Śrí Jain Yašo-Vijaya Series (3)

SIDHAHEM-ŠABDÀNUŠĂSANA

BY

KALIKÁLA-SARVAJÑA-SRI HEMCHANDRÁCHÁRYAVARYA,

With a Short Commentary by the Same Author

and HAIM-DHÁTUPÁTHA &c.

Published by

THE NYÁYA-VIŚÁRADA ŚRÍ YAŚOVIJAYA

BENARES JAIN PÁTHŠÁLÁ

Under The Patronage Of

B. CHUNNÍLÁL THE GIFTED SON OF B. PANNÁ LÁL

RESIDENT OF BOMBAY.

Benares.

PRINTED AT THE CHANDRAPRABHA PRESS.

Vír Era 2431——A. D. 1905.

॥ श्रीः ॥

श्रीहेमचन्द्राचार्यविरचित

सिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनलघुवृत्तिः ।

प्रणम्य परमात्मानं श्रेयःशब्दानुशासनम् ॥
आचार्यहेमचन्द्रेण स्मृत्वा किञ्चित्प्रकाश्यते ॥ १ ॥

अर्हँ । १ । १ । १ ।

अर्हमित्येतदक्षरं परमेश्वरस्य परमेष्ठिनो वाचकम् । मङ्गलार्थं शास्त्रस्यादौ प्रणिदध्महे ॥ १ ॥

सिद्धिः स्याद्वादात् । १ । १ । २ ।

स्याद्वादादनेकान्तवादात् प्रकृतानां शब्दानां सिद्धिर्निष्पत्तिर्ज्ञप्तिश्च वेदितव्या ॥ २ ॥

लोकात् । १ । १ । ३ ।

अनुक्तानांसंज्ञानां न्यायानां च लोकाद्वैयाकरणादेः सिद्धिर्ज्ञप्तिश्च वेदितव्या वर्णसमाम्नायस्य च तत्र ॥ ३ ॥

औदन्ताः स्वराः । १ । १ । ४ ।

औकारावसाना वर्णाः स्वरसंज्ञाः स्युः । अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ ॥ ४ ॥

एकद्वित्रिमात्रा ह्रस्वदीर्घप्लुताः । १ । १ । ५ ।

मात्रा कालविशेषः । एकद्वित्र्युच्चारणमात्रा औदन्ता वर्णा यथासंख्यं

ह्रस्वदीर्घप्लुतसंज्ञाः स्युः। अ इ उ ऋ ऌ। आ ई ऊ ॠ ॡ ए ऐ ओ औ। आ ३ ई ३ ऊ ३ इत्यादि ॥ ५ ॥

अनवर्णा नामी। १। १। ६।

अवर्णवर्ज्या औदन्ता वर्णा नामिसंज्ञाः स्युः। इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ ॥ ६ ॥

ॡदन्ताः समानाः। १। १। ७।

ॡकारावसाना वर्णाः समानाः स्युः। अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ॥ ७ ॥

ए ऐ ओ औ सन्ध्यक्षरम्। १। १। ८।

ए ऐ ओ औ इत्येते सन्ध्यक्षराणि स्युः ॥ ८ ॥

अं अः अनुस्वारविसर्गौ। १। १। ९।

अकारावुच्चारणार्थौ। अं इति नासिक्यो वर्णः। अः इति च कण्ठ्यः। एतौ यथासंख्यमनुस्वारविसर्गौ स्याताम् ॥ ९ ॥

कादिर्व्यञ्जनम्। १। १। १०।

कादिर्वर्णो हपर्यन्तो व्यञ्जनं स्यात्। क ख ग घ ङ। च छ ज झ ञ। ट ठ ड ढ ण। त थ द ध न। प फ ब भ म। य र ल व श ष स ह ॥ १० ॥

अपञ्चमान्तस्थो धुट्। १। १। ११।

वर्गपञ्चमान्तस्थावर्जः कादिर्वर्णो धुट् स्यात् क ख ग घ। च छ ज झ। ट ठ ड ढ। त थ द ध। प फ ब भ। श ष स ह ॥ ११ ॥

पञ्चको वर्गः। १। १। १२।

कादिषु वर्णेषु यो यः पञ्चसंख्यापरिमाणो वर्णः स स वर्गः स्यात्। क ख ग घ ङ। च छ ज झ ञ। ट ठ ड ढ ण। त थ द ध न। प फ ब भ म ॥ १२ ॥

आद्यद्वितीयशषसा अघोषाः। १। १। १३।

वर्गाणामाद्यद्वितीया वर्णाः शषसाश्चाघोषाः स्युः । क ख । च छ । ट ठ । त थ । प फ । श ष स ॥ १३ ॥

अन्यो घोषवान् । १ । १ । १४ ।

अघोषेभ्योऽन्यः कादिर्वर्णो घोषवान् स्यात् । ग घ ङ । ज झ ञ । ड ढ ण । द ध न । ब भ म । य र ल व ह ॥ १४ ॥

यरलवा अन्तस्थाः । १ । १ । १५ ।

एते अन्तस्थाः स्युः ॥ १५ ॥

अंअः ≍क ≍ पशषसाः शिट् । १ । १ । १६ ।

अकपा उच्चारणार्थाः अनुस्वारविसर्गौ वज्रगजकुम्भाकृती च वर्णौ शषसाश्च शिटः स्युः ॥ १६ ॥

तुल्यस्थानास्यप्रयत्नः स्वः । १ । १ । १७ ।

स्थानं कण्ठादि । अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा ॥ जिह्वामूलं च दन्ताश्च नासिकौष्ठौ च तालु च ॥१॥ आस्ये प्रयत्न आस्यप्रयत्नः स्पृष्टतादिः । तुल्यौ वर्णान्तरेण सदृशौ । स्थानास्यप्रयत्नौ यस्य स वर्णस्तंप्रति स्वः स्यात् । तत्र त्रयोऽकारा उदात्तानुदात्तस्वरिताः प्रत्येकं सानुनासिकनिरनुनासिकभेदात् षट् । एवं दीर्घप्लुतावित्यष्टादशभेदा अवर्णस्य । ते सर्वे कण्ठस्थाना विवृतकरणाः परस्परं स्वाः । एवमिवर्णास्तावन्तस्तालव्या विवृतकरणाः स्वाः । उवर्णा ओष्ठ्या विवृतकरणाः स्वाः । ऋवर्णा मूर्द्धन्या विवृतकरणाः परस्परं स्वाः । लृवर्णा दन्त्या विवृतकरणाः परस्परं स्वाः । सन्ध्यक्षराणां ह्रस्वा न सन्तीति । तानि प्रत्येकं द्वादशभेदानि । तत्र एकारास्तालव्या विवृततराः स्वाः । ऐकारास्तालव्याः अतिविवृततराः स्वाः । ओकाराओष्ठ्या विवृततराः स्वाः । औकारा ओष्ठ्या अतिविवृततराः स्वाः । वर्ग्याः पञ्च पञ्च परस्परं स्वाः । यलवानामनुनासिकोननुनासिकश्च द्वौ भेदौ परस्परं स्वौ ॥ १७ ॥

स्यौजसमौशस्टाभ्यांभिस्ङेभ्यांभ्यस्ङसिभ्यांभ्यस्ङसोसाम्ङ्योस्सुपां त्रयीत्रयी प्रथमादिः । १ । १ । १८ ।

स्यादीनां प्रत्ययानां त्रयी त्रयी यथासंख्यं प्रथमा द्वितीया तृतीया चतुर्थी पञ्चमी षष्ठी सप्तमी च स्यात् ॥ १८ ॥

स्त्यादिर्विभक्तिः । १ । १ । १९ ।

स इति च तीति च उत्सृष्टानुबन्धस्य सेस्तिवश्च ग्रहणम् । स्यादयस्तिवादयश्च सुप् स्यामहि पर्यन्ता विभक्तयः स्युः ॥ १९ ॥

तदन्तं पदम् । १ । १ । २० ।

स्याद्यन्तं त्याद्यन्तं च पदं स्यात् । धर्म्मो वः स्वं ददाति नः शास्त्रम् ॥ २० ॥

नाम सिदय्व्यञ्जने । १ । १ । २१ ।

सिति प्रत्यये यवर्ज्ज व्यञ्जनादौ च परे पूर्वं नाम पदं स्यात् । भवदीयः । पयोभ्याम् । अयितिकिम् । वाच्यति ॥ २१ ॥

नं क्ये । १ । १ । २२ ।

क्य इति क्यन् क्यङ् क्यङ्षां ग्रहणम् । नान्तं नाम क्ये परे पदं स्यात् । राजीयति । राजायते । चर्मायति ॥ २२ ॥

न स्तं मत्वर्थे । १ । १ । २३ ।

सान्तं तान्तं च नाम मत्वर्थे परे पदं न स्यात् । यशस्वी । तडित्वान् ॥ २३ ॥

मनुर्नभोऽङ्गिरो वति । १ । १ । २४ ।

एतानि वति परे पदं न स्युः । मनुष्वत् । नभस्वत् । अङ्गिरस्वत् ॥२४॥

वृत्त्यन्तोऽसषे । १ । १ । २५ ।

परार्थाभिधायीसमासादिर्वृत्तिस्तस्या अन्तोऽवसानं पदं न स्यात् । असषे सस्य तु षत्वे पदमेव । परमदिवौ । वहुदण्डिनौ । असष इति किम् । दधिसेक् ॥ २५ ॥

सविशेषणमाख्यातं वाक्यम् । १ । १ । २६ ।

प्रयुज्यमानैरप्रयुज्यमानै र्वा विशेषणैः सहितं प्रयुज्यमानमप्रयुज्यमानं वा आख्यातं वाक्यं स्यात् । धर्म्मो वो रक्षतु । लुनीहि२। पृथुकाँश्चखाद । शीलं ते स्वम् ॥ २६ ॥

अधातुविभक्तिवाक्यमर्थवन्नाम । १ । १ । २७ ।

धातुविभक्त्यन्तवाक्यवर्ज्जमर्थवच्छब्दरूपं नाम स्यात् । वृक्षः । स्वः । धवश्च । अधातुविभक्तिवाक्यमिति किम् । अहन् । वृक्षान् । साधुर्धर्म्मं ब्रूते ॥ २९ ॥

शिघुट् । १ । १ । २८ ।

जस्शसादेशः शिघुट् स्यात् । पद्मानि तिष्ठन्तिपश्य वा ॥ २८ ॥

पुंस्त्रियोः स्यमौजस् । १ । १ । २९ ।

स्यादयः पुंस्त्रीलिङ्गयोर्घुटः स्युः । राजा । राजानौ । राजानः । राजानम् राजानौ । सीमा । सीमानौ । सीमानः । सीमानम् ॥ २९ ॥

स्वरादयोऽव्ययम् । १ । १ । ३० ।

स्वरादयोऽव्ययानि स्युः । स्वर् । अन्तर् । प्रातर् । इत्यादि ॥ ३० ॥

चादयोऽसत्वे । १ । १ । ३१ ।

अद्रव्ये वर्त्तमानाश्चादयो ऽव्ययानि स्युः । वृक्षश्चेत्यादि ॥ ३१ ॥

अधण्तस्वाद्या शसः ।१।१।३२।

धण्वर्ज्यास्तस्वादयः शस्पर्यन्ता ये प्रत्ययास्तदन्तं नामाव्ययं स्यात्। देवा अर्जुनतोऽभवन्। ततः। तत्र। बहुशः। अधणितिकिम्। पाथिद्वैधानि ॥ ३२ ॥

विभक्तिथमन्ततसाद्याभाः।१।१।३३।

विभक्त्यन्ताभा स्थमन्तसानतसादिप्रत्ययान्ताभाश्चाऽव्ययानि स्युः। अहंयुः। अस्तिक्षीरा गौः। कथम्। कुतः ॥ ३३ ॥

वत्तस्याम् ।१।१।३४।

वत्तस्याम्प्रत्ययान्तमव्ययं स्यात्। मुनिवद्वृत्तम्। उरस्तः। उच्चैस्तराम्॥३४॥

क्त्वातुमम् ।१।१।३५।

क्त्वातुमम्प्रत्ययान्तमव्ययं स्यात्। कृत्वा। कर्त्तुं। यावज्जीवमदात्॥३५॥

गतिः ।१।१।३६।

गतिसंज्ञमव्ययं स्यात्। अदः कृत्य। अतः कृकमीत्यादिना रः सो न स्यात् ॥ ३६ ॥

अप्रयोगीत् ।१।१।३७।

इह शास्त्रे उपदिश्यमानो वर्णस्तत्समुदायो वा प्रयोगेऽदृश्यमान इत् स्यात। एधते। यजते। चित्रीयते ॥ ३७ ॥

अनन्तः पञ्चम्याः प्रत्ययः।१।१।३८।

पञ्चम्यर्थाद्विहितोऽन्तशब्दाऽनिर्दिष्टः प्रत्ययः स्यात्। नाम्नः प्रथमैकद्विबहौ। वृक्षः। अनन्तइति किम्। आगमः प्रत्ययो मा भूत् ॥ ३८ ॥

डत्यतु संख्यावत् ।१।१।३९।

डत्यन्तमत्वन्तं च संख्याकार्यभाक् स्यात्। कतिकः। यावत्कः ॥ ३९ ॥

बहुगणं भेदे ।१।१।४०।

बहुगणशब्दौ भेदवृत्ती संख्यावत्स्याताम् । बहुकः । गणकः । भेद इति किम् । वैपुल्ये सङ्घे च माभूत् ॥ ४० ॥

कसमासेऽध्यर्द्धः ।१।१।४१।

अध्यर्द्धशब्दः केप्रत्यये समासे च विधेये संख्यावत् स्यात् । अध्यर्द्धकम् । अध्यर्द्धसूर्प्पम् ॥ ४१ ॥

अर्द्धपूर्वपदः पूरणः ।१।१।४२।

अर्द्धपूर्वपदः पूरणप्रत्ययान्तः केप्रत्यये समासे च कार्ये संख्यावत् स्यात् अर्द्धपञ्चमकम् । अर्द्धपञ्चमसूर्प्पम् ॥ ४२ ॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञ शब्दानुशासनलघुवृत्तौ प्रथमस्याध्यायस्य प्रथमः पादः समाप्तः ॥ १ ॥

समानानां तेन दीर्घः ।१।२।१।

समानानां तेन समानेन परेण सह दीर्घः स्यात् । दण्डाग्रम् । दधीदम् । नदीन्द्रः ॥ १ ॥

ऋऌति ह्रस्वो वा ।१।२।२।

ऋति ऌति च परे समानानां ह्रस्वो वा स्यात । बाल ऋश्यः । ल ऋषभः । होतृ ऌकारः । पक्षे बालर्श्यः ॥ २ ॥

ऌत ॠॡ ऋऌभ्यां वा ।१।२।३।

ऌत ऋता ऌता च सह यथा संख्यं ॠॡ इत्येतौ वा स्याताम् । ऋता ॠकारः । पक्षे ऌ ऋकारः । ऋकारः । ऌता ॡकारः । पक्षे ऌ ऌकार ॡकारः ॥ ३ ॥

ऋतो वा तौ च ।१।२।४।

ऋत ऋलृभ्यां सह यथासंख्यं ॠॡइत्येतौ वा स्यातां तौ च ऋकार-लृकारौ ऋलृभ्यां सह वा स्याताम्। ऋता पितॄषभः। पक्षे पितृ ऋषभः। पितृषभः। लृता। होतॣकारः पक्षे होतृ लृकारः। होतृकारः। तौ च पितृषभः होतॢकारः पक्षपूर्ववत् ॥ ४ ॥

ॠस्तयोः ।१।२।५।

तयोः पूर्वस्थानिनो ऌकारऋकारयोर्यथासंख्यं ऋलृभ्यां सह ॠइति दीर्घः स्यात्। ॠषभः। होतॄकारः ॥ ५ ॥

अवर्णस्येवर्णादिनैदोदरल् ।१।२।६।

अवर्णस्य इ उ ऋ लृ वर्णैः सह यथासंख्यं एत्,ओत् अर् अल् इत्येते स्युः। देवेन्द्रः। तवेहा। मालेयम्। सेक्षते। तवोदकम्। तवोढा। तवर्षिः तवर्कारः। महर्षिः। सर्कारः। तवल्कारः। सल्कारेण ॥ ६ ॥

ऋणे प्रदशार्णवसनकम्बलवत्सरवत्सतर-स्यार् ।१।२।७।

प्रादीनामवर्णस्य ऋणे परे ऋता सह आर् स्यात्। प्रार्णम्। दशार्णम्। ऋणार्णम्। वसनार्णम्। कम्बलार्णम्। वत्सरार्णम् वत्सतरार्णम्॥७॥

ऋते तृतीयासमासे ।१।२।८।

अवर्णस्य ऋते परे तृतीयासमासे। ऋता सह आर् स्यात्। शीतार्त्तः। तृतीयासमास इति किम्। परमर्त्तः। समास इति किम्। दुःखेनर्त्तः॥८॥

ऋत्यारुपसर्गस्य ।१।२।९।

उपसर्गस्थस्यावर्णस्य ऋकारादौ धातौ परे ऋता सह आर् स्यात्। प्रार्च्छति। परार्च्छति ॥ ९ ॥

नाम्नि वा ।१।२।१०।

उपसर्गस्थस्यावर्णस्य ऋकारादौ नामावयवे धातौ परे ऋता सह आर् वा स्यात्। प्रार्षभीयति। प्रर्षभीयति ॥ १० ॥

लृत्याल्वा ।१।२।११।

उपसर्गावर्णस्य लृकारादौ नामावयवे धातौ परे लृता सह आल्वा स्यात्। उपाल्कारीयति । उपल्कारीयति ॥ ११ ॥

ऐदौत् सन्ध्यक्षरैः ।१।२।१२।

अवर्णस्य सन्ध्यक्षरैः परैः सह ऐ औ इत्येतौ स्याताम् । तवैषा। खट्वैषा । तवैन्द्री । सैन्द्री। तवौदनः । तवौपगवः ॥ १२ ॥

ऊटा। १ । २ । १३ ।

अवर्णस्य परेण ऊटा सह औः स्यात् । धौतः। धौतवान् ॥ १३ ॥

प्रस्यैषैष्योढोढ्यूहे स्वरेण ।१।२। १४ ।

प्रावर्णस्य एषादिषु परेषु परेण स्वरेण सह ऐ औ स्याताम्। प्रैषः। प्रैष्यः । प्रौढः । प्रौढिः। प्रौहः ॥ १४ ॥

स्वैरस्वैर्यक्षौहिण्याम् । १ । २ । १५ ।

स्वैरादिष्ववर्णस्य परेण स्वरेण सह ऐ औ स्याताम्। स्वैरः। स्वैरी। अक्षौहिणी सेना ॥ १५ ॥

अनियोगे लुगेवे ।१।२।१६ ।

अनियोगो अनवधारणं तद्विषये एवे परेऽवर्णस्य लुक् स्यात् । इहेव तिष्ठ। अद्येव गच्छ । नियोगेतु । इहैव तिष्ठ मागाः॥ १६ ॥

वौष्ठौतौ समासे ।१। २ । १७ ।

ओष्ठौत्वोः परयोः समासेऽवर्णस्य लुग्वा स्यात्। बिम्बोष्ठी। बिम्बौष्ठी। स्थूलोतुः। स्थूलौतुः। समासइति किम् हे पुत्रौष्ठंपश्य ॥ १७ ॥

ओमाङि। १। २। १८।

अवर्णस्य ओमि आङादेशे च परे लुक् स्यात्। अद्योम्। सोम्। आऊढा। ओढा। अद्योढा। सोढा ॥ १८ ॥

उपसर्गस्यानिणेधेदोति। १। २। १९।

उपसर्गावर्णस्य इणेधिवर्जे एदादावोदादौ च धातौ परे लुक् स्यात्। प्रेलयति। परेलयति। प्रोषति। परोषति। अनिणेधितिकिम्। उपैति। प्रैधते ॥ १९ ॥

वानाम्नि। १। २। २०।

नामावयवे एदादावोदादौ च धातौ परे उपसर्गावर्णस्य लुग् वा स्यात्। उपेकीयति। उपैकीयति। प्रोषधीयति। प्रौषधीयति ॥ २० ॥

इवर्णादेरस्वेस्वरे यवरलम्। १। २। २१।

इ उ ऋ ऌ वर्णानामस्वे स्वरे परे यथासंख्यं य व र ल इत्येते स्युः। दध्यत्र। नद्येषा। मध्वत्र। वध्वासनं। पित्रर्थः। क्रादिः। ॡत्। लाकृतिः ॥ २१ ॥

ह्रस्वोऽपदे वा। १। २। २२।

इवर्णादीनामस्वे स्वरे परे ह्रस्वो वा स्यात्। नचेत्तौ निमित्तनिमित्तिनावेकत्र पदे स्याताम्। नदिएषा। नद्येषा। मधुअत्र। मध्वत्र। अपद इतिकिम्। नद्यौ। नद्यर्थः ॥ २२ ॥

एदैतोऽयाय्। १। २। २३।

एदैतोः स्वरे परे यथासंख्यं अय् आय् इत्येतौ स्याताम्। नयनम्। वृक्षयेव। नायकः। रायैन्द्री ॥ २३ ॥

ओदौतोऽवाव् । १ । २ । २४ ।

ओदौतोः स्वरे परे यथासंख्यं अव् आव् इत्येतौ स्याताम् । लवनम् । पटवोतुः । लावकः । गावौ ॥ २४ ॥

य्यक्ये । १ । २ । २५ ।

ओदौतोः क्यवर्जे यादौ प्रत्यये परे यथासंख्यमव् आवौ स्याताम् । गव्यति । गव्यते । नाव्यति । नाव्यते । लव्यम् । लाव्यम् । अक्य इतिकिम् । उपोयते । औयत ॥ २५ ॥

ऋतो रस्तद्धिते । १ । २ । २६ ।

ऋकारस्य यादौ तद्धिते परे रः स्यात् । पित्र्यम् । तद्धित इतिकिम् । कार्यम् ॥ २६ ॥

एदोतः पदान्तेऽस्य लुक् । १ । २ । २७ ।

एदोद्भ्यां पदान्तस्थाभ्यां परस्याकारस्य लुक् स्यात् । तेऽत्र । पटोऽत्र । पदान्त इतिकिम् । नयनम् ॥ २७ ॥

गोर्नाम्न्यवोऽक्षे । १ । २ । २८ ।

गोरोतः पदान्तस्थस्य अक्षे परे संज्ञायां अव इति स्यात् । गवाक्षः नाम्नीतिकिम् । गोक्षाणि ॥ २८ ॥

स्वरे वाऽनक्षे । १ । २ । २९ ।

गोरोतः पदान्तस्थस्य स्वरे परे अव इति वा स्यात् । सचेतस्वरो ऽक्षस्थो न स्यात् । गवाग्रम् । गोऽग्रम् । गवेशः । गवीशः । अनक्ष इतिकिम् । गोऽक्षम् । ओत इतिकिम् चित्रग्वर्थः ॥ २९ ॥

इन्द्रे । १ । २ । ३० ।

गोरोतः पदान्तस्थस्य इन्द्रस्थेस्वरे परे अव इति स्यात् । गवेन्द्रः ॥३०॥

वात्यऽसन्धिः । १ । २ । ३१ ।

गोरोतः पदान्तस्थस्याकारे परेऽसन्धिभावो वा स्यात् । गोअग्रम् । गवाग्रम् । गोऽग्रम् । अतीतिकिम् । गवेङ्गितम् ॥ ३१ ॥

प्लुतोनितौ । १ । २ । ३२ ।

इतिवर्जे स्वरे परे प्लुतः सन्धिभाग् न स्यात् । देवदत्त ३ अत्रन्वसि । अनिताविति किम् सुश्लोकेति ॥ ३२ ॥

इ ३ वा । १ । २ । ३३ ।

इ स्थानः प्लुतः स्वरे परेऽसन्धिर्वा स्यात् । लुनीहि ३ इति । लुनीहीति ॥ ३३ ॥

ईदूदेद्द्विवचनम् । १ । २ । ३४ ।

ई ऊ ए इत्येवमन्तं द्विवचनान्तं स्वरे परेऽसन्धिः स्यात् । मुनीइह । साधूएतौ । माले इमे । पचेते इति इदूदेदिति किम् वृक्षावत्र । द्विवचनमिति किम् । कुमार्यत्र ॥ ३४ ॥

अदो मुमी । १ । २ । ३५ ।

अदसः सम्बन्धिनौ मुमी इत्येतौ स्वरे परे ऽसन्धी स्याताम् । अमुमुईचा । अमीअश्वाः ॥ ३५ ॥

चादिः स्वरो ऽनाङ् । १ । २ । ३६ ।

आङ्वर्जश्चादिः स्वरः स्वरे परे ऽसन्धिः स्यात् । अअपेहि । इ इन्द्रम् पश्य । उ उत्तिष्ठ । आ एवं किल मन्यसे । आ एवं नुतत् । अनाङिति किम् । आ इहि । एहि ॥ ३६ ॥

ओदन्तः । १ । २ । ३७ ।

ओदन्तश्चादिः स्वरे परेऽसन्धिः स्यात् । अहो अत्र ॥ ३७ ॥

सौ नवेतौ । १ । २ । ३८ ।

सिनिमित्तओदन्त इतौ परेऽसन्धिर्वा स्यात्। पटो इति। पटविति।

ऊँ चोञ् । १ २ । ३९ ।

उञ् चादिरितौ परेऽसन्धिर्वा स्यात् । असन्धौ च उञ्ऊँइति दीर्घोऽनुनासिको वा स्यात् । उ इति । ऊँ इति । विति ॥ ३९ ॥

अञ्वर्गात् स्वरे वोऽसन् । १ । २ । ४० ।

अवर्जं वर्गेभ्यः परः उञ्स्वरे परे वो वा स्यात् सचासन्। कुङ्वास्ते। कुङ्ङुआस्ते। असत्वाद्द्वित्वम् ॥ ४० ॥

अइउ वर्णस्यान्तेऽनुनासिकोऽनीदादेः । १ । २ । ४१ ।

अ इ उ वर्णानामन्तेविरामेऽनुनासिको वा स्यात् । नचेदेते ईदूदेद्विवचनमित्यादि सूत्रसम्बन्धिनः स्युः। सामँ। साम। खट्वाँ। खट्वा। दधिँ। दधि। कुमारीँ। कुमारी। मधुँ। मधु। अनीदादेरिति किम्। अमी। अमी किमु ॥ ४१ ॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञ शब्दानुशासनलघुवृत्तौ प्रथमस्याध्यायस्य द्वितीयपादः समाप्तः ।१।२॥

तृतीयस्य पञ्चमे । १ । ३ । १ ।

वेति पदान्त इति अनुनासिकइति च अनुवर्त्तते। वर्गतृतीयस्य पदान्तस्थस्य पञ्चमे परेऽनुनासिको वा स्यात् । वाङ्मते। वाग्मते। ककुम्मण्डलम्। ककुब्मण्डलम् ॥ १ ॥

प्रत्यये च ।१।३।२।

पदान्तस्थस्य तृतीयस्य प्रत्यये पञ्चमे परेऽनुनासिको नित्यं स्यात्। वाङ्मयम् । षण्णाम् । च उत्तरत्र वा अनुवृत्त्यर्थः ॥ २ ॥

ततो हश्चतुर्थः ।१।३।३।

पदान्तस्थात् ततस्तृतीयात् परस्य हस्य पूर्वसवर्गश्चतुर्थो वा स्यात्। वाग्घीनः । वाग्हीनः । ककुब्भासः । ककुब्हासः ॥ ३ ॥

प्रथमादधुटि शश्छः ॥१।३।४।

पदान्तस्थात् प्रथमात् परस्य शस्याधुटिपरे छो वा स्यात् । वाक्छूरः । वाक्शूरः । त्रिष्टुप्छ्रुतम् । त्रिष्टुप्श्रुतम् । अधुटीतिकिम् वाक्श्च्योतति ॥ ४ ॥

रः कखपफयोः ≍क≈पौ ।१।३।५।

पदान्तस्थस्य रस्य कखे पफे च परे यथासंख्यं ≍क≈पौ वा स्याताम्। क≍करोति । कःकरोति । क≍खनति । कःखनति । क≈पचति । कःपचति । क≈फलति । कःफलति ॥ ५ ॥

शषसे शषसं वा ।१।३।६।

पदान्तस्थस्य रस्य शषसेषु परेषु यथासंख्यं शषसा वा स्युः कश्शेते । कःशेते । कष्षण्ढः । कःषण्ढः । कस्साधुः । कःसाधुः ॥ ६ ॥

चटते सद्वितीये ।१।३।७।

पदान्तस्थस्य रस्य चटतेषु सद्वितीयेषु परेषु यथासंख्यं शषसा नित्यं स्युः । कश्चरः । कश्छन्नः । कष्टः । कष्ठः । कस्तः । कस्थः ॥ ७ ॥

नोऽप्रशानोऽनुस्वारानुनासिकौ च पूर्वस्याधुट्परे ।१।३।८।

पदान्तस्थस्य प्रशान्वर्जं शब्दसम्बन्धिनो नस्य चटतेषु सद्वितीयेषु अधुट्परेषु शषसा यथासंख्यं स्युः। अनुस्वारानुनासिकौ चागमादेशौ पूर्वस्य क्रमेण स्याताम्। भवांश्चरः। भवाँश्चरः। भवांश्छ्यति।भवाँश्छ्यति भवांष्टकः। भवाँष्टकः। भवांष्ठकारः। भवाँष्ठकारः। भवांस्तनुः। भवाँस्तनुः। भवांस्थुडति। भवाँस्थुडति। अप्रशान् इति किम्। प्रशाञ्चरः। अधुट्पर इति किम् भवान्त्सरुकः॥ ८॥

पुमो ऽशिट्यघोषेऽख्यागिरः। १। ३। ९।

पुमितिपुंसः संयोगलुक्यनुकरणं अधुट्परे अघोषे शिट्ख्यागि-वर्जे परे पुमित्येतस्य रः स्यात्। अनुस्वारानुनासिकौ च पूर्वस्य। पुंस्कामा। पुँस्कामा। अशिटीतिकिम्। पुंशिरः। अघोषे इतिकिम्। पुंदासः अख्यागीतिकिम्। पुंख्यातः। अधुट्परइत्येव पुंक्षारः॥ ९॥

नॄनः पेषुवा। १। ३। १०।

नॄनिति शसन्तस्यानुकरणम्। नॄनः पे परे रो वा स्यात्। अनुस्वारानुनासिकौ च पूर्वस्य। नॄं‿पाहि। नॄँ‿पाहि। नॄन्पाहि॥१०॥

द्विः कानः कानिसः। १। ३। ११।

कानः किमः शसन्तस्यानुकरणम्। द्विरुक्तस्य कानि परे सः स्यात्। अनुस्वारानुनासिकौ च पूर्वस्य। कांस्कान् काँस्कान्। द्विरितिकिम्। कान्कान् पश्यति॥ ११॥

स्सटि समः। १। ३। १२।

समः स्सटि परे सः स्यात्। अनुस्वारानुनासिकौ च पूर्वस्य। संस्कर्त्ता। सँस्कर्त्ता। स्सटीतिकिम्। संक्रांतिः॥ १२॥

लुक्। १। ३। १३।

समः स्सटि परे लुक् स्यात्। सस्कर्ता॥ १३॥

तौ मुमोऽव्यंञ्जने स्वौ ।१।३।१४।

मोर्म्वागमस्य पदान्तस्थस्य च मस्य व्यञ्जने परे तस्यैव स्वौ तावनुस्वाराऽनुनासिकौ क्रमेण स्याताम्। चंक्रम्यते। चङ्क्रम्यते। वंवम्यते। वँवँम्यते। त्वंकरोषि। त्वङ्करोषि। कंवः। कँवँः॥ १४॥

मनयवलपरे हे ।१।३।१५।

मनयवलपरे हे पदान्तस्थस्य मस्याऽनुस्वाराऽनुनासिकौ स्वौ क्रमात्स्याताम्। किंह्मलयति। किम्ह्मलयति। किंह्नुते। किन्ह्नुते। किंह्यः। किय्ँह्यः किंह्वलयति। किव्ँह्वलयति। किंह्लादयते। किल्ँह्लादयते॥ १५॥

सम्राट् ।१।३।१६।

समो मस्य राजौ क्विबन्ते ऽनुस्वाराभावः स्यात्। सम्राट्। सम्राजौ॥१६॥

ङ्णोः कटावन्तौ शिटि नवा ।१।३।१७।

पदान्तस्थयो र्ङणयोः शिटिपरे यथासंख्यं कटावन्तौ वा स्याताम्। प्राङ्क्छेते। प्राङ्क्शेते। प्राङ्शेते। सुगण्ट्छेते। सुगण्ट्शेते। सुगण्शेते॥१७॥

ड्नः सः त्सोऽश्चः ।१।३।१८।

पदान्तस्थाभ्यां डनाभ्यां परस्य सस्य त्स इति तादिः सो वा स्यात्। अश्च श्चाऽवयवश्चेत् सो न स्यात्। षड्त्सीदन्ति। षड्सीदन्ति। भवान्त्साधुः। भवान्साधुः। अश्च इति किम् षट्श्च्योतति॥ १८॥

नः शि ञ्च् ।१।३।१९।

पदान्तस्थस्य नस्य शे परे ञ्च् वा स्यात्। अश्चः भवाञ्च्छूरः। भवाञ्च्शूरः। भवाञ्शूरः। अश्च इत्येव। भवाञ्श्च्योतति॥ १९॥

अतोऽति रोरुः ।१।३।२०।

आत्परस्य पदान्तस्थस्य रो रति परे उर्नित्यं स्यात्। कोऽर्थः॥ २०॥

घोषवति । १ । ३ । २१ ।

आत्परस्य पदान्तस्थस्य रोर्घोषवति परे उः स्यात् । धर्म्मोजेता ॥२१॥

अवर्णभोभगोऽघोर्लुगसन्धिः । १ । ३ । २२ ।

अवर्णाद्भोभगोअघोभ्यश्च परस्य पदान्तस्थस्य रोर्घोषवति परे लुक् स्यात् । सच न सन्धिहेतुः । देवायान्ति । भोयासि । भगोहस । अघोवद ॥ २२ ॥

व्योः । १ । ३ । २३ ।

अवर्णात्परयोः पदान्तस्थयोर्वययोर्घोषवति परे लुक् स्यात् । सचासन्धिः वृक्षवृश्चमव्ययश्चाचक्षाणोवृक्षव् । अव्यय् । वृक्षयाति । अव्ययाति ॥ २३ ॥

स्वरे वा । १ । ३ । २४ ।

अवर्णभोभगोअघोभ्यः परयोः पदान्तस्थयोर्वययोः स्वरे परे लुग्वा स्यात् । सचासन्धिः । पटइह । पटविह । वृक्षाइह । वृक्षाविह । तआहुः तयाहुः । तस्माइदम् । तस्मायिदम् । भोअत्र । भोयत्र । भगोअत्र । भगोयत्र । अघोअत्र । अघोयत्र ॥ २४ ॥

अस्पष्टाववर्णात्त्वनुञि वा । १ । ३ । २५ ।

अवर्णभोभगोअघोभ्यः परयोः पदान्तस्थयोर्वययोरस्पष्टावीषत्स्पृष्टतरौ वयौ स्वरे परे स्याताम् । अवर्णात्तु परयोर्व्योरुञ्वर्ज्जे स्वरेऽस्पष्टौ वा स्याताम् । पटवु । असावु । कयु । देवायु । भोयत्र । भगोयत्र । अघोयत्र । अवर्णात्त्वनुञिवा । पटविह २ । असाविन्दुः २ । तयिह २ । तस्मायिदम् २ ॥ २५ ॥

रोर्यः । १ । ३ । २६ ।

अवर्णभोभगोअघोभ्यः परस्य पदान्तस्थस्य रोः स्वरे परे यः स्यात्। कयास्ते । देवायासते । भोयत्र । भगोयत्र । अघोयत्र ॥ २६ ॥

ह्रस्वाद्ङ्णनो द्वे । १ । ३ । २७ ।

ह्रस्वात्परेषां पदान्तस्थानाम् ङणनानाम् स्वरे परे द्विरूपे स्याताम् । कुङ्ङास्ते । सुगण्णिह । कृषन्नास्ते ॥ २७ ॥

अनाङ्माङो दीर्घाद्वाच्छः । १ । ३ । २८ ।

आङ् माङ् वर्ज दीर्घात्पदान्तस्थात्परस्य छस्य द्विरूपे वा स्याताम् । कन्याच्छत्रम् । कन्याछत्रम् । अनाङ्माङितिकिम् । आच्छाया । माच्छिदत् ॥ २८ ॥

प्लुताद्वा । १ । ३ । २९ ।

पदान्तस्थादीर्घात्प्लुतात्परस्य छस्य द्वे रूपे वा स्याताम् । आगच्छ भो इन्द्रभूते ३ च्छत्रमानय । पक्षे छत्रमानय ॥ २९ ॥

स्वरेभ्यः । १ । ३ । ३० ।

स्वरात्परस्य छस्य द्वे रूपे स्याताम् । इच्छति । गच्छति ॥ ३०॥

र्हाद्हस्वरस्यानु नवा । १ । ३ । ३१ ।

स्वरात्पराभ्याम् रहाभ्यां परस्य रहस्वरवर्जस्य वर्णस्य द्वे रूपे वा स्याताम् । अनुकार्यान्तरात्पश्चात् । अर्क्कः । अर्कः । ब्रह्म । ब्रह्म । अर्हस्वरस्येतिकिम् । पद्मह्रदः । अर्हः । करः । स्वरेभ्य इत्येव । अभ्र्यते । अन्विति किम् । प्रोर्ण्णुनाव ॥ ३१ ॥

अदीर्घाद्विरामैकव्यञ्जने । १ । ३ । ३२ ।

अदीर्घात्स्वरात्परस्य रहस्वरवर्जस्य वर्णस्य विरामे असंयुक्तव्यञ्जने च परेऽनु द्विरूपे वा स्याताम् । त्वक्क् । त्वक् । दद्ध्यत्र । दध्यत्र । गोश्श्रात । गोश्रात । अर्हस्वरस्येत्येव । वर्या । वह्यं । तितउः ॥ ३२॥

अञ्वर्गस्यान्तस्थातः । १ । ३ । ३३ ।

अन्तस्थातः परस्य ञ्वर्जवर्गस्य अनु द्वे रूपे वा स्याताम् । उल्का-उल्का । अञितिकिम् । हल्ञौ ॥ ३३ ॥

ततोऽस्याः । १ । ३ । ३४ ।

ततोऽञ्वर्गात्परस्या अस्या अन्तस्थायाद्वे रूपे वा स्याताम् । दध्य्यत्र । दध्यत्र ॥ ३४ ॥

शिटः प्रथमद्वितीयस्य । १ । ३ । ३५ ।

शिटः परयोः प्रथमद्वितीययोर्द्वे रूपे वा स्याताम् । त्वंकरोषि । त्वंकरोषि । त्वंक्खनसि । त्वंखनसि ॥ ३५ ॥

ततः शिटः । १ । ३ । ३६ ।

ततः प्रथमद्वितीयाभ्यां परस्य शिटो द्वे रूपे वा स्याताम् । तच्श्शेते । तच्शेते ॥ ३६ ॥

न रात्स्वरे । १ । ३ । ३७ ।

रात्परस्य शिटः स्वरे परे द्वे रूपे न स्याताम् । दर्शनम् ॥ ३७ ॥

पुत्रस्यादिन् पुत्रादिन्याक्रोशे । १ । ३ । ३८ ।

आदिनि पुत्रादिनि च परे पुत्रस्थस्य तस्य आक्रोश विषये द्वे रूपे न स्याताम् । पुत्रादिनी त्वमसिपापे पुत्रपुत्रादिनी भव । आक्रोश इतिकिम् पुत्त्रादिनी शिशुमारी । पुत्रादिनीतिवा । पुत्रपुत्त्रादिनी नागी पुत्रपुत्रादिनीति वा ॥ ३८ ॥

म्नां धुड्वर्गेऽन्त्योऽपदान्ते । १ । ३ । ३९ ।

अपदान्तस्थानाम् मनानाम् धुटि वर्गे परे निमित्तस्यैवान्त्यो

ऽनुस्यात् । गन्ता । शङ्किता । कम्पिता । धुडितिकिम् । आहन्महे । धुड्वर्गइतिकिम् । गम्यते । अपदान्त इतिकिम् । भवान्करोति ॥ ३९ ॥

शिड्हेऽनुस्वारः । १ । ३ । ४० ।

अपदान्तस्थानाम्म्नाम् शिटि हे च परेऽनुस्वारोऽनु स्यात् । पुंसि । दंशः । बृंहणम् ॥ ४० ॥

रोरेलुग्दीर्घश्चादिदुतः । १ । ३ । ४१ ।

रस्य रे परेऽनुलुक् स्यात् । अइऊनाञ्चदीर्घः । पुनारात्रिः । अग्नीरथेन । पटूराजा । अनुइत्येव । अहोरूपम् ॥ ४१ ॥

ढस्तड्ढे । १ । ३ । ४२ ।

तन्निमित्ते ढे परे ढस्यानु लुक् स्यात् । दीर्घश्चादिदुतः । माढि । लीढम् । गूढम् । तड्ढ इतिकिम् । मधुलिड्ढौकते ॥ ४२ ॥

सहिवहेरोच्चाऽवर्णस्य । १ । ३ । ४३ ।

सहिवह्योर्ढस्य तड्ढे परेऽनुलुक् स्यात् । ओच्चाऽवर्णस्य । सोढा वोढा । उदवोढाम् ॥ ४३ ॥

उदः स्था स्तम्भः सः । १ । ३ । ४४ ।

उदः परयोः स्थास्तम्भोः सस्य लुक् स्यात् । उत्थाता । उत्तम्भिता ॥ ४४ ॥

तदः सेः स्वरे पादार्था । १ । ३ । ४५ ।

तदः परस्य सेः स्वरे परे लुक् स्यात् । साचेत्पादपूरणी स्यात् । सैषदाशरथीरामः सैषराजायुधिष्ठिरः पादार्था इति किम् । सएषभरतोराजा ॥ ४५ ॥

एतदश्च व्यञ्जनेऽनग्नञ्समासे। १ । ३ । ४६ ।

एतदस्तदश्च परस्य सेर्व्यञ्जने परे लुक् स्यात् । अकिनञ्समासे न । एषदत्ते । सलाति । अनग्नञ्समास इतिकिम् । एषकःकृती । सकोयाति । अनेषोयाति । असोवाति ॥ ४६ ॥

व्यञ्जनात्पञ्चमान्तस्थायाः सरूपे वा । १ । ३ । ४७ ।

व्यञ्जनान्तात्परस्य पञ्चमान्तस्थायाश्च सरूपे वर्णे परे लुग् वा स्यात् । कुञ्चाङौ । कुङौ । कुङ्ङौ । आदित्योदेवतास्य । आदित्यः । आदित्य्यः । सरूप इति किम् । वर्ण्यते ॥ ४७ ॥

धुटो धुटि स्वे वा । १ । ३ । ४८ ।

व्यञ्जनात्परस्य धुटो धुटि स्वेपरे लुग्वा स्यात् । शिण्ढि शिण्ड्ढि । स्व इतिकिम् । तर्प्ता । दर्प्ता ॥ ४८ ॥

तृतीयस्तृतीयचतुर्थे । १ । ३ । ४९ ।

तृतीये चतुर्थे च परे धुटस्तृतीयः स्यात् । मज्जति । दोग्धा ॥ ४९ ॥

अघोषे प्रथमोऽशिटः । १ । ३ । ५० ।

अघोषे परे शिट् वर्जस्य धुटः प्रथमः स्यात् । वाक्पूता । अशिट इति किम् । पयस्सु ॥ ५० ॥

विरामे वा । १ । ३ । ५१ ।

विरामस्थस्याऽशिटोधुटः प्रथमो वा स्यात् । वाक् । वाग् ॥ ५१ ॥

न सन्धिः । १ । ३ । ५२ ।

उक्तो वक्ष्यमाणश्च सन्धिर्विरामे न स्यात् । दधि अत्र । तङ् लुनाति ॥ ५२ ॥

रः पदान्ते विसर्गस्तयोः । १ । ३ । ५३ ।

पदान्तस्थस्य रस्य तयोर्विरामाघोषयोर्विसर्गः स्यात् । वृक्षः । स्वः । कः कृती । पदान्त इति किम् । इर्त्तं ॥ ५३ ॥

ख्यागि । १ । ३ । ५४ ।

पदान्तस्थस्य रस्य ख्यागि परे विसर्गएव स्यात् । कः ख्यातः । नमः ख्यात्रे ॥ ५४ ॥

शिट्यघोषात् । १ । ३ । ५५ ।

अघोषात्परे शिटि परतः पदान्तस्थस्य रस्य विसर्गएव स्यात् । पुरुषः त्सरुकः । सर्पिः प्साति । वासः क्षौमम् । अद्भिः प्सातम् ॥ ५५॥

व्यत्यये लुग्वा । १ । ३ । ५६ ।

शिटः परोऽघोष इतिव्यत्ययस्तस्मिन्सति पदान्तस्थस्य रस्य लुग्वा स्यात् । चक्षुश्च्योतति । चक्षुःश्च्योतति ॥ ५६ ॥

अरोः सुपि रः । १ । ३ । ५७ ।

रोरन्यस्य रस्य सुपि परे र एव स्यात् । गीर्षु । धूर्षु । अरोरिति किम् । पयस्सु ॥ ५७ ॥

वाहर्पत्यादयः । १ । ३ । ५८ ।

अहर्पत्यादयो यथायोगमकृतविसर्गाः कृतोत्वाभावाश्च वा स्युः । अहर्पतिः । अहःपतिः । गीर्पतिः । गीःपतिः । प्रचेताराजन् । प्रचेतोराजन् ॥ ५८ ॥

शिट्याद्यस्य द्वितीयो वा । १ । ३ । ५९ ।

प्रथमस्य शिटि परे द्वितीयो वा स्यात। ख्षीरम्। क्षीरम्। अफ्सराः अप्सराः॥ ५९॥

तवर्गस्य श्चवर्गष्टवर्गाभ्यां योगे चटवर्गौ।१।३।६०।

तवर्गस्य शचवर्गाभ्यां षटवर्गाभ्यां च योगे यथासंख्यं चवर्गटवर्गौ स्याताम्। तच्शेते। भवाञ्शेते। तच्चारु। तज्जकारेण। पेष्टा। पूष्णः तट्टकारः। तण्णकारेण। ईट्टे॥ ६०॥

सस्य शषौ।१।३।६१।

सस्य श्चवर्गष्टवर्गाभ्यां योगे यथासंख्यं शषौ स्याताम्। चवर्गेण। श्च्योतति। वृश्चति। षेण। दोष्षु। टवर्गेण। पापट्षि॥ ६१॥

न शात्।१।३।६२।

शात्परस्य तवर्गस्य चवर्गो न स्यात्। अश्नाति। प्रश्नः॥ ६२॥

पदान्ताट्टवर्गादनाम्नगरीनवतेः।१।३।६३।

पदान्तस्थाट्टवर्गात्परस्य नाम्नगरीनवतिवर्जस्य तवर्गस्य सस्य च टवर्गषौ न स्याताम्। षण्नयं। षण्नयाः। षट्सु। अनाम्नगरीनवतेरिति किम्। षण्णाम्। षण्णगरी। षण्णवतिः॥ ६३॥

षि तवर्गस्य।१।३।६४।

पदान्तस्थस्य तवर्गस्य षे परे टवर्गो न स्यात्। तीर्थकृत्षोडशः शान्तिः॥ ६४॥

लि लौ।१।३।६५।

पदान्तस्थस्य तवर्गस्य ले परे लौ स्याताम् । तल्लूनम् । भवाल्लूँनाति ॥ ६५ ॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञ शब्दानुशासनलघुवृत्तौ प्रथमस्याध्यायस्य तृतीयपादः समाप्तः ।१।३॥

अत आः स्यादौ जस्भ्याम्ये ।१।४।१।

स्यादौ जसि भ्यामि ये च परेऽकारस्य आः स्यात् । देवाः । आभ्याम् । सुखाय । स्यादाविति किम् । बाणान् जस्यतीति क्विप् । बाणजः ॥ १ ॥

भिस ऐस् ।१।४।२।

आत्परस्य स्यादेर्भिस ऐस् स्यात् । देवैः । ऐस्करणादतिजरसैः ॥

इदमदसोऽक्येव ।१।४।३।

इदमदसोरक्येवसति आत्परस्य भिस ऐस् स्यात् । इमकैः । अमुकैः । अक्येवेति किम् एभिः । अमीभिः ॥ ३ ॥

एद्बहुस्भोसि ।१।४।४।

बह्वर्थे स्यादौ सादौ भादौ ओसिच परे अत एत्स्यात् । एषु । एभिः । देवयोः ॥ ४ ॥

टाङसोरिनस्यौ ।१।४।५।

आत्परयोष्टाङसोर्यथासंख्यं इन स्यौ स्याताम् । तेन । यस्य ॥५॥

ङेङस्योर्यातौ ।१।४।६।

आत्परस्य ङेङसेश्च यथासंख्यं य आच्च स्याताम् । देवाय । देवात् ॥ ६ ॥

सर्वादेः स्मैस्मातौ । १।४। ७।

सर्वादेरदन्तस्य सम्बन्धिनो ङेङस्योर्यथासंख्यं स्मैस्मातौ स्याताम् । सर्वस्मै । सर्वस्मात् । सर्व विश्व उभ उभयट् अन्य अन्यतर इतर डतर डतम त्व त्वत् नेम । समसिमौसर्वार्थौ । पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायाम् । स्वमज्ञातिधनाख्यायाम् । अन्तरम्बहिर्योगोपसंव्यानयोरपुरि । त्यद् तद् यद् अदस् इदम् एतद् एक द्वि युष्मद् अस्मद् भवतु किम् इत्यसंज्ञायाम् सर्वादिः ॥ ७ ॥

ङेः स्मिन् । १ । ४। ८।

सर्वादेरदन्तस्य ङेः स्मिन् स्यात् । सर्वस्मिन् ॥ ८ ॥

जस इः । १। ४। ९।

सर्व्वादेरदन्तस्य जस इः स्यात् । सर्वे ॥ ९॥

नेमार्द्धप्रथमचरमतयायाल्पकतिपयस्य वा १ । ४ । १० ।

नेमादीनि नामानि तयायौ प्रत्ययौ तेषामदन्तानां जस इर्वा स्यात् । नेमे नेमाः । अर्द्धे अर्द्धाः । प्रथमे प्रथमाः । चरमे चरमाः । द्वितये द्वितयाः । त्रये त्रयाः । अल्पे अल्पाः । कतिपये कतिपयाः ॥ १० ॥

द्वन्द्वे वा । १ । ४ । ११ ।

द्वन्द्वसमासस्थस्यादन्तस्य सर्वादेर्जस इर्वा स्यात् । पूर्व्वोत्तरे । पूर्व्वोत्तराः ॥ ११ ॥

न सर्वादिः । १ । ४ । १२ ।

द्वन्द्वे सर्वादिः सर्वादिर्न स्यात् । पूर्वापराय । पूर्वापरात् । पूर्वापरे । कतरकतमानाम् । कतरकतमकाः ॥ १२ ॥

तृतीयान्तात् पूर्वावरंयोगे । १ । ४ । १३ ।

तृतीयान्तात्परौ पूर्वावरौ योगे सम्बन्धेसति सर्वादी न स्याताम्। मासेनपूर्वाय मासपूर्वाय । दिनेनावराय दिनावराय । दिनेनावराः दिनावराः । तृतीयान्तादितिकिम् । पूर्वस्मै मासेन ॥ १३ ॥

तीयं ङित्कार्ये वा । १ । ४ । १४ ।

तीयान्तम् नाम ङेङसि ङस् ङीनां कार्ये सर्वादिर्वा स्यात् । द्वितीयस्मै द्वितीयाय । द्वितीयस्यै द्वितीयायै । ङित्कार्यइतिकिम् । द्वितीयकाय ॥ १४ ॥

अवर्णस्यामः साम् । १ । ४ । १५ ।

अवर्णान्तस्य सर्वादेरामः साम् स्यात् । सर्वेषाम् । विश्वासाम्॥१५॥

नवभ्यः पूर्वेभ्य इस्मात्स्मिन्वा ।१।४।१६।

पूर्वादिभ्यो नवभ्यो ये इस्मात्स्मिनो यथास्थानमुक्तास्ते वा स्युः । पूर्वे पूर्वाः । पूर्वस्मात् पूर्वात् । पूर्वस्मिन् पूर्वे । इत्यादि । नवभ्यइति किम् त्ये ॥ १६ ॥

आपोङितां यै यास् यास् याम् ।१।४।१७।

आबन्तस्य ङिताम् ङेङसिङस्ङीनां यथासंख्यम् यै यास् यास् यामः स्युः । खट्वायै । खट्वायाः । खट्वायाः । खट्वायाम् ॥१७॥

सर्व्वादेर्डस्पूर्व्वाः । १ । ४ । १८ ।

सर्व्वादेराबन्तस्य ङिताम् यै यास् यास् यामस्ते डस्पूर्वाः स्युः । सर्वस्यै । सर्वस्याः । सर्व्वस्याः । सर्व्वस्याम् ॥ १८ ॥

टौस्येत् । १ । ४ । १९ ।

आबन्तस्य टौसोः परयोरेकारः स्यात् । बहुराजया । बहुराजयोः ॥ १९ ॥

औता। १। ४।२०।

आबन्तस्य औता सहैकारः स्यात्। मालेस्तः पश्य वा॥ २०॥

इदुतोऽस्त्रेरीदूत्। १। ४। २१।

स्त्रेरन्यस्येदन्तस्योदन्तस्य च औता सह यथासंख्यम्। ईदूतौ स्याताम्। मुनी। साधू। अस्त्रेरिति किम्। अतिस्त्रियौ नरौ॥२१॥

जस्येदोत्। १। ४। २२।

इदुदन्तयोर्जसि परे यथासंख्यमेदोतौ स्याताम्। मुनयः। साधवः॥ २२॥

ङित्यदिति। १। ४। २३।

अदिति ङिति स्यादौ परे इदुदन्तयोर्यथासंख्यमेदोतौ स्याताम्। अतिस्त्रये। साधवे। अतिस्त्रेः साधोरागतम् स्वम् वा। अदितीतिकिम्। बुद्ध्याः। धेन्वाः। स्यादावित्येव शुची स्त्री॥२३॥

टः पुंसि ना। १। ४। २४।

इदुदन्तात्परस्याः पुंविषयायाष्टाया ना स्यात्। अतिस्त्रिणा। अमुना। पुंसीतिकिम्। बुद्ध्या॥ २४॥

ङिडौँ। १। ४। २५।

इदुदन्तात्परोङिर्डौः स्यात्। मुनौ। धेनौ। अदिदित्येव। बुद्ध्याम्॥ २५॥

केवलसखिपतेरौ। १। ४। २६।

केवलसखिपतिभ्यामिदन्ताभ्याम् परो ङिरौः स्यात्। सख्यौ। पत्यौ। इत इत्येव। सखायमिच्छति। पतिमिच्छति। सख्यि। पत्यि। केवलेतिकिम्। प्रियसखौ। नरपतौ॥ २६॥

न ना ङिदेत् । १ । ४ । २७ ।

केवलसखिपतेर्यष्टाया ना ङितिपरे एचोक्तः स न स्यात् । सख्या । पत्या । सख्ये । पत्ये । सख्युः पत्युः आगतम् स्वम् वा । सख्यौ । पत्यौ । ङिदितिकिम् । पतयः ॥ २७ ॥

स्त्रियां ङितां वा दै दास् दास् दाम् ।१।४।२८।

स्त्रीलिङ्गादिदुदन्तात्परेषाम् ङिताम् ङे ङसि ङस् ङीनाम् यथा संख्यम् दै दास् दास् दामो वा स्युः । बुद्ध्यै बुद्धये । बुद्ध्याः बुद्धेः आगतम् स्वम् वा । बुद्ध्याम् बुद्धौ । धेन्वै धेनवे । धेन्वाः धेनोः । धेन्वाम् धेनौ । प्रियबुद्ध्यै प्रियबुद्धये । पुंसे स्त्रियै वा ॥ २८ ॥

स्त्रीदूतः । १ । ४ । २९ ।

नित्यम् स्त्रीलिङ्गादीदूदन्ताच्च परेषाम् स्यादेर्ङिताम् यथा संख्यम् । दै दास् दास् दामः स्युः । नद्यै । नद्याः । नद्याः । नद्याम् । कुर्व्यै । कुर्व्याः । कुर्व्याः । कुर्व्याम् । अतिलक्ष्म्यै पुंसे स्त्रियै वा । स्त्रीतिकिम् । ग्रामण्ये । खलप्वे पुंसे स्त्रियै ॥ २९ ॥

वेयुवोऽस्त्रियाः । १ । ४ । ३० ।

इयुवस्थानिनौ यौ स्त्रीदूतौ तदन्तात् स्त्रीवर्ज्जात्परेषाम् स्यादेर्ङिताम् यथासंख्यम् दै दास् दास् दामो वा स्युः । श्रियै श्रिये । श्रियाः श्रियः २ । श्रियाम् श्रियि । अतिश्रियै अतिश्रिये । पुंसे स्त्रियै वा । भ्रुवै भ्रुवे । भ्रुवाः भ्रुवः । भ्रुवाः भ्रुवः । भ्रुवाम् भ्रुवि । अतिभ्रुवै अतिभ्रुवे । पुंसे स्त्रियै वा । इयुव इतिकिम् । आध्यै । अस्त्रिया इति किम् । स्त्रियै ॥ ३० ॥

आमो नाम्वा । १ । ४ । ३१ ।

इयुवोः स्थानिभ्यां स्त्रीदूदन्ताभ्याम् परस्य आमो नाम् वा स्यात् ।

नतुस्त्रियाः । श्रीणाम् श्रियाम् । भ्रूणाम् भ्रुवाम् । अतिश्रीणाम् अतिश्रियाम् । अतिभ्रूणाम् अतिभ्रुवाम् । नृणाम् स्त्रीणाम् वा । इयुवइत्येव । प्रधीनाम् ॥ ३१ ॥

ह्रस्वापश्च । १ । ४ । ३२ ।

ह्रस्वान्तादाबन्तात् स्त्रीदूदन्ताच्च परस्यामो नाम् स्यात् । देवानाम् । मालानाम् । स्त्रीणाम् । वधूनाम् ॥ ३२ ॥

संख्यानां र्ष्णाम् । १ । ४ । ३३ ।

रषनान्तानाम् संख्यावाचिनामामो नाम् स्यात् । चतुर्णाम् । षण्णाम् । पञ्चानाम् । अष्टानाम् ॥ ३३ ॥

त्रेस्त्रयः । १ । ४ । ३४ ।

आमः सम्बन्धिनस्त्रेस्त्रयः स्यात् । त्रयाणाम् । परमत्रयाणाम् ॥ ३४ ॥

एदोद्भ्यां ङसिङसो रः । १ । ४ । ३५ ।

एदोद्भ्याम् परयोः प्रत्येकम् ङसिङसो रः स्यात् । मुनेः । मुनेः । धेनोः । धेनोः । गोः । गोः । द्योः । द्योः ॥ ३५ ॥

खितिखीतीय उर् । १ । ४ । ३६ ।

खिति खीतीसम्बन्धिनो यात्परयोर्ङसिङसोरुर् स्यात् । सख्युः । सख्युः । पत्युः । पत्युः । सखायम् पतिं चेच्छतः सख्युः २ पत्युः २ । य इति किम् । अतिसखेः । अधिपतेः ॥ ३६ ॥

ऋतो डुर् । १ । ४ । ३७ ।

ऋतः परयोः ङसिङसोर्डुर् स्यात् । पितुः । पितुः ॥ ३७ ॥

तृ स्वसृ नप्तृ नेष्टृ त्वष्टृ क्षत्तृ होतृ पोतृ प्रशास्त्रो घुट्यार् । १ । ४ । ३८ ।

तृच् तृन्नन्तस्य स्वस्रादीनां च ऋतो घुटि परे आर् स्यात् । कर्त्तारम् । कर्त्तारौ२। कर्त्तारः । स्वसारम् । नप्तारम् । नेष्टारम् । त्वष्टारम् । क्षत्तारम् । होतारम् । पोतारम् । प्रशास्तारम् । घुटीतिकिम् । कर्तृ कुलम् पश्य ॥३८॥

अर्डौ च । १ । ४ । ३९ ।

ऋतो ङौ घुटि च परे अर् स्यात् । नरि । नरम् ॥ ३९ ॥

मातुर्मातः पुत्रेऽर्हे सिनाऽऽमन्त्र्ये। १।४।४०।

मातुरामन्त्र्ये पुत्रे वर्त्तमानस्य सिना सह मातः स्यात् । अर्हे प्रशंसायाम् । हे गार्गीमात । पुत्रइतिकिम् । हेमातः हेगार्गीमातृके वत्से । अर्हइतिकिम् । अरेगार्गीमातृक ॥ ४० ॥

ह्रस्वस्य गुणः । १ । ४ । ४१ ।

आमन्त्र्यार्थवृत्तेर्ह्रस्वान्तस्य सिना सह गुणः स्यात् । हे पितः । हेमुने ॥ ४१ ॥

एदापः । १ । ४ । ४२ ।

आमन्त्र्यार्थवृत्तेराबन्तस्य सिनासहैकारः स्यात् । हेमाले । हेबहुराजे ॥ ४२ ॥

नित्य दिद्द्विस्वराम्बार्थस्य ह्रस्वः।१।४।४३।

नित्यम् दिद्दै दास् दास् दामादेशा येभ्यस्तेषाम् द्विस्वराम्बार्थानाम् चाबन्तानामामन्त्र्यवृत्तीनाम् सिना सह ह्रस्वः स्यात् । हेस्त्रि । हेलक्ष्मि । हेश्वश्रु । हेवधु । हेअम्ब । हेअक । नित्यदिदितिकिम् । हेहूहूः । द्विस्वरेति किम् । हेअम्बाडे । आप इत्येव । हेमातः ॥ ४३ ॥

अदेतः स्यमोर्लुक् ।१।४।४४।

अदन्तादेदन्ताच्च आमन्त्र्यवृत्तेः परस्य सेरमश्च लुक् स्यात् । हेदेव । हेउपकुम्भ । हेअतिहे ॥ ४४ ॥

दीर्घङ्याब्व्यञ्जनात्सेः ।१।४।४५।

दीर्घङ्याबन्ताभ्याम् व्यञ्जनाच्च परस्य सेर्लुक् स्यात्। नदी। माला। राजा। दीर्घेतिकिम्। निष्कौशाम्बिः। अतिखट्वः॥ ४५॥

समानादमोऽतः । १ । ४ । ४६ ।

समानात्परस्यामोऽस्य लुक् स्यात्। देवम्। मालाम्। मुनिम्। नदीम्। साधुम्। वधूम्॥ ४६॥

दीर्घो नाम्यतिसृचतसृषृः ।१।४। ४७।

तिसृ चतसृ षरान्त वर्जस्य समानस्य नामि परे दीर्घः स्यात्। वनानाम्। मुनीनाम् साधूनाम्। पितॄणाम्। अतिसृचतसृषृ इतिकिम्। तिसृणाम्। चतसृणाम्। षण्णाम्। चतुर्णाम्॥ ४७॥

नुर्वा ।१।४।४८।

नुः समानस्य नामि परे दीर्घो वा स्यात्। नृणाम्। नॄणाम्॥४८॥

शसोऽता सश्च नः पुंसि ।१।४।४९।

शसोऽता सह पूर्वसमानस्य दीर्घः स्यात्। तत्सन्नियोगे च पुंसि शसः सो नः। देवान्। मुनीन्। वातप्रमीन्। साधून्। हूहून्। पितॄन्। पुंसीतिकिम्। शालाः॥ ४९॥

संख्यासायवेरह्नस्याहन् ङौ वा ।१।४।५०।

संख्यावाचिभ्यः सायविभ्याम् च परस्याह्नस्य ङौ परेऽहन्वा स्यात्। द्व्यहनि द्व्यह्नि द्व्यह्ने। सायाहनि सायाह्नि सायाह्ने। व्यहनि व्यह्नि। व्यह्ने॥ ५०॥

निय आम् ।१।४।५१।

नियः परस्य ङेराम् स्यात्। नियाम्। ग्रामण्याम्॥ ५१॥

वाष्टन आः स्यादौ ।१।४।५२।

अष्टनः स्यादौ परे आ वा स्यात् । अष्टाभिः अष्टभिः । प्रियाष्टाः प्रियाष्टा ॥ ५२ ॥

अष्टऔर्जस्शसोः ।१।४।५३।

अष्टनः कृतात्वस्य जस्शसोरौः स्यात् । अष्टौ । अष्टौ ॥ ५३ ॥

डति ष्णः संख्याया लुप् ।१।४।५४।

डति षनान्तानाम् संख्यानाम् जस्शसोर्लुप् स्यात् । कति । कति । षट् । षट् । पञ्च । पञ्च ॥ ५४ ॥

नपुंसकस्य शिः ।१।४।५५।

नपुंसकस्य जस्शसोः शिः स्यात् । कुण्डानि । पयांसि ॥ ५५ ॥

औरीः ।१।४।५६।

नपुंसकस्य औरीः स्यात् । कुण्डे । पयसी ॥ ५६ ॥

अतः स्यमोऽम् ।१।४।५७।

अदन्तस्य नपुंसकस्य स्यमोरम् स्यात् । कुण्डम् । हे कुण्ड ॥ ५७॥

पञ्चतोऽन्यादेरनेकतरस्य दः ।१।४।५८।

पञ्चपरिमाणस्य नपुंसकस्यान्यादेः स्यमोर्दः स्यात् । एकतरवर्जम् । अन्यत् । अन्यतरत् । इतरत् । कतरत् । कतमत् । अनेकतरस्येति किम् । एकतरम् ॥ ५८ ॥

अनतो लुप् ।१।४।५९।

अनकारान्तस्य नपुंसकस्य स्यमोर्लुप् स्यात् । कर्तृ । पयः ॥ ५९ ॥

जरसो वा ।१।४।६०।

जरसन्तस्य नपुंसकस्य स्यमोर्लुग्वा स्यात् । अतिजरः । अतिजरसम् ॥ ६० ॥

नामिनो लुग्वा ।१।४।६१।

नाम्यन्तस्य नपुंसकस्य स्यमोर्लुग्वा स्यात् । हेवारे हेवारि । प्रियतिसृ । प्रियत्रि कुलम् ॥ ६१ ॥

वान्यतः पुमांष्टादौ स्वरे ।१।४।६२।

अन्यतो विशेष्यवशान्नपुंसको नाम्यन्तष्टादौ स्वरे परे पुंवद्वा स्यात् । ग्रामण्या ग्रामणिना कुलेन । कर्त्रोः कर्तृणोः कुलयोः । अन्यत इति किम् । पीलुने फलाय । टादाविति किम् । शुचिनी कुले । नपुंसक इत्येव । कल्याण्यै स्त्रियै ॥ ६२ ॥

दध्यस्थिसक्थ्यक्ष्णो ऽन्तस्यान् ।१।४।६३।

एषां नपुंसकानां नाम्यन्तानामन्तस्य टादौ स्वरे परे अन् स्यात् । दध्ना । अतिदध्ना । अस्थ्ना । अत्यस्थ्ना । सक्थ्ना । अतिसक्थ्ना । अक्ष्णा । अत्यक्ष्णा ॥ ६३ ॥

अनाम्स्वरे नोन्तः । १ । ४ । ६४ ।

नाम्यन्तस्य नपुंसकस्यामवर्जे स्यादौ स्वरे परे नोऽन्तः स्यात् । वारिणी । वारिणः । कर्तृणी । कर्तृणः । प्रियतिसृणः । अनामिति किम् । वारीणाम् । स्वर इति किम् । हेवारे । स्यादावित्येव । तौम्बुरवं चूर्णम् ॥६४॥

स्वराच्छौ । १ । ४ । ६५ ।

शौ परे स्वरान्तान्नपुंसकात्परो नोऽन्तः स्यात् । कुण्डानि । स्वरादिति किम् । चत्वारि ॥ ६५ ॥

धुटां प्राक् । १ । ४ । ६६ ।

स्वरात्परा या धुट्जातिस्तदन्तस्य नपुंसकस्य शौ परे धुड्भ्यएव प्राग् नोऽन्तः स्यात्। पयांसि। अतिजरांसि। काष्टतङ्क्षि। स्वरादित्येव। गोमन्ति॥ ६६॥

र्लो वा। १। ४। ६७।

रलाभ्याम् परा या धुट्जातिस्तदन्तस्य नपुंसकस्य शौ परे धुड्भ्यएव प्राक् नोन्तो वा स्यात्। बहूर्ञ्जि बहूर्जि। सुवल्ङ्गि सुवल्गि। र्ल इति किम्। काष्टतङ्क्षि। धुटामित्येव। सुफुल्लि॥ ६७॥

घुटि। १। ४। ६८।

निमित्तविशेषोपादानं विना आपादपरिसमाप्तेर्यत्कार्यम् वक्ष्यते तद् घुटि वेदितव्यम्॥ ६८॥

अचः। १। ४। ६९।

अञ्चतेर्धातोर्धुडन्तस्य धुटः प्राक् नोन्तो घुटि स्यात्। प्राङ्। अतिप्राङ्। प्राञ्चौ। प्राञ्चि कुलानि॥ ६९॥

ऋदुदितः। १। ४। ७०।

ऋदुदितो धुडन्तस्य घुटि परे धुटः प्राक् स्वरात्परो नोन्तः स्यात्। कुर्वन्। विद्वान्। गोमान्। घुटीत्येव। गोमता॥ ७०॥

युञ्जोऽसमासे। १। ४। ७१।

युजृंपीयोग इत्यस्यासमासे धुडन्तस्य धुटः प्राक् नोन्तः स्यात्। युङ्। युञ्जौ। युञ्जि कुलानि। बहुयुङ्। असमास इति किम्। अश्वयुक्। युज इति किम्। युजिन्च् समाधौ। युजमापन्ना मुनयः॥ ७१॥

अनडुहः सौ। १। ४। ७२।

अनडुहो धुडन्तस्य धुटः प्राक् सौ परे नोन्तः स्यात्। अनड्वान्। प्रियानड्वान्॥ ७२॥

पुंसोः पुमन्स् । १ । ४ । ७३ ।

पुंसोः पुमन्स् घुटि स्यात् । पुमान् । पुमांसौ । पुमांसः । प्रियपुमान् । प्रियपुमांसि ॥ ७३ ॥

ओत औः । १ । ४ । ७४ ।

ओतो घुटि परे औः स्यात् । गौः । गावौ । द्यौः । द्यावौ । प्रियद्यावौ । ओत इति किम् चित्रगुः ॥ ७४ ॥

आ अम्शसोऽता । १ । ४ । ७५ ।

ओतोऽम्शसोरतासह आः स्यात् । गाम् । सुगाम् । गाः । द्याम् । अतिद्याम् । द्याः । सुद्याः ॥ ७५ ॥

पथिन्मथिनृभुक्षः सौ । १ । ४ । ७६ ।

एषां नान्तानामन्तस्य सौ परे आः स्यात । पन्थाः । हेपन्थाः । मन्थाः । हेमन्थाः । ऋभुक्षाः । हेऋभुक्षाः । नान्तनिर्देशादिह न स्यात् । पन्थानमैच्छत् पथीः ॥ ७६ ॥

एः । १ । ४ । ७७ ।

पथ्यादीनां नान्तानामितो घुटि परे आः स्यात् । पन्थाः । पन्थानौ । पन्थानः । पन्थानम् । सुपन्थानि कुलानि । मन्थाः । ऋभुक्षाः ॥ नान्तनिर्देशादिह न स्यात् । पथ्यौ । पथ्यः ॥ ७७ ॥

थोन्थ् । १ । ४ । ७८ ।

पथिन्मथिनोर्नान्तयोस्थस्य घुटि परे न्थ् स्यात् । तथैवोदाहृतम् ॥७८॥

इन् डीस्वरे लुक् । १ । ४ । ७९ ।

पथ्यादीनां नान्तानां ङ्यामघुट्स्वरादौ च स्यादौ परे इन् लुक् स्यात् । सुपथी स्त्री कुलेवा । पथः । सुमथी स्त्री कुले वा । मथः । अनृभुक्षी सेना कुले वा । ऋभुक्षः ॥ ७९ ॥

वोशनसोनश्चामन्त्ये सौ । १ । ४ । ८० ।

आमन्त्र्यवृत्तेरुशनसो नलुकौ सौ परे वा स्याताम् । हेउशनन् हेउशन हेउशनः । आमन्त्र्य इति किम् । उशना ॥ ८० ॥

उतोऽनडुच्चतुरो वः । १ । ४ । ८१ ।

आमन्त्र्यवृत्त्योरनडुच्चतुरोरुतः सौ परे वः स्यात् । हेअनड्वन् । हेप्रियचत्वः । हेअतिचत्वः ॥ ८१ ॥

वाः शेषे । १ । ४ । ८२ ।

आमन्त्र्याविहितात्सेरन्यो घुट्शेषस्तस्मिन्परे अनडुच्चतुरोरुतो वाः स्यात् । अनड्वान् । अनड्वाहौ । प्रियचत्वाः । प्रियचत्वारौ । शेष इति किम् । हेअनड्वन् । हेप्रियचत्वः ॥ ८२ ॥

सख्युरितोऽशावैत् । १ । ४ । ८३ ।

सख्युरिदन्तस्य शिवर्जे शेषघुटि परे ऐत् स्यात् । सखायौ । सखायः । सखायम् । इत इति किम् । सख्यौ स्त्रियौ । अशाविति किम् । अतिसखीनि । शेषइत्येव । हेसखे ॥ ८३ ॥

ऋदुशनस्पुरुदंशोनेहसश्च सेर्डाः । १ । ४ । ८४ ।

ऋदन्तादुशनसादेः सख्युरितश्च परस्य शेषस्य सेर्डाः स्यात् । पिता । अतिपिता । कर्त्ता । उशना । पुरुदंशा । अनेहा । सखा ॥ ८४ ॥

नि दीर्घः । १ । ४ । ८५ ।

शेषघुटि परे योनस्तस्मिन् परे स्वरस्य दीर्घः स्यात् । राजा । राजानौ । राजानः । राजानम् । वनानि । कर्तॄणि । शेष इत्येव । हेराजन् ॥

न्स्महतोः । १ । ४ । ८६ ।

न्सन्तस्य महतश्च स्वरस्य शेषे घुटि परे दीर्घः स्यात् । श्रेयान् । श्रेयांसौ । महान् । महान्तौ ॥ ८६ ॥

इन्हन्पूषार्यम्णः शिस्योः । १।४।८७।

इन्नन्तस्य हनादेश्च स्वरस्य शिस्योरेव परयोर्दीर्घः स्यात् । दण्डीनि । स्रग्वीणि । दण्डी । स्रग्वी । भ्रूणहानि । भ्रूणहा । बहुपूषाणि । पूषा । स्वर्यमाणि । अर्यमा । शिस्योरेवेति किम् । दण्डिनौ । वृत्रहणौ । पूषणौ । अर्यमणौ ॥ ८७ ॥

अपः । १ । ४ । ८८ ।

अपः स्वरस्य शेषे घुटि परे दीर्घः स्यात् । आपः । स्वापौ ॥ ८८ ॥

नि वा । १ । ४ । ८९ ।

अपः स्वरस्य नागमे सति घुटि परे दीर्घो वा स्यात् । स्वाम्पि स्वम्पि । बह्वाम्पि बह्वम्पि ॥ ८९ ॥

अभ्वादेरत्वसः सौ । १ । ४ । ९० ।

अत्वन्तस्यासन्तस्य च भ्वादिवर्जस्य शेषे सौ परे दीर्घः स्यात् । भवान् । यवमान् । अप्सराः । गोमन्तम् स्थूलशिरसम् वेच्छन् गोमान् स्थूलशिराः । अभ्वादेरिति किम् । पिण्डग्रः ॥ ९० ॥

क्रुशस्तुनस्तृच् पुंसि । १ । ४ । ९१ ।

क्रुशोयस्तुन् तस्य शेषे घुटि परे तृच् स्यात् पुंसि । क्रोष्टा । क्रोष्टारौ । पुंसीति किम् । क्रुशक्रोष्टूनि वनानि ॥ ९१ ॥

टादौ स्वरे वा । १ । ४ । ९२ ।

टादौ स्वरादौ परे क्रुशस्तुनस्तृज् वा स्यात् पुंसि । क्रोष्ट्रा क्रोष्टुना । क्रोष्ट्रोः क्रोष्ट्वोः ॥ ९२ ॥

स्त्रियाम् । १ । ४ । ९३ ।

क्रुशः परस्य तुनः स्त्रीवृत्तेस्तृच् स्यात् । निर्निमित्तएव । क्रोष्ट्री । क्रोष्ट्र्यौ । क्रोष्ट्रीभ्याम् । पञ्चक्रोष्टृभीरथैः ॥ ९३ ॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधान स्वोपज्ञ-शब्दानुशासनलघुवृत्तौ प्रथमस्याध्यायस्य चतुर्थः पादः समाप्तः ।१।४ ॥

॥ अर्हं ॥

त्रिचतुरस्तिसृचतसृ स्यादौ । २ । १ । १

स्त्रियामिति वर्त्तते । स्यादौ परे स्त्रीवृत्त्योस्त्रिचतुरोर्यथासंख्यं तिसृ चतसृ इत्येतौ स्याताम् । तिस्रः । चतस्रः । तिसृषु । चतसृषु । प्रियतिसा । प्रियचतसा ना । प्रियतिसृ कुलम् । प्रियत्रि कुलम् । स्यादाविति किम् । प्रियत्रिकः । प्रियचतुष्कः ॥ १ ॥

ऋतो रः स्वरेऽनि । २ । १ । २ ।

तिसृचतसृस्थस्य ऋतः स्वरादौ स्यादौ परे रः स्यात् । अनि नविषयादन्यत्र । तिस्रः ।चतस्रः। प्रियतिस्रौ।प्रियचतस्रौ।स्वर इति किम् । तिसृभिः । चतसृभिः। अनीति किम् । तिसृणाम् । चतसृणाम् ॥ २॥

जराया जरस्वा । २ । १ । ३

स्वरादौ स्यादौ परे जराया जरस्वा स्यात् । जरसौ । जरसः । जरे जराः । अतिजरसौ अतिजरौ । अतिजरसम् अतिजरम् कुलम् ॥ ३ ॥

अपोऽद्भे । २ । १ । ४ ।

भादौ स्यादौ परे अपो अद् स्यात् । अद्भिः। स्वद्भ्याम् । भ इति किम् । अप्सु ॥ ४ ॥

आ रायो व्यञ्जने । २ । १ । ५

व्यञ्जनादौ स्यादौ परे रैशब्दस्य आः स्यात् । राः । रासु । अतिराभ्याम् कुलाभ्याम् । व्यञ्जनइति किम् । रायः ॥ ५ ॥

युष्मदस्मदोः । २ । १ । ६ ।

व्यञ्जनादौ स्यादौ परे युष्मदस्मदोराः स्यात् । त्वाम् । माम् । अतित्वाम् । अतिमाम् । युष्मासु । अस्मासु ॥ ६ ॥

टाङ्योसि यः । २ । १ । ७ ।

टाङ्योस्सु परेषु युष्मदस्मदोर्यः स्यात् । त्वया । मया । अतियुवया । अत्यावया । त्वयि । मयि । युवयोः । आवयोः । टाङ्योसीति किम् । त्वत् । मत् ॥ ७ ॥

शेषे लुक् । २ । १ । ८ ।

यस्मिन्नायौ कृतौ ततोऽन्यः शेषः । तस्मिन् स्यादौ परे युष्मदस्मदोर्लुक् स्यात् । युष्मभ्यम् । अस्मभ्यम् । अतित्वत् । अतिमत् । शेष इति किम् । त्वयि । मयि ॥ ८ ॥

मोर्वा । २ । १ । ९ ।

शेषे स्यादौ परे युष्मदस्मदोर्मोर्लुग् वा स्यात् । युवाम् युष्मान्वा आवाम् अस्मान्वा आचक्षाणेभ्यो णिचि किपि च लुकि च । युष्मभ्यम् युषभ्यम् । अस्मभ्यम् असभ्यम् ॥ ९ ॥

मन्तस्य युवावौ द्वयोः । २ । १ । १० ।

द्व्यर्थवृत्त्योर्युष्मदस्मदोर्मान्तावयवस्य स्यादौ परे यथासंख्यं युव आव इत्येतौ स्याताम् । युवाम् । आवाम् । अतियुवाम् । अत्यावाम् । अतियुवासु । अत्यावासु । मन्तस्येतिकिम् । युवयोः । आवयोरित्यत्र दस्य यत्वम् यथा स्यात् । स्यादावित्येव । युवयोःपुत्रो युष्मत्पुत्रः ॥

त्वमौ प्रत्ययोत्तरपदे चैकस्मिन् ।२।१।११।

स्यादौ प्रत्ययोत्तरपदयोश्च परयोरेकार्थवृत्त्योर्युष्मदस्मदोर्मान्तावयवस्य यथासंख्यं त्व म इत्येतौ स्याताम् । त्वाम् । माम् । अतित्वाम् अतिमाम् । अतित्वासु । अतिमासु । त्वदीयः । मदीयः । त्वत्पुत्रः । मत्पुत्रः । प्रत्ययोत्तरपदे चेति किम् । अधियुष्मद् । अध्यस्मद् । एकस्मिन्निति किम् । युष्माकम् । अस्माकम् ॥ ११ ॥

त्वमहं सिना प्राक्चाकः ।२।१।१२।

सिना सह युष्मदस्मदोर्यथासंख्यं त्वमहमौ स्याताम् । तौ चाक्प्रसङ्गेऽकः प्रागेव । त्वम् । अहम् । अतित्वम् । अत्यहम् । प्राक्चाक इति किम् । त्वकम् । अहकम् ॥ १२ ॥

यूयं वयं जसा ।२।१।१३।

जसा सह युष्मदस्मदोर्यथासंख्यं यूयम्वयमौ स्याताम् । यूयम् । वयम् । प्रिययूयम् । प्रियवयम् । प्राक्चाक इत्येव । यूयकम् । वयकम् ॥ १३ ॥

तुभ्यं मह्यं ङ्या ।२।१।१४।

ङ्या सह युष्मदस्मदोर्यथासंख्यं तुभ्यम्मह्यमौ स्याताम् । तुभ्यम् । मह्यम् । प्रियतुभ्यम् । प्रियमह्यम् । प्राक्चाक इत्येव । तुभ्यकम् । मह्यकम् ॥ १४ ॥

तव मम ङसा ।२।१।१५।

ङसा सह युष्मदस्मदोर्यथासंख्यं तवममौ स्याताम् । तव । मम । प्रियतव । प्रियमम । प्राक्चाक इत्येव । तवक । ममक ॥ १५ ॥

अमौ मः ।२।१।१६।

युष्मदस्मद्भ्याम् परयोरम् औ इत्येतयोर्म इति स्यात् । त्वाम् । माम् । अतित्वाम् । अतिमाम् । युवाम् । आवाम् । अतियुवाम् । अत्यावाम् ॥ १६ ॥

शसो नः । २ । १ । १७ ।

युष्मदस्मद्भ्यां परस्य शसो न इति स्यात् । युष्मान् । अस्मान् । प्रियत्वान् । प्रियमान् ॥ १७ ॥

अभ्यम् भ्यसः । २ । १ । १८ ।

युष्मदस्मद्भ्यां परस्य चतुर्थीभ्यसोऽभ्यं स्यात् । युष्मभ्यम् । अस्मभ्यम् । अतियुवभ्यम् । अत्यावभ्यम् ॥ १८ ॥

ङसेश्चाद् । २ । १ । १९ ।

युष्मदस्मद्भ्यां परस्य ङसेः पञ्चमीभ्यसश्च अद् इति स्यात् । त्वद् । मद् । अतियुवद् । अत्यावद् । युष्मद् । अस्मद् । अतित्वद् । अतिमद् ॥ १९ ॥

आम आकम् । २ । १ । २० ।

युष्मदस्मद्भ्यां परस्य आम आकं स्यात् । युष्माकम् । अस्माकम् । अतियुवाकम् । अत्यावाकम् । युष्मानस्मान् वाऽऽचक्षाणानां युष्माकम् । अस्माकम् ॥ २० ॥

पदाद्युग्विभक्त्यैकवाक्ये वस्नसौ बहुत्वे । २ । १ । २१ ।

बहुत्वविषयया समविभक्त्या सह पदात् परयोर्युष्मदस्मदोर्यथासंख्यं वस्नसौ वा स्याताम् । तच्चेत्पदं युष्मदस्मदौ चैकस्मिन् वाक्ये स्तः । अन्वादेशे नित्यंविधानादिह विकल्पः । एवमुत्तरसूत्रत्रयेऽपि । धर्म्मो वो रक्षतु । धर्मो नो रक्षतु । धर्म्मो युष्मान् रक्षतु । धर्म्मोऽस्मान् रक्षतु । एवं चतुर्थीषष्ठीभ्यामपि । पदादिति किम् । युष्मान् पातु । युग्विभक्त्येतिकिम् । तीर्थे यूयं यात । एकवाक्य इति किम् । अतियुष्मान् पश्य ओदनं पचत युष्माकं भविष्यति ॥ २१ ॥

द्वित्वे वाम्नौ ।२।१।२२।

पदात् परयोर्युष्मदस्मदोर्द्वित्वविषयया युग्विभक्त्या सह यथा-संख्यं वाम्नौ इत्येतौ वा स्याताम् । एकवाक्ये । धर्म्मो वां पातु । धर्म्मो युवां पातु । धर्म्मो नौ पातु । धर्म्म आवां पातु । एवं । चतुर्थीषष्ठीभ्यामपि ॥ २२ ॥

ङेङसा ते मे ।२।१।२३।

ङेङस्भ्यां सह पदात् परयोर्युष्मदस्मदोर्यथासंख्यं ते मे इत्येतौ वा स्याताम् । एकवाक्ये । धर्मस्ते दीयते । धर्म्मस्तुभ्यं दीयते । धर्म्मो मे दीयते । धर्म्मो मह्यं दीयते । धर्म्मस्ते स्वम् । धर्म्मस्तव स्वम् । धर्म्मो मे स्वम् । धर्म्मो मम स्वम् ॥ २३ ॥

अमा त्वामा ।२।१।२४।

अमा सह पदात् परयोर्युष्मदस्मदोर्यथासंख्यं त्वामा इत्येतौ वा स्याताम् । एकवाक्ये । धर्म्मस्त्वा पातु । धर्म्मस्त्वां पातु । धर्म्मो मा पातु । धर्म्मो मां पातु ॥ २४ ॥

असदिवामन्त्र्यं पूर्वम् ।२।१।२५।

आमन्त्र्यार्थं पदं युष्मदस्मद्भ्यां पूर्वमसदिव स्यात् । जना युष्मान् पातु धर्म्मः । साधू युवां पातु धर्म्मः । साधो त्वां पातु तपः । पूर्वमिति किम् । मयैतत्सर्व्वमाख्यातं युष्माकं मुनिपुङ्गवाः ॥ २५ ॥

जस्विशेष्यं वामन्त्र्ये ।२।१।२६।

युष्मदस्मद्भ्यां पूर्वं जसन्तमामन्त्र्यार्थं विशेष्यवाच्यामन्त्र्ये पदेऽर्थात् तद्विशेषणे परेऽसदिव वा स्यात् । जिनाः शरण्या युष्मान् शरणं प्रपद्ये । जिनाः शरण्या वः शरणं प्रपद्ये । जिनाः शरण्या-अस्मान् रक्षत । जिनाः शरण्या नो रक्षत । जसिति किम् । साधो सुविहित

नाथो शरणं प्रपद्ये। साधो सुविहित नाथो रक्ष। विशेष्यमिति किम्। शरण्याः साधवो युष्मान् शरणम् प्रपद्ये। आमन्त्र्य इति किम्। आचार्या युष्मान् शरण्याः शरणं प्रपद्ये। अर्थात्तद्विशेषणभूत इति किम्। आचार्या उपाध्याया युष्मान् शरणं प्रपद्ये ॥ २६ ॥

नान्यत्। २। १। २७।

युष्मदस्मद्भ्याम् पूर्वं जसन्तादन्यदामन्त्र्यं विशेष्यमामन्त्र्ये तद्विशेषणे परेऽसदिव न स्यात्। साधो सुविहित त्वा शरणम् प्रपद्ये। साधो सुविहित मा रक्ष ॥ २७ ॥

पादाद्योः। २। १। २८।

नियतपरिमाणमात्राक्षरपिण्डः पादः। पदात् परयोः पादस्यादिस्थयो युष्मदस्मदोर्वस्नसादिर्न स्यात्। वीरो विश्वेश्वरो देवो युष्माकं कुलदेवता ॥ सएवनाथोभगवानस्माकम्पापनाशनः ॥ १ ॥ पादाद्योरिति किम्। पान्तु वो देशनाकाले जैनेन्द्रा दशनांशवः। भवकूपपतज्जन्तु जातोद्धरणरज्जवः ॥ २ ॥ २८ ॥

चाहहवैवयोगे। २। १। २९।

एभिर्योगे पदात् परयोर्युष्मदस्मदोर्वस्नसादिर्नस्यात्। ज्ञानं युष्मांश्च रक्षतु। एवं अहहवाएवैरप्युदाहार्यम्। योग इति किम्। ज्ञानञ्च शीलञ्च ते स्वम् ॥ २९ ॥

दृश्यर्थैश्चिन्तायाम्। २। १। ३०।

दृशिना समानार्थैश्चिन्तार्थैर्धातुभिर्योगे युष्मदस्मदोर्वस्नसादिर्नस्यात्। जनो युष्मान् सन्दृश्यागतः। जनोऽस्मान् सन्दृश्यागतः। जनो युवां समीक्ष्यागतः। जन आवां समीक्ष्यागतः। जनस्त्वामपेक्षते। जनो मामपेक्षते। सर्वत्र मनसा चिन्तनं दृश्यर्थानामर्थः। दृश्यर्थैरिति किम्। जनो वो मन्यते। चिन्तायामिति किम्। जनो नः पश्यति ॥ ३० ॥

नित्यमन्वादेशे ।२।१।३१।

किञ्चिद्विधातुं कथितस्य पुनरन्यद्विधातुं कथनमन्वादेशः । तस्मिन् विषये पदात् परयोर्युष्मदस्मदोर्वस्नसादिर्नित्यं स्यात् । यूयं विनीतास्तद्वो गुरवो मानयन्ति । वयं विनीतास्तन्नो गुरवो मानयन्ति । धनवांस्त्वमथो त्वा लोको मानयति । धनवानहमथोमा लोको मानयति ॥ ३१ ॥

सपूर्वात् प्रथमान्ताद्वा ।२।१।३२।

विद्यमानपूर्वपदात् प्रथमान्तात् पदात् परयोर्युष्मदस्मदोरन्वादेशे वस्नसादिर्वास्यात् । यूयं विनीतास्तद्गुरवो वो मानयंति । तद्गुरवो युष्मान् मानयन्ति । वयं विनीतास्तद्गुरवो नोमानयन्ति । तद्गुरवो ऽस्मान् मानयन्ति । युवां सुशीलौ तज्ज्ञानं वां दीयते तज्ज्ञानं युवाभ्यां दीयते । आवां सुशीलौ तज्ज्ञानं नौ दीयते तज्ज्ञान मावाभ्यां दीयते ॥ ३२ ॥

त्यदामेनदेतदो द्वितीयाटौ-स्यवृत्त्यन्ते ।२।१।३३।

त्यदादीनामेतदो द्वितीयायां टायामोसि च परेऽन्वादेशे एनद् स्यात् । नतु वृत्त्यन्ते । उद्दिष्टमेतदध्ययनमथोएनदनुजानीत । एतकं साधुमावश्यकमध्यापय अथोएनमेवसूत्राणि । अत्र साकः । एतेन रात्रिरधीता अथो एनेनाहरप्यधीतम् । एतयोः शोभनं शीलमथो एनयोर्महती कीर्त्तिः । त्यदामिति किम् । संज्ञायामेतदं संगृहाण अथो एतदमध्यापय । अवृत्त्यन्त इति किम् । अथो परमैतम् पश्य ॥ ३३ ॥

इदमः । २ । १ । ३४ ।

त्यदादेरिदमो द्वितीयाटौसि परेऽन्वादेशे एनद् स्यात्। अवृत्त्यन्ते। उद्दिष्टमिदमध्ययनमथो एनदनुजानीत। अनेनरात्रिरधीता अथो एनेनाहरप्यधीतम्। अनयोः शोभनं शीलं अथो एनयोर्महती कीर्त्तिः ॥ ३४ ॥

अद्व्यञ्जने। २। १। ३५।

त्यदादेरिदमो व्यञ्जनादौ स्यादौ परेऽन्वादेशे अः स्यात्। अवृत्त्यन्ते। इमकाभ्यां शैक्षकाभ्यां रात्रिरधीता। अथो आभ्यामहरप्यधीतम्। इमकेषु अथो एषु। अनगिति वक्ष्यमाणादिह साकोऽपि विधिः ॥ ३५ ॥

अनक्। २। १। ३६।

त्यदादेर्व्यञ्जनादौ स्यादौ परेऽग्वर्ज इदम् अः स्यात्। आभ्याम्। आभिः। एषु। आसु। अनगिति किम्। इमकाभ्याम्। त्यदामित्येव। अतीदंभ्याम् ॥ ३६ ॥

टौस्यनः। २। १। ३७।

त्यदां टायामोसि च परेऽनक इदमोऽनः स्यात्। अनेन। अनया। अनयोः २। त्यदामित्येव। प्रियेदमा। अनक इत्येव। इमकेन ॥ ३७ ॥

अयमियम् पुंस्त्रियोः सौ।२।१।३८।

त्यदां सौ परे इदमः पुंस्त्रियोर्यथासंख्यमयमियमौ स्याताम्। अयं ना। इयं स्त्री। त्यदामित्येव। अतीदं ना स्त्री वा ॥ ३८ ॥

दो मः स्यादौ।२।१।३९।

त्यदां स्यादौ परे इदमो दो मः स्यात्। इमौ। परमेमौ। इमकाभ्याम्। त्यदामित्येव। प्रियेदमौ ॥ ३९ ॥

किमः कस्तसादौ च ।२।१।४०।

त्यदां स्यादौ तसादौ च प्रत्यये परे किमः कः स्यात् । कः । साकोपि कः । कदा । कर्हि । तसादौ चेति किम् । किन्तराम् । त्यदामित्येव । प्रियकिमौ ॥ ४० ॥

आद्वेरः । २ । १ ।४१।

द्विशब्दमभिव्याप्यत्यदां स्यादौ तसादौ च परे अः स्यात् । स्यः । त्यौ । द्वौ । ततः । त्यदामित्येव । अतितदौ ॥ ४१ ॥

तः सौ सः । २ । १ । ४२ ।

आद्वेस्त्यदां सौ परे तः सः स्यात् । स्यः । स्या । सः । सा । एषा । त्यदामित्येव । प्रियत्यत् ॥ ४२ ॥

अदसो दः सेस्तु डौ ।२ । १ । ४३ ।

त्यदां सौ परे अदसो दः सः स्यात् । सेस्तुडौ । असौ । असकौ । हेअसौ । हेअसकौ । त्यदामित्येव । अत्यदाः ॥ ४३ ॥

असुको वाकि । २ ।१ । ४४।

त्यदां सौ परे अदसोऽकिसत्यसुको वा स्यात् । असुकः। असकौ । हेअसुक । हेअसकौ ॥ ४४ ॥

मोऽवर्णस्य ।२।१।४५।

अवर्णान्तस्य त्यदामदसो दो मः स्यात् । अमू नरौ स्त्रियौ कुले वा । अमी। अमूदृशः । अवर्णस्येति किम् । अदः कुलम् ॥ ४५ ॥

वाद्रौ । २ । १ । ४६ ।

अदसोऽद्रावन्ते सति दोम्वा स्यात् । अदमुयङ् अमुद्र्यङ् अमुमुयङ् अदद्र्यङ् ॥ ४६ ॥

मादुवर्णोऽनु । २ । १ । ४७ ।

अदसो मः परस्य वर्णस्य उवर्णः स्यात् । अनु पश्चात्कार्यान्तरेभ्यः । अमुम् । अमू । अमुमुयङ् । अन्विति किम् । अमुष्मै । अमुष्मिन् ॥४७ ॥

प्रागिनात् । २ । १ । ४८ ।

अदसो मः परस्य वर्णस्येनादेशात् प्राक् उवर्णः स्यात् । अमुना । इनादिति किम् । अमुया ॥ ४८ ॥

बहुष्वेरीः । २ । १ । ४९ ।

बह्वर्थवृत्तेरदसो मः परस्य एत ईः स्यात् । अमी । अमीषु । एरिति किम् । अमूः स्त्रियः । मादित्येव । अमुके ॥ ४९ ॥

धातोरिवर्णोवर्णस्येयुव् स्वरे प्रत्यये । २ । १ । ५० ।

धातोरिवर्णोवर्णयोः स्वरादौ प्रत्यये परे यथासंख्यमियुवौ स्याताम् । नियौ । लुवौ । अधीयते । लुलुवुः । प्रत्यये इति किम् । न्यर्थः । ल्वर्थः । नयनम् । नायकः । इत्यादौ परत्वाद्गुणवृद्धी ॥ ५० ॥

इणः । २ । १ । ५१ ।

इणो धातोः स्वरादौ प्रत्यये परे इय् स्यात् । यापवादः । ईयतुः । ईयुः ॥ ५१ ॥

संयोगात् । २ । १ । ५२ ।

धातोरिवर्णोवर्णयोः संयोगात्परयोः स्वरादौ प्रत्यये परे इयुवौ स्याताम् । यवक्रियौ । कटप्रुवौ । शिश्रियुः ॥ ५२ ॥

भ्रूश्नोः । २ । १ । ५३

भ्रूश्नोरुवर्णस्य संयोगात् परस्य स्वरादौ प्रत्यये परे उव् स्यात् । भ्रुवौ । आप्नुवन्ति । संयोगादित्येव । चिन्वन्ति ॥ ५३ ॥

स्त्रियाः । २ । १ । ५४ ।

स्त्रिया इवर्णस्य स्वरादौ प्रत्यये परे इय् स्यात् । स्त्रियौ । अतिस्त्रियौ ॥

वाम्शसि । २ । १ । ५५ ।

स्त्रिया इवर्णस्याम्शसोः परयोरिय् वा स्यात् । स्त्रियं स्त्रीम् । स्त्रियः स्त्रीः ॥ ५५ ॥

योऽनेकस्वरस्य । २ । १ । ५६ ।

अनेकस्वरस्य धातोरिवर्णस्य स्वरादौ प्रत्यये परे यः स्यात् । चिच्युः । निन्युः । पतिमिच्छति पत्यि ॥ ५६ ॥

स्यादौ वः । २ । १ । ५७ ।

अनेकस्वरस्य धातोरुवर्णस्य स्वरादौ स्यादौ परे वः स्यात् । वसुमिच्छन्तौ वस्वौ । स्यादाविति किम् । लुलुवुः ॥ ५७ ॥

क्विब्वृत्तेरसुधियस्तौ । २ । १ । ५८ ।

क्विबन्तेनैव या वृत्तिः समासस्तस्याः सुधीशब्दादन्यस्याः सम्बन्धिनो धातोरिवर्णोवर्णस्य स्वरादौ स्यादौ परे तौ य व इत्येतौ स्याताम् । उन्न्यौ । ग्रामण्यौ । सुल्वः । खलप्वः । क्विबिति किम् । परमौनियौ परमनियौ । वृत्तेरिति किम् । नियौ कुलस्य । असुधिय इति किम् । सुधियः ॥ ५८ ॥

दृन्पुनर्वर्षाकारैर्भुवः । २ । १ । ५९ ।

दृनादिभिः सह या क्विब्वृत्तिस्तत्सम्बन्धिनएवभुवोधातोरुवर्णस्य स्वरादौ स्यादौ परे वः स्यात् । दृन्भ्वौ । पुनर्भ्वौ । वर्षाभ्वः । कारभ्वः । दृनादिभिरिति किम् । प्रतिभुवौ ॥ ५९ ॥

णषमसत्परे स्यादिविधौ च ।२।१।६०।

इतः सूत्रादारभ्य यत्परं कार्यं विधास्यते तस्मिन् स्याद्यधिकार-विहिते च पूर्वस्मिन्नपि कर्त्तव्ये णत्वं षत्वं चासदसिद्धं स्यात् । एत त्सूत्रनिर्दिष्टयोश्च णषयोः परे षे णोऽसन् । पूष्णः। तक्ष्णः। पिपठीः। अर्वाणौ । सर्प्पींषि । असत्पर इत्यधिकारो रात्स इति यावत् । स्यादिविधौचेति तु नोर्म्यादिभ्य इति ॥ ६० ॥

क्त्वादेशोऽषि । २ । १ । ६१ ।

केनोपलक्षितस्य तस्यादेशः षादन्यस्मिन् परे पूर्वस्मिंश्च स्यादि विधावसन् स्यात् । क्षामिमान् । लून्युः । अषीति किम् । वृक्णः ॥ ६१ ॥

षढोः कस्सि । २ । १ । ६२ ।

सेपरे षढोः कः स्यात् । पेक्ष्यति । लेक्ष्यति ॥ ६२ ॥

भ्वादेर्नामिनो दीर्घोर्वोर्व्यञ्जने ।२।१।६३।

भ्वादेर्धातोर्यौ र्वौ तयोः परयोस्तस्यैव नामिनो दीर्घः स्यात् व्यञ्जने । हूर्च्छा । आस्तीर्णम् । दीव्यति । भ्वादेरिति किम् । कुर्कुरीयति । दिव्यति ॥ ६३ ॥

पदान्ते । २ । १ । ६४ ।

पदान्तस्थयोर्भ्वादेर्वोः परयोर्भ्वादेर्नामिनो दीर्घः स्यात् । गीः । गीर्थः । पदान्त इति किम् । गिरः । ध्रुवः ॥ ६४ ॥

न यि तद्धिते । २ । १ । ६५ ।

यादौ तद्धितपरे यौ र्वौ तयोः परयोर्नामिनो दीर्घो न स्यात् । धुर्यः । यीति किम् । गीर्वत् । तद्धित इति किम् । गीर्यति । गीर्यते ॥ ६५ ॥

कुरुच्छुरः ।२।१।६६।

कुरुच्छुरोर्नामिनो रे परे दीर्घो न स्यात् । कुर्यात् । छुर्यात् । कुर्वित्यु-कारः किम् । कुरत शब्दे । कूर्यात् ॥ ६६ ॥

मो नो म्वोश्च । २ । १ । ६७ ।

मन्तस्य धातोरन्तस्य पदान्तस्थस्य म्वोश्चपरयोर्नः स्यात् । प्रशान् । प्रशान्भ्याम् । जङ्गन्मि । जङ्गन्वः ॥ ६७ ॥

स्रंस्ध्वंस्क्वस्सनडुहो दः । २ । १ । ६८ ।

स्रंस्ध्वंसोः क्वस्प्रत्ययान्तस्य च सन्तस्य अनडुहश्च पदान्तस्थस्य दः स्यात् । उखास्रद् । पर्णध्वद् । विद्वत् कुलम् । स्वनडुद् । क्वस्सिति द्वि सकारपाठादिह माभूत् । विद्वान् ॥ ६८ ॥

ऋत्विज्दिश्दृश्स्पृश्स्रज्दधृषुष्णिहो गः । २ । १ । ६९ ॥

एषां पदान्तस्थानां गः स्यात् । ऋत्विग् । दिग् । दृग् । अन्यादृग् । घृतस्पृग् । स्रग् । दधृग् । उष्णिग् ॥ ६९ ॥

नशो वा । २ । १ । ७० ।

नशः पदान्ते ग् वा स्यात् । जीवनग् । जीवनड् ॥ ७० ॥

युजञ्चक्रुञ्चो नो ङः । २ । १ । ७१ ।

एषां नस्य पदान्ते ङ् स्यात् । युङ् । प्राङ् । क्रुङ् ॥ ७१ ॥

सोरुः । २ । १ । ७२ ।

पदान्ते सोरुः स्यात् । आशीः । वायुः ॥ ७२ ॥

सजुषः । २ । १ । ७३ ।

पदान्ते सजुषोरुः स्यात् । सजूः । सजूर्वत् ॥ ७३ ॥

अह्नः । २ । १ । ७४ ।

अह्नः पदान्ते रुः स्यात् । हे दीर्घाहो निदाघ । दीर्घाहा निदाघः ॥

रो लुप्यरि । २ । १ । ७५ ।

अरेफे परे पदान्ते अह्नो लुपि सत्यां रः स्यात् । अहरधीते । अहर्दत्ते । लुपीति किम् । हे दीर्घाहोऽत्र । अरीति किम् । अहोरूपम् ॥ ७५ ॥

धुटस्तृतीयः । २ । १ । ७६ ।

पदान्ते धुटां तृतीयः स्यात् । वाग् । वाग्भिः । अज्भिः ॥ ७६ ॥

गडदबादेश्चतुर्थान्तस्यैकस्वरस्यादेश्चतुर्थः स्ध्वोश्चप्रत्यये । २ । १ । ७७ ।

गडदबादेश्चतुर्थान्तस्यैकस्वरस्य धातुरूपशब्दावयवस्यादेश्चतुर्थः स्यात् । पदान्ते सादौ ध्वादौ च प्रत्यये । पर्णघुट् । तुण्डिभमाचक्षाणः तुण्ढिप् । एवं गर्द्धप् । धर्मभुत् । निघोक्ष्यते । न्यघूढ्वम् । धोक्ष्यते । अधुग्ध्वम् । भोत्स्यते । अभुद्ध्वम् । गडदबादेरिति किम् । अजज्ञप् । एकस्वरस्येति किम् । दामलिट् ॥ ७७ ॥

धागस्तथोश्च । २ । १ । ७८ ।

धागश्चतुर्थान्तस्य दादेरादेर्दस्य तथोः स्ध्वोश्च प्रत्यययोः परयोश्चतुर्थः स्यात् । धत्तः । धत्थः । धत्से । धद्ध्वे । तथोश्चेति किम् । दध्मः । चतुर्थान्तस्येत्येव । दधाति ॥ ७८ ॥

अधश्चतुर्थात् तथोर्धः । २ । १ । ७९ ।

चतुर्थात्परयोर्धारूपवर्ज्जाद्धातोर्विहितयोस्तथोर्धः स्यात् । अदुग्ध । अदुग्धाः । अलब्ध । अलब्धाः । अध इति किम् । धत्तः । धत्थः । विहितविशेषणं किम् । ज्ञानभुत्त्वम् ॥ ७९ ॥

नाम्यन्तात् परोक्षाद्यतन्याशिषो धोढः ।२।१।८०।

रान्तान्नाम्यन्ताच्च धातोः परासां परोक्षाद्यतन्याशिषां धो ढः स्यात् । अतीढ्वम् । तीर्षीढ्वम् । तुष्टुढ्वे । अदिढ्वम् । चेषीढ्वम् । नाम्यन्तादिति किम् । अपग्ध्वम् । आसिध्वम् ॥ ८० ॥

हान्तस्थाञ्जीड्भ्यां वा । २।१।८१।

हादन्तस्थायाश्चपराञ्जेरिटश्च परासां पराक्षाद्यतन्याशिषां धोढ् वा स्यात् । अग्राहिढ्वम् । अग्राहिध्वम् । ग्राहिषीढ्वम् ग्राहिषीध्वम् । अनायिढ्वम् । अनायिध्वम् । नायिषीढ्वम् नायिषीध्वम् । अकारिढ्वम् अकारिध्वम् । अलाविढ्वम् । अलाविध्वम् । जगृहिढ्वम् । जगृहिध्वम् । आयिढ्वम् । आयिध्वम् । हान्तस्थादिति किम् । घानिषीध्वम् । आसिषीध्वम् ॥ ८१ ॥

हो धुट्पदान्ते । २ । १ । ८२ ।

धुटि प्रत्यये पदान्ते च होढ् स्यात् । लेढा । मधुलिट् । गुडालिण्मान् । धुट्पदान्त इति किम् । मधुलिहौ ॥ ८२ ॥

भ्वादेर्दादेर्घः । २ । १ । ८३ ।

भ्वादेर्धातोर्यो दादिरवयवस्तस्य हो धुटि प्रत्यये परे पदान्ते च घः स्यात् । दोग्धा । धोक्ष्यति । अधोक् । गोधुक् । भ्वादेरिति किम् । दामलिट् ॥ ८३ ॥

मुहद्रुहष्णुहष्णिहो वा । २ । १ । ८४।

एषां हो धुटि प्रत्यये पदान्ते च घ् वा स्यात् । मोग्धा मोढा । उन्मुक् उन्मुट् । द्रोग्धा द्रोढा मित्रध्रुक् मित्रध्रुट् । स्नोग्धा स्नोढा । उत्स्नुट् उत्स्नुक् । स्नेग्धा स्नेढा । चेलस्निक् चेलस्निट् ॥ ८४ ॥

नहाहोर्द्धतौ । २ । १ । ८५ ।

नहेर्ब्रूस्थानाहश्च धातोर्हो धुटि प्रत्यये पदान्तेच यथासंख्यं धतौ स्याताम् ॥ नद्धा । उपानद्भ्याम् आत्थ ॥ ८५ ॥

चजः कगम् । २ । १ । ८६ ।

धुटि प्रत्यये पदान्ते च चजोः कगौ स्याताम् । वक्ता । वाक् । त्यक्ता । अर्द्धभाक् ॥ ८६ ॥

यजसृजमृजराजभ्राजभ्रस्जव्रश्चपरिव्राजः शः षः । २ । १ । ८७ ।

यजादीनां धातूनां चजोः शस्य च धुटि प्रत्यये पदान्ते च षः स्यात् । यष्टा । देवेट् । स्रष्टा । तीर्थसृट् । मार्ष्टा । कंसपरिमृट् । राष्टिः । सम्राट् । भ्राष्टिः । विभ्राट् । भ्रष्टा । धानाभृट् । व्रष्टा । मूलवृट् । परिव्राट् । लेष्टा । प्रष्टा । शब्दप्राट् । यजादिसाहचर्याच्छोपि धातोरेव स्यात् । इह मा भूत् । निज्भ्याम् । चज इत्येव । वृक्षवृश्चमाचष्टे वृक्षव् ॥

संयोगस्यादौ स्कोर्लुक् । २ । १ । ८८ ।

धुट् पदान्ते संयोगादिस्थयोः स्कोर्लुक् स्यात् । लग्नः । साधुलक् । वृक्णः । मूलवृट् । तष्टः । काष्ठतट् ॥ ८८ ॥

पदस्य । २ । १ । ८९ ।

पदस्य संयोगान्तस्य लुक् स्यात् । पुमान् । पुंभिः । महान् । पदस्येति किम् । स्कन्त्वा ॥ ८९ ॥

रात्सः । २ । १ । ९० ।

पदस्य संयोगान्तस्य यो रस्ततः परस्य सस्यैव लुक् स्यात् । चिकीः । कटचिकीः । सएवेति किम् । ऊर्क । न्यमार्ट् ॥ ९० ॥

नाम्नोनोऽनह्नः । २ । १ । ९१ ।

पदान्ते नाम्नो नस्य लुक् स्यात् । स चेदह्नो न स्यात् । राजा । राजपुरुषः । अनह्न इति किम् । अहरेति ॥ ९१ ॥

नामन्त्र्ये । २ । १ । ९२ ।

आमन्त्र्यार्थस्य नाम्नो नस्य लुक् न स्यात् । हे राजन् ॥ ९२ ॥

क्लीबे वा । २ । १ । ९३ ।

आमन्त्र्यार्थस्य नाम्नः क्लीबे नस्य लुग्वा स्यात । हे दाम । हे दामन् ॥ ९३ ॥

मावर्णान्तोपान्तापञ्चमवर्गान् मतोर्मो वः । २ । १ । ९४ ।

मावर्णौ प्रत्येकमन्तोपान्तौ यस्य तस्मात् पञ्चमवर्जवर्गान्ताच्च नाम्नः परस्य मतोर्मो वः स्यात् । किंवान् । शमीवान् । वृक्षवान् । मालावान् । अहर्वान् । भास्वान् । मरुत्वान् ॥ ९४ ॥

नाम्नि । २ । १ । ९५ ।

संज्ञायां मतोर्मो वः स्यात् । अहीवती मुनीवती नद्यौ ॥ ९५ ॥

चर्मण्वत्यष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वत् । २ । १ । ९६ ।

एते मत्वन्ताः संज्ञायां निपात्यन्ते । चर्मण्वती नाम नदी । अष्ठीवान् जानुः । चक्रीवान् खरः । कक्षीवान् ऋषिः । रुमण्वान् गिरिः ॥ ९६ ॥

उदन्वानब्धौ च । २ । १ । ९७ ।

अब्धौ जलाधारे नाम्नि च मतौ उदन्वान्निपात्यते । उदन्वान् घटः । उदन्वान् समुद्रः । ऋषिः आश्रमश्च ॥९७॥

राजन्वान् सुराज्ञि । २ । १ । ९८ ।

सुराजकेऽर्थे राजन्वान् मतौ निपात्यते । राजन्वान् देशः । राजन्वत्यः प्रजाः ॥ ९८ ॥

नोर्म्यादिभ्यः । २ । १ । ९९ ।

ऊर्म्यादिभ्यो मतोर्मो वो न स्यात् । ऊर्मिमान् । दल्मिमान् । इत्यादि । ९९ ॥

मासनिशासनस्य शसादौ लुग्वा । २ । १ । १०० ।

शसादौ स्यादावेषां लुग्वा स्यात् । मासः मासान् । निशः निशा । आसनि आसने ॥ १०० ॥

दन्तपादनासिकाहृदयासृग्यूषोदकदोर्यकृच्छकृतो दत्पन्नसहृदसन्यूषन्नुदन्दोषन्यकञ्छकन् वा । २ । १ । १०१ ।

शसादौ स्यादौ दन्तादीनां यथासंख्यं दत् इत्यादयो वा स्युः । दतः दन्तान् । पदः पादान् । नसा नासिकया । हृदि हृदये । अस्ना असृजा । यूष्णा यूषेण । उदना उदकेन । दोष्णा दोषा । यक्ना यकृता । शक्ना शकृता ॥ १०१ ॥

यस्वरे पादः पदणिक्यघुटि । २ । १ । १०२ ।

णिक्यघुट् वर्जे यादौ स्वरादौ च प्रत्यये पादन्तस्य पद् स्यात् । वैयाघ्रपद्यः । द्विपदः पश्य । पादयतेः क्विपि । पाद् । पदी कुले । यस्वर-

इति किम् । द्विपाद्भ्याम् । अणिक्यघुटीति किम् । पादयति । व्याघ्रपाद्यति । द्विपादौ ॥ १०२ ॥

उदच उदीच् । २ । १ । १०३ ।

अणिक्यघुटि यस्वरे उदच उदीच् स्यात् । उदीच्यः उदीची । अणिक्यघुटीत्येव । उदयति । उदच्यति । उदञ्चः । उदच इति किम् । नि माभूत् । उदञ्चा । उदञ्चे ॥ १०३ ॥

अच्च् प्राग् दीर्घश्च । २ । १ । १०४ ।

अणिक्यघुटि यस्वरादौ प्रत्ययेऽच्च् चः स्यात् प्राक्स्वरस्य दीर्घः । प्राच्यः । दधीचा । अणिक्यघुटीत्येव । दध्ययति । दध्यच्यति । दध्यञ्चः । अचिति किम् । नि माभूत् । साध्वञ्चा ॥ १०४ ॥

क्वसुष्मतौ च । २ । १ । १०५ ।

अणिक्यघुटि यस्वरे मतौ च प्रत्यये क्वस् उष् स्यात् । विदुषः । विदुषा । विदुष्मान् । अणिक्यघुटीत्येव । विद्वयति । विद्वस्यति । विद्वांसः ॥ १०५ ॥

श्वन्युवन्मघोनो ङीस्याद्यघुट्स्वरे व उः । २ । १ । १०६ ।

ङ्यां स्याद्यघुट्स्वरे च श्वनादीनां व उः स्यात् । शुनः शुनी । अतियूनी । यूनः । मघोनी । मघोनः । ङीस्याद्यघुट्स्वर इति किम् । शौवनम् । यौवनम् । माघवनम् ॥ १०६ ॥

लुगातोऽनापः । २ । १ । १०७ ।

आप्वर्जस्यातो ङीस्याद्यघुट्स्वरे लुक् स्यात् । कीलालपः । हाहे देहि । अनाप इति किम् । शालाः ॥ १०७ ॥

अनोऽस्य ।२।१।१०८।

ङीस्याद्यघुट्स्वरेऽनोऽस्य लुक् स्यात् । राज्ञी । राज्ञः ॥ १०८ ॥

ईङौ वा ।२।१।१०९।

ईकारे ङौ च परेऽनोऽस्य लुग्वा स्यात् । साम्नी सामनी । राज्ञि राजनि ॥ १०९ ॥

षादिहन्धृतराज्ञोऽणि ।२।१।११०।

षादेरनोहनोधृतराज्ञश्चातोऽणिप्रत्यये लुक् स्यात् । औक्ष्णः । ताक्ष्णः । भ्रौणघ्नः । धार्त्तराज्ञः ॥ ११० ॥

न वमन्तसंयोगात् ।२।१।१११।

वान्तान्मान्ताच्च संयोगात्परस्यानोऽस्य लुम स्यात् । पर्वणा । कर्म्मणी ॥ १११ ॥

हनो ह्नो घ्नः ।२।१।११२।

हन्तेर्ह्नो घ्नः स्यात् । भ्रूणघ्नी । घ्नन्ति । ह्न इति किम् । वृत्रहणौ ॥११२॥

लुगस्यादेत्यपदे ।२।१।११३।

अपदादावकारे एकारे च परेऽस्य लुक् स्यात् । सः । पचन्ति । पचे । अपद इति किम् । दण्डाग्रम् ॥ ११३ ॥

डित्यन्त्यस्वरादेः ।२।१।११४।

स्वराणां योऽन्त्यस्वरस्तदादेः शब्दस्य डितिपरे लुक् स्यात् । मुनौ । साधौ । पितुः ॥ ११४ ॥

अवर्णादश्नोऽन्तो वाऽतुरी-ङ्योः।२।१।११५।

आवर्जादवर्णात् परस्यातुः स्थानेऽन्तो वा स्यात् । ईङ्योः । तुदन्ती तुदती कुले स्त्री वा । एवम् । भान्ती भाती । अवर्णादिति किम् । अदती । अश्न इति किम् । लुनती ॥ ११५ ॥

श्यशवः । २ । १ । ११६ ।

श्याच्छवश्च परस्याऽतुरीङ्योः परयोरन्त इत्यादेशः स्यात् । दीव्यन्ती । पचन्ती ॥ ११६ ॥

दिव औः सौ । २ । १ । ११७ ।

दिवः सौ परे औः स्यात् । द्यौः ॥ ११७ ॥

उः पदान्तेऽनूत् । २ । १ । ११८ ।

पदान्तस्थस्य दिव उः स्यात् अनूत् । सतु दीर्घो न स्यात् । द्युभ्याम् । द्युषु । पदान्त इति किम् । दिवि । अनूदिति किम् । द्युभवति ॥ ११९ ॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञ शब्दानुशासनलघुवृत्तौ द्वितीयस्याध्यायस्य प्रथमः पादः समाप्तः ॥ २ । १ ॥

क्रियाहेतुः कारकम् । २ । २ । १ ।

क्रियाया निमित्तं कर्त्रादि कारकं स्यात् । अन्वर्थाश्रयणाच्च निमित्तत्वमात्रेण हेत्वादेः कारकसंज्ञा न स्यात् ॥ १ ॥

स्वतन्त्रः कर्त्ता । २ । २ । २ ।

क्रियाहेतुः क्रियासिद्धौ स्वप्रधानो यः स कर्त्ता स्यात् । मैत्रेण कृतः ॥ २ ॥

अन॰ कर्तुर्व्याप्यं कर्म । २ । २ । ३ ।

कर्त्रा क्रियया यद्विशेषेणाप्तुमिष्यते तत्कारकं व्याप्यं कर्म्म च स्यात् । तत्त्रेधा । निर्वर्त्त्यं विकार्यं प्राप्यं च । कटं करोति । काष्ठं दहति । ग्रामं याति ॥ ३ ॥

वा कर्मणामणिक्कर्त्ता णौ । २ । २ । ४ ।

अविवक्षितकर्मणां धातूनां णिगः प्राग् यः कर्त्ता स णिगि सति कर्म वा स्यात् । पचति चैत्रः । पाचयति चैत्रं चैत्रेण वा ॥ ४ ॥

गतिबोधाहारार्थशब्दकर्मनित्याऽकर्मणाम-नीखाद्यदिह्वाशब्दायक्रन्दाम् । २ । २ । ५ ।

गतिर्देशान्तरप्राप्तिः । शब्दः कर्म्मक्रिया व्याप्यश्च येषां ते शब्द-कर्म्माणः । नित्यं न विद्यते कर्म येषां ते नित्याकर्म्माणः । गत्यर्थबोधार्था-हारार्थानां शब्दकर्म्मणां नित्याकर्म्मणाञ्च नीखाद्यदिह्वाशब्दायक्रन्दि-वर्जानां धातूनामणिकर्त्ता स णौ सति कर्म स्यात् । गमयति चैत्रं ग्रामम् । बोधयति शिष्यं धर्म्मम् । भोजयति बटुमोदनम् । जल्पयति मैत्रं द्रव्यम् । अध्यापयति बटुं वेदम् । शाययति मैत्रं चैत्रः । गत्यर्था-दीनामिति किम् । पाचयत्योदनं चैत्रेण मैत्रः । न्यादिवर्ज्जनं किम् । नाययति भारं चैत्रेण । खादयत्यपूपं मैत्रेण । आदयत्योदनं सुतेन । ह्वाययति चैत्रं मैत्रेण । शब्दाययति बटुं मैत्रेण । क्रन्दयति मैत्रं चैत्रेण ॥ ५ ॥

भक्षेर्हिंसायाम् । २ । २ । ६ ।

भक्षेर्हिंसार्थस्यैवाणिकर्त्ता णौ कर्म्म स्यात् । भक्षयति सस्यं बलीवर्दान् मैत्रः । हिंसायामिति किम् । भक्षयति पिण्डीं शिशुना ॥ ६ ॥

वहेः प्रवेयः । २ । २ । ७ ।

वहेरणिकर्त्ता प्रवेयो णौ कर्म्म स्यात् । वाहयति भारं बलीवर्दान् मैत्रः। प्रवेय इति किम् । वाहयति भारं मैत्रेण ॥ ७ ॥

हृक्रोर्नवा । २ । २ । ८ ।

हृक्रोरणिकर्त्ता णौ कर्म्म वा स्यात् । विहारयति देशं गुरुं गुरुणा वा । आहारयत्योदनं बालं बालेन वा । कारयति कटं चैत्रं चैत्रेण वा ॥ ८ ॥

दृश्यभिवदोरात्मने । २। २ । ९ ।

दृश्यभिवदोरात्मनेपदविषयेऽणिकर्त्ता णौ कर्म्म वा स्यात् । दर्शयते राजा भृत्यान् भृत्यैर्वा । अभिवादयते गुरुः शिष्यं शिष्येण वा । आत्मन इति किम् । दर्शयति रूपतर्कं रूपम् ॥ ९ ॥

नाथः । २ । २ । १० ।

आत्मनेपदविषयस्य नाथो व्याप्यं कर्म्म वा स्यात् । सर्पिषो नाथते । सर्पिर्नाथते । आत्मन इत्येव । पुत्रमुपनाथति पाठाय ॥ १० ॥

स्मृत्यर्थदयेशः । २ । २ । ११ ।

स्मृत्यर्थानां दयेशोश्च व्याप्यं कर्म्म वा स्यात् । मातुः स्मरति । मातरं स्मरति । मातुः स्मर्यते । माता स्मर्यते । सर्पिषो सर्पिर्वा दयते। लोकानामीष्टे । लोकानीष्टे ॥ ११ ॥

कृगः प्रतियत्ने । २ । २ । १२ ।

पुनर्यत्नः प्रतियत्नस्तद्वृत्तेः कृगो व्याप्यं कर्म वा स्यात् । एधोदकस्यैधोदकं वोपस्कुरुते ॥ १२ ॥

रुजाऽर्थस्याऽज्वरिसन्तापेर्भावे-कर्त्तरि । २। २ । १३ ।

रुजा पीडा तदर्थस्य ज्वरिसन्तापिवर्जस्य धातोर्व्याप्यं कर्म्म वा स्यात्। भावश्चेद्रुजायाः कर्त्ता। चौरस्य चौरं वा रुजति रोगः। अज्व-रिसन्तापेरिति किम्। आघ्नूनं ज्वरयति सन्तापयति वा। भाव इति किम्। मैत्रं रुजति श्लेष्मा॥ १३॥

जासनाटक्राथपिषोहिंसायाम्। २। २। १४।

हिंसार्थानामेषां व्याप्यं कर्म्म वा स्यात्। चौरस्य चौरं वोज्जा-सयति। चौरस्य चौरं वोन्नाटयति। चौरस्य चौरं वोक्राथयति। चौरस्य चौरं वा पिनष्टि। हिंसायामिति किम्। चौरं बन्धनाज्जासयति॥ १४॥

निप्रेभ्यो घ्नः। २। २। १५।

समस्तव्यस्तविपर्यस्ताभ्यां निप्राभ्यां परस्य हिंसार्थस्य हन्ते-र्व्याप्यं कर्म्म वा स्यात्। चौरस्य चौरं वा निप्रहन्ति। हिंसायामित्येव। रागादीन्निहन्ति॥ १५॥

विनिमेयद्यूतपणं पणिव्यवह्रोः। २। २। १६।

विनिमेयः क्रयविक्रयोऽर्थः द्यूतपणो द्यूतजेयं तौ पणिव्यवह्रोर्व्याप्यौ वा कर्म्म स्याताम्। शतस्य शतं वा पणायति। दशानां दश वा व्यवहरति। विनिमेयद्यूतपणमिति किम्। साधून् पणायति॥ १६॥

उपसर्गाद्दिवः। २। २। १७।

उपसर्गात् परस्य दिवो व्याप्यौ विनिमेयद्यूतपणौ वा कर्म्म स्याताम्। शतस्य शतं वा प्रदीव्यति। उपसर्गादिति किम्। शतस्य-दीव्यति॥ १७॥

न। २। २। १८।

अनुपसर्गस्य दिवो व्याप्यौ विनमेयद्यूतपणौ कर्म्म न स्याताम् । शतस्य दीव्यति ॥ १८

करणं च । २ । २ । १९ ।

दिवः करणं कर्म्म करणं च युगपत् स्यात् । अक्षान् दीव्यति । अक्षैर्दीव्यति । अक्षैर्देवयते मैत्रश्चैत्रेण ॥ १९ ॥

अधेः शीङ्स्थास आधारः । २ । २ । २० ।

अधेः संबद्धानां शीङ्स्थासामाधारः कर्म्म स्यात् । ग्राममधिशेते । अधितिष्ठति अध्यास्ते वा ॥ २० ॥

उपान्वध्याङ्वसः । २ । २ । २१ ।

उपादिविशिष्टस्य वसतेराधारः कर्म्म स्यात् । ग्राममुपवसति । अनुवसति । अधिवसति । आवसति ॥ २१ ॥

वाऽभिनिविशः । २ । २ । २२ ।

अभिनिभ्यामुपसृष्टस्य विशेराधारः कर्म वा स्यात् । ग्राममभिनिविशते । कल्याणे अभिनिविशते ॥ २२ ॥

कालाध्वभावदेशं वा कर्म्म चाकर्म्मणाम् । २ । २ । २३ ।

कालादिराधारोऽकर्मणां धातूनां योगे कर्म्माकर्म्म च युगपद्वा स्यात् । मासमास्ते । क्रोशं शेते । गोदोहमास्ते । कुरूनास्ते । पक्षे । मासे आस्ते इत्यादि । अकर्मचेति किम् । मासमास्यते । अकर्मणामिति किम् । रात्रावुद्देशोऽधीतः ॥ २३ ॥

साधकतमं करणम् । २ । २ । २४ ।

क्रियायां प्रकृष्टोपकारकं करणं स्यात्। दानेन भोगानाप्नोति ॥

कर्म्माभिप्रेयः संप्रदानम्।२।२।२५।

कर्म्मणा व्याप्येन क्रियया वा यमभिप्रेयते स सम्प्रदानं स्यात्। देवाय बलिं दत्ते। राज्ञे कार्यमाचष्टे। पत्ये शेते ॥ २५ ॥

स्पृहेर्व्याप्यं वा।२।२।२६।

स्पृहेर्व्याप्यं वा संप्रदानं स्यात्। पुष्पेभ्यः पुष्पाणि वा स्पृहयति ॥

क्रुद्द्रुहेर्ष्यासूयार्थैर्यं प्रतिकोपः।२।२।२७।

क्रुधाद्यर्थैर्धातुभिर्योगे यं प्रतिकोपस्तत् सम्प्रदानं स्यात्। मैत्राय क्रुध्यति द्रुह्यति ईर्ष्यति असूयति वा। यं प्रतीति किम्। मनसा क्रुध्यति। कोप इति किम्। शिष्यस्य कुप्यति विनयार्थम् ॥ २७ ॥

नोपसर्गात् क्रुद्द्रुहा।२।२।२८।

सोपसर्गाभ्यां क्रुद्द्रुहिभ्यां योगे यं प्रतिकोपस्तत्संप्रदानं न स्यात्। मैत्रमभिक्रुध्यति अभिद्रुह्यति। उपसर्गादिति किम्। मैत्राय क्रुध्यति द्रुह्यति ॥ २८ ॥

अपायेऽवधिरपादानम्।२।२।२९।

अपाये विश्लेषे योऽवधिस्तदपादानं स्यात्। वृक्षात् पर्णं पतति। व्याघ्राद्बिभेति। अधर्म्माज्जुगुप्सते विरमति वा। धर्मात्प्रमाद्यति। चौरेभ्यस्त्रायते। अध्ययनात् पराजयते। यवेभ्यो गां रक्षति। उपाध्यायादन्तर्द्धत्ते। शृङ्गाच्छरो जायते। हिमवतो गंगा प्रभवति। वलभ्याः श्रीशत्रुञ्जयः षड् योजनानि। कार्त्तिक्या आग्रहायणी मासे। चैत्रात् मैत्रः पटुः। माथुराः पाटलिपुत्रकेभ्य आढ्यतराः ॥ २९ ॥

क्रियाश्रयस्याधारोऽधिकरणम् ।२।२।३०।

क्रियाश्रयस्य कर्तुः कर्म्मणो वाऽऽधारोऽधिकरणं स्यात् । कटे आस्ते । स्थाल्यां तण्डुलान् पचति ॥ ३० ॥

नाम्नः प्रथमैकद्विबहौ ।२। २ ।३१।

एकद्विबहावर्थमात्रे वर्त्तमानान्नाम्नः परा यथासंख्यं सि औ जस्-लक्षणा प्रथमा स्यात् । डित्थः। गौः। शुक्लः। कारकः। दण्डी ॥ ३१ ॥

आमन्त्र्ये । २।२।३२।

आमन्त्र्यार्थवृत्तेर्नाम्नः प्रथमा स्यात्। हे देव। आमन्त्र्य इति किम्। राजा भव ॥ ३२ ॥

गौणात्समयानिकषाहाधिगन्तरान्तरे-णातियेनतेनैर्द्वितीया ।२।२।३३।

समयादिभिर्युक्ताद् गौणान्नाम्न एकद्विबहौ यथासंख्यममाशंसिति द्वितीया स्यात् । समयाग्रामम् । निकषा गिरिं नदी । हा मैत्रं व्याधिः। धिग्जालमम्। अन्तराऽन्तरेण च निषधं निलं च विदेहाः।अन्तरेण धर्म्मं सुखं न स्यात् । अतिवृद्धं कुरून् महद्बलम्। येनपश्चिमां गतः । तेन पश्चिमां नीतः ॥ ३३ ॥

द्वित्वेधोध्युपरिभिः ।२।२।३४।

द्विरुक्तैरेभिर्युक्तान्नाम्नो द्वितीया स्यात्। अधोऽधो ग्रामम्। अध्यऽधि-ग्रामम् । उपर्युपरि ग्रामं ग्रामाः । द्वित्व इति किम्। अधो गृहस्य ॥३४॥

सर्वोभयाभिपरिणा तसा ।२।२।३५।

सर्वादिभिस्तसन्तैर्युक्तान्नाम्ना द्वितीया स्यात्। सर्वतः। उभयतः। अभितः परितो वा ग्रामं वनानि ॥ ३५ ॥

लक्षणवीप्स्येत्थम्भूतेष्वभिना ।२।२।३६।

लक्षणं चिह्नम्। वीप्साकर्म्म वीप्स्यम्। इत्थम्भूतः किञ्चित्प्रकारमापन्नः। एषुवर्त्तमानादभिनायुक्ताद्द्वितीया स्यात्। वृक्षमभिविद्युत्। वृक्षं वृक्षमभिसेकः। साधुर्मैत्रो मातरमभि। लक्षणादिष्विति किम्। यदत्र ममाभि स्यात्तद्दीयताम् ॥ ३६ ॥

भागिनि च प्रतिपर्यनुभिः। २।२।३७।

स्वीकार्योंऽशो भागस्तत्स्वामी भागी तत्र लक्षणादिषु च वर्त्तमानात् प्रत्यादिभिर्युक्ताद्द्वितीया स्यात्। यदत्र मां प्रति मां परि मामनु स्यात्तद्दीयताम्। वृक्षं प्रति परि अनु वा विद्युत्। वृक्षंवृक्षं प्रति परि अनु वा सेकः। साधुर्मैत्रो मातरं प्रति परि अनु वा॥ एतेष्विति किम्। अनु वनस्याऽशनिर्गता ॥ ३७ ॥

हेतुसहार्थेऽनुना । २ । २ । ३८।

हेतुर्जनकः। सहार्थस्तुल्ययोगो विद्यमानता च। तद्विषयोप्युपचारात्। तयोर्वर्त्तमानादनुना युक्ताद्द्वितीया स्यात्। जिनजन्मोत्सवमन्वागच्छन् सुराः। गिरिमन्वासिता सेना ॥ ३८ ॥

उत्कृष्टेऽनूपेन । २ । २ ३९ ।

उत्कृष्टार्थादनूपाभ्यां युक्ताद्द्वितीया स्यात्। अनुसिद्धसेनं कवयः। उपोमास्वातिं संग्रहीतारः ॥ ३९ ॥

कर्म्मणि । २ । २ । ४० ।

नाम्नः कर्म्मणि द्वितीया स्यात्। कटं करोति। तण्डुलान् पचति। रविं पश्यति। अजां नयति ग्रामम्। गां दोग्धि पयः ॥ ४० ॥

क्रियाविशेषणात् । २ । २ । ४१ ।

क्रियाया यद्विशेषणं तद्वाचिनो द्वितीया स्यात् । स्तोकं पचति । सुखं स्थाता ॥ ४१ ॥

कालाध्वनोर्व्याप्तौ । २ । २ । ४२ ।

व्याप्तिरत्यन्तसंयोगः । व्याप्तौ द्योत्यायां कालाध्ववाचिभ्यां द्वितीया स्यात् । मासं गुडधानाः कल्याणी अधीते वा । क्रोशं गिरिः कुटिला नदी क्रोशमधीते वा । व्याप्ताविति किम् । मासस्य मासे वा द्व्यहं गुडधानाः । क्रोशस्य क्रोशे वा एकदेशे कुटिला नदी ॥ ४२ ॥

सिद्धौ तृतीया । २ । २ । ४३ ।

सिद्धौ फलनिष्पत्तौ द्योत्यायां कालाध्ववाचिभ्यां टाभ्यांभिस्लक्षणा तृतीया यथासंख्यमेकद्विबहौ स्यात् । मासेन मासाभ्यां मासैर्वा आवश्यकमधीतम् । क्रोशेन क्रोशाभ्यां क्रोशैर्वा प्राभृतमधीतम् । सिद्धाविति किम् । मासमधीत आचारो नतु गृहीतः ॥ ४३ ॥

हेतुकर्तृकरणेत्थम्भूतलक्षणे । २ । २ । ४४ ।

फलसाधनयोग्यो हेतुः । किञ्चित्प्रकारमापन्नस्य चिह्नं इत्थम्भूतलक्षणं हेत्वादिवृत्तेर्नाम्नस्तृतीया स्यात् । धनेन कुलम् । चैत्रेण कृतम् । दात्रेण लुनाति । अपि त्वं कमण्डलुना च्छात्रमद्राक्षीः ४४ ॥

सहार्थे । २ । २ । ४५ ।

सहार्थे तुल्ययोगे विद्यमानतायां च गम्यमाने नाम्नस्तृतीया स्यात् । पुत्रेण सहागतः । स्थूलो गोमान् ब्राह्मणो वा । एकेनापि सुपुत्रेण सिंही स्वपिति निर्भयम् । सहैव दशभिः पुत्रैर्भारं वहति गर्दभी ॥

यद्भेदैस्तद्वदाख्या । २ । २ । ४६ ।

यस्य भेदिनो भेदैः प्रकारैस्तद्वतोऽर्थस्याख्यानिर्देशः स्यात्। तद्वाचिनस्तृतीया स्यात्। अक्ष्णा काणः। पादेन खञ्जः। प्रकृत्या दर्शनीयः। तद्वद्ग्रहणं किम्। अक्षिकाणं पश्य। आख्येति प्रसिद्धिपरिग्रहार्थम्। तेनाक्ष्णा दीर्घ इति न स्यात् ॥ ४६ ॥

कृताद्यैः । २। २। ४७।

कृताद्यैर्निषेधार्थैर्युक्तात्तृतीया स्यात्। कृतं तेन। किं गतेन ॥ ४७॥

काले भान्नवाधारे । २। २। ४८।

कालवृत्तेर्नक्षत्रार्थादाधारे तृतीया वा स्यात्। पुष्येण पुष्ये वा पायसमश्नीयात्। काल इति किम्। पुष्योऽर्कः। भादिति किम्। तिलपुष्येषु यत्क्षीरम्। आधार इति किम्। अद्य पुष्यं विद्धि ॥ ४८ ॥

प्रसितोत्सुकाऽवबद्धैः । २। २। ४९।

एतैर्युक्तादाधारवृत्तेस्तृतीया वा स्यात्। केशैः केशेषु वा प्रसितः। गृहेण गृहे वा उत्सुकः। केशैः केशेषु वाऽवबद्धः ॥ ४९ ॥

व्याप्ये द्विद्रोणादिभ्यो वीप्सायाम्। २। २। ५०।

व्याप्यवृत्तिभ्यो द्विद्रोणादिभ्यो वीप्सायां तृतीया वा स्यात्। द्विद्रोणेन द्विद्रोणं द्विद्रोणं वा धान्यं क्रीणाति। पञ्चकेन पञ्चकं पञ्चकं वा पशून् क्रीणाति ॥ ५० ॥

समो ज्ञोऽस्मृतौ वा । २। २। ५१।

अस्मृत्यर्थस्य सञ्जानातेर्यद्व्याप्यं तद्वृत्तेस्तृतीया वा स्यात्। मात्रा मातरं वा सञ्जानीते। अस्मृताविति किम्। मातरं सञ्जानाति॥

दामः संप्रदानेऽधर्म्ये आत्मने च २।२।५२।

सम्पूर्वस्य दाम: सम्प्रदानेऽधर्म्ये वर्त्तमानात्तृतीया स्यात् । तत्सन्नियोगे च दाम आत्मनेपदम् । दास्या संप्रयच्छते कामुकः । अधर्म्य इति किम् । पत्न्यै संप्रयच्छति ॥ ५२ ॥

चतुर्थी । २ । २ । ५३ ।

संप्रदाने वर्त्तमानादेकद्विबहौ यथासंख्यं ङेभ्यांभ्यस्लक्षणा चतुर्थी स्यात् । द्विजाय गां दत्ते । पत्ये शेते ॥ ५३ ॥

तादर्थ्ये । २ । २ । ५४ ।

तस्मा इदं तदर्थम् । तद्भावे सम्बन्धविशेषे द्योत्ये च चतुर्थी स्यात् । यूपाय दारु । रन्धनाय स्थाली ॥ ५४ ॥

रुचिकृप्यर्थधारिभिः प्रेयविकारोत्तमर्णेषु । २ । २ । ५५ ।

रुच्यर्थैः कृप्यर्थैर्धारिणा च योगे यथासंख्यं प्रेयविकारोत्तमर्णवृतेश्चतुर्थी स्यात् । मैत्राय रोचते धर्म्मः । मूत्राय कल्पते यवागूः । चैत्राय शतं धारयति ॥ ५५ ॥

प्रत्याङः श्रुवार्थिनि । २ । २ ५६ ।

प्रत्याङ्भ्यां परेण श्रुवा युक्तादर्थिन्यभिलाषुके वर्त्तमानाच्चतुर्थी स्यात् । द्विजाय गां प्रतिशृणोति आशृणोति वा ॥ ५६ ॥

प्रत्यनोर्गृणा ख्यातरि । २ । २ । ५७ ।

प्रत्यनुभ्यां परेण गृणायोगे आख्यातृवृत्तेश्चतुर्थी स्यात । गुरवे प्रतिगृणाति । अनुगृणाति ॥ ५७ ॥

यद्वीक्ष्ये राधीक्षी । २ । २ । ५८ ।

वीक्ष्यं विमतिपूर्वकं निरूप्यं तद्विषया क्रियापि यस्य वीक्ष्ये राधीक्षी वर्त्तेते तद्वृतेश्चतुर्थी स्यात् । मैत्राय राध्यति ईक्षते वा । ईक्षितव्यं परस्त्रीभ्यः । वीक्ष्य इति किम् । मैत्रमीक्षते ॥ ५८ ॥

उत्पातेन ज्ञाप्ये । २ । २ । ५९ ।

उत्पात आकस्मिकं निमित्तम् । तेन ज्ञाप्ये वर्तमानाच्चतुर्थी स्यात् । वाताय कपिला विद्युत् आतपायातिलोहिनी । पीता वर्षाय विज्ञेया दुर्भिक्षाय सिता भवेत ॥ १ ॥ उपत्पातेनेति किम् । राज्ञ इदं छत्रमायान्तं विद्धि राजानम् ॥ ५९ ॥

श्लाघह्नुस्थाशपा प्रयोज्ये । २ । २ । ६० ।

श्लाघादिभिर्द्धातुभिर्युक्तात् ज्ञाप्ये प्रयोज्ये वर्तमानाच्चतुर्थी स्यात् । मैत्राय श्लाघते । ह्नुते । तिष्ठते । शपते । प्रयोज्य इति किम् । मैत्रायात्मानं श्लाघते । आत्मनो मा भूत् ॥ ६० ॥

तुमोर्थे भाववचनात् । २ । २ । ६१ ।

क्रियायां क्रियार्थायामुपपदे तुम् वक्ष्यते तस्यार्थे ये भाववाचिनो घञाद्यस्तदन्तात् स्वार्थे चतुर्थी स्यात् । पाकाय इज्यायै वा व्रजति । तुमोर्थ इति किम् । पाकस्य । भाववचनादिति किम् । पक्ष्यतीति पाचकस्य व्रज्या ॥ ६१ ॥

गम्यस्याप्ये । २ । २ । ६२ ।

यस्यार्थो गम्यते नचासौ प्रयुज्यते सगम्यः । गम्यस्य तुमोव्याप्ये वर्त्तमानाच्चतुर्थी स्यात् । एधेभ्यः फलेभ्यो वा व्रजति । गम्यस्येति किम् । एधानाहर्तुं याति ॥ ६२ ॥

गतेर्नवानाप्ते । २ । २ । ६३ ।

गतिः पादविहरणं तस्या आप्येऽनाप्ते वर्तमानाच्चतुर्थी वा स्यात् । ग्रामं ग्रामाय वा याति । विप्रनष्टः पन्थानं पथे वा याति । गतेरिति किम् । स्त्रियं गच्छति । मनसा मेरुं गच्छति । अनाप्त इति किम् । संप्राप्ते माभूत् । पन्थानं याति ॥ ६३ ॥

मन्यस्यानावादिभ्योऽतिकुत्सने।२।२।६४।

अतीव कुत्स्यते येन तदतिकुत्सनं तस्मिन् मन्यतेर्व्याप्ये वर्तमानान्नावादिवर्जाच्चतुर्थी वा स्यात् । न त्वा तृणाय तृणं वा मन्ये । मन्यस्येति किम् । न त्वा तृणं मन्वे । अनावादिभ्य इति किम् । न त्वा नावं अन्नं शुकं शृगालं काकं वा मन्ये । कुत्सन इति किम् । न त्वारत्नं मन्ये । करणाश्रयणं किम् । न त्वा तृणाय मन्ये । युष्मदोमाभूत् । अतीति किम् । त्वां तृणं मन्ये ॥ ६४ ॥

हितसुखाभ्याम् । २ । २।६५।

आभ्यां युक्ताच्चतुर्थी वा स्यात् । आमयाविने आमयाविनो वा हितम् । चैत्राय चैत्रस्य वा सुखम् ॥ ६५ ॥

तद्भद्रायुष्यक्षेमार्थार्थेनाशिषि ।२।२।६६।

तदिति हितसुखयोः परामर्शः । हिताद्यर्थैर्युक्तादाशिषि गम्यायां चतुर्थी वा स्यात् । हितं पथ्यं वा जीवेभ्यो जीवानां वा भूयात् । सुखं शं शर्म वा प्रजाभ्यः प्रजानां वा भूयात् । भद्रमस्तु श्रीजिनशासनाय श्रीजिनशासनस्य वा । आयुष्यमऽस्तु चैत्राय चैत्रस्य वा । क्षेमं भूयात् कुशलं निरामयं वा श्रीसङ्घाय श्रीसङ्घस्य वा । अर्थः कार्यं प्रयोजनं वा भूयान्मैत्राय मैत्रस्य वा ॥ ६६ ॥

परिक्रयणे । २ । २ । ६७ ।

परिक्रीयते नियतकालं स्वीक्रियते येन तस्मिन् वर्तमानाच्चतुर्थी वा स्यात् । शताय शतेन वा परिक्रीतः ॥ ६७ ॥

शक्तार्थवषड्नमः स्वस्तिस्वाहास्वधाभिः। २।२।६८।

शक्तार्थैर्वषडादिभिश्चयुक्ताच्चतुर्थी नित्यं स्यात्। शक्तः प्रभुर्वा मल्लो मल्लाय। वषडग्नये। नमोऽर्हद्भ्यः। स्वस्ति प्रजाभ्यः। स्वाहेन्द्राय। स्वधा-पितृभ्यः॥ ६८॥

पञ्चम्यपादाने। २। २। ६९।

अपादाने एकद्विबहौ यथासंख्यं ङसिभ्यांभ्यस्लक्षणा पञ्चमी स्यात्। ग्रामाद् गोदोहाभ्यां वनेभ्यो वा आगच्छति॥ ६९॥

आङावधौ। २। २। ७०।

अवधिर्मर्यादा अभिविधिश्च तद्वृत्तेराङा युक्तात् पञ्चमी स्यात्। आपाटलिपुत्राद् वृष्टो मेघः॥ ७०॥

पर्यपाभ्यां वर्ज्ये। २। २। ७१।

वर्ज्ये वर्जनीयेऽर्थे वर्त्तमानात् पर्यपाभ्यां युक्तात् पञ्चमी स्यात्। परि अप वा पाटलिपुत्राद् वृष्टो मेघः। वर्ज्य इति किम्। अपशब्दो मैत्रस्य॥ ७१॥

यतः प्रतिनिधिप्रतिदाने प्रतिना।२।२।७२।

प्रतिनिधिर्मुख्यसदृशोऽर्थः प्रतिदानं गृहीतस्य विशोधनं ते यतः स्यातां तद्वाचिनः प्रतिना योगे पञ्चमी स्यात्। प्रद्युम्नो वासुदेवात् प्रति। तिलेभ्यः प्रतिमाषानस्मै प्रयच्छति॥ ७२॥

आख्यातर्युपयोगे। २। २। ७३।

आख्याता प्रतिपादयिता तद्वाचिनः पञ्चमी स्यात् उपयोगे नियमपूर्वकविद्याग्रहणविषये। उपाध्यायादधीते आगमयति वा। उपयोग इति किम्। नटस्य शृणोति। ७३॥

गम्ययपः कर्माधारे । २ । २ । ७४ ।

गम्यस्याप्रयुज्यमानस्य यबन्तस्य कर्माधारवाचिनः पञ्चमी स्यात् । प्रासादादासनाद्वा प्रेक्षते । गम्यग्रहणं किम् । प्रासादमारुह्य शेते । आसने उपविश्य भुङ्क्ते ॥ ७४ ॥

प्रभृत्यन्यार्थदिक्शब्दबहिरारादि-तरैः ।२।२।७५।

प्रभृत्यर्थैरन्यार्थैर्दिक्शब्दैर्बहिरादिभिश्च युक्तात् पञ्चमी स्यात् । ततः प्रभृति । ग्रीष्मादारभ्य । अन्यो भिन्नो वा मैत्रात् । ग्रामात् पूर्वस्यां दिशि वसति । उत्तरो विन्ध्यात् पारियात्रः । पश्चिमो रामाद् युधिष्ठिरः । बहिरारादितरो वा ग्रामात् ॥ ७५ ॥

ऋणाद्धेतोः ।२।२।७६।

हेतुभूतऋणवाचिनः पञ्चमी स्यात्। शताद् बद्धः।हेतोरिति किम्। शतेन बद्धः ७६ ॥

गुणादस्त्रियां नवा ।२।२।७७।

अस्त्रीवृत्तेर्हेतुभूतगुणवाचिनः पञ्चमी वा स्यात् । जाड्याज्-जाड्येन वा बद्धः । ज्ञानात् ज्ञानेन वा मुक्तः । अस्त्रियामिति किम् । बुद्ध्या मुक्तः ॥ ७७ ॥

आरादर्थैः । २ । २ । ७८ ।

आराद्दूरमन्तिकं च तदर्थैर्युक्तात् पञ्चमी वा स्यात् । दूरं विप्रकृष्टं वा ग्रामाद् ग्रामस्य वा। अन्तिकमभ्यासं वा ग्रामाद् ग्रामस्य वा॥७८॥

स्तोकाल्पकृच्छ्रकतिपयादसत्त्वे करणे । २ । २ । ७९ ।

यतो द्रव्ये शब्दप्रवृत्तिः सगुणोऽसत्त्वं तेनैव वा रूपेणाभिधीयमानं द्रव्यादि तस्मिन् करणे वर्त्तमानेभ्यः स्तोकादिभ्यः पञ्चमी वा स्यात्। स्तोकात् स्तोकेन वा। अल्पादल्पेन वा। कृच्छ्रात् कृच्छ्रेण वा। कतिपयात्कतिपयेन वा मुक्तः। असत्त्वइति किम्। स्तोकेन विषेण हतः॥

अज्ञाने ज्ञः षष्ठी। २। २। ८०।

अज्ञानार्थस्य ज्ञो यत्करणं तद्वाचिन एकद्विबहौ यथासंख्यं ङसोसांलक्षणा षष्ठी नित्यं स्यात्। सर्पिषः सर्पिषोः सर्पिषां वा जानीते। अज्ञान इति किम्। स्वरेण पुत्रं जानाति। करण इत्येव। तैलं सर्पिषो जानाति॥ ८०॥

शेषे। २। २। ८१।

कर्म्मादिभ्योऽन्यस्तदविवक्षारूपः स्वस्वामिभावादिसम्बन्धः विशेषः शेषस्तत्र षष्ठी स्यात्। राज्ञः पुरुषः। उपगोरपत्यम्। माषाणामश्नीयात्॥

रिरिष्टात्स्तादस्तादसतसाता। २। २। ८२।

एतत्प्रत्ययान्तैर्युक्तात् षष्ठी स्यात्। उपरि ग्रामस्य। उपरिष्टात्। परस्तात्। पुरस्तात्। पुरः। दक्षिणतः। उत्तराद्वा ग्रामस्य॥ ८२॥

कर्म्मणि कृतः। २। २। ८३।

कृदन्तस्य कर्म्मणि षष्ठी स्यात्। अपां स्रष्टा। गवां दोहः। कर्मणीति किम्। शस्त्रेण भेत्ता। स्तोकं पक्ता। कृत इति किम्। भुक्तपूर्वी ओदनम्॥ ८३॥

द्विषो वाऽतृशः। २। २। ८४।

अतृशन्तस्य द्विषः कर्म्मणि षष्ठी वा स्यात्। चौरस्य चौरं वा द्विषन्॥ ८४॥

वैकत्रद्वयोः २। २। ८५।

द्विकर्म्मकेषु धातुषु कृत्प्रत्ययान्तेषु द्वयोः कर्म्मणोरेकतरस्मिन् षष्ठी वा स्यात्। अजाया नेता स्रुघ्नं स्रुघ्नस्य वा। अथवा अजां अजाया वा नेता स्रुघ्नस्य ॥ ८५ ॥

कर्त्तरि। २। २। ८६।

कृदन्तस्य कर्त्तरि षष्ठी स्यात्। भवत आसिका। कर्त्तरीति किम्। गृहे शायिका ॥ ८६ ॥

द्विहेतोरस्त्र्यणकस्य वा।२।२।८७।

स्त्र्यधिकारविहिताभ्यामणकाभ्यामन्यस्य द्वयोः कर्तृकर्मषष्ठ्यो-र्हेतोः कृतः कर्त्तरि षष्ठी वा स्यात्। विचित्रा सूत्राणां कृतिराचार्यस्य आचार्येण वा। द्विहेतोरित्येकवचनं किम्। आश्चर्यमोदनस्य पाकोऽतिथीनां च प्रादुर्भावः। अस्त्र्यणकस्येति किम्। चिकीर्षा मैत्रस्य काव्यानाम्। भेदिका चैत्रस्य काष्ठानाम् ॥ ८७ ॥

कृत्यस्य वा। २। २। ८८।

कृत्यस्य कर्त्तरि षष्ठी वा स्यात्। त्वया तव वा कृत्यः कटः ॥ ८८ ॥

नोभयोर्हेतोः। २। २। ८९।

उभयोः कर्तृकर्म्मणोः षष्ठीहेतोः कृत्यस्योभयोरेव षष्ठी न स्यात्। नेतव्या ग्राममजा मैत्रेण ॥ ८९ ॥

तृन्नुदन्ताव्ययक्वसानातृशतृङिणकच्-खलर्थस्य। २। २। ९०।

तृन्नादीनां कृतां कर्मकर्त्रोः षष्ठी न स्यात्। तृन्। वदिता जनापवादान्। उदन्तः। कन्यामलङ्कारिष्णुः। श्रद्धालुस्तत्त्वम्। अव्ययम्। कटं कृत्वा। ओदनं भोक्तुं व्रजति। क्वसुः। ओदनं पेचिवान्। आनः। कटं चक्राणः

मलयं पवमानः ओदनं पचमानः चैत्रेण पच्यमानः । अतृश् । अधीयंस्तत्त्वार्थम् । शतृ । कटं कुर्वन् । ङि । परिषहान् सासहिः । णकच् । कटं कारको व्रजति । खलर्थः । ईषत्करः कटो भवता । सुज्ञानं तत्त्वं त्वया ॥

क्तयोरसदाधारे । २ । २ । ९१ ।

सतो वर्त्तमानादाधाराच्चान्यत्रार्थे यौ क्तक्तवतू तयोः कर्मकर्त्रोः षष्ठी न स्यात् । कटः कृतो मैत्रेण । ग्रामं गतवान् । असदाधार इति किम् । राज्ञां पूजितः । इदं सक्तूनां पीतम् ॥ ९१ ॥

वा क्लीबे । २ । २ । ९२ ।

क्लीबे विहितस्य क्तस्य कर्त्तरि षष्ठी वा स्यात् । मयूरस्य मयूरेण वा नृत्तम् ॥ ९२ ॥

अकमेरुकस्य । २ । २ । ९३ ।

कमेरन्यस्योकप्रत्ययान्तस्य कर्म्मणि षष्ठी न स्यात् । भोगानऽभिलाषुकः । अकमेरितिकिम् । दास्याः कामुकः ॥ ९३ ॥

एष्यदृणेनः । २ । २ । ९४ ।

एष्यत्यर्थे ऋणे च विहितस्येनः कर्म्मणि षष्ठी न स्यात् । ग्रामं गमी आगामी वा । शतं दायी । एष्यदृणेति किम् । साधु दायी वित्तस्य॥

सप्तम्यधिकरणे । २ । २ । ९५ ।

अधिकरणे एकद्विबहौ यथासंख्यं ङ्योस्सुपरूपा सप्तमी स्यात् । कटे आस्ते । दिवि देवाः । तिलेषु तैलम् ॥ ९५ ॥

नवासुजर्थैः काले । २ । २ । ९६ ।

सुचोऽर्थो वारो येषां तत्प्रत्ययान्तैर्युक्तात् कालेऽधिकरणे वर्तमानात् सप्तमी वा स्यात् । द्विरह्नि अह्नो वा भुङ्क्ते । पञ्चकृत्वो मासे मासस्य वा भुङ्क्ते । काल इति किम् । द्विः कांस्यपात्र्यां भुङ्क्ते॥९६॥

कुशलायुक्तेनासेवायाम् । २ । २ । ९७ ।

आभ्यां युक्तादाधारवाचिनः सप्तमी वा स्यात् आसेवायां तात्पर्ये । कुशलो विद्यायां विद्याया वा । आयुक्तस्तपसि तपसो वा । आसेवायामिति किम् । कुशलश्चित्रे नतु करोति । आयुक्तो गौः शकटे आकृष्ययुक्त इत्यर्थः ॥ ९७ ॥

स्वामीश्वराधिपतिदायादसाक्षिप्रतिभू-प्रसूतैः । २ । २ । ९८ ।

एभिर्युक्तात् सप्तमी वा स्यात् । गोषु गवां वा स्वामी । ईश्वरः । अधिपतिः । दायादः । साक्षी । प्रतिभूः । प्रसूतो वा ॥ ९८ ॥

व्याप्ये क्ते नः । २ । २ । ९९ ।

क्ताद्यइन् तदन्तस्य व्याप्ये सप्तमी नित्यं स्यात् । अधीतमनेन अधीती व्याकरणे । इष्टी यज्ञे । क्तेनेति किम् । कृतपूर्वी कटम् ॥ ९९ ॥

तद्युक्ते हेतौ । २ । २ । १०० ।

तेन व्याप्येन युक्ते हेतौ वर्त्तमानात् सप्तमी स्यात् । चर्म्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम् । केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः १ तद्युक्त इति किम् । वेतनेन धान्यं लुनाति ॥ १०० ॥

अप्रत्यादावसाधुना । २ । २ । १०१ ।

प्रत्यादेरप्रयोगे असाधुशब्देन युक्तात् सप्तमी स्यात् । असाधुर्मैत्रो मातरि । अप्रत्यादाविति किम् । असाधुर्मैत्रो मातरं प्रति परिअनु- अभि वा ॥ १०१ ॥

साधुना । २ । २ । १०२ ।

अप्रत्यादौ साधुशब्देन युक्तात् सप्तमी स्यात् । साधुर्मैत्रो मातरि । अप्रत्यादावित्येव । साधुर्मातरं प्रति परि अनु अभि वा ॥ १०२॥

निपुणेन चार्चायाम् । ।२।२।१०३।

निपुणसाधुशब्दाभ्यां युक्तादऽप्रत्यादौ सप्तमी स्यात् अर्चायाम् । मातरिनिपुणः साधुर्वा । अर्चायामिति किम् । निपुणो मैत्रो मातुः। मातैवैनं निपुणं मन्यत इत्यर्थः । अप्रत्यादावित्येव । निपुणो मैत्रो मातरं प्रति परि अनु अभिवा ॥ १०३ ॥

स्वेशे ऽधिना ।२। २। १०४।

स्वे ईशितव्ये ईशे च वर्त्तमानादधिना युक्तात् सप्तमी स्यात् । अधिमगधेषु श्रेणिकः । अधिश्रेणिके मगधाः ॥ १०४॥

उपेनाऽधिकिनि । २।२।१०५।

उपेन युक्तादधिकिनि वाचिनः सप्तमी स्यात् । उपखार्यां द्रोणः॥

यद्भावो भावलक्षणम् । २।२।१०६।

भावः क्रिया यस्यभावेन अन्यो भावो लक्ष्यते तद्वाचिनः सप्तमी स्यात् । गोषु दुह्यमानासु गतः ॥ १०६ ॥

गतेगम्येध्वनोन्तेनैकार्थ्यं वा ।२।२।१०७।

कुतश्चिदवधेर्विवक्षितस्याध्वनो ऽवसानमन्तः यद्भावो भावलक्षणं तस्याध्वनो ऽध्वन एवान्तेनान्तवाचिना सहैकार्थ्यं सामानाधिकरण्यं वा स्यात् तद्विभक्तिस्तस्मात् स्यादित्यर्थः । गते गम्ये ऽप्रयुज्यमाने । गवीधुमतः सांकाश्यं चत्वारि योजनानि चतुर्षु वा योजनेषु । गत इति किम् । दग्धेषु लुप्तेष्विति वा प्रतितौ मा भूत्। गम्य इति किम् । गतप्रयोगे माभूत् । अध्वन इति किम् । कार्तिक्या आग्रहायणी मासे । अन्तेनेति किम् । अध्वनश्चतुर्षु गव्यूतेषु भोजनम् ॥ १०७ ॥

षष्ठी वा ऽनादरे । २ । २ । १०८ ।

यद्भावो भावलक्षणं तद्वृत्तेरनादरे षष्ठी वा स्यात् । रुदतो लोकस्य रुदति लोके वा प्राव्राजीत् ॥ १०८ ॥

सप्तमी चाविभागे निर्द्धारणे ।२।२।१०९।

जातिगुणक्रियादिभिः समुदायादेकदेशस्य बुद्ध्या पृथक्करणं निर्द्धारणम् । तस्मिन् गम्ये षष्ठीसप्तम्यौ स्याताम् । अविभागे निर्द्धार्यमाणैकदेशस्य समुदायेन सह कथञ्चिदैक्ये शब्दद्गाम्यमाने । क्षत्रियो नृणां नृषु वा शूरः। कृष्णा गवां गोषु वा बहुक्षीरा । धावन्तो यातां यात्सु वा शीघ्रतमाः। युधिष्ठिरः श्रेष्ठतमः कुरुणां कुरुषु वा । अविभाग इति किम्। मैत्रश्चैत्रात् पटुः ॥ १०९ ॥

क्रियामध्येऽध्वकाले पञ्चमी च ।२।२।११०।

क्रिययोर्मध्ये यावध्वकालौ तद्वाचिभ्यां पञ्चमीसप्तम्यौ स्याताम् । इहस्थोऽयमिष्वासः क्रोशात् क्रोशे वा लक्ष्यं विध्यति । अद्यभुक्त्वा मुनिर्द्व्यहात् द्व्यहे वा भोक्ता ॥ ११० ॥

अधिकेन भूयसस्ते । २। २। १११।

अधिकेनाऽल्पीयोवाचिना योगे भूयोवाचिनस्ते सप्तमीपञ्चम्यौ स्याताम् । अधिको द्रोणः खार्यां खार्या वा ॥ १११ ॥

तृतीयाल्पीयसः ।२।२।११२।

अधिकेन भूयोवाचिना योगे ऽल्पीयोवाचिनस्तृतीयास्यात् । अधिका खारी द्रोणेन ॥ ११२ ॥

पृथग् नाना पञ्चमी च । २।२।११३।

आभ्यां युक्तात् पञ्चमी तृतीया च स्यात् । पृथग् मैत्रात् मैत्रेण वा । नाना चैत्राच्चैत्रेण वा ॥११३॥

ऋते द्वितीया च।२।२।११४।

ऋते शब्देन युक्ताद् द्वितीया पञ्चमी च स्यात्। ऋते धर्म्मं धर्म्मात् कुतः सुखम्॥ ११४॥

विना ते तृतीया च।२।२।११५।

विना शब्देन युक्तात्ते द्वितीयापञ्चम्यौ तृतीया च स्यात्। विना वातं वातात् वातेन वा॥ ११५॥

तुल्यार्थैस्तृतीया षष्ठ्यौ।२।२।११६।

तुल्यार्थैर्युक्तात्तृतीयाषष्ठ्यौ स्याताम्। मात्रा मातुर्वा तुल्यः समो वा॥

द्वितीयाषष्ठ्यावेनेनानञ्चेः।२।२।११७।

एनप्रत्ययान्तेन युक्ताद्द्वितीयाषष्ठ्यौ स्याताम्। नचेत्सोऽञ्चेः परः स्यात्। पूर्वेण ग्रामं ग्रामस्य वा। अनञ्चेरिति किम्। प्राग् ग्रामात्॥११७॥

हेत्वर्थैस्तृतीयाद्याः।२।२।११८।

हेतुर्निमित्तं तद्वाचिभिर्युक्तात् तृतीयाद्याः स्युः। धनेन हेतुना। धनाय हेतवे। धनाद्धेतोः। धनस्य हेतोः। धने हेतौ वा वसति। एवं निमित्तादिभिरपि॥ ११८॥

सर्व्वादेः सर्व्वाः।२।२।११९।

हेत्वर्थैर्युक्तात् सर्वादेः सर्वा विभक्तयः स्युः। को हेतुः। कंहेतुम्। केन हेतुना। कस्मै हेतवे। कस्माद्धेतोः। कस्य हेतोः। कस्मिन् हेतौ वा याति॥ ११९॥

असत्त्वारादर्थाट्टाङसिङ्यम्।२।२।१२०।

असत्त्ववाचिनोदूरार्थादन्तिकार्थाचटाङसिङ्यमः स्युः। गौणादिति निवृत्तं। दूरेण दूरात् दूरे दूरं वा ग्रामस्य ग्रामाद्वा वसति। एवं

विप्रकृष्टेनेत्यादि । अन्तिकेन अन्तिकात् अन्तिके अन्तिकं वा । ग्रामस्य ग्रामाद्वा वसति । एवमभ्यासेनेत्यादि । असत्त्वइति किम् । दूरोऽन्तिको वा पन्थाः ॥ १२० ॥

जात्याख्यायां नवैकोऽसंख्यो बहुवत् । २ । २ । १२१ ।

जातेराख्याभिधा तस्यामेकोऽर्थोऽसंख्यः संख्याविशेषणरहितो बहुवद्वा स्यात् । संपन्ना यवाः । संपन्नो यवः । जातीति किम् । चैत्रः । आख्यायामिति किम् । काश्यपप्रतिकृतिः काश्यपः । असंख्य इति किम् । एको व्रीहिः संपन्नः सुभिक्षं करोति ॥ १२१ ॥

अविशेषणे द्वौ चास्मदः । २ । २ । १२२ ।

अस्मदो द्वावेकश्चार्थौ बहुवद्वा स्यात् अविशेषणे न चेत्तस्य विशेषणं स्यात् । आवां ब्रूवः वयं ब्रूमः । अहं ब्रवीमि वयं ब्रूमः । अविशेषण इति किम् । आवां गार्ग्यौ ब्रूवः । अहं चैत्रो ब्रवीमि ॥ १२२ ॥

फल्गुनीप्रोष्ठपदस्यभे । २ । २ । १२३ ।

फल्गुनीप्रोष्ठपदयोर्भेनक्षत्रे वर्त्तमानयोर्द्वावर्थौ बहुवद्वा स्याताम् । कदा पूर्वे फल्गुन्यौ । कदापूर्वाः फल्गुन्यः । कदा पूर्वे प्रोष्ठपदे । कदा पूर्वाः प्रोष्ठपदाः । भइति किम् । फल्गुनीषु जाते फाल्गुन्यौ कन्ये ॥ १२३ ॥

गुरावेकश्च । २ । २ । १२४ ।

गुरौ गौरवार्हे वर्त्तमानस्य द्वावेकश्चार्थौ बहुवद्वा स्यात् । युवां गुरू । यूयं गुरवः । एष मे पिता । एते मे पितरः ॥ १२४ ॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनलघुवृत्तौ द्वितीयस्याध्यायस्य द्वितीयपादः समाप्तः ॥२॥

॥ अर्हँ ॥

नमस्पुरसो गतेः कखपफि रः सः। २।३।१।

गतिसंज्ञयोर्नमस्पुरसोः कखपफि रः सः स्यात्। नमस्कृत्य। पुरस्कृत्य। गतेरिति किम्। नमः कृत्वा। तिस्रः पुरः करोति ॥ १ ॥

तिरसो वा। २। ३। २।

गतेस्तिरसो रस्य कखपफि स् वा स्यात्। तिरस्कृत्य। तिरःकृत्य। गतेरित्येव। तिरःकृत्वा काष्ठं गतः ॥ २ ॥

पुंसः। २। ३। ३।

पुंसः सम्बन्धिनो रस्य कखपफि स् स्यात्। पुंस्कोकिलः। पुंस्खातः। पुंस्पाकः। पुंस्फलम् ॥ ३ ॥

शिरोऽधसः पदे समासैक्ये। २।३।४।

अनयो रेफस्य पदशब्दे परे स् स्यात् समासैक्ये। शिरस्पदम्। अधस्पदम्। समासेति किम्। शिरः पदम्। ऐक्य इति किम्। परमशिरःपदम् ॥ ४ ॥

अतः कृकमिकंसकुम्भकुशाकर्णीपात्रेऽनव्ययस्य। २। ३। ५।

आत्परस्यानव्ययस्य रस्य कादिस्थे कखपफि स् स्यात् समासैक्ये। अयस्कृत्। यशस्कामः। पयस्कंसः। अयस्कुम्भः। अयस्कुशा। अयस्कर्णी। अयस्पात्रम्। अतइति किम्। वाः पात्रम्। अनव्ययस्येति किम्। स्वःकारः। समासैक्य इत्येव। उपपयः कारः ॥ ५ ॥

प्रत्यये। २। ३। ६।

अनव्ययस्य रस्य प्रत्ययविषये कखपफि स् स्यात्। पयस्पाशम्। पयस्कल्पम्। पयस्कम्। अनव्ययस्येत्येव। स्वः पाशम् ॥ ६ ॥

रोः काम्ये । २ । ३ । ७ ।

अनव्ययस्य रस्य रोरेव काम्ये प्रत्यये स् स्यात् । पयस्काम्यति । रोरिति किम् । अहः काम्यति ॥ ७ ॥

नामिनस्तयोः षः । २ । ३ । ८ ।

तयोः प्रत्ययस्थे कखपफि रोरेव काम्ये नामिनः परस्य रस्य ष् स्यात् । सर्पिष्पाशम् । धनुष्कल्पम् । धानुष्कः । सर्पिष्काम्यति । नामिन इति किम् । अयस्कल्पम् । रोःकाम्य इत्येव । गीः काम्यति ॥८॥

निर्दुर्बहिराविष्प्रादुश्चतुराम् । २ । ३ । ९ ।

निरादीनां रस्य कखपफि ष् स्यात् । निष्कृतम् । दुष्कृतम् । बहिष्पीतम् । आविष्कृतम् । प्रादुष्कृतम् । चतुष्पात्रम् ॥ ९ ॥

सुचो वा । २ । ३ । १० ।

सुजन्तस्थस्य रस्य कखपफि ष् वा स्यात् । द्विष्करोति द्विः करोति चतुष्फलति चतुः फलति ॥ १० ॥

वेसुसोऽपेक्षायाम् । २ । ३ । ११ ।

इसुस्प्रत्ययान्तस्य रस्य कखपफि ष् वा स्यात् । स्थानिनिमित्तयोरपेक्षा चेत् । सर्पिष्करोति । सर्पिः करोति । धनुष्खादति । धनुः खादति । अपेक्षायामिति किम् । परमसर्पिः कुण्डम् ॥ ११ ॥

नैकार्थेऽक्रिये । २ । ३ । १२ ।

न विद्यते क्रिया प्रवृत्तिनिमित्तं यस्य तस्मिन्नेकार्थे तुल्याधिकरणे पदे यत् कखपफं तस्मिन् परे इसुस्प्रत्ययान्तस्य रस्य ष् न स्यात । सर्पिः कालकम् । यजुः पीतकम् । एकार्थ इति किम् । सर्पिष्कुम्भे । सर्पिः कुम्भे । अक्रिय इति किम् । सर्पिष्क्रियते । सर्पिः क्रियते ॥ १२ ॥

समासेऽसमस्तस्य।२।३।१३।

पूर्वेणासमस्तस्य इसुसप्रत्ययान्तस्य रस्य कखपफि ष् स्यात् निमित्तनिमित्तिनौ चेदेकत्र समासे स्तः। सर्पिष्कुम्भः। धनुष्फलम्। समास इति किम्। तिष्ठतु सर्पिः पिबत्वमुदकम्। असमस्तस्येतिकिम्। परमसर्पिः कुण्डम्॥ १३॥

भ्रातुष्पुत्रकस्कादयः। २। ३। १४।

भ्रातुष्पुत्रादयः कस्कादयश्च कखपफि रस्य यथासंख्यं कृतषत्वसत्वाः साधवः स्युः। भ्रातुष्पुत्रः। परमयजुष्पात्रम्। कस्कः। कौतस्कुतः॥

नाम्यन्तस्थाकवर्गात् पदान्तः कृतस्य सः शिड्नान्तरेपि। २। ३। १५।

एभ्यः परस्य पदस्यान्तर्मध्ये कृतस्य कृतस्थस्य वा सस्य ष् स्यात् शिटा नकारेण चान्तरेपि। आशिषा। नदीषु। वायुषु। वधूषु। पितृषु। एषा। गोषु। नौषु। सिषेच। गीर्षु। हल्षु। शक्ष्यति। कुङ्षु। शिड्नान्तरेपि। सर्पिःषु। यजूंषि। पदान्तरितिकिम्। दधिसेक्। कृतस्येतिकिम्। बिसम्॥ १५॥

समासेऽग्नेः स्तुतः।२।३।१६।

अग्नेः परस्य स्तुतः सस्य समासे ष् स्यात्। अग्निष्टुत्॥ १६॥

ज्योतिरायुर्भ्यां च स्तोमस्य।२।३।१७।

आभ्यामग्नेश्च परस्य स्तोमस्य सस्य समासे ष् स्यात्। ज्योतिष्टोमः। आयुष्टोमः। अग्निष्टोमः। समासइत्येव। ज्योतिः स्तोमं याति॥ १७॥

मातृपितुः स्वसुः। २। ३। १८।

आभ्यां परस्य स्वसुः सस्य समासे ष् स्यात् । मातृष्वसा । पितृष्वसा ॥ १८ ॥

अलुपि वा । २ । ३ । १९ ।

मातृपितुः परस्य स्वसुः सस्यालुपि समासे वा ष् स्यात् । मातुःष्वसा मातुः स्वसा । पितुः ष्वसा पितुः स्वसा ॥ १९ ॥

निनद्याः स्नातेः कौशले । २ । ३ । २० ।

आभ्यां परस्य स्नातेः सस्य समासे ष् स्यात् कौशले गम्यमाने । निष्णो निष्णातो वा पाके। नदीष्णो नदीष्णातो वा प्रतरणे । कौशल इति किम् । निस्नातः।नदीस्नः।यः श्रोतसा ह्रियते ॥ २०॥

प्रतेः स्नातस्य सूत्रे । २ । ३ । २१ ।

प्रतेः परस्य स्नातस्य सः समासे ष् स्यात् सूत्रे वाच्ये । प्रतिष्णातं सूत्रम् । प्रत्ययान्तोपादानं किम् । प्रतिस्नातृ सूत्रम् ॥ २१ ॥

स्नानस्य नाम्नि । २ । ३ । २२ ।

प्रतेः परस्य स्नानस्य सः समासे ष् स्यात् सूत्रविषये नाम्नि । प्रतिष्णानं सूत्रमित्यर्थः ॥ २२ ॥

वेः स्त्रः । २ । ३ । २३ ।

वेः परस्य स्तृसस्य समासे ष् स्यात् नाम्नि । विष्टरो वृक्षः । विष्टरं पीठम् ॥ २३ ॥

अभिनिःष्टानः । २ । ३ । २४ ।

अभिनिर्भ्यां स्तानः समासे कृतषत्वो निपात्यते नाम्नि । अभिनिःष्टानो वर्णः ॥ २४ ॥

गवियुधेः स्थिरस्य । २ । ३ । २५ ।

आभ्यां परस्य स्थिरस्य सः समासे ष् स्यात् नाम्नि। गविष्ठिरः। युधिष्ठिरः॥ २५॥

एत्यकः। २। ३। २६।

कवर्जान्नाम्यादेः परस्य स एति परे समासे ष् स्यात् नाम्नि। हरिषेणः। श्रीषेणः। अक इति किम्। विष्वक्सेनः॥ २६॥

भादितो वा। २। ३। २७।

नक्षत्रवाचिन इदन्तात् परस्य स एति परे समासे ष् वा स्यात् नाम्नि। रोहिणिषेणः। रोहिणिसेनः। इतइति किम्। पुनर्वसुषेणः॥

विकुशमिपरेः स्थलस्य। २। ३। २८।

एभ्यः परस्य स्थलस्य सः समासे ष् स्यात्। विष्ठलम्। कुष्ठलम्। शमिष्ठलम्। परिष्ठलम्॥ २८॥

कपेर्गोत्रे। २। ३। २९।

कपेः परस्य स्थलस्य सः समासे ष् स्यात् गोत्रे वाच्ये। कपिष्ठलः ऋषिः॥ २९॥

गोऽम्बाऽऽम्बसव्यापद्वित्रिभूम्यग्निशेकुशङ्कुक्वङ्गुमञ्जिपुञ्जिबर्हिः परमेदिवेः स्थस्य। २। ३। ३०।

एभ्यः परस्य स्थस्य सः समासे ष् स्यात्। गोष्ठम्। अम्बष्ठः। आम्बष्ठः। सव्यष्ठः। अपष्ठः। द्विष्ठः। त्रिष्ठः। भूमिष्ठः। अग्निष्ठः। शेकुष्ठः। शङ्कुष्ठः। कुष्ठः। अङ्गुष्ठः। मञ्जिष्ठः। पुञ्जिष्ठः। बर्हिष्ठः। परमेष्ठः। दिविष्ठः॥ २९॥

निर्दुस्सोः सेधसन्धिसाम्नाम् ।२।३।३१।

एभ्यः परेषां सेधादीनां सः समासे ष् स्यात् । निःषेधः । दुःषेधः सुषेधः । निःषन्धिः । दुःषन्धिः । सुषन्धिः । निःषाम । दुःषाम । सुषाम ॥ ३१ ॥

प्रष्ठोऽग्रगे । २ । ३ । ३२ ।

प्रात् स्थस्य सः ष् स्यात् अग्रगामिन्यर्थे । प्रष्ठो ऽग्रगः ॥ ३२ ॥

भीरुष्ठानादयः । २ । ३ । ३३ ।

एते समासे कृतषत्वाः साधवः स्युः। भीरुष्ठानम् । अङ्गुलिषङ्गः ॥३३॥

ह्रस्वान्नाम्नस्ति । २ । ३ । ३४ ।

नाम्नो विहिते तादौ प्रत्यये ह्रस्वान्नामिनः परस्य सः ष् स्यात् । सर्पिष्टा । वपुष्टमम् । नामिन इत्येव । तेजस्ता ॥ ३४ ॥

निसस्तपे नासेवायाम् । २ । ३ । ३५ ।

निसः सस्तादौ तपतौ परे ष् स्यात् पुनः पुनः करणाभावे । निष्टपति स्वर्णं सकृदग्निं स्पर्शयतीत्यर्थः । तीत्येव निरतपत् ॥ ३५ ॥

घस्वसः । २ । ३ । ३६ ।

नाम्यादेः परस्य घस्वसोः सः ष् स्यात् । जक्षुः । उषितः ॥ ३६॥

णिस्तोरेवाऽस्वदस्विदसहः षणि ।२।३।३७।

स्वदादिवर्जानां ण्यन्तानां स्तोरेव च सो नाम्यादेः परस्य षत्वभूते सनि ष् स्यात । सिषेवयिषति । तुष्टूषति । स्वदादिवर्जनं किम् । सिस्वादयिषति । सिस्वेदयिषति । सिसाहयिषति । एवेतिकिम् । सुसूषति । षणीति किम् । सिषेव । षत्वं किम् । सुषुप्सति ॥ ३७ ॥

सञ्जेर्वा । २ । ३ । ३८ ।

ण्यन्तस्य सञ्जेर्नाम्यादेः परस्य सः षणि ष् वा स्यात् । सिषञ्जयिषति सिसञ्जयिषति ॥ ३८ ॥

उपसर्गात् सुग्सुवसोस्तुस्तुभोऽटयप्यद्वित्वे । २ । ३ । ३९ ।

द्व्युक्ताभावे सुनोत्यादेः स उपसर्गस्थान्नाम्यादेः परस्य ष् स्यात् अड्व्यवधानेपि । सुग् । अभिषुणोति । निःषुणोति । पर्यषुणोत् । सुव । अभिषुवति । पर्यषुवत् । सो । अभिष्यति । पर्यष्यत् । स्तु । अभिष्टौति । दुष्टवम् । पर्यष्टौत् । स्तुभ् । अभिष्टोभते । पर्यष्टोभत । अद्वित्वइति किम् । अभिसुसूषति ॥ ३९ ॥

स्थासेनिसिधसिचसञ्जांद्वित्वेपि । २ । ३ । ४० ।

उपसर्गस्थान्नाम्यादेः परेषां स्थादीनां सः ष् स्यात् द्वित्वेप्यटयपि । अधिष्ठास्यति । अधितष्ठौ । अत्यष्ठात् । अभिषेणयति । अभिषिषेणयिषति । अभ्यषेणयत् । प्रतिषेधति । प्रतिषिषेधिषति । प्रत्यषेधत् । अभिषिञ्चति । अभिषिषिक्षति । अभ्यषिञ्चत् । अभिषजति । अभिषषञ्ज । अभ्यषजत् ॥ ४० ॥

अङ्प्रतिस्तब्धनिस्तब्धे स्तम्भः । २ । ३ । ४१ ।

उपसर्गान्नाम्यादेः परस्य स्तम्भस्सो द्वित्वेप्यटयपि ष् स्यात् न चेत् स्तम्भिर्ङेप्रतिस्तब्धनिस्तब्धयोश्च स्यात् । विष्टम्नाति । वितष्टम्भ । प्रत्यष्टम्नात् । ङादिवर्जनं किम् । व्यतस्तम्भत् । प्रतिस्तब्धः निस्तब्धः॥

अवाच्चाश्रयोर्जाविदूरे । २ । ३ । ४२ ।

अवादुपसर्गात् परस्य स्तम्भः स आश्रयादिषु गम्यमानेषु द्वित्वे-

प्यद्यपि ष् स्यात् । ङविषयश्चेत् स्तम्भिर्न स्यात् । आश्रय आलम्बनम् । दुर्गमवष्टम्नाति । अवतष्टम्भ । अवाष्टम्नाद्वा । ऊर्ज औजित्यम् । अहो वृषभस्यावष्टम्भः । अविदूरमासन्नमदूरासन्नं च । अवष्टब्धा शरत् । अवष्टब्धा सेना । चोऽनुक्तसमुच्चये । तेन उपष्टम्भः । अङ्-इत्येव । अवातस्तम्भत् ॥ ४२ ॥

व्यवात् स्वनोऽशने ।२। ३ ।४३।

वेरवाच्चोपसर्गात् परस्य स्वनः सोऽशने भोजने द्वित्वेप्यद्यपि ष् स्यात् । विष्वणति । अवष्वणति । विषष्वाण । अवषष्वाण । व्यष्वणत् । अवाष्वणत् । व्यषिष्वणत् । अवाषिष्वणत् । अशनइति किम् । विस्वनति मृदङ्गः ॥ ४३ ॥

सदोऽप्रतेः परोक्षायां त्वादेः ।२।३। ४४ ।

प्रतिवर्जोपसर्गस्थान्नाम्यादेः परस्य सदःसो द्वित्वेप्यद्यपि ष् स्यात् परोक्षायां तु द्व्युक्तौ सत्यामादेः पूर्वस्यैव । निषीदति । विषाषद्यते । व्यषीषदत् । परोक्षायां त्वादेरेव । निषसाद । अप्रतेरिति किम् । प्रतिसीदति ॥ ४४ ॥

स्वञ्जश्च ।२।२ ।४५।

उपसर्गस्थान्नाम्यादेः परस्य स्वञ्जः सो द्वित्वेप्यद्यपि ष् स्यात् । परोक्षायां त्वादेरेव । अभिष्वजते । अभिषिष्वंक्षते । प्रत्यष्वजत । परिषस्वजे ॥ ४५ ॥

परिनिवेः सेवः ।२। ३ ।४६।

पर्यादिभ्युपसर्गस्थान्नाम्यादेः परस्य सेवतेः सो द्वित्वेप्यद्यपि ष् स्यात् परिषेवते । परिषिषेवे । परिषिषेविषते । पर्यषेवत । निषेवते । विषिषेवे ॥ ४६ ॥

सयसितस्य । २ । ३ । ४७ ।

परिनिवेः परस्य सयसितयोः सः ष् स्यात् । परिषयः। निषयः। विषयः। परिषितः । निषितः । विषितः ॥ ४७ ॥

असोङसिवूसहस्सटाम् ।२।३।४८।

परिनिविभ्यः परस्य सिवूसहोः स्सटश्च सः ष् स्यात् न चेत् सिवूसहौ सोङविषयौ स्याताम् । परिषीव्यति । निषीव्यति । विषीव्यति । परिषहते। निषहते। विषहते । परिष्करोति । विष्किरः।असोङेति किम्। परिसोढः। मापरिसीषिवत् । मापरिसीषहत् ॥ ४८ ॥

स्तुस्वञ्जश्चाटि नवा । २ । ३ । ४९ ।

परिनिवेः परस्य स्तुस्वञ्जोरसोङसिवूसहस्सटां च सोऽटिसति ष् वा स्यात् । पर्यष्टौत् । पर्यस्तौत् । न्यष्टौत् । न्यस्तौत् । व्यष्टौत् । व्यस्तौत् । पर्यष्वजत् । पर्यस्वजत् । न्यष्वजत् । न्यस्वजत् । व्यष्वजत् । व्यस्वजत् । पर्यषीव्यत् । पर्यसीव्यत । न्यषीव्यत् । न्यसीव्यत् । व्यषीव्यत् । व्यसीव्यत् । पर्यषहत । पर्यसहत । न्यषहत । न्यसहत । व्यषहत । व्यसहत । पर्यष्करोत् । पर्यस्करोत् । असोङसिवूसहेत्येव । पर्यसोढयत् । पर्यसीषीवत् । पर्यसीषहत् ॥ ४९ ॥

निरभ्यनोश्च स्यन्दस्याप्राणिनि।२।३।५०।

एभ्यः परिनिवेश्च परस्याप्राणिकर्तृकार्थवृत्तेः स्यन्दः सः ष् वा स्यात् । निःष्यन्दते । निःस्यन्दते । अभिष्यदन्ते । अभिस्यन्दते । अनुष्यन्दते । अनुस्यन्दते । परिष्यन्दते । परिस्यन्दते । निष्यन्दते । निस्यन्दते । विष्यन्दते । विस्यन्दते तैलम् । अप्राणिनीति किम् । परिस्यन्दते मत्स्यः ॥ ५० ॥

वेः स्कन्दोक्तयोः । २ । ३ ।५१।

विपूर्वस्य स्कन्दः सः ष् वा स्यात् न चेत् क्तक्तवतू स्याताम् । विष्कन्त्ता विस्कन्त्ता। अक्तयोरिति किम्। विस्कन्नः।विस्कन्नवान् ॥५१॥

परेः । २ । ३ । ५२।

परेः स्कन्दः सः ष् वा स्यात् । परिष्कन्त्ता। परिस्कन्त्ता। परिष्कन्नः। परिस्कन्नः ॥ ५२ ॥

निर्नेः स्फुरस्फुलोः । २। ३। ५३ ।

आभ्यां परयोः स्फुरस्फुलोः सः ष् वा स्यात्। निःष्फुरति। निःस्फुरति। निष्फुरति । निस्फुरति । निःष्फुलति । निःस्फुलति । निष्फुलति । निस्फुलति ॥ ५३ ॥

वेः । २ । ३ । ५४ ।

वेः परयोः स्फुरस्फुलोः सः ष् वा स्यात् । विष्फुरति । विस्फुरति। विष्फुलति । विस्फुलति ॥ ५४ ॥

स्कभ्नः । २ । ३ । ५५ ।

वेः स्कभ्नः सः ष् नित्यं स्यात् । विष्कभ्नाति ॥ ५५ ॥

निर्दुःसुवेः समसूतेः । २। ३ ।५६।

एभ्यः परस्य समसूत्योः सः ष् स्यात्। निःषमः। दुःषमः। सुषमः। विषमः । निःषूतिः । दुःषूतिः । सुषूतिः । विषूतिः ॥ ५६ ॥

अवः स्वपः । २।३।५७।

निर्दुःसुविपूर्वस्य वहीनस्य स्वपेः सः ष् स्यात् । निःषुषुपतुः । दुःषुषुपतुः । सुषुषुपतुः। विषुषुपतुः। अव इति किम्। दुःस्वप्नः ॥ ५७ ॥

प्रादुरुपसर्गाद्यस्वरेऽस्तेः । २। ३ । ५८।

प्रादुरुपसर्गस्थाच्च नाम्यादेः परस्यास्तेः सो यादौ स्वरादौ च

परे ष् स्यात् । प्रादुःष्यात् । विष्यात् । निष्यात् । प्रादुःषन्ति । विषन्ति । निषन्ति । यस्वर इति किम् । प्रादुःस्तः ॥ ५८ ॥

नस्सः । २ । ३ । ५९ ।

कृतद्वित्वस्य सस्य ष् न स्यात् । सुपिस्स्यते ॥ ५९ ॥

सिचो यङि । २ । ३ । ६० ।

सिचः सो यङि ष् न स्यात् । सेसिच्यते ॥ ६० ॥

गतौ सेधः । २ । ३ । ६१ ।

गत्यर्थस्य सेधः सः ष् न स्यात् । अभिसेधति गाः । गताविति-किम् । निषेधति पापात् ॥ ६० ॥

सुगः स्यसनि । २ । ३ । ६२ ।

सुनोतेः सः स्ये सनि च ष् न स्यात् । अभिसोष्यति । सुसूषते । क्विप् । सुसूः ॥ ६२ ॥

रषृवर्णान्नोण एकपदेऽनन्त्यस्यालचटत-वर्गशसान्तरे । २ । ३ । ६३ ।

एभ्यः परस्यैभिस्सहैकस्मिन्नेव पदे स्थितस्यानन्त्यस्य नो णः स्यात् लचटतवर्गान् शसौ च मुक्त्वाऽन्यस्मिन्निमित्तकार्यिणो-रन्तरेऽपि । तीर्णम् । पुष्णाति । नृणाम् । नॄणाम् । करणम् । बृंहणम् । अर्केण । एकपद इति किम् । अग्निर्नयति । चर्मनासिकः । अनन्त्य-स्येति किम् । वृक्षान् । लादिवर्जनं किम् । विरलेन । मूर्च्छनम् । वृढेन । तीर्थेन । रशना । रसना ॥ ६३ ॥

पूर्वपदस्थान्नाम्न्यगः । २ । ३ । ६४ ।

गन्तवर्जपूर्वपदस्थात् रषृवर्णात् परस्योत्तरपदस्थस्य नो ण स्यात्

संज्ञायाम् । द्रुणसः । खरणाः । शूर्पणखा । नाम्नीति किम् । मेषनासिकः । अग इति किम् । ऋगयनम् ॥ ६४ ॥

नसस्य । २ । ३ । ६५ ।

पूर्वपदस्थाद्रषृवर्णात् परस्य नसस्य नो ण् स्यात् । प्रणसः ॥ ६५ ॥

निष्प्राऽग्रेऽन्तः खदिरकार्श्याम्रशरेक्षुप्लक्षपीयूक्षाभ्यो वनस्य । २ । ३ । ६६ ।

निरादिभ्यः परस्य वनस्य नो ण् स्यात् । निर्वणम् । प्रवणम् । अग्रेवणम् । अन्तर्वणम् । खदिरवणम् । कार्श्यवणम् । आम्रवणम् । शरवणम् । इक्षुवणम् । प्लक्षवणम् । पीयूक्षावणम् ॥ ६६ ॥

द्वित्रिस्वरौषधिवृक्षेभ्यो नवा ऽनिरिकादिभ्यः । २ । ३ । ६७ ।

द्विस्वरेभ्यस्त्रिस्वरेभ्यश्चेरिकादिवर्जेभ्य ओषधिवृक्षवाचिभ्यः परस्य वनस्य नो ण् वा स्यात् । दुर्वावणम् । दुर्वावनम् । माषवणम् । माषवनम् । नीवारवणम् । नीवारवनम् । वृक्षः । शिग्रुवणम् । शिग्रुवनम् । शिरीषवणम् । शिरीषवनम् । इरिकादिवर्जनं किम् । इरिकावनम् ॥ ६७ ॥

गिरिनद्यादीनाम् । २ । ३ । ६८ ।

एषां नो ण् वा स्यात् । गिरिणदी । गिरिनदी । तुर्यमाणः । तुर्यमानः ॥ ६८ ॥

पानस्यभावकरणे । २ । ३ । ६९ ।

पूर्वपदस्थाद्रादेः परस्य भावकरणार्थस्य पानस्य नो ण् वा स्यात् । क्षीरपाणं क्षीरपानं स्यात् । कषायपाणः । कषायपानः कंसः ॥ ६९ ॥

देशे । २ । ३ । ७० ।

पूर्वपदस्थाद्रादेः परस्य देशविषयस्य पानस्य नो ण् नित्यं स्यात् । क्षीरपाणा उशीनराः । देशइति किम् । क्षीरपानाः गोदुहः ॥ ७० ॥

ग्रामाग्रान्नियः । २ । ३ । ७१ ।

आभ्यां परस्य नियो ण् स्यात् । ग्रामणीः । अग्रणीः ॥ ७१ ॥

वाह्याद्वाहनस्य । २ । ३ । ७२ ।

वाह्यवाचिनो रादिमतः पूर्वपदात्परस्य वाहनस्य नो ण् स्यात् । इक्षुवाहणम् । वाह्यादिति किम् । सुरवाहनम् ॥ ७२ ॥

अतोऽह्नस्य । २ । ३ । ७३ ।

रादिमतोऽदन्तात् पूर्वपदात् परस्याह्नस्य नो ण् स्यात् । पूर्वाह्णः । अतइति किम् । दुरह्नः । अह्नस्येति किम् । दीर्घाह्नी शरत् ॥

चतुस्त्रेर्हायनस्य वयसि । २ । ३ । ७४ ।

आभ्यां पूर्वपदाभ्यां परस्य हायनस्य नो ण् स्यात् वयसि गम्ये । चतुर्हायणो वत्सः । त्रिहायणी वडवा । वयसीति किम् । चतुर्हायना शाला ॥ ७४ ॥

वोत्तरपदान्तनस्यादेरयुवपक्काह्नः । २ । ३ । ७५ ।

पूर्वपदस्थाद्रादेः परस्य उत्तरपदान्तभूतस्य नागमस्य स्यादेश्च नो ण् वा स्यात् चेद्युवन् पक्वाहन् सम्बन्धी न स्यात् । व्रीहिवापिणौ । व्रीहिवापिनौ । माषवापाणि । माषवापानि । व्रीहिवापेण । व्रीहिवापेन । युवादिवर्जनं किम् । आर्ययूना । प्रपक्वानि । दीर्घाह्नी शरत् ॥ ७५ ॥

कवर्गैकस्वरवति । २ । ३ । ७६ ।

पूर्वपदस्थाद्रादेः परस्य कवर्गवत्येकस्वरवति चोत्तरपदे सति उत्तरपदान्तनस्यादेर्नो ण् स्यात् नचेदसौ पक्वस्य । स्वर्गकामिणौ । वृषगामिणौ । ब्रह्महणौ । यूषपाणि । अपक्वस्येत्येव । क्षीरपक्वेन ॥ ७६ ॥

अदुरुपसर्गान्तरोहिणनुमीनानेः।२।३।७७।

दुर्वर्जोपसर्गस्थादन्तःशब्दस्थाच्च रादेः परस्यैषां नो ण् स्यात् । णेतिणोपदेशाधातवः । प्रणमति । परिणायकः । अन्तर्णयति । हिनुः । प्रहिणुतः । मीना । प्रमीणीतः । आनि । प्रयाणि । अदुरिति किम् । दुर्नयः ॥ ७७ ॥

नशः शः ।२।३।७८।

अदुरुपसर्गान्तःस्थाद्रादेः परस्य नशः शन्तस्य नो ण् स्यात् । प्रणश्यति । अन्तर्णश्यति । शइति किम् । प्रनङ्क्ष्यति ॥ ७८ ॥

नेर्ङ्मादापतपदनदगदवपीवहीशमूचिग्याति-वातिद्रातिप्सातिस्यतिहन्ति-देग्धौ । २ । ३ । ७९ ।

अदुरुपसर्गान्तःस्थाद्रादेः परस्योपसर्गस्य नेर्नो माङादिषु परेषु ण् स्यात् । प्रणिमिमीते । परिणिमयते । प्रणिददाति । परिणिदयते । प्रणिदधाति । प्रणिपतति । परिणिपद्यते । प्रणिनदति । प्रणिगदति । प्रणिवपति । प्रणिवहति । प्रणिशाम्यति । प्रणिचिनोति । प्रणियाति । प्रणिवाति । प्रणिद्राति । प्रणिप्साति । प्रणिष्यति । प्रणिहन्ति । प्रणिदेग्धि । अन्तर्णिमिमीते ॥ ७९ ॥

अकखाद्यषान्ते पाठे वा ।२।३।८०।

धातुपाठे कखादिः षान्तश्चयो धातुपाठस्ताभ्यामन्यस्मिन् धातौ परे ऽदुरुपसर्गान्तःस्थाद्रादेः परस्य नेर्नो ण् वा स्यात् । प्रणिपचति । प्रनिपचति । अकखादीति किम् । प्रनिकरोति । प्रनिखनति । अषान्त-इति किम् । प्रनिद्वेष्टि । पाठइति किम् । प्रनिचकार ॥ ८० ॥

द्वित्वेऽप्यन्तेप्यनितेः परेस्तु वा ।२।३।८१।

अदुरुपसर्गान्तः स्थाद्रादेः परस्यानितेर्नो द्वित्वाद्वित्वयोरन्तानन्तयोश्च ण् स्यात् । परिपूर्वस्य वा स्यात् । प्राणिणिषति । पराणिति । हेप्राण् । पर्यणिणिषति । पर्यनिनिषति । पर्यणिति । पर्यनिति । हेपर्यण् । हेपर्यन् ॥ ८१ ॥

हनः । २ । ३ । ८२ ।

अदुरुपसर्गान्तः स्थाद्रादेः परस्य हन्तेर्नो ण् स्यात् । प्राहण्यत । प्रहण्यते । अन्तर्हण्यते ॥ ८२ ॥

वमि वा । २ । ३ । ८३ ।

अदुरुपसर्गान्तःस्थाद्रादेः परस्य हन्तेर्नो वमोः परयोर्ण् वा स्यात् । प्रहण्वः । प्रहन्वः । प्रहण्मि । प्रहन्मि । अन्तर्हण्वः । अन्तर्हन्वः । अन्तर्हण्मः । अन्तर्हन्मः ॥ ८३ ॥

निंसनिक्षनिन्दः कृति वा । २ । ३ । ८४ ।

अदुरुपसर्गान्तःस्थाद्रादेः परस्य निंसादिधातोर्नो ण् वा स्यात् कृत्प्रत्यये । प्रणिंसनम् । प्रनिंसनम् । प्रणिक्षणम् । प्रनिक्षणम् । प्रणिन्दनम् । प्रनिन्दनम् । कृतीति किम् । प्रणिंस्ते ॥ ८४ ॥

स्वरात् । २ । ३ । ८५ ।

अदुरुपसर्गान्तः स्थाद्रादेः परस्य स्वरादुत्तरस्य कृतो नो ण् स्यात् । प्रहाणः । प्रहीणः ॥ ८५ ॥

नाम्यादेरेव ने । २ । ३ । ८६ ।

अदुरुपसर्गान्तःस्थाद्रादेः परस्य नागमे सति नाम्यादेरेवधातोः परस्य स्वरादुत्तरस्य कृतस्य नो ण् स्यात् । प्रेङ्खणम् । प्रेङ्गणम् । प्रेङ्गणीयम् । नाम्यादेरिति किम् । प्रमङ्गनम् ॥ ८६ ॥

व्यञ्जनादेर्नाम्युपान्त्याद्वा।२।३।८७।

अदुरुपसर्गान्तःस्थाद्रादेः परो यो व्यञ्जनादिर्नाम्युपान्त्यो धातुस्ततः परस्य कृतः स्वरात्परस्य नो ण् वा स्यात्। प्रमेहणम्। प्रमेहनम्। व्यञ्जनादेरिति किम्। प्रोहणम्। नाम्युपान्त्यादितिकिम्। प्रवपणम्। प्रवहणम्। स्वरादित्येव। प्रभुग्नः। अदुरित्येव। दुर्मोहनः। अलचटादिवर्जनं किम्। प्रमेदनम्। प्रभोजनम्। स्वरादित्यनेन नित्यप्राप्ते विभाषेयम्॥ ८७॥

णेर्वा। २। ३। ८८।

अदुरुपसर्गान्तःस्थाद्रादेःपरस्य ण्यन्तस्य धातोर्विहितस्य स्वरात्परस्य नो ण् वा स्यात्। प्रमङ्गणा। प्रमङ्गना। विहितविशेषणं किम्। प्रयाप्यमाणः। प्रयाप्यमानः। इतिक्यान्तरेपि स्यात्॥ ८८॥

निर्विण्णः। २। ३। ८९।

निर्विदेः सत्तालाभविचारणार्थात् परस्य क्तस्य नो णत्वं स्यात्। निर्विण्णः॥ ८९॥

न ख्यापूग्भूभाकमगमप्यायवेपो णेश्च। २। ३। ९०।

अदुरुपसर्गान्तःस्थाद्रादेः परेभ्यः ख्यादिभ्यो ऽण्यन्तण्यन्तेभ्यः परस्य कृतो नो ण् न स्यात्। प्रख्यानम्। प्रख्यापनम्। प्रपवनम्। प्रपावनम्। प्रभवनम्। प्रभावनम्। प्रभायमानम्। प्रभायना। प्रकामिनौ। प्रकामना। अप्रगमनिः। प्रगमना। प्रप्यानः। प्रप्यायना। प्रवेपनीयम्। प्रवेपना॥ ९०॥

देशेऽन्तरोऽयनहनः। २। ३। ९१।

अन्तःशब्दात्परस्याऽयनस्य हन्तेश्चनो देशेर्थे ण् न स्यात् । अन्तरयनो ऽन्तर्हननो वा देशः । देशइति किम् । अन्तरयणम् । अन्तर्हण्यते ॥

षात्पदे । २ । ३ । ९२ ।

पदे परतो यः षस्ततः परस्य नो ण् न स्यात् । सर्पिष्पानम् । पदइति किम् । सर्पिष्केण ॥ ९२ ॥

पदेऽन्तरेऽनाङ्तद्धिते । २ । ३ । ९३ ।

आङन्तं तद्धितान्तं च मुक्त्वा ऽन्यस्मिन् पदे निमित्तकार्यिणोरन्तरे नो ण् न स्यात् । प्रावनद्धम् रोषभीममुखेन । अनाङीति किम् । प्राणद्धम् । अतद्धितइति किम् । आर्द्रगोमयेण ॥ ९३ ॥

हनोघि । २ । ३ । ९४ ।

हन्तेर्नो घिनिमित्तकार्यिणोरन्तरे सति ण् न स्यात् । शत्रुघ्नः ॥९४॥

नृतेर्यङि । २ । ३ । ९५ ।

नृतेर्नो यङ्विषये ण् न स्यात् । नरीनृत्यते । नरिनर्त्ति । यङीति किम् । हरिणर्त्ती नाम कश्चित् ॥ ९५ ॥

क्षुभ्नादीनाम् । २ । ३ । ९६ ।

एषां नो ण् न स्यात् । क्षुभ्नाति । आचार्यानी ॥ ९६ ॥

पाठेधात्वादेर्णो नः । २ । ३ । ९७ ।

पाठे धात्वादेर्णो नः स्यात् । नयति । पाठइति किम् । णकारीयति । आदेरिति किम् । रणाति ॥ ९७ ॥

षः सोष्ट्यैष्ठिवष्वष्कः । २ । ३ । ९८ ।

पाठेधात्वादेः षः सः स्यात् नतु ष्ट्यैष्ठिवष्वष्कां सम्बन्धी स्यात् । सहते । आदेरित्येव लषति । ष्ट्यादिवर्जनं किम् । ष्ट्यायति । ष्ठीव्यति । ष्वष्कते ॥ ९८ ॥

ऋरलृलं कृपोऽकृपीटादिषु । २ । ३ । ९९ ।

कृपेर्ऋतलृत् रस्य च ल् स्यात् । नतु कृपीटादिविषयस्य । क्लृप्यते । क्लृप्तः । कल्प्यते । कल्पयति । अकृपीटादिष्विति किम् । कृपीटः । कृपाणः ॥ ९९ ॥

उपसर्गस्यायौ । २ । ३ । १०० ।

उपसर्गस्थस्य रस्यायौ धातौ परे ल् स्यात् । प्लायते । प्लत्ययते ॥

ग्रोयङि । २ । ३ । १०१ ।

यङि परे गिरते रो ल् स्यात् । निजेगिल्यते ॥ १०१ ॥

नवा स्वरे । २ । ३ । १०२ ।

ग्रो रः स्वरादौ प्रत्यये परे विहितस्य ल् वा स्यात् । गिलति । गिरति निगाल्यते । निगार्यते । विहितविशेषणं किम् । गिरः ॥ १०२ ॥

परेर्घाऽङ्कयोगे । २ । ३ । १०३ ।

परिस्थस्य रो घादौ परे ल् वा स्यात् । पलिघः । परिघः । पल्यङ्कः । पर्यङ्कः । पलियोगः । परियोगः ॥ १०३ ॥

ऋफिडादीनां डश्चलः । २ । ३ । १०४ ।

एषामृरऋलौ डस्य च ल् वा स्यात् । ऋफिडः । लृफिलः । ऋतकः । लृतकः । कपरिका । कपलिका ॥ १०४ ॥

जपादीनां पो वः । २ । ३ । १०५ ।

एषां पो वो वा स्यात् । जवा । जपा । पारावतः । पारापतः ॥ १०५ ॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञ-शब्दानुशासनलघुवृत्तौ द्वितीयस्याध्यायस्य तृतीयः पादः समाप्तः ॥ ३ ॥

स्त्रियांनृतोऽस्वस्रादेर्ङीः।२।४।१।

स्त्रीवृत्तेर्नान्तादृदन्ताच्च स्वस्रादिवर्जाङ्कीः स्यात् । राज्ञी । अतिराज्ञी । कर्त्री । स्त्रियामिति किम् । पञ्चनद्यः । अस्वस्रादेरिति-किम् । स्वसा । दुहिता ॥ १ ॥

अधातूदृदितः । २ । ४ । २ ।

अधातुर्यउदिदृदिच्चतदन्तात् स्त्रीवृत्तेर्ङीः स्यात् । भवती । अतिमहती । पचन्ती । अधात्विति किम् । सुकन् स्त्री ॥ २ ॥

अञ्चः । २ । ४ । ३ ।

अञ्चन्तात स्त्रियां ङीः स्यात् । प्राची । उदीची ॥ ३ ॥

णस्वराऽघोषाद्वनो रश्च।२।४।४।

एतदन्तात् विहितो यो वन् तदन्तात् स्त्रियां ङीः स्यात् । तद्योगे वनोऽन्तस्य रश्च । अवावरी । धीवरी । मेरुदृश्वरी । णस्वराऽघोषादिति किम्। सहयुध्वा स्त्री । विहितविशेषणं किम् । शर्वरी ॥ ४ ॥

वा बहुव्रीहेः । २ । ४ । ५ ।

णस्वराघोषाद्विहितोयोवन्तदन्तात् बहुव्रीहेः स्त्रियां ङीर्वा स्यात् । रश्चान्तस्य। प्रियावावरी । प्रियावावा । बहुधीवरी । बहुधीवा । बहुमेरुदृश्वरी । बहुमेरुदृश्वा ॥ ५ ॥

वा पादः । २ । ४ । ६ ।

बहुव्रीहेस्तद्धेतुकपाच्छब्दान्तात् स्त्रियां ङीर्वा स्यात् । द्विपदी । द्विपात् । बहुव्रीहिनिमित्तो यः पादितिविशेषणादिह न स्यात् । पादमाचष्टे । क्विपि पाद् । त्रयः पादोऽस्याः सा त्रिपात् ॥ ६ ॥

ऊध्नः । २ । ४ । ७ ।

ऊधन्नन्ताद्बहुव्रीहेः स्त्रियां ङीः स्यात् । कुण्डोध्नी ॥ ७ ॥

अशिशोः । २ । ४ । ८ ।

अशिशुइति बहुव्रीहेः स्त्रियां ङीः स्यात् । अशिश्वी ॥ ८ ॥

संख्यादेर्हायनाद्वयसि । २ । ४ । ९ ।

संख्यादेर्हायनान्ताद्बहुव्रीहेः स्त्रियां ङीः स्यात् । वयसि गम्ये त्रिहायणी । चतुर्हायणी वडवा । वयसीति किम् । चतुर्हायना शाला ॥

दाम्नः । २ । ४ । १० ।

संख्यादेर्दामन्नन्ताद्बहुव्रीहेः स्त्रियां ङीः स्यात् । द्विदाम्नी । संख्यादेरित्येव । उद्दामानं पश्य ॥ १० ॥

अनो वा । २ । ४ । ११ ।

अन्नन्ताद्बहुव्रीहेः स्त्रियां ङीर्वा स्यात् । बहुराज्यौ । बहुराजे । बहुराजानौ ॥ ११ ॥

नाम्नि । २ । ४ । १२ ।

अन्नन्ताद्बहुव्रीहेः स्त्रियां संज्ञायां नित्यं ङीः स्यात् । अधिराज्ञी । सुराज्ञी नाम ग्रामः ॥ १२ ॥

नोपान्त्यवतः । २ । ४ । १३ ।

यस्योपान्त्यलुग्नास्ति तस्मादन्नन्ताद्बहुव्रीहेः स्त्रियां ङीर्न स्यात् । सुपर्वा । सुशर्मा । उपान्त्यवतइति किम् । बहुराज्ञीः ॥ १३ ॥

मनः । २ । ४ । १४ ।

मन्नन्तात् स्त्रियां ङीर्न स्यात् । सीमानौ ॥ १४ ॥

ताभ्यां वाप् डित् । २ । ४ । १५ ।

मन्नन्ताद्बहुव्रीहेश्चान्नन्तात् स्त्रियामाप्वा स्यात् । सच डित् । सीमे । सुपर्वे । पक्षे । सीमानौ । सुपर्वाणौ ॥ १५॥

अजादेः । २ । ४ । १६ ।

अजादेस्तस्यैव स्त्रियामाप् स्यात् । अजा । बाला । ज्येष्ठा । कुञ्चा ॥ १६ ॥

ऋचि पादः पात्पदे । २ । ४ । १७ ।

कृतपाद्भावपादस्य ऋच्यर्थे पात्पदेतिनिपात्यते । त्रिपदा । त्रिपाद् गायत्री । ऋचीति किम् । द्विपात् । द्विपदी ॥ १७ ॥

आत् । २ । ४ । १८ ।

अकारान्तात् स्त्रियामाप् स्यात् । खट्वा । या । सा ॥ १८ ॥

गौरादिभ्यो मुख्यान्ङीः । २ । ४ । १९ ।

गौरादिगणान्मुख्यात् स्त्रियां ङीः स्यात् । गौरी । शबली । मुख्या-दिति किम् । बहुनदा भूमिः ॥ १९ ॥

अणञेयेकण्नञ्स्नञ्टिताम् । २ । ४ । २० ।

अणादीनां यो ऽतत्तदन्तात्तेषामेव स्त्रियां ङीः स्यात् । औपगवी । वैदी । सौपर्णेयी । आक्षिकी । स्त्रैणी । पौंस्नी । जानुदघ्नी ॥ २० ॥

वयस्यनन्त्ये । २ । ४ । २१ ।

कालकृता शरीरावस्था वयस्तस्मिन्नचरमे वर्त्तमानाद्कारान्तात् स्त्रियां ङीः स्यात् । कुमारी । किशोरी । वधूटी । अनन्त्यइति किम् । वृद्धा ॥ २१ ॥

द्विगोः समाहारात् । २ । ४ । २२ ।

समाहारद्विगोरदन्तात् स्त्रियां ङीः स्यात् । पञ्चपूली । दशराजी ॥ २२ ॥

परिमाणात्तद्धितलुक्यविस्ताचित् कम्बल्यात् । २ । ४ । २३ ।

परितः सर्वतो मानं परिमाणं रुढेः प्रस्थादिविस्तादिवर्जपरिमाणान्ताद् द्विगोरदन्तात् तद्धितलुकि स्त्रियां ङीः स्यात्। द्वाभ्यां कुडवाभ्यां क्रीता द्विकुडवी । परिमाणादिति किम् । पञ्चभिरश्वैः क्रीता पञ्चाश्वा । तद्धितलुकीति किम् । द्विपण्या । विस्तादिवर्जनं किम् । द्विविस्ता । द्व्याचिता । द्विकम्बल्या ॥ २३ ॥

काण्डात् प्रमाणादक्षेत्रे । २ । ४ । २४ ।

प्रमाणवाचिकाण्डान्तादक्षेत्रविषयाद् द्विगोस्तद्धितलुकि स्त्रियां ङीः स्यात् । आयामः प्रमाणम् । द्वे काण्डे प्रमाणमस्याः द्विकाण्डी रज्जुः । प्रमाणादिति किम् । द्विकाण्डा शाटी । अक्षेत्र इति किम् । द्विकाण्डा क्षेत्रभक्तिः ॥ २४ ॥

पुरुषाद्वा । २ । ४ । २५ ।

प्रमाणवाचिपुरुषान्ताद् द्विगोस्तद्धितलुकि स्त्रियां ङीर्वा स्यात् । द्विपुरुषी । द्विपुरुषा परिखा। तद्धितलुकीत्येव । पञ्चपुरुषाः समाहृताः पञ्चपुरुषी ॥ २५ ॥

रेवतरोहिणाद्भे । २ । ४ । २६ ।

आभ्यां नक्षत्रवृत्तिभ्यां स्त्रियां ङीः स्यात्। रेवती । रोहिणी। रेवत्यां जाता रेवती । भ इति किम् । रेवता ॥ २६ ॥

नीलात्प्राण्यौषध्योः । २ । ४ । २७ ।

प्राणिन्यौषधौ च नीलात् स्त्रियां ङीः स्यात् । नीली गौः । नीली औषधिः । नीलाऽन्या ॥ २७ ॥

क्ताच्चनाम्नि वा । २ । ४ । २८ ।

नीलात् क्तान्ताच्च स्त्रियां संज्ञायां ङीर्वा स्यात् । नीली । प्रवृद्धविलूनी । नीला । प्रवृद्धविलूना ॥ २८ ॥

केवलमामकभागधेयपापापरसमानार्यकृतसुमङ्गलभेषजात् । २ । ४ । २९ ।

एभ्यो नाम्नि स्त्रियां ङीः स्यात् । केवली ज्योतिः । मामकी । भागधेयी । पापी । अपरी । समानी । आर्यकृती । सुमङ्गली । भेषजी । नाम्नीत्येव । केवला ॥ २९ ॥

भाजगोणनागस्थलकुण्डकालकुशकामुककटकबरात् पक्वावपनस्थूलाऽकृत्रिमात्रकृष्णायसीरिरंसुश्रोणिकेशपाशे । २ । ४ । ३० ।

एभ्यो यथासंख्यं पक्वादिष्वर्थेषु स्त्रियां नाम्नि ङीः स्यात् । भाजी पक्वा चेत् । भाजाऽन्या । गोणी आवपनम् । गोणाऽन्या । नागी स्थूला । नागाऽन्या । स्थली अकृत्रिमा । स्थलाऽन्या । कुण्डी अमत्रम् । कुण्डाऽन्या । काली कृष्णा । कालाऽन्या । कुशी आयसी । कुशाऽन्या । कामुकी रिरंसुः । कामुकाऽन्या । कटी श्रोणिः । कटाऽन्या । कबरी केशपाशः । कबराऽन्या ॥ ३० ॥

नवा शोणादेः । २ । ४ । ३१ ।

शोणादेः स्त्रियां ङीर्वा स्यात् । शोणी । शोणा । चण्डी । चण्डा ॥ ३१ ॥

इतोक्त्यर्थात् । २ । ४ । ३२ ।

क्त्यर्थप्रत्ययान्तवर्जादिदन्तात् स्त्रियां ङीर्वा स्यात । भूमी । भूमिः । धूली । धूलिः । अक्त्यर्थादिति किम् । कृतिः । अकरणिः हानिः ॥ ३२ ॥

पद्धतेः । २ । ४ । ३३ ।

अस्मात् स्त्रियां ङीर्वा स्यात् । पद्धती । पद्धतिः ॥ ३३ ॥

शक्तेः शस्त्रे । २ । ४ । ३४ ।

अस्माच्छस्त्रे स्त्रियां ङीर्वा स्यात् । शक्ती । शक्तिः । शस्त्रइति किम् । शक्तिः सामर्थ्यम् ॥ ३४ ॥

स्वरादुतो गुणादखरोः । २ । ४ । ३५ ।

स्वरात्परो य उत्तदन्ताद् गुणवचनात् खरुवर्जात् स्त्रियां ङीर्वा स्यात् । पट्वी । पटुः । विभ्वी । विभुः । स्वरादिति किम् । पाण्डुर्भूमिः । गुणादिति किम् । आखुः स्त्री । अखरोरिति । खरुरियम् ॥ ३५ ॥

श्येतैतहरितभरितरोहिताद्वर्णात्तो नश्च । २ । ४ । ३६ ।

एभ्यो वर्णवाचिभ्यः स्त्रियां ङीर्वा स्यात् । तद्योगे तोन्च । श्येनी । श्येता । एनी । एता । हरिणी । हरिता । भरिणी । भरिता । रोहिणी । रोहिता । वर्णादिति किम् । श्येता । एता ॥ ३६ ॥

क्नः पलितासितात् । २ । ४ । ३७ ।

तइतिर्वेतिचानुवर्त्तते । आभ्यां स्त्रियां ङीर्वा स्यात् । तद्योगे तः क्नः । पलिक्नी । पलिता । असिक्नी । असिता ॥ ३७ ॥

असहनञ्विद्यमानपूर्वपदात् स्वाङ्गादक्रोडादिभ्यः । २ । ४ । ३८ ।

सहादिवर्जपूर्वपदं यत् स्वाङ्गं तदन्तात् क्रोडादिवर्जाददन्तात् स्त्रियां ङीर्वा स्यात् । पीनस्तनी । पीनस्तना । अतिकेशी । अतिकेशा माला । सहादिवर्जनं किम् । सहकेशा । अकेशा । विद्यमानकेशा । क्रोडादिवर्जनं किम् । कल्याणक्रोडा । बहुगुदा । दीर्घवाला । स्वाङ्गादिति किम् । बहुशोफा । बहुज्ञाना । बहुयवा ॥ ३८ ॥

नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाङ्गगात्रकण्ठात् । २ । ४ । ३९ ।

सहादिवर्जपूर्वपदेभ्य एभ्यः स्वाङ्गेभ्यः स्त्रियां ङीर्वा स्यात् । तुङ्गनासिकी । तुङ्गनासिका । कृशोदरी । कृशोदरा । बिम्बोष्ठी । बिम्बोष्ठा । दीर्घजङ्घी । दीर्घजङ्घा । समदन्ती । समदन्ता । चारुकर्णी । चारुकर्णा । तीक्ष्णशृङ्गी । तीक्ष्णशृङ्गा । मृद्वङ्गी । मृद्वङ्गा । सुगात्री । सुगात्रा । सुकण्ठी । सुकण्ठा । पूर्वेण सिद्धे नियमार्थमिदम् । तेन बहुस्वरसंयोगोपान्तेभ्योऽन्येभ्यो माभूत् । सुललाटा । सुपार्श्वा ॥ ३९ ॥

नखमुखादनाम्नि । २ । ४ । ४० ।

सहादिवर्जपूर्वपदाभ्यां स्वाङ्गाभ्यामाभ्यामसंज्ञायामेव स्त्रियां ङीर्वा स्यात् । शूर्पनखी । शूर्पनखा । चन्द्रमुखी । चन्द्रमुखा । अनाम्नीति किम् । शूर्पणखा । कालमुखा ॥ ४० ॥

पुच्छात् । २ । ४ । ४१ ।

सहादिवर्जपूर्वपदात् स्वाङ्गात् पुच्छात् स्त्रियां ङीर्वा स्यात् । दीर्घपुच्छी । दीर्घपुच्छा ॥ ४१ ॥

कबरमणिविषशरादेः । २ । ४ । ४२ ।

एतत्पूर्वपदात् पुच्छात् स्त्रियां ङीर्नित्यं स्यात् । कबरपुच्छी । मणिपुच्छी । विषपुच्छी । शरपुच्छी ॥ ४२ ॥

पक्षाच्चोपमानादेः । २ । ४ । ४३ ।

उपमानपूर्वात् पक्षात् पुच्छाच्च स्त्रियां ङीः स्यात् । उलूकपक्षी शाला । उलूकपुच्छी सेना ॥ ४३ ॥

क्रीतात् करणादेः । २ । ४ । ४४ ।

करणादेः क्रीतान्ताददन्तात् स्त्रियां ङीः स्यात् । अश्वक्रीती । मनसाक्रीती । आदेरिति किम् । अश्वेन क्रीता ॥ ४४ ॥

क्तादऽल्पे । २ । ४ । ४५ ।

क्तान्तात् करणादेरल्पेर्थे स्त्रियां ङीः स्यात् । अभ्रविलिप्ती द्यौः । अल्पाभ्रेत्यर्थः । अल्पइति किम् । चन्दनानुलिप्ता स्त्री ॥ ४५ ॥

स्वाङ्गादेरकृतमितजातप्रतिपन्नाद्बहु-व्रीहेः । २ । ४ । ४६ ।

स्वाङ्गादेः कृतादिवर्जात् क्तान्ताद् बहुव्रीहेः स्त्रियां ङीः स्यात् । शङ्खभिन्नी । ऊरुभिन्नी । कृतादिवर्जनं किम् । दन्तकृता । दन्तमिता । दन्तजाता । दन्तप्रतिपन्ना ॥ ४६ ॥

अनाच्छादजात्यादेर्नवा । २ । ४ । ४७ ।

आच्छादवर्जा या जातिस्तदवयवात् कृतादिवर्जात् क्तान्ताद् बहु-व्रीहेः स्त्रियां ङीर्वा स्यात् । शाङ्गरजग्धी शाङ्गरजग्धा । आच्छाद-

वर्जनं किम् । वस्त्रछन्ना । जात्यादेरिति किम् । मासजाता । अकृता-द्यन्तादित्येव । कुण्डकृता ॥ ४७ ॥

पत्युर्नः । २ । ४ । ४८ ।

पत्यन्ताद् बहुव्रीहेः स्त्रियां ङीर्वा स्यात् । तद्योगेऽन्तस्य न्च । दृढपत्नी । दृढपतिः । मुख्यादित्येव । बहुस्थूलपतिः पुरी ॥ ४८ ॥

सादेः । २ । ४ । ४९ ।

सपूर्वपदात्पत्यन्तात् स्त्रियां ङीर्वा स्यात् । तद्योगेऽन्तस्य न्च । ग्रामस्य पतिः। ग्रामपत्नी। ग्रामपतिः। सादेरिति किम्। पतिरियम्। ग्रामस्य-पतिरियम् ॥ ४९ ॥

सपत्न्यादौ । २ । ४ । ५० ।

एषु पतिशब्दात् स्त्रियां ङीः स्यात् । अन्तस्य न्च । सपत्नी । एकपत्नी ॥ ५० ॥

ऊढायाम् । २ । ४ । ५१ ।

पत्युः परिणीतायां स्त्रियां ङीः स्यात् । न्चान्तस्य । पत्नी । वृष-लस्य पत्नी ॥ ५१ ॥

पाणिगृहीतीति । २ । ४ । ५२ ।

पाणिगृहीतीतिप्रकाराः शब्दा ऊढायां स्त्रियां ङ्यन्ता निपात्यन्ते । पाणिगृहीती । करगृहीती । ऊढायामित्येव । पाणिगृहीताऽन्या ॥ ५२ ॥

पतिवत्न्यन्तर्वत्न्यौ भार्यागर्भिण्योः । २ । ४ । ५३ ।

भार्या अविधवा स्त्री । तस्यां गर्भिण्यां च यथासंख्यमेतौ निपा-त्येते पतिवत्नी । अन्तर्वत्नी ॥ ५३ ॥

जातेरयान्तनित्यस्त्रीशूद्रात् । २ । ४ । ५४ ।

जातिवाचिनोऽदन्तात् स्त्रियां ङीः स्यात् । नतु यान्तानित्यस्त्री-शूद्रात् । कुक्कुटी । वृषली । नाडायनी । कठी । जातेरिति किम् । मुण्डा । यान्तादिवर्जनं किम् । क्षत्रिया । नित्यस्त्रीवर्जनमिति किम् । खट्वा । शूद्रवर्जनं किम् । शूद्रा । आदित्येव । आखुः ॥ ५४ ॥

पाककर्णपर्णवालान्तात् । २ । ४ । ५५ ।

पाकाद्यन्ताया जातेः स्त्रियां ङीः स्यात् । ओदनपाकी । आखुकर्णी । मुद्गपर्णी । गोवाली । जातेरित्येव । बहुपाका यवागूः ॥ ५५ ॥

असत्काण्डप्रान्तशतैकाञ्चः पुष्पात् । २ । ४ । ५६ ।

सदादिवर्जेभ्यः परो यः पुष्पशब्दस्तदन्ताज्जातेः स्त्रियां ङीः स्यात् । शङ्खपुष्पी । सदादिवर्जनं किम् । सत्पुष्पा । काण्डपुष्पा । प्रान्तपुष्पा । शतपुष्पा । एकपुष्पा । प्राक्पुष्पा ॥ ५६ ॥

असम्भस्त्राजिनैकशणपिण्डात्फलात् । २ । ४ । ५७ ।

समादिवर्जेभ्यो यः फलशब्दस्तदन्ताज्जातेः स्त्रियां ङीः स्यात् । दासीफली । समादिप्रतिषेधः किम् । संफला । भस्त्रफला । अजिनफला । एकफला । शणफला । पिण्डफला । ओषधिः ॥ ५७ ॥

अनञो मूलात् । २ । ४ । ५८ ।

नञ्वर्जात्परो यो मूलशब्दस्तदन्ताज्जातेः स्त्रियां ङीः स्यात् । दर्भमूली । शीर्षमूली । अनञइति किम् । अमूला ॥ ५८ ॥

धवाद्योगादपालकान्तात् । २ । ४ । ५९ ।

धवो भर्त्ता तद्वाचिनः सम्बन्धात् स्त्रीवृत्तेः पालकान्तशब्दवर्जात् ङीः स्यात् । प्रष्ठी । गणकी । धवादिति किम् । प्रसूता । योगादिति किम् ।

देवदत्तो धवः । देवदत्ता स्त्री स्वतः । अपालकान्तादिति किम् । गोपालकस्य स्त्री गोपालिका । आदित्येव । सहिष्णोः स्त्री सहिष्णुः ॥

पूतक्रतुवृषाकप्यग्निकुसितकुसीदा-दैच । २ । ४ । ६० ।

एभ्यो धववाचिभ्यस्तद्योगात् स्त्रीवृत्तिभ्यो ङीः स्यात् । ङीयोगे चैषामैरन्तस्य । पूतक्रतायी । वृषाकपायी । अग्नायी । कुसितायी । कुसीदायी ॥ ६० ॥

मनोरौ च वा । २ । ४ । ६१ ।

धववृत्तेर्मनोर्योगात् स्त्रीवृत्ते ङीर्वा स्यात् । ङीयोगे चास्यऔरैश्चा-न्तस्य । मनावी । मनायी । मनुः ॥ ६१ ॥

वरुणेन्द्ररुद्रभवशर्वमृडादान् चान्तः । २ । ४ । ६२ ।

एभ्यो धववाचिभ्यो योगस्त्रीवृत्तिभ्यो ङीः स्यात् । ङीयोगे आन्-चान्तः । वरुणानी । इन्द्राणी । रुद्राणी । भवानी । शर्वाणी । मृडानी ॥

मातुलाचार्योपाध्यायाद्वा । २ । ४ । ६३ ।

एभ्योधववाचिभ्यो योगात्स्त्रीवृत्तिभ्यो ङीः स्यात् । ङीयोगे चा नन्तो वा । मातुलानी । मातुली । आचार्यानी । आचार्यी । उपा-ध्यायानी । उपाध्यायी ॥ ६३ ॥

सूर्याद्देवतायां वा । २ । ४ । ६४ ।

सूर्याद्धववाचिनो योगाद्देवतास्त्रीवृत्तेर्ङीर्वा स्यात् । ङीयोगे-चानन्तः । सूर्याणि । सूर्या । देवतायामिति किम् । मानुषी सूरी॥६४॥

यवयवनारण्यहिमाद्दोषलिप्युरु-महत्त्वे । २ । ४ । ६५ ।

एभ्यो यथासंख्यं दोषादौ गम्ये स्त्रियां ङीः स्यात्। ङीयोगे चानन्तः। यवानी। यवनानी लिपिः। अरण्यानी। हिमानी॥ ६५॥

अर्यक्षत्रियाद्वा। २। ४। ६६।

आभ्यां स्त्रियां ङीर्वा स्यात्। ङीयोगे चानन्तः। अर्याणी। अर्या। क्षत्रियाणी। क्षत्रिया॥ ६६॥

यञो डायन् च वा। २। ४। ६७।

यञन्तात् स्त्रियां ङीः स्यात्। ङीयोगे च डायनन्तो वा स्यात्। गार्गी। गार्ग्यायणी॥ ६७॥

लोहितादिशकलान्तात्। २। ४। ६८।

लोहितादेः शकलान्तात् यञन्तात् स्त्रियां ङीः स्यात्। तद्योगे च डायनन्तः। लौहित्यायनी। शाकल्यायनी॥ ६८॥

षावटाद्वा। २। ४। ६९।

षान्तादवटाच्च यञन्तात् स्त्रियां ङीः स्यात्। ङीयोगे च डायनन्तः। पौतिमाष्यायणी। पौतिमाष्या। आवट्यायनी। आवट्या॥ ६९॥

कौरव्यमाण्डूकासुरेः। २। ४। ७०।

एभ्यः स्त्रियां ङीः स्यात्। ङीयोगे च डायनन्तः। कौरव्यायणी। माण्डूकायनी। आसुरायणी॥ ७०॥

इञ इतः। २। ४। ७१।

इञन्तादिदन्तात् स्त्रियां ङीः स्यात्। सौतङ्गमी। इतइति किम्। कारिषगन्ध्या॥ ७१॥

नुर्जातेः। २। ४। ७२।

मनुष्यजातिवाचिन इदन्तात् स्त्रियां ङीः स्यात्। कुन्ती। दाक्षी।

इतइत्येव । दरत् । नुरिति किम् । तित्तिरिः । जातेरिति किम् । निष्कौशाम्बिः ॥ ७२ ॥

उतोऽप्राणिनश्चायुरज्ज्वादिभ्य ऊङ् । २ । ४ । ७३ ।

उदन्तान्नृजात्यप्राणिजातिवाचिनश्च स्त्रियामूङ् स्यात् । नतु य्वन्ताद्रज्ज्वादिभ्यश्च । कुरूः । ब्रह्मबन्धूः । अलाबूः । कर्कन्धूः । उतइति किम् । वधूः अप्राणिनश्चेति किम् । आखुः । जातेरित्येव । पटुः स्त्री । युरज्ज्वादिवर्जनं किम् । अध्वर्युः स्त्री । रज्जुः । हनुः ॥ ७३ ॥

बाह्वन्तकद्रुकमण्डलोर्नाम्नि । २ । ४ । ७४ ।

बाह्वन्तात् कद्रुकमण्डलुभ्यां च संज्ञायां स्त्रियामूङ् स्यात् । मद्रबाहूः । कद्रूः । कमण्डलूः । नाम्नीति किम् । वृत्तबाहुः ॥ ७४ ॥

उपमानसहितसंहितसहशफवामलक्ष्मणाद्यूरोः । २ । ४ । ७५ ।

एतत्पूर्वपदादूरोः स्त्रियामूङ् स्यात् । करभोरूः । सहितोरूः । संहितोरूः । सहोरूः । शफोरूः । वामोरूः । लक्ष्मणोरूः । उपमानादेरिति किम् । पीनोरुः ॥ ७५ ॥

नारीसखीपङ्गुश्वश्रू । २ । ४ । ७६ ।

एते ङ्यन्ता ऊङन्ताश्च निपात्यन्ते ॥ ७६ ॥

यूनस्तिः । २ । ४ । ७७ ।

यूनः स्त्रियां तिः स्यात् । युवतिः । मुख्यादित्येव । निर्यूनी ॥ ७७ ॥

अनार्षे वृद्धेऽणिञो बहुस्वरगुरूपान्त्य-

स्यान्तस्य ष्यः । २ । ४ । ७८ ।

अनार्षे वृद्धे विहितौ यावणिञौ तदन्तस्य सतो बहुस्वरस्य गुरूपान्त्यस्य नाम्नोऽन्तस्य ष्यः स्यात् । कारिषगन्ध्या । बालाक्या । अनार्षइति किम् । वासिष्ठी । वृद्धइति किम् । आहिच्छत्री । अणिञइति किम् । आर्त्तभागी । बहुस्वरेति किम् । दाक्षी । गुरूपान्त्यस्येति किम् । औपगवी । अणिञन्तस्य सतो बहुस्वरादिविशेषणं किम् । दौवार्या । औडुलोम्या ॥ ७८ ॥

कुलाख्यानाम् । २ । ४ । ७९ ।

कुलमाख्यायते यकाभिः तासामनार्षवृद्धाणिञन्तानामन्तस्य स्त्रियां ष्यः स्यात् । पौणिक्या । गौप्या । अनार्षइत्येव गौतमी ॥७९॥

क्रौड्यादीनाम् । २ । ४ । ८० ।

क्रौडि इत्यादीनामणिञन्तानामन्तस्य स्त्रियां ष्यः स्यात् । क्रौड्या । लाड्या ॥ ८० ॥

भोजसूतयोः क्षत्रियायुवत्योः । २ । ४ । ८१ ।

अनयोरन्तस्य यथासंख्यं क्षत्रियायुवत्योः स्त्रियां ष्यः स्यात् । भोज्या क्षत्रिया । सूत्या युवतिः । अन्यातु भोजा । सूता ॥ ८१ ॥

दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्ठेविद्धेर्वा । २ । ४ । ८२ ।

एषामिञन्तानां स्त्रियामन्तस्य ष्यो वा स्यात् । दैवयज्ञ्या । दैवयज्ञी । शौचिवृक्ष्या । शौचिवृक्षी । सात्यमुग्र्या । सात्यमुग्री । काण्ठेविद्ध्या । काण्ठेविद्धी ॥ ८२ ॥

ङ्यापुत्रपत्योः केवलयोरीच् तत्पुरुषे । २ । ४ । ८३ ।

मुख्यआबन्तस्य ङ्यः पुत्रपत्योः केवलयोः परयोस्तत्पुरुषे समासे ईच् स्यात् । कारीषगन्धीपुत्रः । कारीषगन्धीपतिः । ङ्येति किम् । इभ्यापुत्रः। केवलयोरिति किम् । कारीषगन्ध्यापुत्रकुलम् ॥ ८३ ॥

बन्धौ बहुव्रीहौ । २ । ४ । ८४ ।

मुख्यआबन्तस्य ङ्यो बन्धौ केवलेपरे बहुव्रीहावीच् स्यात् । कारीषगन्धीबन्धुः । केवलइत्येव । कारीषगन्ध्याबन्धुकुलम् । मुख्यइत्येव । अतिकारिषगन्ध्याबन्धुः ॥ ८४ ॥

मातमातृमातृके वा । २ । ४ । ८५ ।

मुख्यआबन्तस्य ङ्यो मातादिषु केवलेषु परेषु बहुव्रीहावीज् वा स्यात् । कारीषगन्धीमातः । कारीषगन्ध्यामातः । कारीषगन्धीमाता । कारीषगन्ध्यामाता । कारिषगन्धीमातृकः । कारीषगन्ध्यामातृकः ॥८५॥

अस्य ङ्यां लुक् । २ । ४ । ८६ ।

ङ्यां परे ऽस्य लुक् स्यात् । मद्रचरी ॥ ८६ ॥

मत्स्यस्य यः । २ । ४ । ८७ ।

मत्स्यस्य यो ङ्यां लुक् स्यात् । मत्सी ॥ ८७ ॥

व्यञ्जनात्तद्धितस्य । २ । ४ । ८८ ।

व्यञ्जनात्परस्य तद्धितस्य यो ङ्यां लुक् स्यात् । मनुषी । व्यञ्जनादिति किम् । कारिकेयी । तद्धितस्येति किम् । वैश्यी ॥ ८८ ॥

सूर्यागस्त्ययोरीये च । २ । ४ । ८९ ।

अनयोर्यो ङ्यामीये च प्रत्यये लुक् स्यात् । सूरी । आगस्ती । सौरीयः । आगस्तीयः ॥ ८९ ॥

तिष्यपुष्ययोर्भाणि । २ । ४ । ९० ।

भं नक्षत्रं तस्याणि परेऽनयोर्यो लुक् स्यात् । तैषी रात्रिः । पौषमहः । भाणीति किम् । तैष्यश्चरुः ॥ ९० ॥

आपत्यस्य क्यच्व्योः । २ । ४ । ९१ ।

व्यञ्जनात्परस्यापत्यस्य यः क्ये च्वौ च परे लुक् स्यात् । गार्गीयति । गार्गीयते । गार्गीभूतः । आपत्यस्येति किम् । साङ्काश्यीयति । व्यञ्जनादित्येव । कारिकेयीयति ॥ ९१ ॥

तद्धितयस्वरेऽनाति । २ । ४ । ९२ ।

व्यञ्जनात्परस्यापत्यस्य यो यादावादादिवर्जस्वरादौ च तद्धिते लुक् स्यात् । गार्ग्यः । गार्गकम् । आपत्यस्येत्येव । काम्पील्यकः । तद्धितेति किम् । वात्स्येन । अनातीति किम् । गार्ग्यायणः ॥ ९२ ॥

बिल्वकीयादेरीयस्य । २ । ४ । ९३ ।

नडादिस्था बिल्वादयः । तेषां कीयप्रत्ययान्तानामीयस्य तद्धितयस्वरे लुक् स्यात् । बैल्वकाः । वैणुकाः । बिल्वकीयादेरिति किम् । नाडकीयः ॥ ९३ ॥

न राजन्यमनुष्ययोरके । २ । ४ । ९४ ।

अनयोर्योऽके परे लुग् न स्यात् । राजन्यानां समूहो राजन्यकम् । एवं मानुष्यकम् ॥ ९४ ॥

ङ्यादेर्गौणस्याक्विपस्तद्धितलुक्यगोणीसूच्योः । २ । ४ । ९५ ।

ङ्यादेः प्रत्ययस्य गौणस्याक्विबन्तस्य तद्धितलुकि लुक् स्यात् । नतु गोणीसूच्योः । सप्तकुमारः । पञ्चेन्द्रः । पञ्चयुवा । द्विपङ्गुः । गौणस्येति किम् । अवन्ती । अक्विपइति किम् । पञ्चकुमारी । अगोणीसूच्योरिति किम् । पञ्चगोणिः । दशसूचिः ॥ ९५ ॥

गोश्चान्ते ह्रस्वोऽनंशिसमासेयो बहुव्रीहौ । २ । ४ । ९६ ।

गौणस्याक्विपो गोङ्यांद्यन्तस्य चान्ते वर्त्तमानस्य ह्रस्वः स्यात् । न चेदसावंशिसमासान्तइयस्वन्तबहुव्रीह्यन्तो वा । चित्रगुः । निष्कौशाम्बिः । अतिखट्वः । अतिब्रह्मबन्धुः । गौणस्येत्येव । सुगौः । राजकुमारी । अक्विप इत्येव । प्रियगौः । प्रियकुमारी चैत्रः । गोश्चेति किम् । अतितन्त्रीः । अन्तइति किम् । गोकुलम् । कुमारीप्रियः । कन्यापुरम् । अंशिसमासादिवर्जनं किम् । अर्द्धपिप्पली । बहुश्रेयसी ना ॥ ९६ ॥

क्लीबे । २ । ४ । ९७ ।

नपुंसकवृत्तेः स्वरान्तस्य नाम्नो ह्रस्वः स्यात् । कीलालपम् । अतिनु कुलम् ॥ ९७ ॥

वेदूतोऽनव्ययय्वृदीच्ङीयुवःपदे । २ । ४ । ९८ ।

ईदूतोरुत्तरपदे परे ह्रस्वो वा स्यात् । न चेत्तावव्ययौ य्वृतौ ईचौ ङ्यौ इयुव्स्थानौ च स्याताम् । लक्ष्मीपुत्रः । लक्ष्मिपुत्रः । खलपूपुत्रः । खलपुपुत्रः । अव्ययादिवर्जनं किम् । काण्डीभूतम् । इन्द्रहूपुत्रः । कारीषगन्धीपुत्रः । गार्गीपुत्रः । श्रीकुलम् । भ्रूकुलम् ॥ ९८ ॥

ङ्यापो बहुलं नाम्नि । २ । ४ । ९९ ।

ङ्यन्तस्याबन्तस्य चोत्तरपदे संज्ञायां ह्रस्वः स्याद्बहुलम् । भरणिगुप्तः । भरणीगुप्तः । रेवतिमित्रः । रेवतीमित्रः । शिलवहम् । शिलावहम् । गङ्गमहः गङ्गामहः ॥ ९९ ॥

त्वे । २ । ४ । १०० ।

ङ्यावन्तस्य त्वे परे बहुलं ह्रस्वः स्यात्। रोहिणित्वम् । रोहिणीत्वम् । अजत्वम् । अजात्वम् ॥ १०० ॥

भ्रुवोऽच्च कुंसकुट्योः । २ । ४ । १०१ ।

अनयोः परयोर्भ्रुवो ह्रस्वो ऽच्च स्यात् । भ्रकुंसः । भ्रुकुंसः । भ्रकुटिः । भ्रुकुटिः ॥ १०१ ॥

मालेषीकेष्टकस्यान्तेऽपि भारितूलचिते । २ । ४ । १०२ ।

एषां केवलानामन्तस्थानां च भार्यादिषु परेषु यथासंख्यं ह्रस्वः स्यात् । मालभारी । उत्पलमालभारी । इषीकतूलम् । इष्टकचितम् ॥१०२॥

गोण्या मेये । २ । ४ । १०३ ।

गोण्या मानवृत्तेरुपचारान्मेयवृत्तेर्ह्रस्वः स्यात् । गोण्या मितो-गोणिः ॥ १०३ ॥

ङ्यादीदूतः के । २ । ४ । १०४ ।

ङ्यादीदूदन्ताश्च के प्रत्यये ह्रस्वः स्यात् । पट्विका । सोमपका । लक्ष्मिका । वधुका ॥ १०४ ॥

न कचि । २ । ४ । १०५ ।

ङ्यादीदूतां कचि परे ह्रस्वो न स्यात् । बहुकुमारीकः । बहुकीलाल्पाकः । बहुलक्ष्मीकः । बहुब्रह्मबन्धूकः ॥ १०५ ॥

नवाऽऽपः । २ । ४ । १०६ ।

आपः कचि परे ह्रस्वो वा स्यात् । प्रियखट्वकः । प्रियखट्वाकः ।

इच्चापुंसो ऽनित्क्याप्परे । २ । ४ । १०७ ।

आबेवपरो यस्मान्न विभक्तिस्तस्मिन्ननितः प्रत्ययस्यावयवे के परेऽपुल्लिङ्गार्थाद्विहितस्यापस्स्थाने इह्रस्वौ वा स्याताम् । खट्विका । खट्वका । खट्वाका । अपुंसइति किम् । सर्विका । अनिदिति किम् । दुर्गका । आप्परइति किम् । प्रियखट्वाको ना । अतिप्रियखट्वाका स्त्री । आपइत्येव । मातृका ॥ १०७ ॥

स्वज्ञाऽजभस्त्राऽधातुत्ययकात् । २ । ४ । १०८ ।

स्वज्ञाऽजभस्त्रेभ्यो धातुत्यवर्जस्य यौ यकौ ताभ्यां च परस्यापः स्थाने ऽनित्क्याप्परे परस्त इकारो वा स्यात् । स्विका । स्वका । ज्ञिका । ज्ञका । अजिका । अजका । भस्त्रिका । भस्त्रका । इभ्यिका । इभ्यका । चटकिका । चटकका । धातुत्यवर्जनं किम् । सुनयिका । सुपाकिका । इहत्यिका । आप इत्येव । काम्पील्यिका ॥ १०८ ॥

द्व्येषसूतपुत्रवृन्दारकस्य । २ । ४ । १०९ ।

एषामन्तस्यानित्क्याप्परे इर्वा स्यात् । द्विके । द्वके । एषिका । एषका । सूतिका । सूतका । पुत्रिका । पुत्रका । वृन्दारिका । वृन्दारका ॥ १०९ ॥

वौ वर्त्तिका । २ । ४ । ११० ।

शकुनार्थे वर्त्तिकाया इत्वं वा स्यात् । वर्त्तिका । वर्त्तका । वाविति किम् । वर्त्तिका भागुरिः ॥ ११० ॥

अस्या यत्तत्क्षिपकादीनाम् । २ । ४ । १११ ।

यदादिवर्जस्यातोऽनित्क्याप्परे इः स्यात् । पाचिका । मद्रिका । अनित्कीत्येव । जीवका । आप्पर इत्येव । बहुपरिव्राजका । यदादिवर्जनं किम् । यका । सका । क्षिपका । ध्रुवका ॥ १११ ॥

नरिका मामिका । २ । ४ । ११२ ।

नरिकामामिकयोरित्वं निपात्यते । नरिका । मामिका ॥ ११२ ॥

तारकावर्णकाऽष्टका ज्योतिस्तान्तव पितृदैवत्ये । २ । ४ । ११३ ।

एतेष्वर्थेषु यथासंख्यमेते इवर्जा निपात्यन्ते । तारका ज्योतिः । वर्णका प्रावरणविशेषः । अष्टका पितृदैवत्यंकर्म्म ॥ ११३ ॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां सिद्धहेमचद्राभिधानस्वोपज्ञशब्दानुशासनलघुवृत्तौ द्वितीयाध्यायस्य चतुर्थः पादः समाप्तः ॥ २ ॥

अर्हँ ।

धातोः पूजार्थस्वतिगतार्थाधिपर्यतिक्रमार्थाऽतिवर्जः प्रादिरुपसर्गः प्राक् च । ३ । १ । १ ।

धातोः सम्बन्धी तदर्थद्योती प्रादिरुपसर्गः स्यात् । स च धातोः प्राक् न परो न व्यवहितः । पूजार्थौ स्वती गतार्थावधिपरी अतिक्रमार्थमतिश्च वर्जयित्वा । प्रणयति । परिणयति । धातोरिति किम् । वृक्षं वृक्षमभिसेकः । पूजार्थस्वत्यादिवर्जनं किम् । सुसिक्तम् । अतिसिक्तम् भवता । अध्यागच्छति । आगच्छत्यधि । पर्यागच्छति । आगच्छति परि । अतिसिक्त्वा । धातोरिति प्राक् चेति च गतिसंज्ञां यावत ॥ १ ॥

ऊर्याद्यनुकरणच्विडाचश्च गतिः । ३ । १ । २ ।

एते उपसर्गाश्च धातोः सम्बन्धिनो गतयः स्युस्ते च प्राग् धातोः। ऊर्यादिः। ऊरीकृत्य। उररीकृत्य। अनुकरणम्। खाट्कृत्य। च्व्यन्तः। शुक्लीकृत्य। डाजन्तः। पटपटाकृत्य। उपसर्गः। प्रकृत्य॥ २॥

कारिका स्थित्यादौ। ३। १। ३।

स्थित्यादावर्थे कारिका गतिः स्यात्। स्थितिर्मर्यादा वृत्तिर्वा। कारिकाकृत्य॥ ३॥

भूषादरक्षेपेऽलं सदसत्। ३। १। ४।

एष्वर्थेष्वेते यथासंख्यं गतयः स्युः। अलङ्कृत्य। सत्कृत्य। असत्कृत्य। भूषादिष्विति किम्। अलङ्कृत्वा मा कारीत्यर्थः॥ ४॥

अग्रहाऽनुपदेशे ऽन्तरदः। ३। १। ५।

अनयोरर्थयोरेतौ यथासंख्यं गती स्याताम्। अन्तर्हत्य। अदः कृत्यैतत्कर्त्तेतिध्यायति॥ ५॥

कणेमन स्तृप्तौ। ३। १। ६।

एतावव्ययौ तृप्तौ गम्यमानायां गती स्याताम्। कणेहत्य। मनोहत्य पयः पिबति। तृप्ताविति किम्। तण्डुलावयवे कणे हत्वा॥ ६॥

पुरोऽस्तमव्ययम्। ३। १। ७।

एतावव्ययौ गती स्याताम्। पुरस्कृत्य। अस्तङ्गत्य। अव्ययमिति किम्। पुरः कृत्वा नगरीरित्यर्थः॥ ७॥

गत्यर्थवदोऽच्छः। ३। १। ८।

अच्छेत्यव्ययं गत्यर्थानां वदश्च धातोः सम्बन्धि गतिः स्यात्। अच्छगत्य। अच्छोद्य॥ ८॥

तिरोऽन्तर्द्धौ। ३। १। ९।

तिरो ऽन्तर्द्धौ गतिः स्यात् । तिरोभूय ॥ ९ ॥

कृगो नवा । ३ । १ । १० ।

तिरो ऽन्तर्द्धौ कृगः सम्बन्धि गतिर्वा स्यात् । तिरस्कृत्य । तिरःकृत्य । पक्षे तिरः कृत्वा ॥ १० ॥

मध्येपदेनिवचनेमनस्युरस्यनत्याधाने । ३ । १ । ११ ।

अनत्याधानमनुपश्लेषोऽनाश्चर्यं वा । तद्वृत्तय एते ऽव्ययाः कृगयोगे गतयो वा स्युः । मध्येकृत्य । मध्येकृत्वा । पदेकृत्य । पदेकृत्वा । निवचनेकृत्य । निवचनेकृत्वा । मनसिकृत्य । मनसिकृत्वा । उरसिकृत्य । उरसिकृत्वा ॥ ११ ॥

उपाजेऽन्वाजे । ३ । १ । १२ ।

एतावव्ययौ दुर्बलस्य भग्नस्य वा बलाधानार्थौ कृग्योगे गती वा स्याताम् । उपाजेकृत्य । उपाजेकृत्वा । अन्वाजेकृत्य । अन्वाजेकृत्वा ॥१२॥

स्वाम्येऽधिः । ३ । १ । १३ ।

स्वाम्ये गम्ये ऽधीत्यव्ययं कृगयोगे गति र्वा स्यात् । चैत्रं ग्रामे ऽधिकृत्य । अधिकृत्वा वा गतः । स्वाम्यइति किम् । ग्राममधिकृत्वा उद्दिश्येत्यर्थः ॥ १३ ॥

साक्षादादिश्च्व्यर्थे । ३ । १ । १४ ।

एते च्व्यर्थवृत्तयः कृगयोगे गतयो वा स्युः । साक्षात्कृत्य । साक्षात्कृत्वा । मिथ्याकृत्य । मिथ्याकृत्वा ॥ १४ ॥

नित्यं हस्तेपाणावुद्वाहे । ३ । १ । १५ ।

एतावव्ययावुद्वाहे गम्ये नित्यं कृग्योगे गती स्याताम् । हस्तेकृत्य । पाणौकृत्य । उद्वाहइति किम् । हस्तेकृत्वा काण्डं गतः ॥ १५ ॥

प्राध्वं बन्धे । ३ । १ । १६ ।

प्राध्वमित्यव्ययं बन्धार्थे कृग्योगे गतिः स्यात् । प्राध्वंकृत्य । बन्धइति किम् । प्राध्वंकृत्वा शकटं गतः ॥ १६ ॥

जीविकोपनिषदौपम्ये । ३ । १ । १७ ।

एतावौपम्ये गम्ये कृग्योगे गती स्याताम् । जीविकाकृत्य । उपनिषत्कृत्य ॥ १७ ॥

नाम नाम्नैकार्थ्ये समासो बहुलम् ।३।१।१८।

नाम नाम्ना सहैकार्थ्ये सामर्थ्यविशेषे सति समासो बहुलं स्यात् । लक्षणमिदमधिकारश्च तेन बहुव्रीह्यादिसंज्ञाऽभावे यत्रैकार्थता तत्रानेनैव समासः । विस्पष्टपटुः । दारुणाध्यायकः । सार्वचर्म्मीणो रथः । कन्येइव । श्रुतपूर्वः । नामेति किम् । चरन्ति गावो धनमस्य । नाम्नेति किम् । चैत्रः पचति ॥ १८ ॥

सुज्वार्थे सङ्ख्या सङ्ख्येये सङ्ख्यया बहुव्रीहिः । ३ । १ । १९ ।

सुजऽर्थो वारो वाऽर्थो विकल्पः संशयो वा । तद्वृत्तिसङ्ख्यावाचिनामसङ्ख्येयार्थेन सङ्ख्यानाम्ना सहैकार्थे समासो बहुव्रीहिश्च स्यात् । द्विदशाः । द्वित्राः । सङ्ख्येति किम् । गावो वा । दश वा । सङ्ख्ययेति किम् । दश वा । गावो वा । सङ्ख्येयइति किम् । द्विविंशतिर्गवाम् ॥१९॥

आसन्नादूराधिकाध्यर्द्धार्द्धादिपूरणं द्वितीयाद्यन्यार्थे । ३ । १ । २० ।

आसन्नादि अर्द्धपूर्वपदं च पूरणप्रत्ययान्तं नाम सङ्ख्यानाम्नैकार्थ्ये समासः स्यात्। द्वितीयाद्यन्तस्यान्यपदस्यार्थे सङ्ख्येये वाच्ये स च बहुव्रीहिः। आसन्नदशाः। अदूरदशाः। अधिकदशाः। अध्यर्द्धविंशाः। अर्द्धपञ्चमविंशाः॥ २०॥

अव्ययम्। ३। १। २१।

अव्ययं नाम सङ्ख्यानाम्नैकार्थ्ये समस्यते। द्वितीयान्यार्थे सङ्ख्येये वाच्ये स च बहुव्रीहिः। उपदशाः॥ २१॥

एकार्थं चानेकं च। ३। १। २२।

एकमनेकं चैकार्थं समानाधिकरणमव्ययं च नाम्ना द्वितीयाद्यन्तान्यपदस्यार्थे समस्यते। स च बहुव्रीहिः। आरूढवानरो वृक्षः। सुसूक्ष्मजटकेशः। उच्चैर्मुखः॥ २२॥

ओष्ट्रमुखादयः। ३। १। २३।

एते बहुव्रीहिसमासा निपात्यन्ते। ओष्ट्रमुखमिवमुखमस्य ओष्ट्रमुखः वृषस्कन्धः॥ २३॥

सहस्तेन। ३। १। २४।

तेनेतितृतीयान्तेन सहोऽन्यपदार्थे समस्यते। स च बहुव्रीहिः। सपुत्रआगतः। सकर्म्मकः॥ २४॥

दिशोरूढ्याऽन्तराले। ३। १। २५।

रूढ्या दिग्वाचिनामरूढ्यैवदिग्वाचिना सहान्तरालेऽन्यपदार्थे वाच्ये समासो बहुव्रीहिः स्यात्। दक्षिणपूर्वा दिक्। रूढ्येति किम्। ऐन्द्र्याश्चकौबेर्याश्च दिशोर्यदन्तरालमिति॥ २५॥

तत्रादायमिथस्तेन प्रहृत्येति सरूपेण

युद्धेऽव्ययीभावः । ३ । १ । २६ ।

तत्रेति सप्तम्यन्तं मिथ आदायेतिक्रियाव्यतिहारे तेनेतितृतीयान्तं मिथः प्रहृत्येतिक्रियाव्यतिहारे समानरूपेण नाम्ना युद्धविषयेऽन्यपदार्थे वाच्ये समासोऽव्ययीभावः स्यात् । केशाकेशि । दण्डादण्डि । तत्रेति तेनेति च किम् । केशांश्च केशांश्च गृहीत्वा। मुखं च मुखं च प्रहृत्य कृतं युद्धम्। आदायेति प्रहृत्येति च किम् । केशेषु च केशेषु च स्थित्वा । दण्डैश्च दण्डैश्चागत्य कृतं युद्धम् गृहकोकिलाभ्याम् । सरूपेणेति किम् । हस्ते च पादे च गृहीत्वा कृतं युद्धम् । युद्धइति किम् । हस्ते च हस्ते चादाय सख्यं कृतम् ॥ २६ ॥

नदीभिर्नाम्नि । ३ । १ । २७ ।

नाम नदीवाचिना संज्ञायामन्यपदार्थे समासोऽव्ययीभावश्च स्यात् । उन्मत्तगङ्गं देशः। तूष्णींगङ्गम्। नाम्नीति किम् । शीघ्रगङ्गो देशः॥२७॥

सङ्ख्या समाहारे । ३ । १ । २८ ।

सङ्ख्यावाचि नदीवाचिभिः सह समाहारे गम्ये समासोऽव्ययीभावः स्यात् । द्वियमुनम् । पञ्चनदम् । समाहारेति किम् । एकनदी । द्विगु-बाधनार्थं वचनम् ॥ २८ ॥

वंश्येन पूर्वार्थे । ३ । १ । २९ ।

विद्यया जन्मना वा एकसन्तानो वंशः । तत्र भवो वंश्यः । तद्वाचिना नाम्ना सङ्ख्यावाचिसमासोऽव्ययीभावः स्यात् । पूर्वपदस्यार्थे वाच्ये । एकमुनि व्याकरणस्य । सप्तकाशि राज्यस्य। पूर्वार्थइति किम् । द्विमुनिकं व्याकरणम् ॥ २९ ॥

पारे मध्ये ऽग्रेऽन्तः षष्ठ्या वा । ३ । १ । ३० ।

एतानि षष्ठ्यन्तेन पूर्वपदार्थे समासोऽव्ययीभावो वा स्युः । पारे-

गङ्गम् । मध्येगङ्गम् । अग्रेवणम् । अन्तर्गिरिम् । पक्षे गङ्गापारम् । गङ्गामध्यम् । वनाग्रम् । गिर्यन्तः ॥ ३० ॥

यावदियत्त्वे । ३ । १ । ३१ ।

इयत्त्वेऽवधारणे गम्ये यावदिति नाम नाम्ना पूर्वपदार्थे वाच्ये समासोऽव्ययीभावः स्यात् । यावदमत्रं भोजय । इयत्त्वइति किम् । यावद्दत्तम् तावद्भुक्तम् ॥ ३१ ॥

पर्यपाङ्बहिरच् पञ्चम्या । ३ । १ । ३२ ।

एतानि पञ्चम्यन्तेन पूर्वपदार्थे वाच्ये समासोऽव्ययीभावः । परित्रिगर्त्तम् । अपत्रिगर्त्तम् । आग्रामम् । बहिर्ग्रामम् । प्राग्ग्रामम् । पञ्चम्येति किम् । परिवृक्षं विद्युत् ॥ ३२ ॥

लक्षणेनाभिप्रत्याभिमुख्ये । ३ । १ । ३३ ।

लक्षणं चिह्नम् । तद्वाचिनाऽऽभिमुख्यार्थावभिप्रती पूर्वपदार्थेऽर्थे समासोऽव्ययीभावः स्यात् । अभ्यग्नि । प्रत्यग्नि शलभाः पतन्ति । लक्षणेनेति किम् । स्रुघ्नं प्रतिगतः । पूर्वपदार्थइत्येव । अभ्यङ्कागावः ॥ ३३ ॥

दैर्घ्येऽनुः । ३ । १ । ३४ ।

दैर्घ्ये आयामविषये यल्लक्षणं तद्वाचिना पूर्वपदार्थेऽनुः समासोऽव्ययीभावः स्यात् । अनुगङ्गं वाणारसी । दैर्घ्यइति किम् । वृक्षमनुविद्युत् ॥ ३४ ॥

समीपे । ३ । १ । ३५ ।

समीपार्थेऽनुः समीपिवाचिनाम्ना पूर्वपदार्थे समासोऽव्ययीभावः स्यात् । अनुवनमशनिर्गता ॥ ३५ ॥

तिष्ठद्ग्वित्यादयः । ३ । १ । ३६ ।

एते समासा ऽव्ययीभावाः स्युः । यथायोगमन्यस्य पूर्वस्य वा पदस्यार्थे । तिष्ठद्गु कालः । अधोनाभं हतः ॥ ३६ ॥

नित्यं प्रतिनाऽल्पे । ३ । १ । ३७ ।

अल्पार्थेन प्रतिना नाम नित्यं समासोऽव्ययीभावः स्यात् । शाकप्रति । अल्पइति किम् । वृक्षंप्रतिविद्युत् ॥ ३७ ॥

संङ्ख्याऽक्षशलाकं परिणा द्यूतेऽन्यथा-वृत्तौ । ३ । १ । ३८ ।

सङ्ख्यावाच्यक्षशलाके च द्यूतविषयायामन्यथावृत्तौ वर्त्तमानेन परिणा सह नित्यं समासोऽव्ययीभावः स्यात् । एकपरि । अक्षपरि । शलाकापरि । एकेनाक्षेण शलाकया वा न तथावृत्तं यथापूर्वंजयइत्यर्थः । संङ्ख्यादिति किम् । पाशकेन न तथावृत्तम् । द्यूतइति किम् । रथस्याक्षेण न तथावृत्तम् ॥ ३८ ॥

विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययाऽ-संप्रतिपश्चात्क्रमख्यातियुगपत्सदृक्-सम्पत्साकल्यान्तेऽव्ययम् । ३ । १ । ३९ ।

एष्वर्थेषु वर्त्तमानमव्ययं नाम्ना सह पूर्वपदार्थे वाच्ये नित्यं समासोऽव्ययीभावः स्यात् । विभक्ति । विभक्त्यर्थः कारकम् । अधिस्त्रि । समीपम् । उपकुम्भम् । समृद्धिः । सुमद्रम् । विगता ऋद्धिर्व्यृद्धिः । दुर्यवनम् । अर्थाभावः । निर्मक्षिकम् । अत्ययोऽतीतत्वम् । अतिवर्षम् । असम्प्रतीति सम्प्रत्युपभोगाद्यभावः । अतिकम्बलम् । पश्चात् । अनुरथम् । क्रमः । अनुज्येष्ठं । ख्यातिः । इतिभद्रबाहु । युगपत् । सचक्रं धेहि । सदृक् । सव्रतम् ।

सम्पत् । सब्रह्म साधूनाम् । साकल्यम् । सतृणमभ्यवहरति । अन्तः सपिण्डैषणमधीते ॥ ३९ ॥

योग्यतावीप्सार्थानतिवृत्तिसादृश्ये।३।१।४०।

एष्वर्थेष्वऽव्ययं नाम्ना सह पूर्वपदार्थे समासोऽव्ययीभावः स्यात। अनुरूपम् । प्रत्यर्थम् । यथाशक्ति । सशीलमनयोः ॥ ४० ॥

यथाऽथा । ३ । १ । ४१ ।

थाप्रत्ययवर्जं यथेत्यव्ययं नाम्ना सह पूर्वपदार्थे समासोऽव्ययीभावः स्यात् । यथारूपं चेष्टते । यथावृद्धमर्चय । यथासूत्रम् । अथेति किम् । यथा चैत्रस्तथा मैत्रः ॥ ४१ ॥

गतिक्वन्यस्तत्पुरुषः । ३ । १ । ४२ ।

गतयः कुश्च नाम्ना सह नित्यं समासस्तत्पुरुषः स्यात् । अन्यो बहुव्रीह्यादिलक्षणहीनः । ऊरीकृत्य । खाट्कृत्य । प्रकृत्य । कारिकाकृत्य । कुब्राह्मणः । कोष्णम् । अन्यइति किम् । कुपुरुषः ॥ ४२ ॥

दुर्निन्दाकृच्छ्रे । ३ । १ । ४३ ।

दुरव्ययं निन्दाकृच्छ्रवृत्ति नाम्ना सह नित्यं समासस्तत्पुरुषः स्यात् । दुष्पुरुषः । दुष्कृतम् । अन्यइति किम् । दुष्पुरुषकः ॥ ४३ ॥

सुः पूजायाम् । ३ । १ । ४४ ।

स्वित्यव्ययं पूजार्थं नाम्ना सह नित्यं समासस्तत्पुरुषः स्यात् । सुराजा । अन्यइति किम् । सुमद्रम् ॥ ४४ ॥

अतिरतिक्रमे च । ३ । १ । ४५ ।

अतिक्रमे पूजायां चार्थे अतीत्यव्ययं नाम्ना सह नित्यं समासस्तत्पुरुषः स्यात् । अतिस्तुत्य । अतिराजा ॥ ४५ ॥

आङल्पे । ३ । १ । ४६ ।

आङित्यव्ययमल्पार्थं नाम्ना सह समासस्तत्पुरुषः स्यात् । आकडारः ॥ ४६ ॥

प्रात्यवपरिनिरादयो गतक्रान्तक्रुष्टग्लानक्रान्ताद्यर्थाः प्रथमाद्यन्तैः । ३ । १ । ४७ ।

प्रादयो गताद्यर्थाः प्रथमान्तैरत्यादयः क्रान्ताद्यर्था द्वितीयान्तैरवादयः क्रुष्टाद्यर्थास्तृतीयान्तैः पर्यादयो ग्लानाद्यर्थाश्चतुर्थ्यन्तैर्निरादयः क्रान्ताद्यर्थाः पञ्चम्यन्तैर्नित्यं समासस्तत्पुरुषः स्युः । प्राचार्यः । समर्थः । अतिखट्वः । उद्वेलः । अवकोकिलः । परिवीरुत् । पर्यध्ययनः । उत्सङ्ग्रामः निष्कौशाम्बिः । अपशाखः । बाहुलकात् षष्ठ्याऽपि । अन्तर्गार्ग्यः । गताद्यर्था इति किम् । वृक्षम्परिविद्युत् । अन्यइत्येव । प्राचार्यको देशः ॥ ४७ ॥

अव्ययं प्रवृद्धादिभिः । ३ । १ । ४८ ।

अव्ययं प्रवृद्धादिभिस्सह नित्यं समासस्तत्पुरुषः स्यात् । पुनः प्रवृद्धम् । अन्तर्भूतः ॥ ४८ ॥

ङस्युक्तं कृता । ३ । १ । ४९ ।

कृत्प्रत्ययविधायके सूत्रे ङस्यन्त नाम्नोक्तं कृदन्तेन नाम्ना नित्यं समासस्तत्पुरुषः स्यात् । कुम्भकारः । ङस्युक्तमिति किम् । अलङ्कृत्वा । कृतेति किम् । धर्मो वो रक्षतु ॥ ४९ ॥

तृतीयोक्तं वा । ३ । १ । ५० ।

दंशेस्तृतीययेत्यतो यत्तृतीयोक्तं नाम तत्कृदन्तेन वा समासस्तत्पुरुषः स्यात् । मूलकोपदंशम् । मूलकेनोपदंशं भुङ्क्ते ॥ ५० ॥

नञ् । ३ । १ । ५१ ।

नञ् नाम नाम्ना समासस्तत्पुरुषः स्यात् । अगौः । न सूर्यं पश्यन्ति असूर्यम्पश्या राजदाराः ॥ ५१ ॥

पूर्वापराधरोत्तरमभिन्नेनांशिना । ३ । १ । ५२ ।

पूर्वादयोऽशार्था अंशवद्वाचिना समासस्तत्पुरुषः स्यात् । नचेत्सोंऽशी भिन्नः । पूर्वकायः । अपरकायः । उत्तरकायः । अधरकायः । अभिन्नेनेति किम् । पूर्वं छात्राणामामन्त्रयस्व । अंशिनेति किम् । पूर्वो नाभेः कायस्य ॥ ५२ ॥

सायाह्नादयः । ३ । १ । ५३ ।

एतेऽशितत्पुरुषाः साधवः स्युः । सायाह्नः । मध्यन्दिनम् ॥ ५३ ॥

समेंऽशेऽर्द्धं नवा । ३ । १ । ५४ ।

समांशार्थमर्द्धमंशिना भिन्नेन वा समासस्तत्पुरुषः स्यात् । अर्द्धपिप्पली । पिप्पल्यर्द्धम् । समेंशइति किम् । ग्रामार्द्धः ॥ ५४ ॥

जरत्यादिभिः । ३ । १ । ५५ ।

एभिरंशिभिरभिन्नैरर्द्धो वा समासस्तत्पुरुषः स्यात् । अर्द्धजरती । जरत्यर्द्धः । अर्द्धोक्तम् । उक्तार्द्धः ॥ ५५ ॥

द्वित्रिचतुष्पूरणाग्रादयः । ३ । १ । ५६ ।

पूरणप्रत्ययान्ता द्वित्रिचत्वारोऽग्रादयश्चाभिन्नेनांशिना वा समासस्तत्पुरुषः स्यात् । द्वितीयभिक्षा । भिक्षाद्वितीयम् । तृतीयभिक्षा । भिक्षातृतीयम् । तुर्यभिक्षा । भिक्षातुर्यम् । अग्रहस्तः । हस्ताग्रम् । तलपादः । पादतलम् ॥ ५६ ॥

कालो द्विगौ च मेयैः । ३ । १ । ५७ ।

कालवाच्येकवचनान्तं द्विगौ च विषये मेयवाचिना समासस्तत्पुरुषः स्यात् । मासजातः । द्विगौ । एकमासजातः । द्व्यह्नसुप्तः । कालइति किम् । द्रोणो धान्यस्य । ५७ ॥

स्वयंसामी क्तेन । ३ । १ । ५८ ।

एते अव्यये क्तान्तेन सहैकार्थ्ये समासस्तत्पुरुषः स्याताम् । स्वयंधौतम् । सामिकृतम् । क्तेनेति किम् । स्वयंकृत्वा ॥ ५८ ॥

द्वितीयाखट्वा क्षेपे । ३ । १ । ५९ ।

खट्वेतिद्वितीयान्तं क्षेपे निन्दायां क्तान्तेन सहैकार्थ्ये समासस्तत्पुरुषः स्यात् । खट्वारूढो जाल्मः । क्षेपइति किम् । खट्वामारूढः पिताऽध्यापयति ॥ ५९ ॥

कालः । ३ । १ । ६० ।

कालवाचिद्वितीयान्तं क्तान्तेन समासस्तत्पुरुषः स्यात् । रात्र्यारूढाः । अहरतिसृताः ॥ ६० ॥

व्याप्तौ । ३ । १ । ६१ ।

गुणक्रियाद्रव्यैरत्यन्तसंयोगे या द्वितीया तदन्तं कालवाचिव्यापकार्थेन समासस्तत्पुरुषः स्यात् । मुहूर्त्तसुखं । क्षणपाठः । दिनगुडः । व्याप्ताविति किम् । मासं पूरको याति ॥ ६१ ॥

श्रितादिभिः । ३ । १ । ६२ ।

द्वितीयान्तं श्रितादिभिः समासस्तत्पुरुषः स्यात् । धर्मश्रितः । शिवगतः ॥ ६२ ॥

प्राप्तापन्नौ तयाच्च । ३ । १ । ६३ ।

एतौ प्रथमान्तौ द्वितीयान्तेन समासस्तत्पुरुषः स्याताम् । तद्योगे चानयोरत् स्यात् । प्राप्तजीविका । आपन्नजीविका ॥ ६३ ॥

ईषद्गुणवचनैः । ३ । १ । ६४ ।

ईषदव्ययं गुणवचनैः समासस्तत्पुरुषः स्यात्। ये गुणेवर्त्तित्वा तद्योगाद्गुणिनि वर्त्तन्ते ते गुणवचनाः। ईषत्पिङ्गलः। ईषद्रक्तः। गुणवचनैरिति किम्। ईषद्गार्ग्यः ६४ ॥

तृतीया तत्कृतैः। ३। १। ६५।

तृतीयान्तं तदर्थकृतैर्गुणवचनैरेकार्थ्ये समासस्तत्पुरुषः स्यात्। शङ्कुलाखण्डः। मदपटुः। तत्कृतैरिति किम्। अक्ष्णाकाणः। गुणवचनैरित्येव। बभ्रापटुः पाटवमित्यर्थः ॥ ६५ ॥

चतस्रार्द्धम्। ३। १। ६६।

अर्द्धस्तृतीयान्तस्तत्कृतार्थेन चतसृशब्देन समासस्तत्पुरुषः स्यात्। अर्द्धचतस्रो मात्रः। चतस्रेति किम्। अर्द्धेन चत्वारो द्रोणाः ॥ ६६ ॥

ऊनार्थपूर्वाद्यैः। ३। १। ६७।

तृतीयान्तं ऊनार्थैः पूर्वाद्यैश्च समासस्तत्पुरुषः स्यात्। माषोनं। माषविकलं। मासपूर्वः। मासावरः ॥ ६७ ॥

कारकं कृता। ३। १। ६८।

कारकवाचितृतीयान्तं कृदन्तेन समासस्तत्पुरुषः स्यात्। आत्मकृतम्। नखानिर्भिन्नः। काकपेया नदी। बाष्पच्छेद्यानि तृणानि। कारकमिति किम्। विद्ययोषितः ॥ ६८ ॥

न विंशत्यादिनैकोऽच्चान्तः। ३। १। ६९।

एकशब्दस्तृतीयान्तो न विंशत्यादिना समासस्तत्पुरुषः स्यात्। एकस्यचादन्तः। एकान्नविंशतिः। एकादूनविंशतिः। एकान्नत्रिंशत्। एकादूनत्रिंशत् ॥ ६९ ॥

चतुर्थी प्रकृत्या। ३। १। ७०।

प्रकृतिः परिणामिकारणम् । एतद्वाचिनैकार्थ्ये चतुर्थ्यन्तं विकारार्थं समासस्तत्पुरुषः स्यात् । यूपदारु । प्रकृत्येति किम् । रन्धनाय स्थाली ॥

हितादिभिः । ३ । १ । ७१ ।

चतुर्थ्यन्तं हिताद्यैः समासस्तत्पुरुषः स्यात् । गोहितम् । गोसुखम् ॥

तदर्थार्थेन । ३ । १ । ७२ ।

चतुर्थ्यर्थो यस्य तेनार्थेन चतुर्थ्यन्तं समासस्तत्पुरुषः स्यात् । पित्रर्थ-पयः । आतुरार्थाय यवागूः । तदर्थार्थेनेति किम् । पित्रेऽर्थः ॥ ७२ ॥

पञ्चमीभयाद्यैः । ३ । १ । ७३ ।

पञ्चम्यन्तं भयाद्यैरैकार्थ्ये समासस्तत्पुरुषः स्यात् । वृकभयम् । वृक-भीरुः ॥ ७३ ॥

क्तेनासत्त्वे । ३ । १ । ७४ ।

असत्त्ववृत्तेर्या पञ्चमी तदन्तं क्तान्तेन समासस्तत्पुरुषः स्यात् । स्तोकान्मुक्तः । अल्पान्मुक्तः । असत्त्वइति किम् । स्तोकाद्बद्धः ॥७४॥

परः शतादि । ३ । १ । ७५ ।

अयं पञ्चमीतत्पुरुषः साधुः स्यात् । परःशताः । परःसहस्राः ॥७५॥

षष्ठ्ययत्नाच्छेषे । ३ । १ । ७६ ।

शेषे या षष्ठी तदन्तं नाम नाम्नैकार्थ्ये समासस्तत्पुरुषः स्यात् । नचेत्सशेषो नाथइत्यादिर्यत्नात् । राजपुरुषः । अयत्नादिति किम् । सर्पि-षोनाथितम् । शेषइति किम् । गवां कृष्णा सम्पन्नक्षीरा ॥ ७६ ॥

कृति । ३ । १ । ७७ ।

कर्मणिकृतः कर्त्तरीति या कृन्निमित्ता षष्ठी तदन्तं नाम्ना समास-स्तत्पुरुषः स्यात् । सर्पिर्ज्ञानं । गणधरोक्तिः ॥ ७७ ॥

याजकादिभिः । ३ । १ । ७८ ।

षष्ठ्यन्तं याजकाद्यैः समासस्तत्पुरुषः स्यात् । ब्राह्मणयाजकः । गुरुपूजकः ॥ ७८ ॥

पत्तिरथौ गणकेन । ३ । १ । ७९ ।

एतौ षष्ठ्यन्तौ गणकेन समासस्तत्पुरुषः स्याताम् । पत्तिगणकः । रथगणकः । पत्तिरथाविति किम् । धनस्य गणकः ॥ ७९ ॥

सर्वपश्चादादयः । ३ । १ । ८० ।

एते षष्ठीतत्पुरुषाः साधवः स्युः । सर्वपश्चात् । सर्वचिरम् ॥ ८० ॥

अकेन क्रीडाजीवे । ३ । १ । ८१ ।

षष्ठ्यन्तमकप्रत्ययान्तेन क्रीडाजीविकयोर्गम्ययोः समासस्तत्पुरुषः स्यात् । उद्दालपुष्पभञ्जिका । नखलेखकः । क्रीडाजीवइति किम् । पयसः पायकः ॥ ८१ ॥

न कर्त्तरि । ३ । १ । ८२ ।

कर्त्तरि या षष्ठी तदन्तमकान्तेन समासो न स्यात् । तव शायिका । कर्त्तरीति किम् । इक्षुभक्षिका ॥ ८२ ॥

कर्मजा तृचाच । ३ । १ । ८३ ।

कर्मणि या षष्ठी तदन्तं कर्तृविहिताकान्तेन तृजन्तेन न समासः स्यात् ।- भक्तस्य भोजकः । अपांस्रष्टा । कर्मजेति किम् । गुणो गुणिविशेषकः सम्बन्धे ऽत्र षष्ठी । कर्त्तरीत्येव । पयः पायिका ॥ ८३ ॥

तृतीयायाम् । ३ । १ । ८४ ।

कर्त्तरि तृतीयायां सत्यां कर्म्मजा षष्ठी न समस्यते । आश्चर्यो गवां दोहोऽगोपालेन । तृतीयायामिति किम् । शब्दानुशासनं गुरोः ॥ ८४ ॥

तृप्तार्थपूरणाव्ययाऽतृश्शत्रानशा।३।१।८५।

तृप्तार्थैः पूरणप्रत्यान्तैरव्ययैरतृशन्तैः शत्रन्तैरानशन्तैश्च षष्ठ्यन्तं न समस्यते । फलानां तृप्तः । तीर्थकृतां षोडशः । राज्ञः साक्षात् । रामस्य-द्विषन् । चैत्रस्य पचन् । मैत्रस्य पचमानः ॥ ८५ ॥

ज्ञानेच्छार्चार्थाधारक्तेन । ३ । १ । ८६ ।

ज्ञानेच्छार्चार्थेभ्यो यो वर्त्तमानेक्तो यश्चाद्यर्थाच्चाधार इत्याधारे-क्तस्तदन्तेन षष्ठ्यन्तं न समस्यते। राज्ञां ज्ञातः। राज्ञामिष्टः। राज्ञां पूजि-तः । इदमेषां यातम् ॥ ८६ ॥

अस्वस्थगुणैः । ३ । १ । ८७ ।

ये गुणाः स्वात्मन्येवतिष्ठन्ति न द्रव्ये ते स्वस्थास्तत्प्रतिषेधेना-स्वस्थगुणवाचिभिः षष्ठ्यन्तं न समस्यते । पटस्य शुक्लः । गुडस्य मधुरः। अस्वस्थगुणैरिति किम् । घटवर्णः । चन्दनगन्धः ॥ ८७ ॥

सप्तमी शौण्डाद्यैः । ३ । १ । ८८ ।

एभिः सहैकार्थ्ये सप्तम्यन्तं समासस्तत्पुरुषः स्यात् । पानशौण्डः । अक्षधूर्त्तः ॥ ८८ ॥

सिंहाद्यैः पूजायाम् । ३ । १ । ८९ ।

एभिः सप्तम्यन्तं समासस्तत्पुरुषः स्यात् । पूजायां गम्यमानायां । समरसिंहः । भूमिवासवः ॥ ८९ ॥

काकाद्यैः क्षेपे । ३ । १ । ९० ।

एभिः सप्तम्यन्तं निन्दायां गम्यमानायां समासस्तत्पुरुषः स्यात् । तीर्थकाकः । तीर्थश्वा । क्षेपइति किम् । तीर्थे काकोस्ति ॥ ९० ॥

पात्रेसमितेत्यादयः । ३ । १ । ९१ ।

एते सप्तमीतत्पुरुषाः क्षेपे निपात्यन्ते। पात्रे समिताः। गेहे शूरः॥९१॥

क्तेन। ३। १। ९२।

सप्तम्यन्तं क्तान्तेन क्षेपे समासस्तत्पुरुषश्च स्यात्। भस्मनिहुतं। अवतप्ते नकुलस्थितम्॥ ९२॥

तत्राहोरात्रांशम्। ३।१। ९३।

तत्रेतिसप्तम्यन्तं अहरवयवा रात्रवयवाश्च सप्तम्यन्ताः क्तान्तेन समासस्तत्पुरुषः स्यात्। तत्रकृतम्। पूर्वाह्णकृतम्। पूर्वरात्रकृतम्। तत्राहोरात्रंशमिति किम्। घटेकृतम्। अहोरात्रग्रहणं किम्। शुक्लपक्षे कृतम्। अंशमिति किम्। अह्निभुक्तं रात्रौनृत्तम्॥ ९३॥

नाम्नि। ३। १। ९४।

सप्तम्यन्तं नाम्ना संज्ञाविषये समासस्तत्पुरुषश्च स्यात्। अरण्येतिलकाः। अरण्येमाषकाः॥ ९४॥

कृद्येनावश्यके। ३। १। ९५।

सप्तम्यन्तं नाम यएव्रातइतियान्तेनावश्यम्भावे गम्ये समासस्तत्पुरुषश्च स्यात्। मासदेयम्। कृदिति किम्। मासेपित्र्यम्॥ ९५॥

विशेषणं विशेष्येणैकार्थं कर्म्मधारयश्च। ३। १। ९६।

भिन्नप्रवृत्तिनिमित्तयोः शब्दयोरेकस्मिन्नर्थे वृत्तिरैकार्थ्यं तद्विशेषणवाचि विशेष्यवाचिनैकार्थ्ये समासस्तत्पुरुषः कर्म्मधारयश्च स्यात्। नीलोत्पलम्। खञ्जकुण्टः। कुण्टखञ्जः। एकार्थ्यमिति किम्। वृद्धस्योक्षा वृद्धोक्षा॥ ९६॥

पूर्वकालैकसर्वजरत्पुराणनवकेवलम्। ३। १। ९७।

पूर्वकालो यस्य तद्वाच्येकादीनि चैकार्थानि परेण नाम्ना समासस्तत्पुरुषः कर्मधारयश्च स्यात् । स्नातानुलिप्तः । एकशाटी । सर्वान्नम् । जरद्गवः पुराणकविः । नवोक्तिः । केवलज्ञानम् । एकार्थमित्येव । स्नात्वानुलिप्तः ॥

दिगधिकं संज्ञातद्धितोत्तरपदे । ३ । १ । ९८ ।

दिग्वाच्यधिकं चैकार्थं नाम्ना समासस्तत्पुरुषः कर्मधारयश्च स्यात् । संज्ञायां तद्धिते च विषयभूते उत्तरपदे च परतः । दक्षिणकोशला । पूर्वेषुकामशमी । दाक्षिणशालः । आधिकषाष्टिकः । उत्तरगवधनः । अधिकगवप्रियः ॥ ९८ ॥

संख्या समाहारे च द्विगुश्चानाम्न्ययम् । ३ । १ । ९९ ।

संख्यावाचि परेण नाम्ना समासस्तत्पुरुषः कर्म्मधारयश्च स्यात् । संज्ञातद्धितयोर्विषये उत्तरपदे च परे समाहारे चार्थे अयमेव चासंज्ञायां द्विगुश्च । पञ्चाम्राः । सप्तर्षयः । द्वैमातुरः । अध्यर्द्धकंसः । पञ्चगवधनः । पञ्चनावप्रियः । पञ्चराजी । समाहारेचेति किम् । अष्टौप्रवचनमातरः । अनाम्नीति किम् । पाञ्चर्षम् ॥ ९९ ॥

निन्द्यंकुत्सनैरपापाद्यैः । ३ । १ । १०० ।

निन्द्यवाचिनिन्दाहेतुभिः पापादिवर्जैः सह समासस्तत्पुरुषः कर्म्मधारयश्च स्यात् । वैयाकरणखसूची । मीमांसकदुर्दुरूटः । निन्द्यमिति किम् । वैयाकरणश्चौरः । अपापाद्यैरिति किम् । पापवैयाकरणः । हतविधिः ॥ १०० ॥

उपमानं सामान्यैः । ३ । १ । १०१ ।

उपमानवाच्येकार्थमुपमानोपमेयसाधारणधर्म्मवाचिभिरेव समासस्तत्पुरुषः कर्म्मधारयश्च स्यात् । शस्त्रीश्यामा । मृगचपला । उपमानमिति किम् । देवदत्ता श्यामा । सामान्यैरिति किम् । अग्निर्माणवकः ॥ १०१ ॥

उपमेयं व्याघ्राद्यैः साम्यानुक्तौ ।३।१।१०२।

उपमेयवाच्येकार्थमुपमानवाचिभिर्व्याघ्राद्यैः साधारणधर्मानुक्तौ समासस्तत्पुरुषः कर्म्मधारयश्च स्यात् । पुरुषव्याघ्रः । श्वसिंही । साम्यानुक्ताविति किम् । पुरुषव्याघ्रः शूरइतिमाभूत् ॥ १०२ ॥

पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीरम् । ३ । १ । १०३ ।

एतान्येकार्थानि नाम्ना परेण समासस्तत्पुरुषः कर्म्मधारयश्च स्युः । पूर्वपुरुषः । अपरपुरुषः । प्रथमपुरुषः । चरमपुरुषः । जघन्यपुरुषः । समानपुरुषः । मध्यपुरुषः । मध्यमपुरुषः । वीरपुरुषः ॥ १०३ ॥

श्रेण्यादि कृताद्यैश्च्व्यर्थे । ३ । १ । १०४।

श्रेण्याद्येकार्थं कृताद्यैः सह च्व्यर्थे गम्ये समासस्तत्पुरुषः कर्मधारयश्च स्यात् । श्रेणिकृताः । ऊककृताः । च्व्यर्थइति किम् । श्रेणयः कृताः केचित् ॥ १०४ ॥

क्तं नञादिभिन्नैः । ३ । १ । १०५ ।

क्तान्तमेकार्थं नञ्प्रकारैरेव यानिभिन्नानि तैः सहसमासस्तत्पुरुषः कर्मधारयश्च स्यात् । कृताकृतम् । पीताऽवपीतम् । क्तमिति किम् । कर्त्तव्यमकर्त्तव्यंच। नञादिभिन्नैरितिकिम् । कृतं प्रकृतं । कृतश्चाविहितंच॥१०५॥

सेट्नाऽनिटा । ३ । १ । १०६ ।

सेट् क्तान्तं नञादिभिन्नेनानिटा सह न समस्यते । क्लिशितमक्लिष्टम् । शितमशातम् । सेडिति किम् । कृताकृतम् । अनिटेति किम् । अशितानशितम् ॥ १०६ ॥

सन्महत्परमोत्तमोत्कृष्टं पूजायाम्।३।१।१०७।

एतान्येकार्थानि पूजायां गम्यमानायां पूज्यवचनैः सह समासस्तत्पुरुषः कर्मधारयश्च स्यात्। सत्पुरुषः। महापुरुषः। परमपुरुषः। उत्तमपुरुषः। उत्कृष्टपुरुषः। पूजायामिति किम्। सन्घटोऽस्तीत्यर्थः॥ १०७॥

वृन्दारकनागकुञ्जरैः। ३। १। १०८।

पूजायां गम्यायामेभिः सह पूज्यवाच्येकार्थं समासस्तत्पुरुषः कर्म्मधारयश्च स्यात्। गोवृन्दारकः। गोनागः। गोकुञ्जरः। पूजायामिति किम्। सुसीमो नागः॥ १०८॥

कतरकतमौ जातिप्रश्ने।३।१।१०९।

एतावेकार्थौ जातिप्रश्ने गम्ये जात्यर्थेन नाम्ना समासस्तत्पुरुषः कर्मधारयश्च स्यात्। कतरकठः। कतमगार्ग्यः। जातिप्रश्न इति किम्। कतरः शुक्लः। कतमो गन्ता॥ १०९॥

किं क्षेपे। ३। १। ११०।

निन्दायां गम्यमानायां किमित्येकार्थं कुत्स्यवाचिना समासस्तत्पुरुषः कर्मधारयश्च स्यात्। किंराजा। किंगौः। क्षेपइति किम्। को राजा तत्र॥ ११०॥

पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यायकधूर्त्तप्रशंसारूढैर्जातिः। ३। १। १११।

पोटादिभिः प्रशंसारूढैश्च सह जातिवाच्येकार्थं समासस्तत्पुरुषः कर्मधारयश्च स्यात्। इभ्यपोटा। नागयुवतिः। अग्निस्तोकम्। दधिकतिपयम्। गोगृष्टिः। गोधेनुः। गोवशा। गोवेहत्। गोबष्कयणी। कठप्रवक्ता। कठश्रोत्रियः। कठाध्यायकः। मृगधूर्त्तः। गोमतल्लिका। गोप्रकाण्डम्॥ १११॥

चतुष्पाद्गर्भिण्या । ३ । १ । ११२ ।

चत्वारः पादा यस्या जातेस्तद्वाच्येकार्थं गर्भिण्या समासस्तत्पुरुषः कर्मधारयश्च स्यात् । गोगर्भिणी । महिषगर्भिणी । जातिरित्येव । कालाक्षी गर्भिणी ॥ ११२ ॥

युवाखलतिपलितजरद्वलिनैः । ३।१।११३ ।

युवन्नित्येकार्थमेभिः समासस्तत्पुरुषः कर्मधारयश्च स्यात् । युवखलतिः । युवपलितः । युवजरत् । युववलिनः ॥ ११३ ॥

कृत्यतुल्याख्यमजात्या । ३ । १ । ११४ ।

कृत्यान्तं तुल्यपर्यायं चैकार्थ्यमजात्येन सह समासस्तत्पुरुषः कर्म्मधारयश्च स्यात् । भोज्योष्णम् । स्तुत्यपटुः । तुल्यसन् । सदृशमहान् । अजात्येति किम् । भोज्यओदनः ॥ ११४ ॥

कुमारः श्रमणादिना । ३ । १ । ११५ ।

कुमारित्येकार्थं श्रमणादिना समासस्तत्पुरुषः कर्मधारयश्च स्यात् । कुमारश्रमणा । कुमारप्रव्रजिता ॥ ११५ ॥

मयूरव्यंसकेत्यादयः । ३ । १ । ११६ ।

एते तत्पुरुषसमासा निपात्यन्ते । मयूरव्यंसकः । कम्बोजमुण्डः । एहीडं कर्म । अश्नीतपिबता क्रिया । कुरुकटो वक्ता । गतप्रत्यागतं क्रयाक्रयिका । शाकपार्थिवः । त्रिभागः । सर्वश्वेतः ॥ ११६ ॥

चार्थे द्वन्द्वः सहोक्तौ । ३ । १ । ११७ ।

नाम नाम्ना सहोक्तिविषये चार्थवृत्तिः समासोद्वन्द्वः स्यात् । प्लक्षन्यग्रोधौ । वाक्त्वचम् । नाम नाम्नेत्यनुवृत्तावपि लध्वक्षरादिसूत्रे एकग्रहणात् बहूनामपि । धवखदिरपलाशाः । चार्थइति किम् । वीप्सा-

सहोक्तौ माभूत्। ग्रामोग्रामोरमणीयः। सहोक्ताविति किम्। प्लक्षश्च न्यग्रोधश्च वीक्ष्यताम् ॥ ११७ ॥

समानामर्थेनैकः शेषः ।३।१।११८।

अर्थेन समानां समानार्थानां सहोक्तौ गम्यायामेकः शिष्यते। अर्थादन्ये निवर्त्तन्ते। वक्रश्च कुटिलश्च वक्रौ कुटिलौ वा। सितश्च शुक्लश्च श्वेतश्च सिताः शुक्लाः श्वेता वा। अर्थेन समानामिति किम्। प्लक्षन्यग्रोधौ। सहोक्तावित्येव। वक्रश्च कुटिलश्च दृश्यः ॥ ११८ ॥

स्यादावसंख्येयः। ३। १। ११९।

सर्वस्मिन् स्यादौ विभक्तौ समानानां तुल्यरूपाणां सहोक्तावेकः शिष्यते। नतु संख्येयवाची। अक्षश्च शकटस्य अक्षश्च देवनः अक्षश्च बिभीतकः अक्षाः। स्यादाविति किम्। माता च जननी। माता च धान्यस्य। मातृमातरौ। असंख्येयइति किम्। एकश्चैकश्च ॥११९॥

त्यदादिः। ३। १। १२०।

त्यदाद्यैरन्येन च सहोक्तौ त्यदादिरेवैकः शिष्यते। स च चैत्रश्च तौ। स च यश्च यौ। अहं च स च त्वं च वयम् ॥ १२० ॥

भ्रातृपुत्राः स्वसृदुहितृभिः।३।१।१२१।

स्वस्रर्थेन सहोक्तौ भ्रात्रर्थो दुहित्रर्थेन च पुत्रार्थः एकः शिष्यते। भ्राता च स्वसा च भ्रातरौ। पुत्रश्च दुहिता च पुत्रौ ॥ १२१ ॥

पिता मात्रा वा। ३। १। १२२।

मातृशब्देन सहोक्तौ पितृशब्दएको वा शिष्यते। पिता च माता च पितरौ मातापितरौ ॥ १२२ ॥

श्वशुरः श्वश्रूभ्यां वा।३।१।१२३।

श्वश्रुशब्देन सहोक्तौ श्वशुरएको वा शिष्यते । श्वशुरौ । श्वश्रू-श्वशुरौ ॥ १२३ ॥

वृद्धोयूना तन्मात्रभेदे । ३ । १ । १२४ ।

यूना सहोक्तौ वृद्धवाच्येकः शिष्यते । तन्मात्रभेदे न चेत्प्रकृति-भेदोऽर्थभेदो वाऽन्यः स्यात् । गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ । वृद्ध-इति किम् । गर्गगार्ग्यायणौ । यूनेति किम् । गार्ग्यगर्गौ । तन्मात्र-भेदइति किम् । गार्ग्यवात्स्यायनौ ॥ १२४ ॥

स्त्री पुंवच्च । ३ । १ । १२५ ।

वृद्धस्त्रीवाची यूना सहोक्तौ एकः शिष्यते । पुलिङ्गश्चायं तन्मात्रभेदे । गार्गी च गार्ग्यायणश्च गार्ग्यौ । गार्गी च गार्ग्यायणौ च गर्गान् ॥ १२५ ॥

पुरुषः स्त्रिया । ३ । १ । १२६ ।

पुरुषशब्दः प्राणिनि पुंसि रूढस्त्रीवाचिना सहोक्तौ पुरुष एकः शिष्यते । स्त्रीपुरुषमात्रभेदश्चेत् । ब्राह्मणश्च ब्राह्मणी च ब्राह्मणौ । पुरुषइति किम् । तीरं नदनदीपतेः । तन्मात्रभेदइत्येव । स्त्रीपुंसौ ॥ १२६ ॥

ग्राम्याशिशुद्विशफसंघे स्त्रीप्रायः । ३ । १ । १२७ ।

ग्राम्याशिशवो ये द्विशफा द्विखुरा अर्थात्पशवस्तेषां संघे स्त्रीपुरुष सहोक्तौ प्रायः स्त्रीवाच्येकः शिष्यते । स्त्रीपुरुषमात्रभेदश्चेत् । गावश्च स्त्रियःगावश्च नरा इमा गावः । ग्राम्येति किम् । रुरवश्चेमे रुरवश्चेमाः इमे रुरवः । अशिश्विति किम् । बर्कयश्च बर्कराश्च बर्कराः । द्विशफइति किम् । गर्दभाश्च गर्दभ्यश्च गर्दभाः । सङ्घइति किम् । गौश्चायं गौश्चेयं इमौ गावौ । प्रायइति किम् । ओष्ट्राश्च ओष्ट्र्यश्च ओष्ट्राः ॥ १२७ ॥

क्लीबमन्येनैकं च वा । ३ । १ । १२८ ।

क्लीबं नपुंसकमन्येनाक्लीबेन सहोक्तावेकः शिष्यते। क्लीबाक्लीबमात्रभेदे तत्र शिष्यमाणं एकमेकार्थं च वा स्यात् । शुक्लं च शुक्लश्च शुक्लं शुक्ले वा । शुक्लं च शुक्लश्च शुक्लाच शुक्लं शुक्लानि वा । अन्येनेति किम् । शुक्लं च शुक्लं च शुक्ले । तन्मात्रभेदइत्येव हिमहिमान्यौ ॥ १२८ ॥

पुष्यार्थाद्भेपुनर्वसुः ३।१।१२९

पुष्यार्थान्नक्षत्रवृत्तेः परो नक्षत्रवृत्तिः पुनर्वसुः सहोक्तौ द्व्यर्थः सन् एकार्थः स्यात् । उदितौ पुष्यपुनर्वसू । उदितौ तिष्यपुनर्वसू । पुष्यार्थादिति किम् । आर्द्रापुनर्वसवः । पुनर्वसुरिति किम् । पुष्यमघाः। भइति किम् तिष्यपुनर्वसवो बालाः ॥ १२९ ॥

विरोधिनामद्रव्याणां नवा द्वन्द्वः स्वैः । ३ । १ । १३० ।

द्रव्यं गुणाद्याश्रयः । विरोधिवाचि नाम तदाश्रयवृत्तीनां द्वन्द्वो चैकार्थः स्यात् । स्वैः स्वजातीयैरेवारब्धश्चेत् । सुखदुःखम् । सुखदुःखे । लाभालाभम् । लाभालाभौ । विरोधिनामिति किम् । कामक्रोधौ । अद्रव्याणामिति किम् । शीतोष्णे जले । स्वैरिति किम् । बुद्धिसुखदुःखानि ॥

अश्ववडवपूर्वापराधरोत्तरा।३।१।१३१।

एते त्रयोपि द्वन्द्वा एकार्था वा स्युः स्वैश्चेत् । अश्ववडवं । अश्ववडवौ । पूर्वापरम् । पूर्वापरे । अधरोत्तरं । अधरोत्तरे ॥ १३१ ॥

पशुव्यञ्जनानाम् । ३ । १ । १३२ ।

पशूनां व्यञ्जनानां च स्वैर्द्वन्द्वएकार्थो वा स्यात् । गोमहिषम् । गोमहिषौ । दधिघृतम् । दधिघृते ॥ १३२ ॥

तरुतृणधान्यमृगपक्षिणा बहुत्वे।३।१।१३३।

एतद्वाचिनां बह्वर्थानां प्रत्येकं स्वैर्द्वन्द्वएकार्थो वा स्यात् । प्लक्षन्यग्रोधम् । प्लक्षन्यग्रोधाः । कुशकाशम् । कुशकाशाः । तिलमाषम् । तिलमाषाः । ऋश्यैणम् । ऋश्यैणाः । हंसचक्रवाकम् । हंसचक्रवाकाः ॥१३३॥

सेनाङ्गक्षुद्रजन्तूनाम् । ३ । १ । १३४ ।

सेनाङ्गानां क्षुद्रजन्तूनां च बह्वर्थानां स्वैर्द्वन्द्वएकार्थो नित्यं स्यात् । अश्वरथम् । यूकालिक्षम् ॥ १३४ ॥

फलस्य जातौ । ३ । १ । १३५ ।

फलवाचिनां बह्वर्थानां जातौ स्वैर्द्वन्द्वएकार्थो नित्यं स्यात् । बदरामलकम् । जाताविति किम् । एतानि बदरामलकानि सन्ति ॥१३५॥

अप्राणिपश्वादेः । ३ । १ । १३६ ।

प्राणिभ्यः पश्वादिसूत्रोक्तेभ्यश्च येऽन्यद्रव्यवाचिनस्तेषां जात्यर्थानाम् स्वैर्द्वन्द्वएकार्थः । स्यात् । आराशस्त्रि । जातावित्येव । सह्यविन्ध्यौ । प्राणादिवर्जनं किम् । ब्राह्मणक्षत्रियविट्शूद्राः । ब्राह्मणक्षत्रियविट्शूद्रम् । गोमहिषौ । गोमहिषम् । प्लक्षन्यग्रोधौ । प्लक्षन्यग्रोधम् । अश्वरथौ । अश्वरथम् । बदरामलके । बदरामलकम् ॥ १३६ ॥

प्राणितुर्याङ्गाणाम् । ३ । १ । १३७ ।

प्राणितूर्ययोरङ्गार्थानां स्वैर्द्वन्द्वएकार्थः स्यात् । कर्णनाशिकम् । मार्दङ्गिकपाणविकम् । स्वैरित्येव । पाणिगृध्रौ ॥ १३७ ॥

चरणस्य स्थेणोऽद्यतन्यामनुवादे । ३ । १ । १३८ ।

चरणाः कठादयः । तद्वाचिनामद्यतन्यां यौ स्थेणौ तयोः कर्तृत्वेन सम्बन्धिनां स्वैर्द्वन्द्वोऽनुवादविषये एकार्थः स्यात् । प्रत्यष्ठात् कठकालापम् । उदगात् कठकौथुमम् । अनुवादइति किम् । उदगुः कठकालापाः अप्रसिद्धं कथयन्ति ॥ १३८ ॥

अक्लीबेऽध्वर्युक्रतोः । ३ । १ ।१३९ ।

अध्वर्युः यजुर्वेदः तद्विहितक्रतुवाचिनां स्वैर्द्वन्द्वएकार्थः स्यात् । नचेदेते क्लीबवृत्तयः । अर्काश्वमेधम् । अक्लीबइति किम् । गवामयनादित्यानामयने । अध्वर्य्विति किम् । इषुवज्रौ । क्रतोरिति किम् । दर्शपौर्णमासौ ॥ १३९ ॥

निकटपाठस्य । ३ । १ ।१४० ।

निकटः पाठो येषामध्येतॄणां तेषां स्वैर्द्वन्द्वएकार्थः स्यात । पदकक्रमकम् ॥ १४० ॥

नित्यवैरस्य । ३ । १। १४१ ।

नित्यज्ञातिनिबद्धं वैरं येषां तेषां स्वैर्द्वन्द्वएकार्थः स्यात् । अहिनकुलम् । नित्यवैरस्येति किम् । देवासुराः । देवासुरम् ॥ १४१ ॥

नदीदेशपुरां विलिङ्गानाम् ।३ । १। १४२।

एषां विविधलिङ्गानां स्वैर्द्वन्द्वएकार्थः स्यात् । गङ्गाशोणम् । कुरुकुरुक्षेत्रं । मथुरापाटलिपुत्रम् । विलिङ्गानामिति किम् । गङ्गायमुने॥

पात्र्यशूद्रस्य । ३ । १ ।१४३ ।

पात्रार्हशूद्रवाचिनां स्वैर्द्वन्द्वएकार्थः स्यात्। तक्षायस्कारम्। पात्रेति किम् । जनङ्गमबुक्कसाः ॥ १४३ ॥

गवाश्वादिः । ३ । १ ।१४४ ।

अयं द्वन्द्वएकार्थः स्यात् । गवाश्वम् । गवाविकम् ॥ १४४ ॥

न दधिपयआदिः । ३ । १ ।१४५ ।

दधिपय आद्यो द्वन्द्वएकार्थो न स्यात् । दधिपयसी । सर्प्पिर्मधुनी॥

संख्याने । ३ । १।१४६ ।

वर्त्तिपदार्थानां गणनेमध्ये द्वन्द्वएकार्थो न स्यात्। दशगोमहिषाः। बहवः पाणिपादाः ॥ १४६ ॥

वान्तिके। ३। १।१४७।

वर्त्तिपदार्थानां संख्यानस्य समीपे गम्ये द्वन्द्वएकार्थो वा स्यात्। उपदशम्। गोमहिषम्। उपदशाः। गोमहिषाः ॥ १४७ ॥

प्रथमोक्तं प्राक्। ३। १।१४८।

अत्र समासप्रकरणे प्रथमान्तेन यन्निर्दिष्टं तत् प्राक् स्यात्। आसन्नदशाः। सप्तगङ्गम् ॥ १४८ ॥

राजदन्तादिषु ३।१।१४९।

एतेषु समासेष्वप्राप्तप्रामिपातं प्राक् स्यात्। राजदन्तः। लिप्तवासितम् ॥ ३४९ ॥

विशेषणं सर्वादिसंख्यं बहुव्रीहौ।३।१।१५०।

विशेषणं सर्वादिसंख्यावाचिच बहुव्रीहौ प्राक् स्यात्। चित्रगुः। सर्वशुक्लः। द्विकृष्णः ॥ १५० ॥

क्तः। ३। १। १५१।

क्तान्तं सर्वं बहुव्रीहौ प्राक् स्यात्। कृतकटः ॥ १५१ ॥

जातिकालसुखादेर्नवा। ३। १।१५२।

जातेः कालात् सुखादिभ्यश्च बहुव्रीहौ क्तान्तं वा प्राक् स्यात्। शाङ्गरजग्धी। जग्धशाङ्गरा। मासजाता। जातमासा। सुखजाता। जातसुखा। दुःखहीना। हीनदुःखा ॥ १५२ ॥

आहिताग्न्यादिषु। ३। १। १५३ ॥

एषु बहुव्रीहिषु क्तान्तं वा प्राक् स्यात्। आहिताग्निः। अग्न्याहितः। जातदन्तः। दन्तजातः ॥ १५३ ॥

प्रहरणात् । ३ । १ । १५४ ।

प्रहरणार्थात् क्तान्तं बहुव्रीहौ वा प्राक् स्यात् । उद्यतासिः । अस्युद्यतः ॥ १५४ ॥

न सप्तमीन्द्वादिभ्यश्च । ३ । १ । १५५ ।

इन्द्वादेः प्रहरणार्थाच्च प्राक् सप्तम्यन्तं बहुव्रीहौ न स्यात् । इन्दुमौलिः । पद्मनाभः । असिपाणिः ॥ १५५ ॥

गड्वादिभ्यः । ३ । १ । १५६ ।

गड्वादिभ्यो बहुव्रीहौ सप्तम्यन्तं प्राक् वा स्यात् । कण्ठगडुः । गडुकण्ठः । मध्येगुरुः । गुरुमध्यः ॥ १५६ ॥

प्रियः । ३ । १ । १५७ ।

अयं बहुव्रीहौ प्राक् वा स्यात् । प्रियगुडः । गुडप्रियः ॥ १५७ ॥

कडारादयः कर्म्मधारये । ३ । १ । १५८ ।

एते कर्म्मधारये प्राक् वा स्युः । कडारजैमिनिः । जैमिनिकडारः । काणद्रोणः । द्रोणकाणः ॥ २५८ ॥

धर्मार्थादिषु द्वन्द्वे । ३ । १ । १५९ ।

एषु द्वन्द्वेष्वप्राप्तप्राक्त्वं वा प्राक् स्यात् । धर्म्मार्थौ । अर्थधर्म्मौ । शब्दार्थौ । अर्थशब्दौ ॥ १५९ ॥

लघ्वक्षरासखीदुत्स्वराद्यदल्पस्वरार्च्यमेकम् । ३ । १ । १६० ।

लघ्वक्षरं सखिवर्जेदुदन्तं स्वराद्यकारान्तमल्पस्वरं पूज्यवाचि चैकं द्वन्द्वे प्राक् स्यात् । शरशीर्षम् । अग्नीषोमौ । वायुतोयम् । असखीति

किम् । सुतसखायौ । अस्त्रशस्त्रम् । प्लक्षन्यग्रोधौ । श्रद्धामेधे । लघ्वा-दिति किम् । कुक्कुटमयूरौ । मयूरकुक्कुटौ । एकमिति किम् । शंख-दुन्दुभिवीणाः । द्वन्द्वइत्येव । विस्पष्टपटुः ॥ १६० ॥

मासवर्णभ्रात्रऽनुपूर्वम् । ३ । १ । १६१ ।

एतद्वाचि द्वन्द्वेऽनुपूर्वं प्राक् स्यात् । फाल्गुनचैत्रौ । ब्राह्मणक्षत्रियौ । ब्राह्मणक्षत्रियवैश्याः । बलदेववासुदेवौ ॥ ४६१ ॥

भर्तुतुल्यस्वरम् । ३ । १ । १६२ ।

नक्षत्रर्तुवाचि तुल्यस्वरं द्वन्द्वेऽनुपूर्वं प्राक् स्यात् । अश्विनीभरणी-कृत्तिकाः । हेमन्तशिशिरवसन्ताः । तुल्यस्वरइति किम् । आर्द्रामृगशिरसी । ग्रीष्मवसन्तौ ॥ १६२ ॥

संख्या समासे । ३ । १ । १६३ ।

समासमात्रे संख्यावाच्यनुपूर्वं प्राक् स्यात् । द्वित्राः । द्विशती एकादश ॥ १६३ ॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञ-शब्दानुशासनलघुवृत्तौ तृतीयस्याध्यायस्य प्रथमः पादः समाप्तः॥३।१॥

अर्हम्

परस्पराऽन्योन्येतरेतरस्याम् स्यादेर्वा पुंसि । ३ । २ । १ ।

एषामपुंवृत्तीनां स्यादेराम् वा स्यात् । इमे सख्यौ कुले वा परस्परां परस्परं अन्योन्यां अन्योन्यं इतरेतरां इतरेतरं भोजयतः । आभिः सखीभिः कुलैर्वा परस्परां परस्परेण अन्योन्यां अन्योनेन इतरेतरां इतरेतरेण भोज्यते । अपुंसीति किम् । इमे नराः परस्परं भोजयन्ति ॥ १ ॥

अमव्ययीभावस्यातोऽपञ्चम्याः ।३। २।२।

अदन्तस्याव्ययीभावस्य स्यादेरम् स्यात् । नतु पञ्चम्याः । उपकुम्भमस्ति । उपकुम्भं देहि । अव्ययीभावस्येति किम् । प्रियोपकुम्भोऽयम् । अत इति किम् । अधिस्त्रि । अपञ्चम्या इति किम् । उपकुम्भात् ॥ २ ॥

वा तृतीयायाः । ३ । २ । ३ ।

अदन्तस्याव्ययीभावस्य तृतीयाया अम् वा स्यात् । किन्न उपकुम्भम् । किन्न उपकुम्भेन । अव्ययीभावस्येति किम् । प्रियोपकुम्भेन ॥

सप्तम्या वा । ३ । २ । ४ ।

अदन्तस्याव्ययीभावस्य सप्तम्या अम्वा स्यात् । उपकुम्भम् । उपकुम्भे निधेहि । अव्ययीभावस्येत्येव । प्रियोपकुम्भे ॥ ४ ॥

ऋद्धनदीवंश्यस्य । ३ । २ । ५ ।

एतदन्तस्याव्ययीभावस्यादन्तस्य सप्तम्या अम् नित्यं स्यात् । सुमगधम् । उन्मत्तगङ्गम् । एकविंशतिभारद्वाजं वसति ॥ ५ ॥

अनतो लुप् । ३ । २ । ६ ।

अदन्तवर्जस्याव्ययीभावस्य स्यादेर्लुप् स्यात् । उपवधु । उपकर्तृ । अनतइति किम् । उपकुम्भात् । अव्ययीभावस्यैत्येव । प्रियोपवधुः ॥ ६ ॥

अव्ययस्य । ३ । २ । ७ ।

अव्ययस्य सादेर्लुप् स्यात् । स्वः । प्रातः । अव्यस्येति किम् । अत्युच्चैसः ॥ ७ ॥

ऐकार्थ्ये । ३ । २ । ८ ।

ऐकार्थ्यमैकपद्यं तन्निमित्तस्य स्यादेर्लुप् स्यात् । चित्रगुः । पुत्रीयति । औपगवः । अतएव लुब्विधानान्नाम नाम्नेत्युक्तावपि स्याद्यन्तानां समासः स्यात् । ऐकार्थ्य इति किम् । चित्रा गावो यस्येत्यादिवाक्ये माभूत् ॥ ८ ॥

न नाम्येकस्वरात् खित्युत्तरपदेऽमः । ३ । २ । ९ ।

समासारम्भकमन्त्यं पदमुत्तरपदं तस्मिन् खित् प्रत्ययान्ते उत्तरपदे परे नाम्यन्तादेकस्वरात्पूर्वपदात्परस्यामो लुब् न स्यात् । स्त्रियंमन्यः । नावंमन्यः । नामीति किम् । क्ष्मंमन्यः । एकस्वरादिति किम् । वधुंमन्यः । खितीति किम् । स्त्रीमानी ॥ ९ ॥

असत्त्वे ङसेः । ३ । २ । १० ।

असत्त्वे विहितस्य ङसेरुत्तरपदे परे लुब् न स्यात् । स्तोकान्मुक्तः । असत्त्वइति किम् । स्तोकभयम् । उत्तरपदइत्येव । निःस्तोकः ॥ १० ॥

ब्राह्मणाच्छंसी । ३ । २ । ११ ।

अत्रसमासे ङसेर्लुबभावो निपात्यते । ब्राह्मणाच्छंसिनौ । निपातनादृत्विग्विशेषादन्यत्र लुबेव । ब्राह्मणशंसिनी स्त्री ॥ ११ ॥

ओजोऽञ्जःसहोऽम्भस्तमस्तपसष्टः। ३। २। १२।

एभ्यः परस्य टावचनस्योत्तरपदे परे लुब् न स्यात्। ओजसाकृतम्। अञ्जसाकृतम्। सहसाकृतम्। अम्भसाकृतम्। तमसाकृतम्। तपसाकृतम्। टइति किम् ओजो भावः॥ १२॥

पुञ्जनुषोऽनुजान्धे। ३। २। १३।

पुञ्जनुर्भ्यां परस्य टो यथासंख्यमनुजेऽन्धे चोत्तरपदे लुब् न स्यात्। पुंसाऽनुजः। जनुषाऽन्धः। टइत्येव। पुमनुजा॥ १३॥

आत्मनः पूरणे। ३। २। १४।

अस्मात्परस्य टः पूरणप्रत्ययान्त उत्तरपदे लुब् न स्यात्। आत्मनाद्वितीयः। आत्मनाषष्ठः॥ १४॥

मनसश्चाज्ञायिनि। ३। २। १५।

मनसः आत्मनश्च परस्य टआज्ञायिन्युत्तरपदे लुब् न स्यात्। मनसाज्ञायी। आत्मनाज्ञायी॥ १५॥

नाम्नि। ३। २। १६।

मनसः परस्य टः संज्ञाविषये उत्तरपदे परे लुब् न स्यात्। मनसादेवी। नाम्नीति किम्। मनोदत्ता कन्या॥ १६॥

परात्मभ्यां ङेः। ३। २। १७।

आभ्यां परस्य ङेवचनस्योत्तरपदे परे नाम्नि लुब् न स्यात्। परस्मैपदम्। आत्मनेपदम्। नाम्नीत्येव। परहितम्॥ १७॥

अद्व्यञ्जनात्सप्तम्याबहुलम्। ३। २। १८।

अदन्ताद्व्यञ्जनान्ताच्च परस्याः सप्तम्या बहुलं नाम्नि लुब् न स्यात्। अरण्येतिलकाः। युधिष्ठिरः। अद्व्यञ्जनादिति किम्। भूमिपाशः। नाम्नीत्येव। तीर्थकाकः॥ १८॥

प्राक्कारस्य व्यञ्जने । ३ । २ । १९ ।

राजलभ्यो रक्षानिर्देशः कारः प्राचां देशे यः कारः तस्य संज्ञायां गम्यमानयामद्व्यञ्जनात्परस्याः सप्तम्या व्यञ्जनादावुत्तरपदे लुब् न स्यात् । मुकुटेकार्षापणः । समिधिमाषकः । प्रागिति किम् । यूथपशुः उदीचामयं न प्राचां । कारइति किम् । अभ्यर्हितपशुः । व्यञ्जनइति किम् । अविकटोरणः ॥ १९ ॥

तत्पुरुषे कृतिः । ३ । २ । २० ।

अद्व्यञ्जनात्परस्याः सप्तम्याः कृदन्ते उत्तरपदे तत्पुरुषे लुब् न स्यात् । स्तम्बेरमः । भस्मनिहुतम् । तत्पुरुषइति किम् । धन्वकारकः । अद्व्यञ्जनादित्येव । कुरुचरः ॥ २० ॥

मध्यान्ताद् गुरौ । ३ । २ । २१ ।

आभ्यां परस्याः सप्तम्या गुरावुत्तरपदे लुब् न स्यात् । मध्येगुरुः । अन्तेगुरुः ॥ २१ ॥

अमूर्द्धमस्तकात्स्वाङ्गादकामे । ३ । २ । २२ ।

मूर्द्धमस्तकवर्जात्स्वाङ्गवाचिनोऽद्व्यञ्जनात्परस्याः सप्तम्याः कामवर्जे उत्तरपदे लुब् न स्यात् । कण्ठेकालः । अमूर्द्धमस्तकादिति किम् । मूर्द्धशिखः मस्तकशिखः । अकामइति किम् । सुखकामः ॥ २२ ॥

बन्धे घञि नवा । ३ । २ । २३ ।

बन्धे घञन्ते उत्तरपदे अद्व्यञ्जनात्परस्याः सप्तम्या लुब् वा न

अद्व्यञ्जनान्तात्कालवाचिनः परस्याः सप्तम्यास्तनादिप्रत्ययेषु कालेषूत्तरपदे वा लुब् न स्यात् । पूर्वाह्णेतनः । पूर्वाह्णतनः । पूर्वाह्णेतराम् । पूर्वाह्णतरे । पूर्वाह्णेतमाम् । पूर्वाह्णतमे । पूर्वाह्णेकाले । पूर्वाह्णकाले । कालादिति किम् । शुक्लतरे । शुक्लतमे । अद्व्यञ्जनादित्येव । रात्रितराम् ॥ २४ ॥

शयवासिवासेष्वकालात् । ३ । २ । २५ ।

अकालवाचिनोऽद्व्यञ्जनात्परस्याः सप्तम्या एषूत्तरपदेषु लुब् वा न स्यात् । बिलेशयः । बिलशयः । वनेवासी । वनवासी । ग्रामेवासः । ग्रामवासः । अकालादिति किम् । पूर्वाह्णशयः ॥ २५ ॥

वर्षक्षरवराप्सरःशरोरोमनसो जे ।३।२।२६।

एभ्यः परस्याः सप्तम्या जे उत्तरपदे लुब् वा न स्यात् । वर्षेजः । वर्षजः । क्षरेजः । क्षरजः । वरेजः । वरजः । अप्सुजम् । अब्जम् । सरसिजम् । सरोजम् । शरेजम् । शरजम् । उरसिजः । उरोजः । मनसिजः । मनोजः ॥ २७ ॥

द्युप्रावृड्वर्षाशरत्कालात् । ३ । २ । २७ ।

एभ्यः परस्याः सप्तम्या जे उत्तरपदे लुब् न स्यात् । दिविजः । प्रावृषिजः । वर्षासुजः । शरदिजः । कालेजः ॥ २७ ॥

अपो ययोनिमतिचरे । ३ । २ । २८ ।

अपः परस्याः सप्तम्या ये प्रत्यये योन्यादौ च उत्तरपदे लुब् न स्यात् । अप्सव्यः । अप्सुयोनिः । अप्सुमतिः । अप्सुचरः ॥ २८ ॥

नेन्सिद्धस्थे । ३ । २ । २९ ।

इन्प्रत्ययान्ते सिद्धस्थयोश्चोत्तरपदयोर्न लुब् न स्यात् । भवत्येवेत्यर्थः । स्थण्डिलवर्त्ती । साङ्काश्यसिद्धः । समस्थः ॥ २९ ॥

षष्ठ्याः क्षेपे । ३ । २ । ३० ।

उत्तरपदे परे क्षेपे गम्ये षष्ठ्या लुब् न स्यात् । चौरस्यकुलम् ॥३०॥

पुत्रे वा । ३ । २ । ३१ ।

पुत्रे उत्तरपदे क्षेपे षष्ठ्या लुब् वा न स्यात् । दास्याःपुत्रः । दासीपुत्रः ॥ ३१ ॥

पश्यद्वाग्दिशो हरयुक्तिदण्डे ।३।२।३२।

एभ्यः परस्याः षष्ठ्या यथासंख्यं हरादावुत्तरपदे लुब् न स्यात् । पश्यतोहरः । वाचोयुक्तिः । दिशोदण्डः ॥ ३२ ॥

अदसोऽकञायनणोः।३।२।३३।

अदसः परस्याः षष्ठ्या अकञ् विषये उत्तरपदे आयनणि च परे लुब् न स्यात् । आमुष्यपुत्रिका । आमुष्यायणः ॥ ३३ ॥

देवानां प्रियः । ३ । २ । ३४ ।

अत्र षष्ठ्या लुब् न स्यात् । देवानांप्रियः ॥ ३४ ॥

शेपपुच्छलाङ्गुलेषु नाम्नि शुनः।३।२।३५।

शुनः परस्याः षष्ठ्याः शेपादावुत्तरपदे संज्ञायां लुब् न स्यात् । शुनःशेपः । शुनःपुच्छः । शुनोलाङ्गुलकः ॥ ३५ ॥

वाचस्पतिवास्तोष्पतिदिवस्पतिदिवोदासम् । ३ । २ । ३६ ।

एते समासाः षष्ठ्यलुपि निपात्यन्ते नाम्नि । वाचस्पतिः । वास्तोष्पतिः । दिवस्पतिः । दिवोदासः ॥ ३६ ॥

ऋतां विद्यायोनिसम्बन्धे ३ । २ । ३७।

ऋदन्तानां विद्यया योन्या वा कृते सम्बन्धे हेतौ सति प्रवृत्तानां षष्ठ्यास्तत्रैव हेतौ सति प्रवृत्ते उत्तरपदे लुब् न स्यात् । होतुःपुत्रः । पितुः पुत्रः । पितुरन्तेवासी । ऋतामिति किम् । आचार्यपुत्रः । विद्यायोनिसम्बन्ध इति किम् । भर्तृगृहम् ॥ ३७ ॥

स्वसृपत्योर्वा । ३ । २ । ३८ ।

विद्यायोनिसम्बन्धनिमित्तानामृदन्तानां षष्ठ्याः स्वसृपत्योरुत्तरपदयोर्योनिसम्बन्धनिमित्तयोर्लुब् वा न स्यात् । होतुःस्वसा । होतृस्वसा । स्वसुःपतिः । स्वसृपतिः । विद्यायोनिसम्बन्धइत्येव । भर्तृस्वसा । होतृपतिः ॥३८॥

आद्वन्द्वे । ३ । २ । ३९ ।

विद्यायोनिसम्बन्धनिमित्तानामृदन्तानां योद्वन्द्वस्तस्मिन् सत्युत्तरपदे पूर्वपदस्याऽऽत्स्यात् । होतापोतारौ । मातापितरौ । ऋतामित्येव । गुरुशिष्यौ । विद्यायोनिसम्बन्धइत्येव । कर्तृकारयितारौ ॥ ३९ ॥

पुत्रे । ३ । २ । ४० ।

पुत्रे उत्तरपदे विद्यायोनिसम्बन्धानामृदन्तानां द्वन्द्वे आः स्यात् । मातापुत्रौ । होतापुत्रौ ॥ ४० ॥

वेदसहश्रुताऽवायुदेवतानाम् । ३ । २ । ४१ ।

एषां द्वन्द्वे पूर्वपदस्योत्तरपदे आः स्यात् । इन्द्रासोमौ । वेदेति किम् । ब्रह्मप्रजापती । सहेति किम् । विष्णुशक्रौ । श्रुतेति किम् । चन्द्रसूर्यौ । वायुवर्जनं किम् । वाय्वग्नी । देवतानामिति किम् । यूपचषालौ ॥४१॥

ईः षोमवरुणे ऽग्नेः । ३ । २ । ४२ ।

वेदसहश्रुतावायुदेवतानां द्वन्द्वे षोमे वरुणे चोत्तरपदे ऽग्नेरीः स्यात् । षोमेति निर्देशादीयोगे षत्वं च । अग्नीषोमौ । अग्नीवरुणौ । देवता द्वन्द्व इत्येव । अग्निसोमौ बटू ॥ ४२ ॥

इर्वृद्धिमत्यविष्णौ । ३ । २ । ४३ ।

विष्णुवर्जे वृद्धिमत्युत्तरपदे देवताद्वन्द्वे अग्नेरिः स्यात् । अग्निवारुणीमनड्वाहीमालभेत । वृद्धिमतीति किम् । अग्नीवरुणौ । अविष्णाविति किम् । आग्नावैष्णवं चरुं निर्वपेत् ॥ ४३ ॥

दिवो द्यावा । ३ । २ । ४४ ।

देवताद्वन्द्वे दिव उत्तरपदे द्यावेति स्यात् । द्यावाभूमी ॥ ४४ ॥

दिवस् दिवः पृथिव्यां वा ।३।२।४५।

देवताद्वन्द्वे दिवः पृथिव्यामुत्तरपदे एतौ वा स्याताम् । दिवस्पृथिव्यौ । दिवः पृथिव्यौ । द्यावापृथिव्यौ ॥ ४५ ॥

उषासोषसः । ३ । २ । ४६ ।

देवताद्वन्द्वे उषस उत्तरपदे उषासा स्यात् । उषासासूर्यम् ॥४६॥

मातरपितरं वा । ३ । २ । ४७ ।

मातृपित्रोः पूर्वोत्तरपदयोर्द्वन्द्वे ऋतोऽरो वा निपात्यते । मातरपितरयोः । मातापित्रोः ॥ ४७ ॥

वर्चस्कादिष्ववस्करादयः । ३।२।४८।

एष्वर्थेष्वेते कृतशषसाद्युत्तरपदाः साधवः स्युः । अवस्करोऽन्नमलम् । अवकरो ऽन्यः । अपस्करोरथाङ्गम् । अपकरोऽन्यः ॥४८॥

परतः स्त्री पुम्वत् स्त्र्येकार्थेऽनूङ् ।३।२।४९।

परतोविशेष्यवशात् स्त्रीलिङ्गः स्त्रीवृत्तावेकार्थे उत्तरपदे पुम्वत्स्यात् । नतूङन्तः । दर्शनीयभार्यः।परतइति किम् । द्रोणीभार्यः । स्त्रीति किम्।खलपुदृष्टिः । स्त्र्येकार्थ्यइति किम् । गृहिणीनेत्रः । कल्याणीमाता ।अनूङिति किम्। करभोरूभार्यः ॥ ४९ ॥

क्यङ्मानिपित्तद्धिते । ३ । २ । ५० ।

क्यङि मानिनि चोत्तरपदे पित्तद्धिते च परतः स्त्रिलिङ्गोऽनूङ् पुम्वत्स्यात् । श्येतायते । दर्शनीयमान्ययमस्याः । अजथ्यं यूथम् ॥५०॥

जातिश्च णितद्धितयस्वरे । ३ । २ । ५१ ।

अन्याः परतः स्त्रीजातिश्च णौ प्रत्यये यादौ स्वरादौ च तद्धिते विषयभूते पुम्वत्स्यात् अनूङ् । पटयति । एत्यः । भावत्कम् । जातिः । दारद्यः । गार्गः । तद्धितेति किम् । हस्तिनीयति । हस्तिन्यः ॥ ५१ ॥

एयेऽग्नायी । ३ । २ । ५२ ।

एयप्रत्यये ऽग्नाय्येच परतः स्त्री पुम्वत् स्यात् । आग्नेयः । पूर्वेण सिद्धे नियमार्थमिदम् । श्यैनेयः ॥ ५२ ॥

नाप्प्रियादौ । ३ । २ । ५३ ।

अप् प्रत्ययान्ते स्त्र्येकार्थ्ये उत्तरपदे प्रियादौ च परतः स्त्री पुम्वन्न स्यात् । कल्याणीपञ्चमा रात्रयः । कल्याणीप्रियः । अप्प्रियादाविति किम् । कल्याणपञ्चमीकः पक्षः ॥ ५३ ॥

तद्धिताककोपान्त्यपूरण्याख्याः । ३ । २ । ५४ ।

तद्धितस्याकप्रत्ययस्य च कउपान्त्योयासां ताः पूरणप्रत्ययान्ताः संज्ञाश्च परतः स्त्री पुम्वन्न स्युः । माद्रिकाभार्यः । कारिकाभार्यः । पञ्चमीभार्यः । दत्ताभार्यः । तद्धिताकेति किम् । पाकभार्यः ॥ ५४ ॥

तद्धितः स्वरवृद्धिहेतुररक्तविकारे । ३ । २ । ५५ ।

रक्तविकाराभ्यामऽन्यार्थः स्वरवृद्धिहेतुर्यस्तद्धितस्तदन्तः परतः स्त्रीपुम्वन्न स्यात् । माथुरीभार्यः । स्वरेति किम् । वैयाकरणभार्यः । वृद्धिहेतु-

रिति किम् । अर्द्धप्रस्थभार्यः। अरक्तविकारइति किम् । काषायबृहतिकः । लौहेषः ॥ ५५ ॥

स्वाङ्गान्ङीर्जातिश्चाऽमानिनि। ३।२।५६।

स्वाङ्गाद्योङीस्तदन्तोजातिवाची च परतः स्त्री पुम्वन्न स्यात् नतु-मानिनि । दीर्घकेशीभार्यः।कठीभार्यः। शूद्राभार्यः । स्वाङ्गादिति किम् । पटुभार्यः । अमानिनीति किम् । दीर्घकेशमानिनी ॥ ५६ ॥

पुम्वत्कर्म्मधारये।३। २।५७।

परतः स्त्री अनूङ् कर्म्मधारये सति स्त्र्येकार्थ्ये उत्तरपदे परे पुम्वत् स्यात् । कल्याणप्रिया । मद्रकभार्या । माथुरवृन्दारिका । चन्द्रमुख-वृन्दारिका । अनूङित्येव । ब्रह्मबन्धूवृन्दारिका ॥ ५७ ॥

रिति । ३ । २ । ५८ ।

परतः स्त्री अनूङ् रिति प्रत्यये पुम्वत्स्यात् । पटुजातीया । कठ-देशीया ॥ ५८ ॥

त्वतेगुणः । ३ । २ । ५९ ।

परतः स्त्र्यनूङ् गुणवचनस्त्वतयोः प्रत्यययोः पुम्वत्स्यात् । पटुत्वम् । पटुता । गुणइति किम् । कठीत्वम् ॥ ५९ ॥

च्वौ क्वचित् । ३ । २ । ६० ।

परतः स्त्र्यनूङ् च्वौ क्वचित् पुम्वत्स्यात् । महद्भूता कन्या । क्वचिदिति किम् । गोमतीभूता ॥ ६० ॥

सर्वादयोऽस्यादौ । ३ । २ । ६१ ।

सर्वादिःपरतः स्त्री पुम्वत्स्यात् नतु स्यादौ । सर्वस्त्रियः। भवत्पुत्रः । अस्यादाविति किम् । सर्वस्यै ॥ ६१ ॥

मृगक्षीरादिषु वा । ३ । २ । ६२ ।

एषु समासेषु परतः स्त्री उत्तरपदे पुम्वद्वा स्यात् । मृगक्षीरम् । मृगीक्षीरम् । काकशावः । काकीशावः ॥ ६२ ॥

ऋदुदित्तरतमरूपकल्पब्रुवचेलड्गोत्रमतहते वा ह्रस्वश्च । ३ । २ । ६३ ।

ऋदुदित्परतः स्त्री तरादिषु प्रत्ययेषु ब्रुवादौ च स्त्र्येकार्थे उत्तरपदे ह्रस्वान्तः पुम्वच्च वा स्यात् । पचन्तितरा । पचत्तरा । पचन्तीतरा । श्रेयसितरा । श्रेयस्तरा । श्रेयसीतरा । पचन्तितमा । पचत्तमा । पचन्तीतमा । श्रेयसितमा । श्रेयस्तमा । श्रेयसीतमा । पचन्तिरूपा । पचद्रूपा । पचन्तीरूपा । विदुषिरूपा । विद्वद्रूपा । विदुषीरूपा । पचन्तिकल्पा । पचत्कल्पा । पचन्तीकल्पा । विदुषिकल्पा । विद्वत्कल्पा । विदुषीकल्पा । श्रेयसिकल्पा । श्रेयस्कल्पा । श्रेयसीकल्पा । पचन्तिब्रुवा । पचद्ब्रुवा । पचन्ती ब्रुवा । श्रेयसिब्रुवा । श्रेयोब्रुवा । श्रेयसीब्रुवा । पचन्तिचेली । पचच्चेली । पचन्तीचेली । श्रेयसिचेली । श्रेयश्चेली । श्रेयसीचेली । पचन्तिगोत्रा । पचद्गोत्रा । पचन्तीगोत्रा । श्रेयसिगोत्रा । श्रेयोगोत्रा । श्रेयसीगोत्रा । पचन्तिमता । पचन्मता । पचन्तीमता । श्रेयसिमता । श्रेयोमता । श्रेयसी मता । पचन्तिहता । पचद्धता । पचन्तीहता । श्रेयसिहता । श्रेयोहता । श्रेयसीहता ॥ ६३ ॥

ङ्यः । ३ । २ । ६४ ।

ङ्यन्तायाः परतः स्त्रियास्तरादिषु प्रत्ययेषु ब्रुवादिषु चोत्तरपदेषु एकार्थे ह्रस्वः स्यात् । गौरितरा । गौरितमा । नर्त्तकिरूपा । कुमारिकल्पा । ब्राह्मणिब्रुवा । गार्गिचेली । ब्राह्मणिगोत्रा । गार्गिमता । गौरिहता ॥

भोगवद्गौरिमतोर्नाम्नि । ३ । २ । ६५ ।

अनयोर्ङ्यन्तयोः संज्ञायां तरादिषु प्रत्ययेषु ब्रुवादौ चोत्तरपदे एकार्थे ह्रस्वः स्यात् । भोगवतितरा । गौरिमतितमा । भोगवतिरूपा ।

गौरिमतिकल्पा । भोगवतिब्रुवा । गौरिमतिचेली । भोगवतिगोत्रा । गौरिमतिमता । भोगवतिहता । नाम्नीति किम् । भोगवतितरा । भोगवत्तरा । भोगवतीतरा ॥ ६५ ॥

नवैकस्वराणाम् । ३ । २ । ६६ ।

एकस्वरस्य ङ्यन्तस्य तरादौ प्रत्यये ब्रुवादौ चोत्तरपदे स्त्र्येकार्थे वा ह्रस्वः स्यात् । स्त्रितरा । स्त्रीतरा । श्रितरा । श्रीतरा । श्रितमा । श्रीतमा । श्रिब्रुवा । श्रीब्रुवा । एकस्वराणामिति किम् । कुटीतरा ॥ ६६ ॥

ऊङः । ३ । २ । ६७ ।

ऊङन्तस्य तरादौ चोत्तरपदे स्त्र्येकार्थ्ये वा ह्रस्वः स्यात् । ब्रह्मबन्धुतरा । ब्रह्मबन्धूतरा । कद्रुब्रुवा । कद्रूब्रुवा ॥ ६७ ॥

महतः करघासविशिष्टे डाः । ३ । २ । ६८ ।

करादावुत्तरपदे महतो डा वा स्यात् । महाकरः । महत्करः । महाघासः । महद्घासः । महाविशिष्टः । महद्विशिष्टः ॥ ६८ ॥

स्त्रियाम् । ३ । २ । ६९ ।

स्त्रीवृत्तेर्महतः करादावुत्तरपदे नित्यं डाः स्यात् । महाकरः । महाघासः । महाविशिष्टः ॥ ६९ ॥

जातीयैकार्थेऽच्वेः । ३ । २ । ७० ।

महतोऽच्व्यन्तस्य जातीयरि एकार्थ्ये चोत्तरपदे डाः स्यात । महाजातीयः । महावीरः । जातीयैकार्थ्य इति किम् । महत्तरः । अच्वेरिति किम् । महद्भूता कन्या ॥ ७० ॥

न पुम्वन्निषेधे । ३ । २ । ७१ ।

महतः पुम्वन्निषेधविषये उत्तरपदे डा न स्यात् । महतीप्रियः ॥ ७१ ॥

इच्यस्वरे दीर्घआच्च । ३ । २ । ७२ ।

इजन्तेऽस्वरादावुत्तरपदे पूर्वपदस्य दीर्घत्वं आच्च स्यात् । मुष्टी मुष्टि । मुष्टामुष्टि । अस्वरइति किम् । अस्यसि ॥ ७२ ॥

हविष्यष्टनः कपाले । ३ । २ । ७३ ।

हविष्यर्थे कपाले उत्तरपदेऽष्टनोदीर्घः स्यात् । अष्टाकपालं हविः । हविषीति किम् । अष्टकपालम् । कपालइति किम् । अष्टपात्रं हविः॥७३॥

गवि युक्ते । ३ । २ । ७४ ।

युक्तेऽर्थे गव्युत्तरपदे ऽष्टनोदीर्घः स्यात् । अष्टागवं शकटम् । युक्तइति किम् । अष्टगुश्चैत्रः ॥ ७४ ॥

नाम्नि । ३ । २ । ७५ ।

अष्टन उत्तरपदे संज्ञायां दीर्घः स्यात् । अष्टापदः कैलाशः । नाम्नीति किम् । अष्टदंष्ट्रः ॥ ७५ ॥

कोटरमिश्रकासिध्रकपुरगसारिकस्य वणे । ३ । २ । ७६ ।

एषां कृतणत्वे वने उत्तरपदे संज्ञायां दीर्घः स्यात् । कोटरावणम् । मिश्रकावणम् । सिध्रकावणम् । पुरगावणम् । सारिकावणम् ॥ ७६ ॥

अञ्जनादीनां गिरौ । ३ । २ । ७७ ।

एषां गिरावुत्तरपदे नाम्नि दीर्घः स्यात् । अञ्जनागिरिः । कुक्कुटागिरिः ॥ ७७ ॥

अनजिरादिबहुस्वरशरादीनां मतौ । ३ । २ । ७८ ।

अजिरादिवर्जबहुस्वराणां शरादीनां च मतौ प्रत्यये नाम्नि दीर्घः स्यात् । उदुम्बरावती । शरावती । वंशावती । अनजिरादीति किम् । अजिरवती । हिरण्यवती ॥ ७८ ॥

ऋषौ विश्वस्य मित्रे । ३ । २ । ७९ ।

ऋषावर्थे मित्रे उत्तरपदे विश्वस्य नाम्नि दीर्घः स्यात् । विश्वामित्रः ॥

नरे । ३ । २ । ८० ।

नरे उत्तरपदे नाम्नि विश्वस्य दीर्घः स्यात् । विश्वानरः कश्चित् ॥

वसुराटोः । ३ । २ । ८१ ।

अनयोरुत्तरपदयोर्विश्वस्य दीर्घः स्यात् । विश्वावसुः । विश्वाराट् ॥

वलच्यपित्रादेः । ३ । २ । ८२ ।

वलच्प्रत्यये पित्रादिवर्जानां दीर्घः स्यात् । आसुतीवलः । अपित्रादेरिति किम् । पितृवलः । मातृवलः ॥ ८२ ॥

चितेः कचि । ३ । २ । ८३ ।

चितेः कचि दीर्घः स्यात् । एकचितीकः ॥ ८३ ॥

स्वामिचिह्नस्याऽविष्टाऽष्टपञ्चभिन्नछिन्नच्छिद्रश्रुवस्वस्तिकस्य कर्णे । ३ । २ । ८४ ।

स्वामी चिह्न्यते येन तद्वाचिनोविष्टादिवर्जस्य कर्णे उत्तरपदे दीर्घः स्यात् । दात्राकर्णः पशुः । स्वामिचिह्नस्येति किम् । लम्बकर्णः । विष्टादिवर्जनं किम् । विष्टकर्णः । अष्टकर्णः ॥ ८४ ॥

गतिकारकस्य नहिवृतिवृषिव्यधिरुचिसहितनौ क्वौ । ३ । २ । ८५ ।

गतिकारकयोर्नह्यादौ क्विबन्ते उत्तरपदे दीर्घः स्यात् । उपानत् । नीवृत् । प्रावृट् । श्वावित् । नीरुक् । ऋतीषट् । परीतत् । जलासट् ॥ ८५ ॥

घञ्युपसर्गस्य बहुलम् । ३ । २ । ८६ ।

घञन्ते उत्तरपदे उपसर्गस्य बहुलं दीर्घः स्यात् । नीक्लेदः । नीवारः । बाहुलकात् क्वचिद्वा । प्रतीवेशः । प्रतिवेशः । क्वचिन्न । विषादः । निषादः ॥ ८६ ॥

नामिनः काशे । ३ । २ । ८७ ।

नाम्यन्तस्योपसर्गस्याजन्ते काशे उत्तरपदे दीर्घः स्यात् । नीकाशः । वीकाशः । नामिनइति किम् । प्रकाशः ॥ ८७ ॥

दस्ति । ३ । २ । ८८ ।

दो यस्तादिरादेशस्तस्मिन्परे नाम्यन्तस्योपसर्गस्य दीर्घः स्यात् । नीत्तम् । वीत्तम् । दइति किम् । वितीर्णम् । तीति किम् । सुदत्तम् ॥ ८८ ॥

अपील्वादेर्वहे । ३ । २ । ८९ ।

पील्वादिवर्जस्य नाम्यन्तस्य वहे उत्तरपदे दीर्घः स्यात् । ऋषीवहम् । मुनीवहम् । अपील्वादेरिति किम् । पीलुवहम् । दारुवहम् ॥ ८९ ॥

शुनः । ३ । २ । ९० ।

अस्योत्तरपदे दीर्घः स्यात् । श्वादन्तः । श्वावराहम् ॥ ९० ॥

एकादश षोडश षोडत्षोढा षड्ढा । ३ । २ । ९१ ।

एकादयोदशादिषु कृतदीर्घत्वादयो निपात्यन्ते । एकादश । षोडश । षट्दन्ता अस्य षोडन् । षोढा । षड्ढा ॥ ९१ ॥

द्वित्र्यष्टानां द्वात्रयोऽष्टाः प्राक्शतादन-

शीतिबहुव्रीहौ । ३ । २ । ९२ ।

एषां यथासंख्यमेते प्राक्शतात् संख्यायामुत्तरपदे स्युर्नत्वशीतौ बहुव्रीहिविषये च । द्वादश । त्रयोविंशतिः । अष्टात्रिंशत् । प्राक्शतादिति किम् । द्विशतम् । त्रिशतम् । अष्टसहस्रम् । अनशीतिबहुव्रीहाविति किम् । द्व्यशीतिः । द्वित्राः ॥ ९२ ॥

चत्वारिंशदादौ वा । ३ । २ । ९३ ।

द्वित्र्यष्टानां प्राक्शताच्चत्वारिंशदादावुत्तरपदे यथासंख्यं द्वात्रयोऽष्टा वा स्युः अनशीतिबहुव्रीहौ । द्वाचत्वारिंशत् । द्विचत्वारिंशत् । त्रयश्चत्वारिंशत् । त्रिचत्वारिंशत् । अष्टाचत्वारिंशत् । अष्टचत्वारिंशत् ॥ ९३ ॥

हृदयस्य हृल्लासलेखाण्ये ।३।२।९४।

अस्य लासलेखयोरुत्तरपदयोरणि ये च प्रत्यये हृत् स्यात् । हृल्लासः । हृल्लेखः । हार्दम् । हृद्यः ॥ ९४ ॥

पदः पादस्याज्यातिगोपहते ।३।२।९५।

पादस्याज्यादावुत्तरपदे पदः स्यात् । पदाजिः । पदातिः । पदगः । पदोपहतः ॥ ९५ ॥

हिमहतिकाषिये पद् । ३ । २ । ९६ ।

हिमादावुत्तरपदे ये च प्रत्यये पादस्य पद् स्यात् । पद्धिमम् । पद्धतिः । पत्काषी । पद्याः, शर्कराः ॥ ९६ ॥

ऋचः शसि । ३ । २ । ९७ ।

ऋचां पादस्य शादौ शस्प्रत्यये पद् स्यात् । पच्छोगायत्रीं शंसति । ऋचइति किम् । पादशः श्लोकं वक्ति । द्विःशपाठात् स्यादिशसि न स्यात् । ऋचः पादाः पश्य ॥ ९७ ॥

शब्दनिष्कघोषमिश्रे वा । ३ । २ । ९८ ।

शब्दादावुत्तरपदे पादस्य पद् वा स्यात् । पच्छब्दः । पादशब्दः । पन्निष्कः । पादनिष्कः । पद्घोषः । पादघोषः । पन्मिश्रः । पादमिश्रः ॥९८॥

नस् नासिकायास्तः क्षुद्रे । ३ । २ । ९९ ।

नासिकायास्तस्प्रत्यये क्षुद्रे चोत्तरपदे नस् स्यात् । नस्तः । नः क्षुद्रः ॥ ९९ ॥

येऽवर्णे । ३ । २ । १०० ।

नासिकाया ये प्रत्यये वर्णादन्यत्रार्थे नस् स्यात् । नस्यम् । यइति किम् । नासिक्यं पुरम् । अवर्णइति किम् । नासिक्यो वर्णः ॥१०० ॥

शिरसः शीर्षन् । ३ । २ । १०१ ।

शिरसो ये प्रत्यये शीर्षन् स्यात् । शीर्षण्यः स्वरः । शीर्षण्यं तैलम् । यइत्येव । शिरस्तः । शिरस्यति ॥ १०१ ॥

केशे वा । ३ । २ । १०२ ।

शिरसः केशविषये ये प्रत्यये शीर्षन् वा स्यात् । शीर्षण्याः, शिरस्याः केशाः ॥ १०२ ॥

शीर्षः स्वरे तद्धिते । ३ । २ । १०३ ।

शिरसः स्वरादौ तद्धिते शीर्षः स्यात् । हास्तिशीर्षिः । शीर्षिकः ॥

उदकस्योदः पेषंधिवासवाहने । ३ । २ । १०४ ।

उदकस्य पेषमादावुत्तरपदे उदः स्यात् । उदपेषं पिनष्टि । उदधिर्घटः । उदवासः । उदवाहनः ॥ १०४ ॥

वैकव्यञ्जने पूर्ये । ३ । २ । १०५ ।

उदकस्यासंयुक्तव्यञ्जनादौ पूर्यमाणार्थे उत्तरपदे उदो वा स्यात् । उदकुम्भः। उदककुम्भः। व्यञ्जनइति किम् । उदकामत्रम् ।एकेति किम् । उदकस्थालम् । पूर्यइति किम् । उदकदेशः ॥ १०५ ॥

मन्थौदनसक्तुबिन्दुवज्रभारहारवीवधगाहे वा । ३ । २ । १०६ ।

एषूत्तरपदेषु उदकस्योदो वा स्यात् । उदमन्थः। उदकमन्थः। उदौदनः। उदकौदनः । उदसक्तुः। उदकसक्तुः ।उदबिन्दुः।उदकबिन्दुः ।उदवज्रः । उदकवज्रः।उदभारः।उदकभारः।उदहारः। उदकहारः।उदवीवधः।उदकवीवधः । उदगाहः । उदकगाहः ॥ १०६ ॥

नाम्न्युत्तरपदस्य च । ३ । २ । १०७ ।

उदकस्य पूर्वपदस्योत्तरपदस्य च संज्ञायामुदः स्यात् । उदमेघः। उदवाहः । उदपानम् । उदधिः । लवणोदः । कालोदः ॥ १०७ ॥

ते लुग्वा । ३ । २ । १०८ ।

संज्ञाविषये पूर्वोत्तरपदे लुग्वा स्यात् । देवदत्तः।देवः। दत्तः ॥१०८॥

द्व्यन्तरनवर्णोपसर्गादप ईप्। ३ । २ ।१०९।

द्व्यन्तर्भ्यामवर्णान्तवर्जोपसर्गेभ्यश्च परस्यापउत्तरपदस्य ईप् स्यात्। द्वीपम् । अन्तरीपम्।नीपम्। समीपम्।उपसर्गादेरिति किम्।स्वापः। अनवर्णेति किम् । प्रापम् । परापम् ॥ १०९॥

अनोर्देशे उप् । ३ । २ । ११० ।

अनोः परस्यापोदेशेऽर्थे उप् स्यात् । अनूपोदेशः। देशइति किम् । अन्वीपं वनम् ॥ ११० ॥

खित्यनव्ययाऽरुषोर्मोऽन्तोह्रस्व-

श्च । ३ । २ । १११।

स्वरान्तस्यानव्ययस्यारुषश्च खित्प्रत्ययान्ते उत्तरपदे मोऽन्तोयथा- सम्भवं ह्रस्वादेशश्च स्यात्। ह्रंमन्यः। कालिमन्या ।अरुन्तुदः । खितीति किम् । ह्रमानी । अनव्ययस्येति किम् । दोषामन्यमहः ॥ १११॥

सत्यागदास्तोः कारे । ३ । २ । ११२ ।

एभ्यः कारि उत्तरपदे मोऽन्तः स्यात् । सत्यङ्कारः । अगदङ्कारः । अस्तुङ्कारः ॥ ११२ ॥

लोकम्पृणमध्यन्दिनाऽनभ्यास- मित्यम् । ३ । २ । ११३ ।

एते कृतपूर्वपदमोऽन्ता निपात्यन्ते । लोकम्पृणः । मध्यन्दिनम् । अनभ्यासमित्यः ॥ ११३ ॥

भ्राष्ट्राग्नेरिन्धे । ३ । २ । ११४ ।

आभ्यामिन्धे उत्तरपदे मोऽन्तःस्यात् ।भ्राष्ट्रमिन्धः।अग्निमिन्धः ॥

अगिलाद्गिलगिलगिलयोः । ३ । २ । ११५।

गिलान्तवर्जात् पूर्वपदात्परोगिले गिलगिले चोत्तरपदे मोऽन्तः स्यात् । तिमिङ्गिलः। तिमिङ्गिलगिलः। अगिलादिति किम् । तिमिङ्गिल- गिलः ॥ ११५ ॥

भद्रोष्णात्करणे । ३ । २ । ११६ ।

आभ्यां परः करणे उत्तरपदे मोऽन्तः स्यात् । भद्रंकरणम् । उष्णं- करणम् ॥ ११६ ॥

न वाखित्कृदन्ते रात्रेः । ३ । २ । ११७ ।

खिद्वर्जे कृदन्ते उत्तरपदे परे रात्रेर्मोऽन्तो वा स्यात् । रात्रिञ्चरः । रात्रिचरः। खिद्वर्जनमिति किम्। रात्रिमन्यमहः। कृदन्तइति किम्। रात्रिसुखम् । अन्तग्रहणं किम् । रात्र्यिता ॥ ११७ ॥

धेनोर्भव्यायाम् । ३ । २ । ११८ ।

धेनोर्भव्यायामुत्तरपदे मोऽन्तोवा स्यात् । धेनुम्भव्या । धेनुभव्या ॥

अषष्ठीतृतीयादन्याद्दोर्थे । ३ । २ । ११९ ।

अषष्ठ्यन्तादतृतीयान्ताच्चान्यादर्थे उत्तरपदे द् अन्तो वा स्यात् । अन्यदर्थः । अन्यार्थः । षष्ठ्यादिवर्जनं किम् । अन्यस्यान्येन वाऽर्थोऽन्यार्थः ॥ ११९ ॥

आशीराशास्थितास्थोत्सुकोतिरागे । ३ । २ । १२० ।

एषूत्तरपदेषु अषष्ठीतृतीयादन्याद् अन्तः स्यात् । अन्यदाशीः । अन्यदाशा । अन्यदास्थितः । अन्यदास्था। अन्यदुत्सुकः। अन्यदूतिः। अन्यद्रागः । अषष्ठीतृतीयादित्येव । अन्यस्य अन्येन वा आशीः अन्याशीः ॥ १२० ॥

ईयकारके । ३ । २ । १२१ ।

अन्यादीये प्रत्यये कारके चोत्तरपदे दाऽन्तः स्यात् । अन्यदीयः। अन्यत्कारकः ॥ १२१ ॥

सर्वादिविष्वग्देवाड्डद्रिः क्व्यञ्चौ।३।२।१२२।

सर्वादेर्विष्वग्देवाभ्यां च परतः क्विबन्ते अञ्चावुत्तरपदे डद्रिरन्तः स्यात्। सर्वद्रीचः। द्व्यद्र्यङ्। कद्र्यङ्। विष्वद्र्यङ्। देवद्र्यङ्। क्वीति किम्। विष्वगंचनम् ॥ १२२ ॥

सहसमः सध्रिसमि । ३ । २ । १२३ ।

अनयोः स्थाने क्विबन्ते अञ्चावुत्तरपदे यथासंख्यं सध्रिसमी स्याताम् । सध्र्यङ् । सम्यङ् । क्वच्यञ्चावित्येव । सहाञ्चनम् ॥ १२३ ॥

तिरसस्तिर्यति । ३ । २ । १२४ ।

अकारादौ क्विबन्तेऽञ्चावुत्तरपदे तिरसस्तिरिः स्यात् । तिर्यङ् । अतीति किम् । तिरश्चः ॥ १२४ ॥

नञत् । ३ । २ । १२५ ।

उत्तरपदे परे नञ् अः स्यात् । अचौरः पन्थाः । उत्तरपद इत्येव । न भुङ्क्ते ॥ १२५ ॥

त्यादौ क्षेपे । ३ । २ । १२६ ।

त्याद्यन्ते पदे परे निन्दायां गम्यमानायां नञ् अः स्यात् । अपचसि त्वं जाल्म । क्षेपइति किम् । न पचति चैत्रः ॥ २६ ॥

नगोऽप्राणिनि वा । ३ । २ । १२७ ।

अप्राणिन्यर्थे नगो वा निपात्यते । नगः, अगः, गिरिः। अप्राणिनीति किम् । अगोऽयं शीतेन ॥ १२७ ॥

नखादयः । ३ । २ । १२८ ।

एते अकृताकाराद्यादेशा निपात्यन्ते । नखः । नासत्यः ॥ १२८ ॥

अन् स्वरे । ३ । २ । १२९ ।

स्वरादावुत्तरपदे नञोऽन् स्यात् । अनन्तो जिनः ॥ १२९ ॥

कोः कत्तत्पुरुषे । ३ । २ । १३० ।

स्वरादावुत्तरपदे कोस्तत्पुरुषे कद् स्यात् । कदश्वः । तत्पुरुष इति किम् । कूष्ट्रो देशः । स्वरइत्येव । कुब्राह्मणः ॥ १२७ ॥

रथवदे । ३ । २ । १३१ ।

रथे वदे चोत्तरपदे कोः कद् स्यात् । कद्रथः । कद्वदः ॥१३१॥

तृणे जातौ । ३ । २ । १३२ ।

जातावर्थे तृणे उत्तरपदे कोः कद् स्यात् । कत्तृणा, रोहिषाख्या तृणजातिः ॥ १३२ ॥

कत्रि । ३ । २ । १३३ ।

कोः किमो वा त्रावुत्तरपदे कद् स्यात् । कत्त्रयः ॥ १३३ ॥

काऽक्षपथोः । ३ । २ । १३४ ।

अनयोरुत्तरपदयोः कोः का स्यात् । काक्षः । कापथम् ॥ १३४॥

पुरुषे वा । ३ । २ । १३५ ।

पुरुषे उत्तरपदे कोः का वा स्यात् । कापुरुषः । कुपुरुषः ॥ १३५ ॥

अल्पे । ३ । २ । १३६ ।

ईषदर्थस्य कोरुत्तरपदे का स्यात् । कामधुरम् । काच्छम् ॥१३६॥

काकवौ वोष्णे । ३ । २ । १३७ ।

उष्णे उत्तरपदे कोः काकवौ वा स्याताम् । कोष्णम् । कवोष्णम् । पक्षे यथाप्राप्तमिति । तत्पुरुषे । कदुष्णम् । बहुव्रीहौ । कूष्णोदेशः ॥१३७॥

कृत्ये ऽवश्यमोलुक् । ३ । २ । १३८ ।

कृत्यान्ते उत्तरपदे ऽवश्यमोलुक् स्यात् । अवश्यकार्यम् । कृत्यइति किम् । अवश्यं लावकः ॥ १३९ ॥

समस्ततहिते वा । ३ । २ । १३९ ।

ततेहिते चोत्तरपदे समो लुग् वा स्यात्। सततम्। सन्ततम्। सहितम्। संहितम् ॥ १३९ ॥

तुमश्च मनःकामे। ३। २। १४०।

तुम्समोर्मनसि कामे चोत्तरपदे लुक् स्यात्। भोक्तुमनाः। भन्तुकामः। समनाः। सकामः ॥ १४० ॥

मांसस्यानडघञि पचि नवा।३।२।१४१।

अनड घञन्ते पचावुत्तरपदे मांसस्य लुग्वा स्यात्। मांस्पचनम्। मांसपचनम्। मांस्पाकः। मांसपाकः ॥ १४१ ॥

दिक्शब्दात्तीरस्य तारः। ३। २। १४२।

अस्मात्परस्य तीरस्योत्तरपदस्य तारो वा स्यात्। दक्षिणतारम्। दक्षिणतीरम् ॥ १४२ ॥

सहस्य सोऽन्यार्थे। ३। २। १४३।

उत्तरपदे परे बहुव्रीहौ सहस्य सो वा स्यात्। सपुत्रः। सहपुत्रः। अन्यार्थइति किम्। सहजः ॥ १४३ ॥

नाम्नि। ३। २। १४४।

उत्तरपदे परे बहुव्रीहौ सहस्य सः संज्ञायां स्यात्। साश्वत्थं वनम्। अन्यार्थइत्येव। सहदेवः कुरुः ॥ १४४ ॥

अदृश्याधिके। ३। २। १४५।

अदृश्यं परोक्षमधिकमधिरूढं तदर्थयोरुत्तरपदयोर्बहुव्रीहौ सहस्य सः स्यात्। साग्निः कपोतः। सद्रोणा खारी ॥ १४५ ॥

अकालेऽव्ययीभावे। ३। २। १४६।

अकालवाचिन्युत्तरपदे सहस्याऽव्ययीभावे सः स्यात्। सब्रह्म

साधूनाम्। अकालइति किम्। सहपूर्वाह्णं शेते। अव्ययीभावइति वि सहयुध्वा ॥ १४६ ॥

ग्रन्थाऽन्ते । ३। २ । १४७।

एतद्वाच्युत्तरपदे सहस्याव्ययीभावे सः स्यात् । सकलं ज्योति मधीते ॥ १४७ ॥

नाशिष्यगोवत्सहले। ३।२।१४८।

गवादिवर्जे उत्तरपदे आशिषि गम्यायां सहस्य सो न स्यात् स्वस्ति गुरवे सहशिष्याय । आशिषीति किम् । सपुत्रः । गवादिवर्ज किम् । स्वस्ति तुभ्यं सगवे । सहगवे । सवत्साय । सहवत्साय । सहलाय । सहहलाय ॥ १४८ ॥

समानस्य धर्मादिषु । ३ ।२। १४९।

धर्मादावुत्तरपदे समानस्य सः स्यात् । सधर्मा । सनामा ॥१४९

सब्रह्मचारी । ३ । २ । १५० ।

अयं निपात्यते ॥ १५० ॥

दृग्दृशदृक्षे। ३।२।१५१ ।

एषूत्तरपदेषु समानस्य सः स्यात् । सदृक् । सदृशः सदृक्षः ॥१५१॥

अन्यत्यदादेराः । ३ । २ । १५२ ।

अन्यस्य त्यदादेश्च दृगादावुत्तरपदे आः स्यात् । अन्यादृक् अन्यादृशः। अन्यादृक्षः । त्यादृक् । त्यादृशः । त्यादृक्षः। अस्मादृक् । अस्मादृशः । अस्मादृक्षः ॥ १५२ ॥

इदङ्किमीत्की । ३ । २ । १५३ ।

दृगादावुत्तरपदे इदङ्किमौ यथासङ्ख्यमीत्कीरूपौ स्याताम् । ईदृक् । ईदृशः । ईदृक्षः । कीदृक् । कीदृशः । कीदृक्षः ॥ १५३ ॥

अनञः क्त्वो यप् । ३ । २ । १५४ ।

नञोऽन्यस्मादव्ययात्पूर्वपदात्परं यदुत्तरपदं तदवयवस्य क्त्वो यप् स्यात् । प्रकृत्य । अनञ इति किम् । अकृत्वा । परमकृत्वा । उत्तरपदस्येत्येव । अलंकृत्वा ॥ १५४ ॥

पृषोदरादयः । ३ । २ । १५५ ।

एते साधवः स्युः । पृषोदरः । बलाहकः ॥ १५५ ॥

वावाप्योस्तनिक्रीधाग्नहोर्वपी । ३ । २ । १५६ ।

अवस्योपसर्गस्य तनिक्रियोरपेश्च धाग्नहोर्यथासङ्ख्यं वपी वा स्याताम् । वतंसः । अवतंसः । वक्रयः । अवक्रयः । पिहितम् । अपिहितम् । पिनद्धम् । अपिनद्धम् ॥ १५६ ॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनलघुवृत्तौ तृतीयस्याध्यायस्य द्वितीयः पादः समाप्तः ।

ॐ

अर्हम्

वृद्धिरारैदौत् । ३ । ३ । १ ।

आ आर् ऐ औ एते प्रत्येकं वृद्धिः स्युः । मार्ष्टि । कार्यम् । नायकः। औपगवः ॥ १॥

गुणोऽरेदोत् । ३ । ३ । २ ।

अर् एत् ओत् एते प्रत्येकं गुणः स्युः। कर्त्ता । चेता । स्तोता ॥ २ ॥

क्रियार्थोधातुः । ३ । ३ । ३ ।

कृतिः क्रिया पूर्वापरीभूता साऽर्थोयस्य स धातुः स्यात् । भवति । अत्ति। गोपायति । जुगुप्सते । पापच्यते । पुत्रकाम्यति । मुण्डयति । जवनः ॥ ३ ॥

न प्रादिरप्रत्ययः । ३ । ३ । ४ ।

प्रादिर्धातोरवयवोन स्यात् ततः परएव धातुरित्यर्थः न चेत्ततः परः प्रत्ययः । अभ्यमनायत । प्रासादीयत् । प्रादिरिति किम् । अमहापुत्रीयत् । अप्रत्ययइति किम् । औत्सुकायत ॥ ४ ॥

अवौ दाधौ दा । ३ । ३ । ५ ।

दाधारूपौ धातू अवितौ दा स्याताम् । दाम् । प्रणिदाता । देङ् । प्रणिदयते । डुदांग् । प्रणिददाति । दों । प्रणिद्यति । ट्धें । प्रणिधयति । डुधांग्। प्रणिदधाति । अवाविति किम्। दांव्। दातं बर्हिः। दैंव्। अवदातंमुखम् ॥ ५ ॥

वर्त्तमाना तिव् तस् अन्ति, सिव् थस् थ, मिव् वस् मस्; ते आते अन्ते, से आथे ध्वे,

ए वहे महे । ३ । ३ । ६ ।

इमानि वचनानि वर्त्तमाना स्युः ॥ ६ ॥

सप्तमी यात् यातां युस्, यास् यातं यात, यां याव याम; ईत ईयातां ईरन्, ईथास् ईयाथां ईध्वं, ईय ईवहि ईमहि । ३ । ३ । ७ ।

इमानि वचनानि सप्तमी स्युः ॥ ७ ॥

पञ्चमी तुव् तां अन्तु, हि तं त, आनिव् आवव् आमव्; तां आतां अन्तां, स्व आथां ध्वं, ऐव् आवहैव् आमहैव् । ३ । ३ । ८ ।

इमानि वचनानि पञ्चमी स्युः ॥ ८ ॥

ह्यस्तनी दिव् तां अन्, सिव् तं त, अमव् व म; त आतां अन्त, थास् आथां ध्वं, इ वहि महि । ३ । ३ । ९ ।

इमानि वचनानि ह्यस्तनी स्युः ॥ ९ ॥

एताः शितः । ३ । ३ । १० ।

एताश्चतस्रः शितोज्ञेयाः । भवति । भवेत् । भवतु । अभवत् ॥ १० ॥

अद्यतनी दि तां अन्, सि तं त, अम् व म; त आतां अन्त, थास् आथां ध्वं, इ वहि महि । ३ । ३ । ११ ।

इमानि वचनानि अद्यतनी स्युः ॥ ११ ॥

परोक्षा णव् अतुस् उस्, थव् अथुस् अ, णव् व म; ए आते इरे, से आथे ध्वे, ए वहे महे । ३ । ३ । १२ ।

इमानि वचनानि परोक्षा स्युः ॥ १२ ॥

आशीः क्यात् क्यास्तां क्यासुस्, क्यास् क्यास्तं क्यास्त, क्यासं क्यास्व क्यास्म; सीष्ट सीयास्तां सीरन्, सीष्ठास् सीयास्थां सीध्वं, सीय सीवहि सीमहि । ३ । ३ । १३ ।

इमानि वचनानि आशीः स्युः ॥ १३ ॥

श्वस्तनी ता तारौ तारस्, तासि तास्थस् तास्थ, तास्मि तास्वस् तास्मस्; ता तारौ तारस्, तासे तासाथे ताध्वे, ताहे तास्वहे तास्महे । ३ । ३ । १४ ।

इमानि वचनानि श्वस्तनी स्युः ॥ १४ ॥

भविष्यन्ती स्यति स्यतस् स्यन्ति, स्यसि
स्यथस् स्यथ, स्यामि स्यावस् स्यामस्;
स्यते स्येते स्यन्ते, स्यसे स्येथे स्यध्वे;
स्ये स्यावहे स्यामहे ३।३।१५।

इमानि वचनानि भविष्यन्ती स्युः ॥ १६ ॥

क्रियातिपत्तिः स्यत् स्यतां स्यन्, स्यस्
स्यतं स्यत, स्यं स्याव स्याम; स्यत स्येतां
स्यन्त, स्यथास् स्येथां स्यध्वं, स्ये
स्यावहि स्यामहि। ३। ३। १६।

इमानि वचनानि क्रियातिपत्तिः स्युः ॥ १६ ॥

त्रीणि त्रीण्यऽन्ययुष्मदस्मदि।३।३।१७।

सर्वासां विभक्तीनां त्रीणि त्रीणि वचनानि अन्यस्मिन्नर्थे युष्मदर्थेऽस्मदर्थे च वाच्ये यथाक्रमं स्युः। स पचति। तौ पचतः। ते पचन्ति। पचते। पचेते। पचन्ते। त्वं पचसि। युवां पचथः। यूयं पचथ। पचसे। पचेथे। पचध्वे। अहं पचामि। आवां पचावः। वयं पचामः। पचे। पचावहे। पचामहे। एवं सर्वासु द्वययोगे त्रययोगे च पराश्रयमत्र वचनम्। स च त्वं च पचथः। स च त्वं चाहं च पचामः ॥ १७ ॥

एकद्विबहुषु। ३। ३। १८।

अन्यादिषु यानि त्रीणि त्रीण्युक्तानि तान्येकद्विबहुष्वर्थेषु यथासङ्ख्यं स्युः। स पचति। तौ पचतः। ते पचन्तीत्यादि ॥ १८ ॥

नवाद्यानि शतृक्वसू च परस्मैपदम् । ३ । ३ । १९ ।

सर्वविभक्तीनामाद्यानि नव नव वचनानि शतृक्वसू च परस्मैपदानि स्युः । तिव् । तस् । अन्ति । सिव् । थस् । थ । मिव् । वस् । मस् । एवं सर्वासु ॥ १९ ॥

पराणि कानानशौ चात्मनेपदम् ।३।३।२०।

सर्वविभक्तीनां पराणि नव नव वचनानि कानानशौ चात्मनेपदानि स्युः । ते । आते । अन्ते । से । आथे । ध्वे । ए । वहे । महे । एवं सर्वासु ॥ २० ॥

तत्साप्यानाप्यात्कर्मभावे कृत्यक्तखलर्थाश्च । ३ । ३ । २१ ।

तदात्मनेपदं कृत्यक्तखलर्थाश्च प्रत्ययाः सकर्मकाद्धातोः कर्म्मणि अकर्मकादविवक्षितकर्मकाच्च भावे स्युः । क्रियते कटश्चैत्रेण । चक्राणः । क्रियमाणः । भूयते त्वया । भूयमानम् । क्रियते । मृदु पच्यते । कार्यः । कर्त्तव्यः । करणीयः । देयः । कृत्यः कटस्त्वया । शयितव्यम् । शयनीयम् । शेयम् । कार्यम् । कर्त्तव्यम् । करणीयम् । देयम् । कृत्यम् । त्वया कृतः कटः । शयितम् । कृतं त्वया । सुकरः कटस्त्वया । सुशयं, सुकरं त्वया । सुकटंकराणि वीरणानि । ईषदाढ्यम्भवं भवता । सुज्ञानं तत्त्वं मुनिना । सुग्लानं दीनेन । मासआस्यते । मासमास्यते ॥ २१ ॥

इङितः कर्त्तरि । ३ । ३ । २२ ।

इदितो ङितश्च धातोः कर्त्तर्यात्मनेपदं स्यात् । एधते । एधमानः । शेते । शयानः ॥ २२ ॥

क्रियाव्यतिहारेऽगतिहिंसाशब्दार्थहसोहृवहश्चानन्योऽन्यार्थे ।३।३।२३।

अन्यचिकीर्षितायाः क्रियाया अन्येन हरणं करणं क्रियाव्यतिहारः तदर्थाद्गतिहिंसाशब्दार्थहस्वर्जाद्धातोर्हृवहिभ्यां च कर्त्तर्यात्मनेपदं स्यात् । नत्वन्योन्येतरेतरपरस्परशब्दयोगे । व्यतिलुनते । व्यतिहरन्ते । व्यतिवहन्ते भारम् । क्रियेति किम् । द्रव्यव्यतिहारे माभूत् । चैत्रस्य धान्यं व्यतिलुनन्ति । गत्यर्थादिवर्जनं किम् । व्यतिसर्प्पन्ति । व्यतिहिंसन्ति । व्यतिजल्पन्ति । व्यतिहसन्ति । अनन्योन्यार्थइति किम् । परस्परस्य व्यतिलुनन्ति । कर्त्तरीत्येव । तेन भावकर्मणोः पूर्वेणैव गत्यर्थादिभ्योपि स्यात् । व्यतिगम्यन्ते ग्रामाः ॥ २३ ॥

निविशः । ३ । ३ । २४ ।

नेर्विशः कर्त्तर्यात्मनेपदं स्यात् । निविशते ॥ २४ ॥

उपसर्गादस्योहो वा । ३ । ३ । २५ ।

उपसर्गात्पराभ्यामस्यत्यूहिभ्यां कर्त्तर्यात्मनेपदं वा स्यात् । विपर्यस्यते । विपर्यस्यति । समूहते । समूहति ॥ २५ ॥

उत्स्वराद्युजेरयज्ञतत्पात्रे ।३।३।२६।

उदः स्वरान्ताच्चोपसर्गात्परादुयुनक्तेः कर्त्तर्यात्मनेपदं स्यात् नचेद्यज्ञे यत्तत्पात्रं तद्विषयोयुज्यर्थः स्यात् । उद्युङ्क्ते । उपयुङ्क्ते । उत्स्वरादिति किम् । संयुनक्ति । अयज्ञतत्पात्रइति किम् । द्वन्द्वं यज्ञपात्राणि प्रयुनक्ति ॥ २६ ॥

परिव्यवात्क्रियः । ३ । ३ । २७ ।

एभ्य उपसर्गेभ्यः परात् क्रीणातेः कर्त्तर्यात्मनेपदं स्यात् । परिक्रीणीते । विक्रीणीते । अवक्रीणीते । उपसर्गादित्येव । उपरिक्रीणाति ॥ २७ ॥

परावेर्जेः । ३ । ३ । २८ ।

आभ्यां पराज्जयतेः कर्त्तर्यात्मनेपदं स्यात् । पराजयते । विजयते । उपसर्गाभ्यामित्येव । बहु विजयति वनम् ॥ २८ ॥

समः क्ष्णोः । ३ । ३ । २९ ।

समः परात् क्ष्णौतेः कर्त्तर्यात्मनेपदं स्यात । संक्ष्णुते शस्त्रम् । समइति किम् । क्ष्णौति । उपसर्गादित्येव । आयसं क्ष्णौति ॥ २९ ॥

अपस्किरः । ३ । ३ । ३० ।

अपात्किरतेः सस्सट्कात्कर्त्तर्यात्मनेपदं स्यात् । अपस्किरते वृषभोहृष्टः। सस्सटनिर्देशः किम् । अपकिरति ।अपेति किम्।उपस्किरति॥

उदश्चरः साप्यात् । ३ । ३ । ३१ ।

उत्पूर्वाच्चरेः सकर्म्मकात्कर्त्तर्यात्मनेपदं स्यात् । मार्गमुच्चरते । साप्यादिति किम् । धूम उच्चरति ॥ ३१ ॥

समस्तृतीयया । ३ । ३ । ३२ ।

सम्पूर्वाच्चरेस्तृतीयान्तेन योगे कर्त्तर्यात्मनेपदं स्यात् । अश्वेनसञ्चरते । तृतीयेति किम् । उभौ लोकौ सञ्चरसि ॥ ३२ ॥

क्रीडोऽकूजने । ३ । ३ । ३३ ।

कूजनमव्यक्तः शब्दस्ततोऽन्यार्थात्संपूर्वात्क्रीडतेः कर्त्तर्यात्मनेपदं स्यात् । संक्रीडते । सम इत्येव । क्रीडति । अकूजनइति किम् । संक्रीडन्त्यऽनांसि ॥ ३३ ॥

अन्वाङ्परेः । ३ । ३ । ३४ ।

एभ्यः परात्क्रीडतेः कर्त्तर्यात्मनेपदं स्यात् । अनुक्रीडते । आक्रीडते । परिक्रीडते ॥ ३४ ॥

शप उपलम्भने । ३ । ३ । ३५ ।

उपलम्भनं प्रकाशनं शपथो वा तदर्थाच्छपतेः कर्त्तर्यात्मनेपदं स्यात् । मैत्राय शपते । उपलम्भनइति किम् । मैत्रं शपति ॥ ३५ ॥

आशिषि नाथः । ३ । ३ । ३६ ।

आशीरर्थादेव नाथेः कर्त्तर्यात्मनेपदं स्यात् । सर्पिषोनाथते । आशिषीति किम् । मधु नाथति ॥ ३६ ॥

भुनजोऽत्राणे । ३ । ३ । ३७ ।

पालनादन्यार्थाद् भुनक्तेः कर्त्तर्यात्मनेपदं स्यात् । ओदनं भुङ्क्ते । भुनजइति किम् । ओष्ठौ निर्भुजति । अत्राणइति किम् । पृथ्वीं भुनक्ति ॥ ३७ ॥

हृगोगतताच्छील्ये । ३ । ३ । ३८ ।

गतं सादृश्यं हृगोगतताच्छील्यार्थात्कर्त्तर्यात्मनेपदं स्यात् । पैत्रकमश्वा अनुहरन्ते । पितुरनुहरन्ते । गतइति किम् । पितुर्हरति । चोरयतीत्यर्थः । ताच्छील्यादिति किम् । नटो राममनुहरति ॥ ३८ ॥

पूजाचार्यकभृत्युत्क्षेपज्ञानविगणनव्यये नियः । ३ । ३ । ३९ ।

पूजादिषु गम्येषु नियः कर्त्तर्यात्मनेपदं स्यात् । नयते विद्वान् स्याद्वादे । माणवकमुपनयते । कर्मकरानुपनयते । शिशुमुदानयते । नयते तत्त्वार्थे । मद्राः कारं विनयन्ते । शतं विनयते । एष्विति किम् । अजां नयति ग्रामम् ॥ ३९ ॥

कर्तृस्थामूर्त्ताप्यात् । ३ । ३ । ४० ।

कर्तृस्थममूर्त्तं कर्म्म यस्य तस्मान्नियः कर्त्तर्यात्मनेपदं स्यात् । श्रम

विनयते । कर्तृस्थेति किम् । चैत्रो मैत्रस्य मन्युं विनयति । अमूर्त्तेति किम् । गडुं विनयति । आप्येति किम् । बुद्ध्या विनयति ॥ ४० ॥

शदः शिति । ३ । ३ । ४१ ।

शिद्विषयाच्छदेः कर्त्तर्यात्मनेपदं स्यात् । शीयते । शितीति किम् । शत्स्यति ॥ ४१ ॥

म्रियतेरद्यतन्याशिषि च ।३।३।४२।

अतोऽद्यतन्याशीर्विषयाच्छिद्विषयाच्च कर्त्तर्यात्मनेपदं स्यात् । अमृत । मृषीष्ट । म्रियते । अद्यतन्याशिषिचेति किम् । ममार ॥ ४२ ॥

क्यङ्षो नवा । ३ । ३ । ४३ ।

क्यङ्षन्तात्कर्त्तर्यात्मनेपदं वा स्यात् । निद्रायति । निद्रायते ॥

द्युद्भ्योऽद्यतन्याम् । ३ । ३ । ४४ ।

द्युतादिभ्योऽद्यतनीविषये कर्त्तर्यात्मनेपदं वा स्यात् । व्यद्युतत् । व्यद्योतिष्ट । अरुचत् । अरोचिष्ट । अद्यतन्यामिति किम् । द्योतते ॥४४॥

वृद्भ्यः स्यसनोः । ३ । ३ । ४५ ।

वृदादेः पञ्चतः स्यादौ प्रत्यये सनि च विषये कर्त्तर्यात्मनेपदं वा स्यात् । वर्त्स्यति । वर्त्तिष्यते । विवृत्सति । विवर्त्तिषते । स्यसनोरिति किम् । वर्त्तते ॥ ४५ ॥

कृपः श्वस्तन्याम् । ३ । ३ । ४६ ।

कृपः श्वस्तनीविषये कर्त्तर्यात्मनेपदं वा स्यात् । कल्प्तासि । कल्पितासे ॥ ४६ ॥

क्रमोऽनुपसर्गात् । ३ । ३ । ४७ ।

अविद्यमानोपसर्गात्क्रमतेः कर्त्तर्यात्मनेपदं वा स्यात् । क्रमते । क्रामति । अनुपसर्गादिति किम् । अनुक्रामति ॥ ४७ ॥

वृत्तिसर्गतायने । ३ । ३ । ४८ ।

वृत्तिरप्रतिबन्धः, सर्ग उत्साहः, तायनं स्फीतता, एतद्वृत्तेः क्रमेः कर्त्तर्यात्मनेपदं स्यात् । शास्त्रेऽस्य क्रमते बुद्धिः । सूत्राय क्रमते । क्रमन्तेऽस्मिन्योगाः ॥ ४८ ॥

परोपात् । ३ । ३ । ४९ ।

आभ्यामेव परात् क्रमेर्वृत्त्याद्यर्थात्कर्त्तर्यात्मनेपदं स्यात् । पराक्रमते । उपक्रमते । परोपादिति किम् । अनुक्रामति । वृत्त्यादावित्येव । पराक्रामति ॥ ४९ ॥

वेः स्वार्थे । ३ । ३ । ५० ।

स्वार्थः पादविक्षेपस्तदर्थाद्विपूर्वात्क्रमेः कर्त्तर्यात्मनेपदं स्यात् । साधु विक्रमते गजः । स्वार्थइति किम् । गजेन विक्रामति ॥ ५० ॥

प्रोपादारम्भे । ३ । ३ । ५१ ।

आरम्भार्थात्प्रोपाभ्यां परात्क्रमेः कर्त्तर्यात्मनेपदं स्यात् । प्रक्रमते । उपक्रमते भोक्तुम् । आरम्भइति किम् । प्रक्रामति । यातीत्यर्थः ॥ ५१ ॥

आङो ज्योतिरुद्गमे । ३ । ३ । ५२ ।

आङः परात्क्रमेश्चन्द्राद्युद्गमार्थात्कर्त्तर्यात्मनेपदं स्यात् । आक्रमते चन्द्रः सूर्यो वा । ज्योतिरुद्गमइति किम् । आक्रामति बटुः कुतुपम् । धूम आक्रामति ॥ ५२ ॥

दागोऽस्वास्यप्रसारविकाशे । ३ । ३ । ५३ ।

स्वास्यप्रसारविकाशाभ्यामन्यार्थादाङ् पूर्वाद्दागः कर्त्तर्यात्मनेपदं स्यात् । विद्यामादत्ते । स्वास्यादिवर्जनं किम् । उष्ट्रो मुखं व्याददाति । कूलं व्याददाति ॥ ५३ ॥

नुप्रच्छः । ३ । ३ । ५४ ।

आङ्पूर्वान्नौतेः प्रच्छेश्च कर्त्तर्यात्मनेपदं स्यात् । आनुते शृगालः । आपृच्छते गुरून् ॥ ५४ ॥

गमेः क्षान्तौ । ३ । ३ । ५५ ।

कालहरणार्थाद्गमयतेराङ्पूर्वात्कर्त्तर्यात्मनेपदं स्यात् । आगमयते गुरुम् । कश्चित्कालं प्रतीक्षते । क्षान्ताविति किम् । विद्यामागमयति ॥

ह्वः स्पर्द्धे । ३ । ३ । ५६ ।

आङ्पूर्वात् ह्वयतेः स्पर्द्धे गम्ये कर्त्तर्यात्मनेपदं स्यात्। मल्लोमल्लमाह्वयते। स्पर्द्धइति किम् । गामाह्वयति ॥ ५६ ॥

सन्निवेः । ३ । ३ । ५७ ।

एभ्योह्वयतेः कर्त्तर्यात्मनेपदं स्यात् । संह्वयते । निह्वयते । विह्वयते॥ ५७॥

उपात् । ३ । ३ । ५८ ।

उपात् ह्वयतेः कर्त्तर्यात्मनेपदं स्यात् । उपह्वयते ॥ ५८ ॥

यमः स्वीकारे । ३ । ३ । ५९ ।

उपाद्यमेः स्वीकारार्थात्कर्त्तर्यात्मनेपदं स्यात् । कन्यामुपयच्छते । उपायंस्त महास्त्राणि । च्विनिर्देशइति किम् । शाटकानुपयच्छति ॥ ५९ ॥

देवार्चामैत्रीसङ्गमपथिकर्त्तृकमन्त्रकरणे स्थः । ३ । ३ । ६० ।

एतदर्थादुपपूर्वात्तिष्ठतेः कर्त्तर्यात्मनेपदं स्यात् । देवार्चा । जिनेन्द्रमुपतिष्ठते । मैत्री । रथिकानुपतिष्ठते । सङ्गमः । यमुनागंगामुपतिष्ठते । पन्थाः कर्त्ता यस्य तत्र । श्रुघ्नमुपतिष्ठते पन्थाः । मन्त्रः करणं यस्य । ऐन्द्र्या गार्हपत्यमुपतिष्ठते ॥ ६० ॥

वा लिप्सायाम् । ३ । ३ । ६१ ।

उपात्स्थोलिप्सायां गम्यमानायां कर्त्तर्यात्मनेपदं स्याद्वा । भिक्षुर्दातृकुलमुपतिष्ठते । उपतिष्ठति वा ॥ ६१ ॥

उदोऽनूर्द्ध्वेहे । ३ । ३ । ६२ ।

अनूर्द्ध्वा या चेष्टा तदर्थादुत्पूर्वात् स्थः कर्त्तर्यात्मनेपदं स्यात् । मुक्तावुत्तिष्ठते । अनूर्द्ध्वेति किम् । आसनादुत्तिष्ठति । ईहेति किम् । ग्रामाच्छतमुत्तिष्ठति ॥ ६२ ॥

संविप्रावात् । ३ । ३ । ६३ ।

एभ्यः परात् स्थः कर्त्तर्यात्मनेपदं स्यात् । संतिष्ठते । वितिष्ठते । प्रतिष्ठते । अवतिष्ठते ॥ ६३ ॥

ज्ञीप्सास्थेये । ३ । ३ । ६४ ।

ज्ञीप्सा आत्मप्रकाशनम् । स्थेयः सभ्यः। ज्ञीप्सायां स्थेयविषयार्थे च वर्त्तमानात् स्थः कर्त्तर्यात्मनेपदं स्यात् । तिष्ठते कन्या च्छात्रेभ्यः । त्वयि तिष्ठते विवादः ॥ ६४ ॥

प्रतिज्ञायाम् । ३ । ३ । ६५ ।

अभ्युपगमार्थात् स्थः कर्त्तर्यात्मनेपदं स्यात् । नित्यं शब्दमातिष्ठते॥६५॥

समोगिरः । ३ । ३ । ६६ ।

संपूर्वाद्गिरः प्रतिज्ञार्थात् कर्त्तर्यात्मनेपदं स्यात् । स्याद्वादं सङ्गिरते ॥ ६६ ॥

अवात् । ३ । ३ । ६७ ।

अवाद्गिरः कर्त्तर्यात्मनेपदं स्यात् । अवगिरते ॥ ६७ ॥

निह्नवे ज्ञः । ३ । ३ । ६८ ।

निह्नवोऽपलापस्तद्वृत्तेर्ज्ञः कर्त्तर्यात्मनेपदं स्यात्। शतमपजानीते ॥६८॥

संप्रतेरस्मृतौ । ३ । ३ । ६९ ।

स्मृतेरन्यार्थात्संप्रतिभ्यां परात् ज्ञः कर्त्तर्यात्मनेपदं स्यात्। शतं संजानीते । प्रतिजानीते । अस्मृताविति किम्। मातुः संजानाति ॥६९॥

अननोः सनः । ३ । ३ । ७० ।

सन्नन्ताज्ज्ञः कर्त्तर्यात्मनेपदं स्यात् नत्वनोः परात्। धर्म्मं जिज्ञासते । अननोरिति किम् । धर्म्ममनुजिज्ञासति ॥ ७० ॥

श्रुवोऽनाङ्प्रतेः । ३ । ३ । ७१ ।

सन्नन्ताच्छृणोतेः कर्त्तर्यात्मनेपदं स्यात् नत्वाङ्प्रतिभ्यां परात् । शुश्रूषते गुरून्। अनाङ्प्रतेरिति किम्। आशुश्रूषति । प्रतिशुश्रूषति ॥७१॥

स्मृदृशः । ३ । ३ । ७२ ।

आभ्यां सन्नन्ताभ्यां कर्त्तर्यात्मनेपदं स्यात्। सुस्मूर्षते। दिदृक्षते ॥७२॥

शकोजिज्ञासायाम् । ३ । ३ । ७३ ।

शकोज्ञानानुसंहितार्थात्सन्नन्तात्कर्त्तर्यात्मनेपदं स्यात्। विद्यां शिक्षते । जिज्ञासायामिति किम् । शिक्षति ॥ ७३ ॥

प्राग्वत् । ३ । ३ । ७४ ।

सनः पूर्वोयोधातुस्तस्मादिव सन्नन्तात्कर्त्तर्यात्मनेपदं स्यात्। शिशयिषते । अश्वेन संचिचरिषते ॥ ७४ ॥

आमः कृगः । ३ । ३ । ७५ ।

आमः परादनुप्रयुक्तात् कृग आम एव प्राग् योधातुस्तस्मादिव कर्त्तर्यात्मनेपदं स्यात्। भवति न भवति चेति विधिनिषेधावतिदिश्येते । ईहांचक्रे । बिभराञ्चकार । कृग इति किम् । ईक्षामास ॥७५॥

गन्धनावक्षेपसेवासाहसप्रतियत्न-प्रकथनोपयोगे। ३। ३। ७६।

एतदर्थात् कृगः कर्त्तर्यात्मनेपदं स्यात्। गन्धनं द्रोहेण परदोषोद्घटनम्। उत्कुरुते। अवक्षेपः कुत्सनम्। दुर्वृत्तानवकुरुते। सेवा। महामात्रानुपकुरुते। साहसमविमृश्यप्रवृत्तिः। परदारान् प्रकुरुते। प्रतियत्न गुणान्तराधानम्। एधोदकस्योपस्कुरुते। प्रकथनम्। जनापवादान् प्रकुरुते। उपयोगो धर्मादौ विनियोगः। शतं प्रकुरुते॥ ७६॥

अधेः प्रसहने। ३। ३। ७७।

अधेः परात्कृगः प्रसहनार्थात्कर्त्तर्यात्मनेपदं स्यात्। प्रसहनं पराभिभवः परेण पराजयो वा। तं ह्यधिचक्रे। प्रसहनइति किम्। तमधिकरोति॥ ७७॥

दीप्तिज्ञानयत्नविमत्युपसंभाषोपमन्त्रणे वदः। ३। ३। ७८।

एष्वर्थेषु गम्येषु वदः कर्त्तर्यात्मनेपदं स्यात्। दीप्तिर्भासनम्। वदते विद्वान् स्याद्वादे। ज्ञाने। वदते धीमांस्तत्वार्थे। यत्ने। तपसि वदते। नानामतिर्विमतिः। धर्म्मे विवदन्ते। उपसंभाष उसान्त्वनम्। कर्म्मकरानुपवदते। उपमन्त्रणं रहस्युपच्छन्दनम्। कुलभार्यामुपवदते॥७८॥

व्यक्तवाचां सहोक्तौ। ३। ३। ७९।

व्यक्तवाचो रूढ्या मनुष्यादयस्तेषां संभूयोच्चारणार्थाद्वदः कर्त्तर्यात्मनेपदं स्यात्। संप्रवदन्ते ग्राम्याः। व्यक्तवाचामिति किम्। संप्रवदन्ति शुकाः। सहोक्ताविति किम्। चैत्रेणोक्ते मैत्रो वदति॥ ७९॥

विवादे वा। ३। ३। ८०।

विरुद्धार्थोवादोविवादः, व्यक्तवाचां विवादरूपसहोक्त्यर्थाद्वदः कर्त्तर्यात्मनेपदं स्यात्। विप्रवदन्ते, विप्रवदन्ति वा मौहूर्त्ताः। विवाद इति किम्। संप्रवदन्ते वैयाकरणाः। सहोक्ताविवत्येव। मौहूर्त्तोमौहूर्त्तेन क्रमाद्विप्रवदति ॥ ८० ॥

अनोः कर्म्मण्यसति । ३ । ३ । ८१ ।

व्यक्तवाचामर्थे वर्त्तमानादनुपूर्वाद्वदः कर्म्मण्यसति कर्त्तर्यात्मनेपदं स्यात्। अनुवदते चैत्रोमैत्रस्य। कर्मण्यसतीति किम्। उक्तमनुवदति। व्यक्तवाचामित्येव। अनुवदति वीणा ॥ ८१ ॥

ज्ञः । ३ । ३ । ८२ ।

जानातेः कर्म्मण्यसति कर्त्तर्यात्मनेपदं स्यात्। सर्प्पिषोजानीते। कर्म्मण्यसतीत्येव। तैलं सर्प्पिषोजानाति ॥ ८२ ॥

उपात्स्थः । ३ । ३ । ८३ ।

अतः कर्म्मण्यसति कर्त्तर्यात्मनेपदं स्यात्। योगे योगे उपतिष्ठते। कर्मण्यसतीत्येव। राजानमुपतिष्ठति ॥ ८३ ॥

समोगम्मृच्छिप्रच्छिश्रुवित्स्वरत्यर्त्तिदृशः । ३ । ३ । ८४ ।

संपूर्वेभ्य एभ्यः कर्म्मण्यसति कर्त्तर्यात्मनेपदं स्यात्। सङ्गच्छते। समृच्छिष्यते। संपृच्छते। संशृणुते। संवित्ते। संस्वरते। समृच्छते। समियृते। संपश्यते। कर्मण्यसतीत्येव। सङ्गच्छति मैत्रम् ॥ ८४ ॥

वेः कृगः शब्दे चानाशे । ३ । ३ । ८५ ।

अनाशार्थाद्विपूर्वात्कृगः कर्म्मण्यसति शब्दे च कर्मणि कर्त्तर्यात्मनेपदं स्यात्। विकुर्वते सैन्धवाः। क्रोष्टा विकुरुते स्वरान्। शब्दे चेति किम्। विकरोति मृदम्। अनाशइति किम्। विकरोत्यध्यायम् ॥

आङोयमहनः स्वेऽङ्गे च । ३।३।८६।

आङः पराभ्यां यम्हन्भ्यां कर्मण्यसति कर्तुः स्वेऽङ्गे च कर्मणि कर्त्तर्यात्मनेपदं स्यात्। आयच्छते, आहते वा। स्वेऽङ्गे। अयच्छते, आहते वा पादम् । स्वेऽङ्गेचेति किम् । आयच्छति रज्जुम् ॥८६॥

व्युदस्तपः । ३ । ३ । ८७ ।

आभ्यां परात्तपेः कर्म्मण्यसति स्वेऽङ्गे च कर्म्मणि कर्त्तर्यात्मनेपदं स्यात् । वितपते । उत्तपते रविः । वितपते । उत्तपते पाणिम् ॥ ८७ ॥

अणिक्कर्म णिक्कर्तृकाणिगोऽस्मृतौ। ३। ३।८८।

अणिगवस्थायां यत्कर्म तदेव णिगवस्थायां कर्त्ता यस्य तस्मादणिगन्तादस्मृत्यर्थात्कर्त्तर्यात्मनेपदं स्यात् । आरोहयते हस्ती हस्तिपकान् । अणिगितीति किम् । आरोहयति हस्तिपकान्महामात्रः । आरोहयन्ति महामात्रेण हस्तिपकाः। गित्किम् । गणयते गणोगोपालकम् । कर्मेति किम् । दर्शयति प्रदीपो भृत्यान्। णिगिति किम् । लुनाति केदारं चैत्रः। लूयते केदारः स्वयमेव, तं प्रयुङ्क्ते लावयति केदारं चैत्रः। कर्त्तेति किम्। आरोहन्ति हस्तिनं हस्तिपकाः। तानारोहयति माहामात्रः। णिग इति किम् । आरोहन्ति हस्तिनं हस्तिपकाः। तानेनमारोहयते हस्तीत्यणिगि माभूत् । अस्मृताविति किम् । स्मरयति वनगुल्मः कोकिलम् ॥ ८८॥

प्रलम्भे गृधिवञ्चेः । ३ । ३ । ८९ ।

आभ्यां णिगन्ताभ्यां प्रलम्भनार्थाभ्यां कर्त्तर्यात्मनेपदं स्यात् । बटुं गर्द्धयते, वञ्चयते वा । प्रलम्भइति किम् । श्वानं गर्द्धयति ॥ ८९ ॥

लीङ्लिनोऽर्चाभिभवे चाचाकर्त्तर्य्यपि । ३ । ३ । ९० ।

आभ्यां णिगन्ताभ्यामर्चाभिभवप्रलम्भार्थाभ्यां कर्त्तर्यात्मनेपदं स्यादाच्चानयोरकर्त्तर्यपि। अर्चा। जटाभिरालापयते। अभिभवः। श्येनोवर्त्तिकामपलापयते। प्रलम्भः। कस्त्वामुल्लापयते। अकर्त्तर्यपीति किम्। जटाभिरालाप्यते जटिलेन॥ ९०॥

स्मिङः प्रयोक्तुः स्वार्थे। ३। ३। ९१।

प्रयोक्तृतोयः स्वार्थः स्मयस्तदर्थाण्णिगन्तात्स्मिङः कर्त्तर्यात्मनेपदं स्यादाच्चास्याकर्त्तर्यपि। जटिलोविस्मापयते। प्रयोक्तुः स्वार्थ इति किम्। रूपेण विस्मायपति। अकर्त्तर्यपीत्येव। विस्मापनम्॥ ९१॥

बिभेतेर्भीष् च। ३। ३। ९२।

प्रयोक्तृतः स्वार्थवृत्तेर्ण्यन्ताद्भियः कर्त्तर्यात्मनेपदं स्यादस्य च भीष् पक्षे आच्चाकर्त्तर्यपि। मुण्डोभीषयते, भापयते वा। प्रयोक्तुः स्वार्थ इत्यत्र। कुञ्चिकया भापयति। अकर्त्तर्यपीत्येव। भीषाभापनम्॥

मिथ्याकृगोऽभ्यासे। ३। ३। ९३।

मिथ्यायुक्तात्कृगोण्यन्तात्क्रियाभ्यासवृत्त्यर्थात्कर्त्तर्यात्मनेपदं स्यात्। पदं मिथ्या कारयते। मिथ्येति किम्। पदं साधु कारयति। अभ्यास-इति किम्। सकृत्पदं मिथ्या कारयति॥ ९३॥

परिमुहायमायसपाद्धेवदवसदमादरुचनृतः फलवति। ३। ३। ९४।

प्रधानफलवति कर्त्तरि एभ्योविवक्षितभ्योणिगन्तेभ्य आत्मनेपदं स्यात्। परिमोहयते चैत्रम्। आयामयते सर्पम्। आयासयते मैत्रम्। पाययते बटुम्। धापयते शिशुम्। वादयते बटुम्। वासयते पान्थम्। दमयते अश्वम्। आदयते चैत्रेण। रोचयते मैत्रम्। नर्त्तयते नटम्॥ ९४॥

ईगितः। ३। ३। ९५।

ईदितोगितश्च धातोः फलवति कर्त्तर्यात्मनेपदं स्यात् । यजते । कुरुते । फलवतीत्येव । यजन्ति । कुर्वन्ति ॥ ९५ ॥

ज्ञोऽनुपसर्गात् । ३ । ३ । ९६ ।

अतः फलवति कर्त्तर्यात्मनेपदं स्यात् । गां जानीते । फलवतीत्येव । परस्य गां जानाति ॥ ९६ ॥

वदोऽपात् । ३ । ३ । ९७ ।

अतः फलवति कर्त्तर्यात्मनेपदं स्यात् । एकान्तमपवदते । फलवतीत्येव । अपवदति परं स्वभावात् ॥ ९७ ॥

समुदाङोयमेरग्रन्थे । ३ । ३ । ९८ ।

एभ्यः परात् यमेरग्रन्थविषये फलवत्कर्तर्यात्मनेपदं स्यात् । संयच्छते व्रीहीन् । उद्यच्छते भारम् । आयच्छते भारम् । अग्रन्थ इति किम् । चिकित्सामुद्यच्छति । फलवतीत्येव । संयच्छति ॥ ९८ ॥

पदान्तरगम्ये वा । ३ । ३ । ९९ ।

प्रकान्तसूत्रपञ्चके यदात्मनेपदमुक्तं तत्पदान्तरगम्ये फलवत्कर्त्तरि वा स्यात् । स्वं शत्रुं परिमोहयते । परिमोहयति वा । स्वं यज्ञं यजते यजति वा । स्वां गां जानीते जानाति वा । स्वं शत्रुमपवदते, अपवदति वा । स्वान् व्रीहीन् संयच्छते, संयच्छति वा । ९९ ॥

शेषात्परस्मै । ३ । ३ । १०० ।

येभ्योधातुभ्यो येन विशेषेणात्मनेपदमुक्तं ततोऽन्यस्मात्कर्त्तरि परस्मैपदं स्यात् । भवति । अत्ति ॥ १०० ॥

परानोः कृगः । ३ । ३ । १०१ ।

परानुपूर्वात् कृगः कर्त्तरि परस्मैपदं स्यात् । परा करोति । अनुकरोति ॥ १०१ ॥

प्रत्यभ्यतेः क्षिपः । ३ । ३ । १०२ ।

एभ्यः परात् क्षिपेः कर्त्तरि परस्मैपदं स्यात् । प्रतिक्षिपति । अभिक्षिपति । अतिक्षिपति ॥ १०२ ॥

प्राद्वहः । ३ । ३ । १०३ ।

अतः कर्त्तरि परस्मैपदं स्यात् । प्रवहति ॥ १०३ ॥

परेर्मृषश्च । ३ । ३ । १०४ ।

परेः परान्मृषेर्वहेश्च कर्त्तरि परस्मैपदं स्यात् । परिमृष्यति । परिवहति ॥ १०४ ॥

व्याङ्परे रमः । ३ । ३ । १०५ ।

एभ्यः पराद्रमेः कर्त्तरि परस्मैपदं स्यात् । विरमति । आरमति । परिरमति ॥ १०५ ॥

वोपात् । ३ । ३ । १०६ ।

उपाद्रमेः कर्त्तरि परस्मैपदं वा स्यात् । भार्यामुपरमति । उपरमते वा ॥ १०६ ॥

अणिगि प्राणिकर्त्तृकानाप्याण्णिगः । ३ । ३ । १०७ ।

अणिगवस्थायां यः प्राणिकर्त्तृकोऽकर्मकश्च धातुस्तस्माण्णिगन्तात्कर्तरि परस्मैपदं स्यात् । आसयति चैत्रम् । अणिगीति किम् । स्वयमेवारोहयमाणं गजं प्रयुङ्क्ते आरोहयते । अणिगिति गकारः किम् । चेतयमानं प्रयुङ्क्ते चेतयति । प्राणिकर्त्तृकादिति किम् । शोषयते व्रीहीनातपः । अनाप्यादिति किम् । कटं कारयते ॥१०७॥

चल्याहारार्थेङ्बुधयुधप्रुद्रुस्रुनशजनः । ३ । ३ । १०८ ।

चल्याहारार्थेभ्य इङादिभ्यश्च णिगन्तेभ्यः कर्त्तरि परस्मैपदं स्यात् । चलयति । कम्पयति । भोजयति । आशयति चैत्रमन्नम् । सूत्रमध्यापयति शिष्यम् । बोधयति पद्मं रविः । योधयति काष्ठानि । प्रावयति राज्यम् । द्रावयत्ययः । स्रावयति तैलम् । नाशयति पापम् । जनयति पुण्यम् ॥ १०८॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनलघुवृत्तौ तृतीयस्याध्यायस्य तृतीयः पादः समाप्तः ।३।३।

अर्हम्

गुपौधूपविच्छिपणिपनेरायः । ३ । ४ । १ ।

एभ्यो धातुभ्यः स्वार्थे आयः स्यात् । गोपायति । धूपायति । विच्छायति । पणायति । पनायति ॥ १ ॥

कमेर्णिङ् । ३ । ४ । २ ।

कमेः स्वार्थे णिङ् स्यात् । कामयते ॥ २ ॥

ऋतेर्डीयः । ३ । ४ । ३ ।

ऋतेः स्वार्थे डीयः स्यात् । ऋतीयते ॥ ३ ॥

अशविते वा । ३ । ४ । ४ ।

गुपादिभ्योऽशविषये ते आयादयो वा स्युः । गोपायिता । गोप्ता । कामयिता । कमिता । ऋतीयिता । अर्तिता ॥ ४ ॥

गुप्तिजोगर्हाक्षान्तौ सन् । ३ । ४ । ५ ।

गुपोगर्हायां तिजः क्षान्तौ वर्त्तमानात् स्वार्थे सन् स्यात् । जुगुप्सते । तितिक्षते । गर्हाक्षान्त्याविति किम् । गोपनम् । तेजनम् ॥ ५ ॥

कितः संशयप्रतीकारे । ३ । ४ । ६ ।

कितः संशयप्रतीकारार्थात् स्वार्थे सन् स्यात् । विचिकित्सति मे मनः । व्याधिं चिकित्सति । शंसयप्रतीकारार्थ इति किम् । केतयति ॥ ६ ॥

शान्दान्मान्बधान्निशानार्जवविचारवैरूप्ये दीर्घश्चेतः । ३ । ४ । ७ ।

एभ्यो यथासङ्ख्यं निशानाद्यर्थेभ्यः स्वार्थे सन् स्यात् । दीर्घश्चैषां द्वित्वे पूर्वस्येतः । शीशांसति । दीदांसति । मीमांसते । बीभत्सते । अर्थोक्तिः किम् । अर्थान्तरे माभूत् । निशानम् । अवदानम् । मानयति । बाधयति ॥ ७ ॥

धातोः कण्ड्वादेर्यक् । ३ । ४ । ८ ।

एभ्योधातुभ्यः स्वार्थे यक् स्यात् । कण्डूयति । कण्डूयते । महीयते । धातोरिति किम् । कण्डूः ॥ ८ ॥

व्यञ्जनादेरेकस्वराद् भृशाभीक्ष्ण्ये यङ् वा । ३ । ४ । ९ ।

गुणक्रियाणामधिश्रयणादीनां क्रियान्तराव्यवधानेन साकल्येन संपत्तिः फलातिरेको वा भृशत्वं प्रधानक्रियाया विच्छेदादेः क्रियान्तराव्यधानेनावृत्तिराभीक्ष्ण्यं, तद्विशिष्टार्थवृत्तेर्धातोर्व्यञ्जनादेरेकस्वराद्यङ् वा स्यात् । पापच्यते । व्यञ्जनादेरिति किम् । भृशमीक्षते । एकस्वरादिति किम् । भृशं चकास्ति । वेति किम् । लुनीहि लुनीहीत्येवायं लुनातीत्यादि यथा स्यात् ॥ ९ ॥

अट्यर्त्तिसूत्रिमूत्रिसूच्यशूर्णोः । ३ । ४ । १० ।

एभ्योभृशाभीक्ष्ण्यार्थवृत्तिभ्योयङ् स्यात् । अटाट्यते । अरार्यते । सोसूत्र्यते । मोमूत्र्यते । सोसूच्यते । अशाश्यते । प्रोर्णोनूयते ॥१०॥

गत्यर्थात्कुटिले । ३ । ४ । ११ ।

व्यञ्जनादेरेकस्वराद् गत्यर्थात्कुटिल एवार्थे वर्त्तमानाद्धातोर्यङ् स्यात्। चङ्क्रम्यते । कुटिल इति किम् । भृशं क्रामति॥११॥

गृलुपसदचरजपजभदशदहोगर्ह्ये।३।४।१२।

गर्ह्यार्थेभ्य एव एभ्यो यङ् स्यात् । निजेगिल्यते । लोलुप्यते । सासद्यते। चञ्चूर्यते । जञ्जप्यते । जञ्जभ्यते । दन्दश्यते। दन्दह्यते । गर्ह्य इति किम्। साधु जपति । भृशं निगिरति ॥ १२ ॥

न गृणाशुभरुचः । ३ । ४ । १३ ।

एभ्यो यङ् न स्यात् । निन्द्यं गृणाति । भृशं शोभते । भृशं रोचते ॥ १३ ॥

बहुलं लुप् । ३ । ४ । १४ ।

यङोलुप् बहुलं स्यात् । बोभूयते । बोभवीति । बहुलवचनात् क्वचिन्न भवति । लोलूया । पोपूया ॥ १४ ॥

अचि । ३ । ४ । १५ ।

यङोचि परे लुप् स्यात् । चेच्यः । नेन्यः ॥ १५ ॥

नोतः । ३ । ४ । १६ ।

उदन्ताद्विहितस्य यङोऽचि परे लुब् न स्यात् । रोरूयः ॥१६॥

चुरादिभ्योणिच् । ३ । ४ । १७ ।

एभ्योधातुभ्यः स्वार्थे णिच् स्यात् । चोरयति । पदयति ॥ १७ ॥

युजादेर्नवा । ३ । ४ । १८ ।

एभ्यः स्वार्थे णिज्वा स्यात् । योजयति । योजति । साहयति । सहति ॥ १८ ॥

भूङःप्राप्तौ णिङ् । ३ । ४ । १९ ।

भुवः प्राप्त्यर्थाण्णिङ्वा स्यात् । भावयते । भवते । प्राप्ताविति किम् । भवति ॥ १९ ॥

प्रयोक्तृव्यापारे णिग् । ३ । ४ । २० ।

कुर्वन्तं यः प्रयुङ्क्ते तद्व्यापारे वाच्ये धातोर्णिग्वा स्यात् । कारयति । भिक्षा वासयति । राजानमागमयति । कंसं घातयति । पुष्येण चन्द्रं योजयति । उज्जयिन्याः प्रस्थितोमाहिष्मत्यां सूर्यमुद्गमयति ॥ २० ॥

तुमर्हादिच्छायां सन्नतत्सनः । ३ । ४ । २१ ।

योधातुरिषेः कर्मेषिणैव च समानकर्तृकः स तुमर्हस्तस्मादिच्छायामर्थे सन्वा स्यात् नत्विच्छासन्नन्तात् । चिकीर्षति । जिगमिषति । तुमर्हादिति किम् । यानेनेच्छति । भुक्तिमिच्छति मैत्रस्य । इच्छायामिति किम् । भोक्तुं याति । अतत्सन इति किम् । चिकीर्षतुमिच्छति । तदिति किम् । जुगुप्सिषते ॥ २१ ॥

द्वितीयायाः काम्यः । ३ । ४ । २२ ।

द्वितीयान्तादिच्छायां काम्यो वा स्यात् । इदं काम्यति । द्वितीयाया इति किम् । इष्टः पुत्रः ॥ २२ ॥

अमाव्ययात्क्यन्च । ३ । ४ । २३ ।

मान्ताव्ययाभ्यामन्यस्माद् द्वितीयान्तादिच्छायां क्यन् काम्यश्च वा

स्यात् । पुत्रीयति । पुत्रकाम्यति । अमाव्ययादिति किम् । इदमिच्छति । स्वरिच्छति ॥ २३ ॥

आधाराच्चोपमानादाचारे । ३ । ४ । २४ ।

अमाव्ययादुपमानाद् द्वितीयान्तादाधाराच्चाचारार्थे क्यन् वा स्यात् । पुत्रीयति च्छात्रम् । प्रासादीयति कुट्याम् ॥२४॥

कर्तुः क्विप् गल्भक्लीबहोडात्तु-डित् । ३ । ४ । २५ ।

कर्तुरुपमानान्नाम्न आचारार्थे क्विब्वा स्यात् । गल्भक्लीबहोडेभ्यस्तु स एव ङित् । अश्वति । गल्भते । क्लीबते । होडते ॥ २५ ॥

क्यङ् । ३ । ४ । २६ ।

कर्तुरुपमानादाचारेऽर्थे क्यङ् वा स्यात् । हंसायते ॥ २६ ॥

सो वा लुक्च । ३ । ४ । २७ ।

सन्तात् कर्तुरुपमानादाचारेऽर्थे क्यङ् वा स्यादन्तस्य च सो वा लुक् । पयायते । पयस्यते ॥ २७ ॥

ओजोऽप्सरसः । ३ । ४ । २८ ।

आभ्यां कर्तुरुपमानाभ्यामाचारे क्यङ् स्यात् सश्च लुक् । ओजायते । अप्सरायते ॥ २८ ॥

च्व्यर्थे भृशादेः स्तोः । ३ । ४ । २९ ।

भृशादेः कर्तुश्च्व्यर्थे क्यङ् वा स्यात् यथासम्भवं स्तोर्लुक्च । भृशायते । उन्मनायते । वेहायते । कर्तुरित्येव । अभृशम्भृशङ्करोति । च्व्यर्थ इति किम् । भृशोभवति ॥ २९ ॥

डाच् लोहितादिभ्यः षित् । ३ । ४ । ३० ।

डाजन्तेभ्यो लोहितादिभ्यश्च कर्तृभ्यश्च्व्यर्थे क्यङ् षित् स्यात् । पटपटायति । पटपटायते । लोहितायति । लोहितायते । कर्तुरित्येव । अपटपटा पटपटा करोति । च्व्यर्थ इत्येव । लोहितो भवति ॥ ३० ॥

कष्टकक्षकृच्छ्रसत्रगहनाय पापे क्रमणे । ३ । ४ । ३१ ।

एभ्यश्चतुर्थ्यन्तेभ्यः पापवृत्तिभ्यः क्रमणेऽर्थे क्यङ् स्यात् । कष्टायते । कक्षायते । कृच्छ्रायते । सत्रायते । गहनायते । चतुर्थीति किम् । रिपुः कष्टं क्रामति । पाप इति किम् । कष्टाय तपसे क्रामति ॥ ३१ ॥

रोमन्थाद्व्याप्यादुच्चर्वणे । ३ । ४ । ३२ ।

अभ्यवहृतं द्रव्यं रोमन्थ उद्गीर्य चर्वणमुच्चर्वणमस्मिन्नर्थे रोमन्थात्कर्मणः क्यङ् वा स्यात् । रोमन्थायते गौः । उच्चर्वण इति किम् । कीटो रोमन्थं वर्त्तयति ॥ ३२ ॥

फेनोष्मबाष्पधूमादुद्वमने । ३ । ४ । ३३ ।

एभ्यः कर्मभ्य उद्वमनेऽर्थे क्यङ् वा स्यात् । फेनायते । ऊष्मायते । बाष्पायते । धूमायते ॥ ३३ ॥

सुखादेरनुभवे । ३ । ४ । ३४ ।

साक्षात्कारेऽर्थे सुखादेः कर्म्मणः क्यङ् वा स्यात् । सुखायते । दुःखायते ॥ ३४ ॥

शब्दादेः कृतौ वा । ३ । ४ । ३५ ।

एभ्यः कर्मभ्यः कृतावर्थे क्यङ् वा स्यात् । शब्दायते । वैरायते । पक्षे णिङ् । शब्दयति । वैरयति ॥ ३५ ॥

तपसः क्यन् । ३ । ४ । ३६ ।

अस्मात्कर्मणः कृतावर्थे क्यन्वा स्यात् । तपस्यति ॥ ३६ ॥

नमोवरिवश्चित्रङोऽर्चासेवाश्चर्ये।३।४।३७।

एभ्यः कर्मभ्योयथासंख्यमर्चादिष्वर्थेषु क्यन्वा स्यात् । नमस्यति । वरिवस्यति । चित्रीयते ॥ ३७ ॥

अङ्गान्निरसने णिङ् । ३ । ४ । ३८ ।

अङ्गवाचिनः कर्मणोनिरसनेऽर्थे णिङ् वा स्यात् । हस्तयते । पादयते ॥ ३८ ॥

पुच्छादुत्परिव्यसने । ३ । ४ । ३९ ।

पुच्छात्कर्मण उदसने पर्यसने व्यसनेऽसने चार्थे णिङ् वा स्यात् । उत्पुच्छयते । परिपुच्छयते । विपुच्छयते । पुच्छयते ॥ ३९ ॥

भाण्डात्समाचितौ । ३ । ४ । ४० ।

भाण्डात्कर्मणः समाचितावर्थे णिङ् वा स्यात् । सम्भाण्डयते । परिभाण्डयते ॥ ४० ॥

चीवरात्परिधानार्जने । ३ । ४ । ४१ ।

अस्मात्कर्म्मणः परिधानेऽर्जने चार्थे णिङ् वा स्यात् । परिचीवरयते । संचीवरयते ॥ ४१ ॥

णिज्बहुलं नाम्नः कृगादिषु । ३ । ४ । ४२ ।

कृगादीनां धातूनामर्थे नाम्नोणिज्बहुलं स्यात् । मुण्डङ्करोति मुण्डयति छात्रम् । पटुमाचष्टे पटयति । वृक्षं रोपयति वृक्षयति । कृतं गृह्णाति कृतयति ॥ ४२ ॥

व्रताद्भुजितन्निवृत्त्योः । ३ । ४ । ४३ ।

व्रतं शास्त्रविहितोनियमः, व्रताद्भुज्यर्थात्तन्निवृत्त्यर्थाच्च भुजादिष्वर्थेषु णिज्बहुलं स्यात् । पयोव्रतयति । सावद्यान्नं व्रतयति ॥ ४३ ॥

सत्यार्थवेदस्याः । ३ । ४ । ४४ ।

एषां णिच्सन्नियोगे आः स्यात् । सत्यापयति । अर्थापयति । वेदापयति ॥ ४४ ॥

श्वेताश्वाश्वतरगालोडिताह्वरकस्याश्वतरेतकलुक् । ३ । ४ । ४५ ।

एषां णिज्योगे यथासङ्ख्यमश्वादेः शब्दस्य लुक् स्यात् । श्वेतयति । अश्वयति । गालोडयति ॥ आह्वरयति ॥ ४५ ॥

धातोरनेकस्वरादाम्परोक्षायाः कृभ्वस्तिचानुतदन्तम् । ३ । ४ । ४६ ।

अनेकस्वराद्धातोः परस्याः परोक्षायाः स्थाने आम् स्यात् आमन्ताच्च परे कृभ्वस्तयः परोक्षान्ता अनु पश्चादन्तरं प्रयुज्यन्ते । चकासाञ्चकार । चकासाम्बभूव । चकासामास । अनेकस्वरादिति किम् । पपाच । अनुविपर्यासव्यवहितिनिवृत्त्यर्थः । तेन चकार चकासाम् । ईहाञ्चैत्रश्चक्रे इत्यादि न स्यात् ॥ ४६ ॥

दयायास्कासः । ३ । ४ । ४७ ।

एभ्योधातुभ्यः परस्याः परोक्षाया आम् स्यात् आमन्ताच्च परे कृभ्वस्तयः परोक्षान्ताऽनुप्रयुज्यन्ते । दयाञ्चक्रे । दयाम्बभूव । दयामास । पलायाञ्चक्रे । आसाञ्चक्रे । कासाञ्चक्रे ॥ ४७ ॥

गुरुनाम्यादेरनृच्छूर्णोः । ३ । ४ । ४८ ।

गुरुर्नाम्यादिर्यस्य तस्माद्धातोः, ऋच्छूर्णुवर्जात्परस्याः परोक्षाया आम् स्यात् आमन्ताच्च परे कृभ्वस्तयः परोक्षान्ता अनुप्रयुज्यन्ते। ईहाञ्चक्रे। ईहाम्बभूव। ईहामास। गुर्विति किम्। इयेष। नामीति किम्। आनर्च्छ। आदीति किम्। निनाय। अनृच्छूर्णोरिति किम्। आनर्च्छ। प्रोर्णुनाव॥ ४८॥

जागुषसमिन्धेर्नवा। ३। ४। ४९।

एभ्यो धातुभ्यः परस्याः परोक्षाया आम् वा स्यात् आमन्ताच्च परे-कृभ्वस्तयः परोक्षान्ता अनुप्रयुज्यन्ते। जागराञ्चक्रे। जागराम्बभूव। जागरामास। जजागार। उषाञ्चकार। उवोष। समिन्धाञ्चक्रे। समीधे॥ ४९॥

भीह्रीभृहोस्तिव्वत्। ३। ४। ५०।

एभ्यः परस्याः परोक्षाया आम् वा स्यात् स च तिव्वत् आमन्ताच्च परे कृभ्वस्तयः परोक्षान्ता अनुप्रयुज्यन्ते। बिभयाञ्चकार। बिभयाम्बभूव। बिभयामास। बिभाय। जिह्रयाञ्चकार। जिह्राय। बिभराञ्चकार। बभार। जुहवाञ्चकार। जुहाव॥ ५०॥

वेत्तेः कित्। ३। ४। ५१।

वेत्तेः परस्याः परोक्षाया आम् किद्वा स्यात् आमन्ताच्च कृभ्वस्तयः परोक्षान्ता अनुप्रयुज्यन्ते। विदाञ्चकार। विवेद॥५१॥

पञ्चम्याः कृग्। ३। ४। ५२।

वेत्तेः परस्याः पञ्चम्याः किदाम्वा स्यात आमन्ताच्च परः पञ्चम्यन्तः कृगनुप्रयुज्यते। विदाङ्करोतु। वेत्तु॥ ५२॥

सिजद्यतन्याम्। ३। ४। ५३।

अद्यतन्यां परस्यां धातोः परः सिच् नित्यं स्यात्। अनैषीत्॥५३॥

स्पृशमृशकृषतृपदृपो वा । ३ । ४ । ५४ ।

एभ्योऽद्यतन्यां सिज् वा स्यात् । अस्प्राक्षीत् । अस्पार्क्षीत् । अस्पृक्षत् । अम्राक्षीत् । अमार्क्षीत् । अमृक्षत् । अक्राक्षीत् । अकार्क्षीत् । अकृक्षत् । अत्राप्सीत् । अतार्प्सीत् । अतृपत् । अद्राप्सीत् । अदार्प्सीत् । अदृपत् ॥ ५४ ॥

हशिटो नाम्युपान्त्याददृशोऽनिटः सक् । ३ । ४ । ५५ ।

हशिडन्तान्नाम्युपान्त्याददृशोऽनिटोऽद्यतन्यां सक् स्यात् । अधुक्षत् । अलिक्षत् । हशिट इति किम् । अभैत्सीत् । नाम्युपान्त्यादिति किम् । अधाक्षीत् । अदृश इति किम् । अद्राक्षीत् । अनिट इति किम् । अकोषीत् ॥ ५५ ॥

श्लिषः । ३ । ४ । ५६ ।

श्लिषोऽनिटोऽद्यतन्यां सक् स्यात् । आश्लिक्षत्कन्यां मैत्रः । अनिट इत्येव । अश्लेषीत् ॥ ५६ ॥

नासत्वाश्लेषे । ३ । ४ । ५७ ।

श्लिषोऽप्राण्याश्लेषार्थात्सक् न स्यात् । उपाश्लिषज्जतु च काष्ठं च । असत्वाश्लेष इति किम् । व्यत्यश्लिक्षन्त मिथुनानि ॥ ५७ ॥

णिश्रिद्रुस्रुकमः कर्त्तरि ङः । ३ । ४ । ५८ ।

ण्यन्ताच्छ्र्यादिभ्यश्च कर्त्तर्यद्यतन्यां ङः स्यात् । अचीकरत् । अशिश्रियत् । अदुद्रुवत् । असुस्रुवत् । अचकमत् । कर्त्तरीति किम् । अकारयिषातां कटौ मैत्रेण ॥ ५८ ॥

धेश्वेर्वा । ३ । ४ । ५९ ।

आभ्यां कर्त्तर्यद्यतन्यां ङोवा स्यात्। अदधत्। अधात्। अशिश्वियत्। अश्वत्। कर्त्तरीत्येव। अधिषातां गावौ वत्सेन ॥ ५९ ॥

शास्त्यऽसूवक्तिख्यातेरङ् ।३।४।६०।

एभ्यः कर्त्तर्यद्यतन्यामङ् स्यात्। आशिषत्। अपारथत्। अवोचत्। आख्यत्। कर्त्तरीत्येव। अशासिषातां शिष्यौ गुरुणा ॥ ६० ॥

सर्त्यर्त्तेर्वा । ३ । ४ । ६१ ।

आभ्यां कर्त्तर्यद्यतन्यामङ् वा स्यात्। असरत्। असार्षीत्। आरत्। आर्षीत् ॥ ६१ ॥

ह्वालिप्सिचः । ३ । ४ । ६२ ।

एभ्यः कर्त्तर्यद्यतन्यामङ् स्यात्। आह्वत्। अलिपत्। असिचत् ॥

वात्मने । ३ । ४ । ६३ ।

ह्वादेः कर्त्तर्यद्यतन्यामात्मनेपदे वाऽङ् स्यात्। आह्वत। आह्वास्त। अलिपत। अलिप्त। असिचत। असिक्त ॥ ६३ ॥

लृदिद्द्युतादिपुष्यादेः परस्मै ।३।४।६४।

लृदितो द्युतादेः पुष्यादेश्च कर्त्तर्यद्यतन्यां परस्मैपदेऽङ् स्यात्। अगमत्। अद्युतत्। अरुचत्। अपुषत्। औचत्। परस्मैपद इति किम्। समगंस्त ॥ ६४ ॥

ऋदिच्छ्विस्तम्भूम्रुचूम्लुचूग्रुचूग्लुचूग्लुंचूज्रो वा । ३ । ४ । ६५ ।

ऋदितः श्व्यादेश्च कर्त्तर्यद्यतन्यां परस्मैपदेऽङ् वा स्यात्। अरुधत्। अरौत्सीत्। अश्वत्। अश्वयीत्। अस्तभत्। अस्तम्भीत्। अम्रुचत्।

अम्रोचीत् । अम्लुचत् । अम्लोचीत् । अग्रुचत् । अग्रोचीत् । अग्लुचत् । अग्लोचीत् अग्लुञ्चत् । अग्लुञ्चीत् । अजरत् । अजारीत् ॥ ६५॥

ञिच् ते पदस्तलुक्च ।३।४।६६।

पद्यतेः कर्त्तर्यद्यतन्यास्ते परे ञिच् स्यान्निमित्ततस्य च लुक् । उदपादि । त इति किम् । उदपत्साताम् ॥ ६६ ॥

दीपजनबुधिपूरितायिप्यायोवा ।३।४।६७।

एभ्यः कर्त्तर्यद्यतन्यास्ते परे ञिज्वा स्यात्तलुक्च । अदीपि । अदीपिष्ट । अजनि । अजनिष्ट । अबोधि । अबुद्ध । अपूरि । अपूरिष्ट । अतायि । अतायिष्ट । अप्यायि । अप्यायिष्ट ॥ ६७ ॥

भावकर्मणोः । ३ । ४ । ६८ ।

सर्वस्माद्धातोर्भावकर्मविहितेऽद्यतन्यास्ते ञिच् स्यात्तलुक्च । आसि त्वया । अकारि कटः ॥ ६८ ॥

स्वरग्रहदृशहन्भ्यः स्यसिजाशीःस्वस्तन्यां ञिड् वा । ३ । ४ । ६९ ।

स्वरान्ताद् ग्रहादेश्च विहितासु भावकर्मजासु स्यसिजाशीःस्वस्तनीषु ञिड् वा स्यात् । दायिष्यते । दास्यते । अदायिषाताम् । अदिषाताम् । दायिषीष्ट । दासीष्ट । दायिता । दाता । ग्राहिष्यते । ग्रहीष्यते । अग्राहिषाताम् । अग्रहीषाताम् । ग्राहिषीष्ट । ग्रहीषीष्ट । ग्राहिता । ग्रहीता । दर्शिष्यते । द्रक्ष्यते । अदर्शिषाताम् । अदृक्षाताम् । दर्शिषीष्ट । दृक्षीष्ट । दर्शिता । द्रष्टा । घानिष्यते । हनिष्यते । अघानिषाताम् । अवधिषाताम् । घानिषीष्ट । वधिषीष्ट । घानिता । हन्ता ॥ ६९ ॥

क्यः शिति । ३ । ४ । ७० ।

सर्वस्माद्धातोर्भावकर्मविहिते शिति क्यः स्यात् । शय्यते त्वया । क्रियते कटः । शितीति किम् । बभूवे ॥ ७० ॥

कर्त्तर्यनद्भ्यः शव् । ३ । ४ । ७१ ।

अदादिवर्जाद्धातोः कर्त्तरि विहिते शिति शव् स्यात् । भवति । कर्त्तरीति किम् । पच्यते । अनद्भ्य इति किम् । अत्ति ॥ ७१ ॥

दिवादेः श्यः । ३ । ४ । ७२ ।

दिवादेः कर्तृविहिते शिति श्यः स्यात् । दीव्यति । जीर्यति ॥७२॥

भ्रासभ्लासभ्रमक्रमक्लमत्रसित्रुटिलषियसिसंयसेर्वा । ३ । ४ । ७३ ।

एभ्यः कर्त्तरि विहिते शिति श्योषा स्यात् । भ्रास्यते । भ्रासते । भ्लास्यते । भ्लासते । भ्राम्यति । भ्रमति । क्राम्यति । क्रामति । क्लाम्यति । क्लामति । त्रस्यति । त्रसति । त्रुट्यति । त्रुटति । लष्यति । लषति । यस्यति । यसति । संयस्यति । संयसति ॥ ७३ ॥

कुषिरञ्जेर्व्याप्ये वा परस्मै च ।३।४।७४।

आभ्यां व्याप्ये कर्त्तरि शिद्विषये परस्मैपदं वा स्यात्तद्योगे च श्यः । कुष्यति, कुष्यते वा पादः स्वयमेव । रज्यति रज्यते वा वस्त्रं स्वयमेव । व्याप्ये कर्त्तरीति किम् । कुष्णाति पादं रोगः । शितीत्येव । अकोषि ॥ ७४ ॥

स्वादेः श्नुः । ३ । ४ । ७५ ।

स्वादेः कर्तृविहिते शिति श्नुः स्यात् । सुनोति । सिनोति ॥ ७५ ॥

वाऽक्षः । ३ । ४ । ७६ ।

अक्षः कर्तृविहिते शिति श्नुर्वा स्यात् । अक्ष्णोति । अक्षति ॥७६॥

तक्षः स्वार्थे वा । ३ । ४ । ७७ ।

स्वार्थस्तनुत्वं तद्वृत्तेस्तक्षः कर्तृविहिते शिति श्नुर्वा स्यात् । तक्ष्णोति । तक्षति । स्वार्थ इति किम् । संतक्षति शिष्यम् ॥ ७७ ॥

स्तम्भूस्तुम्भूस्कम्भूस्कुम्भूस्कोः श्ना च । ३ । ४ । ७८ ।

स्तम्भ्वादेः सौत्राद्धातोः स्कुञश्च कर्तृविहिते शिति श्ना श्नुश्च स्यात् । स्तभ्नाति । स्तभ्नाति । स्तुभ्नाति । स्तुभ्नोति । स्कभ्नाति । स्कभ्नोति । स्कुभ्नाति । स्कुभ्नोति । स्कुनाति । स्कुनोति ॥ ७८ ॥

क्र्यादेः । ३ । ४ । ७९ ।

क्र्यादेः कर्तृविहिते शिति श्ना स्यात् । क्रीणाति । प्रीणाति ॥

व्यञ्जनाच्छ्नाहेरानः । ३ । ४ । ८० ।

व्यञ्जनात्परस्य श्नायुक्तस्य हेरानः स्यात् । पुषाण । मुषाण । व्यञ्जनादिति किम् । लुनीहि ॥ ८० ॥

तुदादेः शः । ३ । ४ । ८१ ।

एभ्यः कर्तृविहिते शिति शः स्यात् । तुदति । नुदति ॥ ८१ ॥

रुधां स्वराच्छ्नो नलुक्च । ३ । ४ । ८२ ।

रुधादीनां स्वरात्परः कर्तृविहिते शिति श्नः स्यात्तद्योगे प्रकृतेर्नो लुक् यथासम्भवम् । रुणद्धि । हिनस्ति ॥ ८२ ॥

कृगतनादेरुः । ३ । ४ । ८३ ।

कृगस्तनादिभ्यश्च कर्तृविहिते शिति उः स्यात् । करोति । तनोति ॥ ८३ ॥

सृजः श्राद्धे ञिक्यात्मने तथा।३।४।८४।

सृजः पराणि श्रद्धावति कर्त्तरि ञिक्यात्मनेपदानि स्युस्तथा यथा पूर्वं विहितानि। असर्जि। सृज्यते, स्रक्ष्यते वा मालां धार्मिकः। श्राद्ध-इति किम्। व्यत्यसृष्ट माले मिथुनम् ॥ ८४ ॥

तपेस्तपः कर्म्मकात्। ३। ४। ८५।

तपेस्तपःकर्मकात्कर्त्तरि ञिक्यात्मनेपदानि स्युस्तथा। तप्यते, तेपे वा तपः साधुः। तप इति किम्। उत्तपति स्वर्णं स्वर्णकारः। कर्मेति किम्। तपः साधुं तपति ॥ ८५ ॥

एकधातौ कर्मक्रिययैकाऽकर्म-क्रिये। ३। ४। ८६।

एकस्मिन्धातौ कर्म्मस्थक्रियया पूर्वदृष्टया एका अभिन्ना सम्प्रत्यकर्मिका क्रिया यस्य तस्मिन् कर्त्तरि कर्मकर्तृरूपे धातोर्ञिक्यात्मनेपदानि स्युः। अकारि। क्रियते, करिष्यते वा कटः स्वयमेव। एकधाताविति किम्। पचत्योदनञ्चैत्रः। सिध्यत्योदनः स्वयमेव। कर्मक्रिययेति किम्। साध्वासिश्छिनत्ति। एकक्रिय इति किम्। श्रवत्युदकं कुण्डिका। श्रवत्युदकं कुण्डिकायाः। अकर्म्मक्रिय इति किम्। भिद्यमानः कुशूलः। पात्राणि भिनत्ति ॥ ८६ ॥

पचिदुहेः।३।४।८७।

एकधातौ कर्मस्थक्रियया पूर्वदृष्टया अकर्मिकया सकर्मकया वा एकक्रिये कर्त्तरि कर्मकर्तृरूपे आभ्यां ञिक्यात्मनेपदानि स्युः। अपाचि, पच्यते, पक्ष्यते वा ओदनः स्वयमेव। अदोहि दुह्यते, धोक्ष्यते, वा गौः स्वयमेव। उदुम्बरः फलं प्रच्यते अपक्त वा स्वयमेव। दुग्धे, अदुग्ध वा पयो धोक्ष्यते गौः स्वयमेव ॥ ८७ ॥

न कर्मणा ञिच् । ३ । ४ । ८८ ।

पचिदुहिभ्यां कर्म्मणा योगे अनन्तरोक्ते कर्त्तरि ञिच् न स्यात् । अपक्तोदुम्बरः फलं स्वयमेव । अदुग्ध गौः पयः स्वयमेव । कर्मणेति किम् । अपाच्योदनः स्वयमेव । अनन्तरोक्त कर्त्तरीत्येव । अपाच्युदुम्बरः फलं वायुना ॥ ८८ ॥

रुधः । ३ । ४ । ८९ ।

रुधोऽनन्तरोक्ते कर्त्तरि ञिच् न स्यात् । अरुद्ध गौः स्वयमेव ॥

स्वरदुहोवा । ३ । ४ । ९० ।

स्वरान्ताद् दुहेश्चानन्तरोक्ते कर्त्तरि ञिज्वा स्यात् । अकृत, अकारि वा कटः स्वयमेव । अदुग्ध अदोहि वा गौः स्वयमेव ॥ ९० ॥

तपः कर्त्रनुतापे च । ३ । ४ । ९१ ।

तपेः कर्मकर्त्तरि कर्त्तर्यनुतापे चार्थे ञिच् न स्यात् । अन्ववातप्त कितवः स्वयमेव । अतप्त तपांसि साधुः । अन्वतप्त चैत्रेण । अन्ववातप्त पापः स्वकर्म्मणा । कर्त्रनुतापेचेति किम् । अतापि पृथिवी राज्ञा॥९१॥

णिस्नुश्र्यात्मनेपदाकर्म्मकात् ।३।४।९२।

ण्यन्तात् स्नुश्रिभ्यामात्मनेपदविधायकर्मकेभ्यश्च कर्म्मकर्त्तरि ञिच् न स्यात् । अपीपचदोदनं चैत्रेण मैत्रः । अपीपचतौदनः स्वयमेव । प्रास्नोष्ट गौः स्वयमेव । उदशिश्रियत दण्डः स्वयमेव । व्यकृत सैन्धवः स्वयमेव ॥ ९२ ॥

भूषार्थसन्किरादिभ्यश्च ञिक्यौ ।३।४।९३।

भूषार्थेभ्यः सन्नन्तेभ्यः किरादिभ्योण्यादिभ्यश्च कर्म्मकर्त्तरि ञिक्यौ न स्याताम् । अलमकृत कन्या स्वयमेव । अलंकुरुते कन्या स्वयमेव ।

सन् । अचिकीर्षिष्ट, चिकीर्षते वा कटः स्वयमेव । किरादिः । अकीर्ष्ट, किरते वा पांशुः स्वयमेव । अगीर्ष्ट, गिरते वा ग्रासः स्वयमेव । णि । कारयते कटः स्वयमेव । चोरयते गौः स्वयमेव । प्रस्नुते गौः स्वयमेव । श्रि । उच्छ्रयते दण्डः स्वयमेव । आत्मनेपदाकर्मकात् । विकुर्वते सैन्धवाः स्वयमेव ॥ ९३ ॥

करणक्रियया क्वचित् । ३ । ४ । ९४ ।

एकधातौ पूर्वदृष्टया करणस्थया क्रियया एकाकर्मक्रिये कर्त्तरि ञिक्यात्मनेपदानि स्युः क्वचित् । परिवारयन्ते कण्टका वृक्षं स्वयमेव । क्वचिदिति किम् । साध्वसिश्छिनत्ति ॥ ९४ ॥

इत्याचार्यहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनलघुवृत्तौ तृतीयोऽध्यायः समाप्तः ॥

अर्हम्

द्विर्धातुः परोक्षाङे प्राक्तु स्वरे स्वरविधेः । ४ । १ । १ ।

परोक्षायां ङे च परे धातुर्द्विः स्यात् स्वरादौ तु द्वित्वनिमित्ते स्वरस्य कार्यात् प्रागेव । पपाच । अचकमत । धातुरिति किम् । प्राशिश्रियत् । प्रागिति किम् । चक्रतुः । स्वर इति किम् । जेघ्रीयते । स्वरविधेरिति किम् । शुशाव । प्राक्तु स्वरे स्वरविधेरित्यादिर्द्विर्वचनाधिकारः॥१॥

आद्योऽश एकस्वरः । ४ । १ । २ ।

अनेकस्वरस्य धातोराद्यएकस्वरोऽवयवः परोक्षा ङेपरे द्विः स्यात् । जजागार । अचीकाणत् । अचकाणत् । अचीकरत् ॥ २ ॥

सन्यङश्च । ४ । १ । ३ ।

सन्नन्तस्य यङन्तस्य चाद्यएकस्वरोंऽशो द्विः स्यात् । तितिक्षते । पापच्यते ॥ ३ ॥

स्वरादेर्द्वितीयः । ४ । १ । ४ ।

स्वरादेर्द्वशक्तिभाजो द्वितीयोंऽश एकस्वरो द्विः स्यात् । अटिटिषति । अशाश्यत । प्राक्तुस्वरे स्वरविधेरित्येव । आटिटत् ॥ ४ ॥

न बदनं संयोगादिः । ४ । १ । ५ ।

स्वरादेर्धातोर्द्वितीयस्यांशस्यैकस्वरस्य बदनाः संयोगस्याद्या न द्विः स्युः । उब्जिजिषति । अड्डिटिषति । उन्दिदिषति । संयोगादिरिति किम् । प्राणिणिषति ॥ ५ ॥

अयिरः । ४ । १ । ६ ।

स्वरादेर्धातोर्द्वितीयस्यांशस्यैकस्वरस्य संयोगादीरो द्विर्न स्यात् नतु रादनन्तरे यि । अर्चिचिषति । अयीति किम् । अरार्यते ॥ ६ ॥

नाम्नोद्वितीयाद्यथेष्टम् । ४ । १ । ७ ।

स्वरादेर्नामधातोर्द्वित्वभाजो द्वितीयादारभ्यैकस्वरोंऽशोयथेष्टं द्विः स्यात् । अशिश्वीयिषति । अश्वीयियिषति । अश्वीयिषिषति ॥ ७ ॥

अन्यस्य । ४ । १ । ८ ।

स्वरादेर्नामधातोरन्यस्य द्वित्वभाज एकस्वरोंशोयथेष्टं प्रथमादिर्द्विः स्यात् । पुपुत्रीयिषति । पुतित्रीयिषति । पुत्रीयियिषति । पुत्रीयिषिषति ॥ ८ ॥

कण्ड्वादेस्तृतीयः । ४ । १ । ९ ।

कण्ड्वादेर्द्वित्वभाज एकस्वरोंऽशस्तृतीया एवद्विः स्यात् । कण्डूयियिषति । असूयियिषति ॥ ९ ॥

पुनरेकेषाम् । ४ । १ । १० ।

एकेषां मते द्वित्वे कृते पुनर्द्वित्वं स्यात् । सुसोषुपिषते । एकेषामिति किम् । सोषुपिषते ॥ १० ॥

यिः सन्वेर्ष्यः । ४ । १ । ११ ।

ईर्ष्योद्वित्वभाजोयिः सन् वा द्विः स्यात् । ईर्ष्यियिषति । ईर्ष्यिषिषति ॥ ११ ॥

ह्वः शिति । ४ । १ । १२ ।

जुहोत्यादयः शिति द्विः स्युः । जुहोति ॥ १२ ॥

चराचरचलाचलपतापतवदावदघनाघनपाटूपटं वा । ४ । १ । १३ ।

एते ऽचि कृतद्वित्वादयोवा निपात्यन्ते । चराचरः । चलाचलः । पतापतः । वदावदः । घनाघनः । पाटूपटः । पक्षे । चरः । चलः । पतः । वदः । हनः । पटः ॥ १३ ॥

चिक्लिदचक्नसम् । ४ । १ । १४ ।

एतौ केऽचि च कृतद्वित्वौ निपात्येते । चिक्लिदः । चक्नसः ॥ १४ ॥

दास्वत्साह्वन्मीढ्वत् । ४ । १ । १५ ।

एते क्वसावद्वित्वादयोनिपात्यन्ते । दास्वांसौ । साह्वांसौ । मीढ्वांसौ ॥ १५ ॥

ज्ञप्यापोर्ज्ञीपीप् न च द्विः सिसनि । ४ । १ । १६ ।

ज्ञपेरापेश्च सादौ सनि परे यथासंख्यं ज्ञीपीपौ स्यातां नचाऽनयोरेकस्वरोंऽशोद्विः स्यात् । ज्ञीप्सति । ईप्सति । सीति किम् । जिज्ञपयिषति ॥ १६ ॥

ऋध ईर्त् । ४ । १ ।१७ ।

ऋधः सादौ सनि परे ईर्त्स्यात् न चास्य द्विः । ईर्त्सति । सीत्येव । अर्दिधिषति ॥ १७ ॥

दम्भोधिप्धीप् । ४ । १ । १८ ।

दम्भेः सि सनि धिप्धीपौ स्यातां नचास्य द्विः । धिप्सति । धीप्सति । सीत्येव । दिदंभिषति ॥ १८ ॥

अव्याप्यस्य मुचेर्मोग्वा । ४ । १ । १९ ।

मुचेरकर्म्मणः सि सनि मोग्वा स्यान्नचास्य द्विः । मोक्षति । मुमुक्षति चैत्रः । अव्याप्यस्येति किम् । मुमुक्षति वत्सम् ॥ १९ ॥

मिमीमादामित्स्वरस्य । ४ । १ । २० ।

मिमीमादासंज्ञानां स्वरस्य सिसनीत्स्यान्नच द्विः । मित्सति । मित्सते । मित्सते । दित्सति । धित्सति ॥ २० ॥

रभलभशकपतपदामिः ।४।१ । २१ ।

एषां स्वरस्य सि सनि इःस्यान्नच द्विः । आरिप्सते । लिप्सते । शिक्षति । पित्सति । पित्सते । सीत्येव । पिपतिषति ॥ २१ ॥

राधेर्वधे । ४ । १ । २२ ।

राधेर्हिंसार्थस्य सि सनि स्वरस्य इः स्यान्नचद्विः । प्रतिरित्सति । वधइति किम् । आरिरात्सति ॥ २२ ॥

अवित्परोक्षासेट्थवोरेः । ४ । १ । २३ ।

राधेर्हिंसार्थस्यावित्ति परोक्षायां थवि च सेटि स्वरस्य एः स्यान्नच द्विः । रेधुः । रेधिथ । अविदिति किम् । अपरराध । वध इत्येव । आरराधतुः ॥ २३ ॥

अनादेशादेरेकव्यञ्जनमध्येऽतः।४।१।२४।

अवित्परोक्षासेट्थवोः परयोर्योऽनादेशादिस्तत्सम्बन्धिनः स्वरस्यातोऽसहायव्यञ्जनयोर्मध्यगतस्यैः स्यान्नचाद्विः । पेचुः । पेचिथ । नेमुः। नेमिथ । अनादेशादेरिति किम् । बभणतुः। एकव्यञ्जनमध्य इति किम् । ततक्षिथ । अत इति किम् । दिदिवतुः । सेट्थवीत्येव । पपक्थ ॥ २४ ॥

तॄत्रपफलभजाम्।४।१।२५।

एषामवित्परोक्षासेट्थवोः स्वरस्यैः स्यान्नचाद्विः । तेरुः । तेरिथ। त्रेपे । फेलुः । फेलिथ । भेजुः। भेजिथ ॥ २५ ॥

जॄभ्रमवमत्रसफणस्यमस्वनराजभ्राज-भ्रासभ्लासोवा।४।१।२६।

एषां स्वरस्याऽवित्परोक्षासेट्थवोरेर्वा स्यान्नद्विः । जेरुः । जजरुः । जेरिथ । जजरिथ । भ्रेमुः । बभ्रमुः । भ्रेमिथ । बभ्रमिथ । वेमुः। ववमुः । वेमिथ । ववमिथ । त्रेसुः । तत्रसुः । त्रेसिथ । तत्रसिथ । फेणुः । पफणुः । फेणिथ । पफणिथ । स्येमुः । सस्यमुः । स्येमिथ । सस्यमिथ । स्वेनुः । सस्वनुः ।स्वेनिथ । सस्वनिथ।रेजुः।रराजुः। रेजिथ। रराजिथ । भ्रेजे । बभ्राजे । भ्रेसे । बभ्रासे । भ्लेसे । बभ्लासे॥ २६ ॥

वा श्रन्थग्रन्थोन लुक् च।४।१।२७।

अनयोः स्वरस्यावित्परोक्षासेट्थवोरेर्वा स्यात्तद्योगे च नोलुङ् नचाद्विः ।श्रेथुः। शश्रन्थुः। श्रेथिथ ।शश्रन्थिथ। ग्रेथुः। जग्रन्थुः। ग्रेथिथ। जग्रन्थिथ ॥ २७ ॥

दम्भः ।४।१।२८।

दम्भेः स्वरस्यावित्परोक्षायामेः स्यात् नचाद्विस्तद्योगे च नोलुक् । देभुः ॥ २८ ॥

थे वा । ४ । १ । २९ ।

दम्भेः स्वरस्य थव्येर्वा स्यात्तद्योगे च नोलुङ् नचाद्विः । देभिथ । ददम्भिथ ॥ २९ ॥

नशसददिवादिगुणिनः । ४ । १ । ३० ।

शसिदद्योर्वादीनां गुणिनां च स्वरस्यैर्न स्यात् । विशशसुः । विशशसिथ । दददे । ववले । विशशरुः । विशशरिथ ॥ ३० ॥

हौ दः । ४ । १ । ३१ ।

दासंज्ञस्य हौ परे, एः स्यान्नचाद्विः । देहि । धेहि ॥ ३१ ॥

देर्दिगिः परोक्षायाम् । ४ । १ । ३२ ।

देङः परोक्षायां दिगिः स्यान्नचाद्विः । दिग्ये ॥ ३२ ॥

ङे पिबः पीप्य् । ४ । १ । ३३ ।

ण्यन्तस्य पिबतेर्ङे परे पीप्य् स्यात् नचाद्विः । अपीप्यत् ॥ ३३ ॥

अङे हिहनोर्होघः पूर्वात् । ४ । १ । ३४ ।

हिहनोर्ङवर्जे प्रत्यये परे द्वित्वे सति पूर्वस्मात्परस्य होघः स्यात् । प्रजिघाय । जंघन्यते । अङ इति किम् । प्राजीहयत् ॥ ३४ ॥

जेर्गिः सन्परोक्षयोः । ४ । १ । ३५ ।

सन्परोक्षयोर्द्वित्वे सति पूर्वात्परस्य जेर्गिः स्यात् । जिगीषति । विजिग्ये ॥ ३५ ॥

चेः किर्वा । ४ । १ । ३६ ।

सन्परोक्षयोर्द्वित्वे सति पूर्वस्मात्परस्य चेः किर्वा स्यात्। चिकीषति। चिचीषति। चिक्ये। चिच्ये॥ ३६॥

पूर्वस्यास्वे स्वरे य्वोरियुव्।४।१।३७।

द्वित्वे सति यः पूर्वस्तत्सम्बन्धिनोरिवर्णोवर्णयोरस्वे स्वरे परे इयुवौ स्यातास्। इयेष। अरियर्त्ति। उवोष। अस्व इति किम्।ईषतुः। स्वर इति किम्। इयाज॥ ३७॥

ऋतोऽत्।४।१।३८।

द्वित्वे सति पूर्वस्य ऋतोऽत् स्यात्। चकार॥ ३८॥

ह्रस्वः।४।१।३९।

द्वित्वे सति पूर्वस्य ह्रस्वः स्यात्। पपौ ३९॥

गहोर्जः।४।१।४०।

द्वित्वे सति पूर्वयोर्गहोर्जः स्यात्। जगाम। जहास॥ ४०॥

द्युतेरिः।४।१।४१।

द्युतेर्द्वित्वे सति पूर्वस्य, इः स्यात्। दिद्युते॥ ४१॥

द्वितीयतुर्ययोः पूर्वौ।४।१।४२।

द्वित्वे पूर्वयोर्द्वितीयतुर्ययोर्यथासङ्ख्यं पूर्वावाद्यतृतीयौ स्याताम्। चखान। जझाम॥ ४२॥

तिर्वाष्ठिवः।४।१।४३।

ष्ठिवेर्द्वित्वे सति पूर्वस्य तिर्वा स्यात्। तिष्ठेव। टिष्ठेव॥ ४३॥

व्यञ्जनस्याऽनादेर्लुक्।४।१।४४।

द्वित्वे पूर्वस्य व्यञ्जनस्यानादेर्लुक् स्यात्। जग्ले। अनादेरिति किम्। आदेर्माभूत्। पपाच॥ ४४॥

अघोषे शिटः । ४ । १ । ४५ ।

द्वित्वे पूर्वस्य शिटस्तत्सम्बन्धिन्येवाऽघोषे लुक् स्यात् । चुश्च्योत । अघोष इति किम् । सस्नौ ॥ ४५ ॥

कङश्चञ् । ४ । १ । ४६ ।

द्वित्वे पूर्वयोः कङोर्यथासङ्ख्यं चञौ स्यातास् । चकार । ञुङुवे ॥

नकवतेर्यङः । ४ । १ । ४७ ।

यङन्तस्य कवतेर्द्वित्वे सति पूर्वस्य कश्चो न स्यात् । कोकूयते खरः । कवतेरिति किम् । कौतिकुवत्योर्माभूत् । चोकूयते । यङ इति किम् । चुकुवे ॥४७॥

आगुणावन्यादेः । ४ । १ । ४८ ।

यङन्तस्य द्वित्वे पूर्वस्य न्याद्यागमवर्जस्य आगुणौ स्याताम् । पापच्यते । लोलूयते । अन्यादेरिति किम् । वनीवच्यते । जञ्जप्यते । यंयम्यते ॥ ४८ ॥

नहाकोर्लुपि । ४ । १ । ४९ ।

हाकोर्द्विर्त्वे पूर्वस्य यङोलुप्या न स्यात् । जहेति ॥ ४९ ॥

वञ्चस्रंसध्वंसभ्रंसकसपतपदस्कन्दोऽन्तो-नीः । ४ । १ । ५० ।

एषां यङन्तानां द्वित्वे पूर्वस्य नीरन्तः स्यात् । वनीवच्यते । सनीस्रस्यते । दनीध्वस्यते । वनीभ्रस्यते । चनीकस्यते । पनीपत्यते । पनीपद्यते । चनीस्कद्यते ॥ ५० ॥

मुरतोऽनुनासिकस्य । ४ । १ । ५१ ।

आत्परो योऽनुनासिकस्तदन्तस्य यङन्तस्य द्वित्वे पूर्वस्य मुरन्तः स्यात् । बम्भण्यते । अत इति किम् । तेतिम्यते । अनुनासिकस्येति किम् । पापच्यते ॥ ५१ ॥

जपजभदहदशभञ्जपशः।४।१।५२।

एषां यङन्तानां द्वित्वे पूर्वस्य मुरन्तः स्यात् । जञ्जप्यते । जञ्जभ्यते । दन्दह्यते । दन्दश्यते । बम्भज्यते । पम्पश्यते ॥ ५२ ॥

चरफलाम् । ४ । १ । ५३ ।

एषां यङन्तानां द्वित्वे पूर्वस्य मुरन्तः स्यात् । चञ्चूर्यते । पम्फुल्यते ॥ ५३ ॥

तिचोपान्त्यातोऽनोदुः । ४ । १ । ५४ ।

यङन्तानां चरफलां तादौ च प्रत्यये उपान्त्यस्यात उः स्यान्न च तस्यौत् । चञ्चूर्यते । पम्फुल्यते । चूर्त्तिः । प्रफुल्तिः । अत इति किम् । चञ्चार्यते । फम्फाल्यते । अनादिति किम् । चंचूर्त्तिः । पम्फुल्तिः ॥५४॥

ऋमतां रीः । ४ । १ । ५५ ।

ऋमतां यङन्तानां द्वित्वे पूर्वस्य रीरन्तः स्यात् । नरीनृत्यते ॥५५॥

रिरौ च लुपि । ४ । १ । ५६ ।

ऋमतां यङोलुपि द्वित्वे पूर्वस्य रिरौ रीश्चान्तः स्यात् । चरिकर्त्ति । चर्कर्त्ति । चरीकर्त्ति ॥ ५६ ॥

निजां शित्येत् । ४ । १ । ५७ ।

निजिविजिविषां शिति द्वित्वे पूर्वस्यैत्स्यात् । नेनेक्ति । वेवेक्ति । वेवेष्टि । शितीति किम् । निनेज ॥ ५७ ॥

पृभृमाहाङामिः । ४ । १ । ५८ ।

एषां शिति द्वित्वे पूर्वस्य, इः स्यात् । पिपर्त्ति । इयर्त्ति । बिभर्त्ति । मिमीते । जिहीते । हाङिति किम् । जहाति । शितीत्येव । पपार ॥५८॥

सन्यस्य । ४ । १ । ५९ ।

द्वित्वे पूर्वस्यातः सनि परे, इः स्यात् । पिपक्षति । अस्येति किम् । पापचिषते ॥ ५९ ॥

उर्जान्तस्थापवर्गेऽवर्णे ।४।१।६०।

द्वित्वे पूर्वस्योतोऽवर्णान्ते जान्तस्थापवर्गे परे सनि इः स्यात् । जिजविषति । जिजावयिषति । यियविषति । यियावयिषति । रिरावयिषति । लिलावयिषति । पिपविषते । पिपावयिषते । बिभावयिषते । जान्तस्थापवर्ग इति किम् । जुहावयिषति । अवर्ण इति किम् । बुभूषति ॥ ६० ॥

श्रुस्रुद्रुप्रुप्लुच्योर्वा । ४ । १ । ६१ ।

एषां सनि द्वित्वे पूर्वस्योतोऽवर्णान्तायामन्तस्थायां परस्यामिर्वा स्यात् । शिश्रावयिषति । शुश्रावयिषति । सिस्रावयिषति । सुस्रावयिषति । दिद्रावयिषति । दुद्रावयिषति । पिप्रावयिषति । पुप्रावयिषति । पिप्लावयिषति । पुप्लावयिषति । चिच्यावयिषति । चुच्यावयिषति ॥ ६१ ॥

स्वपोणावुः । ४ । १ । ६२ ।

स्वपेर्णौ सति द्वित्वे पूर्वस्योत्स्यात् । सुष्वापयिषति । णाविति किम् । सिष्वापकीयिषति । स्वपोणाविति किम् । स्वापं चिकीर्षति । सिष्वापयिषति । स्वपोणौ सति द्वित्व इति किम् । सोषोपयिषति ॥ ६२ ॥

असमानलोपे सन्वल्लघुनि ङे।४।१।६३।

नविद्यते समानस्य लोपोयस्मिंस्तस्मिन् ङपरे णौ द्वित्वे पूर्वस्य लघुनि धात्वक्षरे परे सनीव कार्यं स्यात् । अचीकरत् । अजीजवत् । अशि-

श्रवत् । लघुनीति किम् । अततक्षत् । णावित्येव । अचकमत् । असमानलोप इति किम् । अचकथत् ॥ ६३ ॥

लघोर्दीर्घोऽस्वरादेः । ४ । १ । ६४ ।

अस्वरादेरसमानलोपे ङपरे णौ द्वित्वे पूर्वस्य लघोर्लघुनि धात्वक्षरे परे दीर्घः स्यात् । अचीकरत् । लघोरिति किम् । अचिक्कणत् । अस्वरादेरिति किम् । औण्र्णुनवत् ॥ ६४ ॥

स्मृदृत्वरप्रथम्रदस्तृस्पशेरः ।४।१।६५।

एषामसमानलोपे ङपरे णौ द्वित्वे पूर्वस्यात्स्यात् । असस्मरत् । अददरत् । अतत्वरत् । अपप्रथत् । अमम्रदत् । अतस्तरत् । अपस्पशत्॥

वा वेष्टचेष्टः । ४ । १ । ६६ ।

अनयोरसमानलोपे ङपरे णौ द्वित्वे पूर्वस्याद्वा स्यात् । अववेष्टत् । अविवेष्टत् । अचचेष्टत् । अचिचेष्टत् ॥ ६६ ॥

ईचगणः ।४। १ । ६७।

गणेर्ङपरे णौ द्वित्वे पूर्वस्य ईश्च स्यात् । अजीगणत् । अजगणत् ।

अस्यादेराःपरोक्षायाम् । ४ । १ । ६८ ।

अस्यां द्वित्वे पूर्वस्यादेरत आः स्यात् । आदुः । आरतुः । अस्येति किम् । ईयुः । आदेरिति किम् । पपाच ॥ ६८ ॥

अनातोनश्चान्तऋदाद्यशौ संयोगस्य ।४।१।६९।

ऋदादेरश्नोतेः संयोगान्तस्य च परोक्षायां द्वित्वे पूर्वस्यादेरात्स्थानादन्यस्यास्य, आः स्यात् कृतातोनोऽन्तश्च । आनृधुः । आनशे । आनञ्ज । ऋदादीति किम् । आर । अनात इति किम् । आत्थ ॥६९॥

भूस्वपोरदुतौ । ४ । १ । ७० ।

भूस्वपोः परोक्षायां द्वित्वे पूर्वस्य यथासंख्यमदुतौ स्याताम् । बभूव । सुष्वाप ॥ ७० ॥

ज्याव्येव्यधिव्यचिव्यथेरिः । ४ । १ । ७१ ।

एषां परोक्षायां द्वित्वे पूर्वस्य इः स्यात् । जिज्यौ । संविव्याय । विव्याध । विव्याच । विव्यथे ॥ ७१ ॥

यजादिवश्वचः सस्वरान्तस्था-य्वृत् । ४ । १ । ७२ ।

यजादेर्वश्वचोश्च परोक्षायां द्वित्वे पूर्वस्य सस्वरान्तस्था इउऋरूपा प्रत्यासत्त्या स्यात् । इयाज । उवाय । उवाश । उवाच ॥ ७२ ॥

न वयोय् । ४ । १ । ७३ ।

वेगोवयोय् परोक्षायां य्वृन्न स्यात् । ऊयुः ॥ ७३ ॥

वेरयः । ४ । १ । ७४ ।

वेगोऽयन्तस्य पूर्वस्य परस्य च परोक्षायां य्वृन्न स्यात् । ववौ । अय इति किम् । उवाय ॥ ७४ ॥

अविति वा । ४ । १ । ७५ ।

वेगोऽयन्तस्याविति परोक्षायां य्वृद्वा न स्यात् । ववुः । ऊवुः ॥

ज्यश्च यपि । ४ । १ । ७६ ।

ज्योवेगश्च यपि य्वृन्न स्यात् । प्रज्याय । प्रवाय ॥ ७६ ॥

व्यः । ४ । १ । ७७ ।

व्यो यपि य्वृन्न स्यात् । प्रव्याय ॥ ७७ ॥

संपरेर्वा । ४ । १ । ७८ ।

आभ्यां परस्य व्यो यपि य्वृद्वा न स्यात् । संव्याय । संवीय । परिव्याय । परिवीय ॥७८॥

यजादिवचेः किति । ४ । १ । ७९ ।

यजादेर्वचेश्च सस्वरान्तस्था किति परे य्वृत् स्यात् । ईजुः । ऊयुः । ऊचुः । कितीति किम् । यक्षीष्ट ॥ ७९ ॥

स्वपेर्यङ्के च । ४ । १ । ८० ।

स्वपेर्यङि के किति च परे सस्वरान्तस्था य्वृत्स्यात् । सोषुप्यते । असूषुपत् । सुषुप्सति ॥ ८० ॥

ज्याव्यधः क्ङिति । ४ । १ । ८१ ।

ज्याव्यधोः सस्वरान्तस्था किति ङिति य्वृत्स्यात् । जीयात् । जिनाति । विध्यात् । विध्यति ॥ ८१ ॥

व्यचोऽनसि । ४ । १ । ८२ ।

व्यचेः सस्वरान्तस्था अस्वर्जे क्ङिति य्वृत्स्यात् । विचति । अनसीति किम् । उरुव्यचाः ॥ ८२ ॥

वशेरयङि । ४ । १ । ८३ ।

वशेः सस्वरान्तस्था अयङि क्ङिति य्वृत्स्यात् । उष्टः । उशन्ति । अयङीति किम् । वावश्यते ॥ ८३ ॥

ग्रहव्रश्चभ्रस्जप्रच्छः । ४ । १ । ८४ ।

एषां सस्वरान्तस्था क्ङिति य्वृत्स्यात् । जगृहुः । गृह्णाति । वृक्णः । वृश्चति । भृष्टः । भृज्जति । पृष्टः । पृच्छा ॥ ८४ ॥

व्ये स्यमोयङि । ४ । १ । ८५ ।

व्येग्स्यमोः सस्वरान्तस्था यङि य्वृत्स्यात् । वेवीयते । सेसिमीति ॥ ८५ ॥

चायः कीः । ४ । १ । ८६ ।

चायोयङि कीः स्यात् । चेकीतः ॥ ८६ ॥

द्वित्वेह्वः । ४ । १ । ८७ ।

ह्वेगोद्वित्वविषये सस्वरान्तस्था य्वृत्स्यात् । जुहूषति ॥ ८७ ॥

णौ ङसनि । ४ । १ । ८८ ।

ह्वेगः सस्वरान्तस्था ङपरे सन्परे च णौ विषये य्वृत्स्यात् । अजूहवत् । जुहावयिषति ॥ ८८ ॥

श्वेर्वा । ४ । १ । ८९ ।

श्वेः सस्वरान्तस्था ङपरे सन्परे णौ विषये य्वृद्वा स्यात् । अशूशवत् । अशिश्वयत् । शुशावयिषति । शिश्वाययिषति ॥ ८९ ॥

वापरोक्षायङि । ४ । १ । ९० ।

श्वेः सस्वरान्तस्थापरोक्षायङोर्य्वृद्वा स्यात् । शुशाव । शिश्वाय । शोशूयते । शेश्वीयते ॥ ९० ॥

प्यायः पीः । ४ । १ । ९१ ।

प्यायः परोक्षायङोः पीः स्यात् । आपिप्ये । आपेपीतः ॥ ९१ ॥

क्तयोरनुपसर्गस्य । ४ । १ ९२ ।

अनुपसर्गस्य प्यायेः क्तक्तवतोः पीः स्यात् । पीनम् । पीनवन्मुखम् । अनुपसर्गस्येति किम् । प्रप्यानोमेघः ॥ ९२ ॥

आङोऽन्धूधसोः । ४ । १ । ९३ ।

आङः परस्य प्यायेरन्धूधसि चार्थे क्तयोः परतः पीः स्यात् । आपीनोऽन्धुः । आपीनमूधः । अन्धूधसोरिति किम् । आप्यानश्चन्द्रः । आङ एवेति नियमात्, माप्यानमूधः ॥ ९३ ॥

स्फायः स्फीर्वा । ४ । १ । ९४ ।

स्फायतेः क्तयोः परयोः स्फीर्वा स्यात् । स्फीतः । स्फीतवान् । स्फातः । स्फातवान् ॥ ९४ ॥

प्रसमः स्त्यः स्तीः । ४ । १ । ९५ ।

प्रसम्समुदायपूर्वस्य स्त्यः क्तयोः परयोः स्तीः स्यात् । प्रसंस्तीतः । प्रसंस्तीतवान् । प्रसम इति किम् । संप्रस्त्यानः ॥ ९५ ॥

प्रात्स्चमोवा । ४ । १ । ९६ ।

प्रात् केवलात्परस्य स्त्यः क्तयोः परयोः स्तीः स्यात् क्तयोस्तो-मश्च वा । प्रस्तीतः । प्रस्तीतवान् । प्रस्तीमः । प्रस्तीमवान् ॥ ९६ ॥

श्यः शीर्द्रवमूर्त्तिस्पर्शेनश्चास्पर्शे।४।१।९७।

मूर्त्तिः काठिन्यं द्रवमूर्त्तिस्पर्शार्थस्य श्यः क्तयोः परयोः शीः स्यात्। तद्योगेचक्तयोस्तोऽस्पर्शविषये नश्च । शीनम् । शीनवद्घृतम् । शीतं वर्त्तते । शीतोवायुः ॥ ९७ ॥

प्रतेः । ४ । १ । ९८ ।

प्रतेः परस्य श्यः क्तयोः परयोः शीः स्यात्तद्योगे क्तयोः स्तोनश्च । प्रतिशीनः। प्रतिशीनवान् ॥ ९८ ॥

वाऽभ्यऽवाभ्याम् । ४ । १ । ९९ ।

आभ्यां परस्य श्यः क्तयोः परयोः शीर्वा स्यात्तद्योगे च क्तयोः स्तोऽस्पर्शे नश्च। अभिशीनः । अभिशीनवान्। अभिश्यानः। अभिश्या-

वान् । अवशीनम् । अवश्यानं हिमम् । अवश्यानः । अवश्यानवान् ॥ ९९ ॥

श्रः शृतं हविःक्षीरे । ४ । १ । १०० ।

श्रातेः श्रायतेश्च क्ते हविषि क्षीरे चार्थे शृर्निपात्यते । शृतं हविः । शृतं क्षीरं स्वयमेव । हविः क्षीर इति किम् । श्राणा यवागूः ॥ १०० ॥

श्रपेः प्रयोक्त्रैक्ये । ४ । १ । १०१ ।

श्रातेः श्रायतेर्वा ण्यन्तस्यैकस्मिन् प्रयोक्तरि क्ते परे हविःक्षीरयोः शृर्निपात्यते । शृतं हविः क्षीरं वा चैत्रेण । हविःक्षीर इत्येव । श्रपिता यवागूः । प्रयोक्त्रैक्य इति किम् । श्रपितं हविश्चैत्रेण मैत्रेण ॥ १०१ ॥

य्वृत्सकृत् । ४ । १ । १०२ ।

अन्तस्थास्थानमिउऋत्सकृदेव स्यात् । संवीयते ॥ १०२ ॥

दीर्घमवोऽन्त्यम् । ४ । १ । १०३ ।

वेग्वर्जस्य य्वृदन्त्यं दीर्घं स्यात् । जीनः । अव इति किम् । उतः । अन्त्यमिति किम् । सुप्तः ॥ १०३ ॥

स्वरहन्गमोः सनि धुटि । ४ । १ । १०४ ।

स्वरान्तस्य हन्गमोश्च धुडादौ सनि दीर्घः स्यात् । चिचीषति । जिघांसति । जिगांसते । धुटीति किम् । यियविषति ॥ १०४ ॥

तनोवा । ४ । १ । १०५ ।

तनेर्धुडादौ सनि दीर्घो वा स्यात् । तितांसति । तितंसति । धुटीत्येव । तितनिषति ॥ १०५ ॥

क्रमः क्त्वि वा । ४ । १ । १०६ ।

क्रमोधुडादौ क्त्वि दीर्घो वा स्यात्। क्रान्त्वा। क्रन्त्वा। धुटीत्येव। क्रमित्वा ॥ १०६ ॥

अहन्पञ्चमस्य क्विक्ङिति ।४।१।१०७।

हन्वर्जस्य पञ्चमान्तस्य क्वौ धुडादौ च क्ङिति दीर्घः स्यात्। प्रशान्। शान्तः। शंशान्तः। पञ्चमस्येति किम्। पक्त्वा। अहन्निति किम्। वृत्रहणि। धुटीत्येव। यम्यते ॥ १०७ ॥

अनुनासिके चछ्वः शूट् ।४।१।१०८।

अनुनासिकादौ क्वौ धुडादौ च धातोः छ्वोर्यथासङ्ख्यं शूटौ स्याताम्। प्रश्नः। शब्दप्राशौ। पृष्टः। स्योमा। अक्षद्यूः। द्यूतः ॥१०८॥

मव्यविश्रिविज्वरित्वरेरुपान्त्येन ।४।१।१०९।

एषामनुनासिकादौ क्वौ धुडादौ च प्रत्यये उपान्त्येन सहोट् स्यात्। मोमा। मूः। मूतिः। उमा। ओमा। ऊः। ऊतिः। श्रोमा। श्रूः। श्रूतिः। जूर्मा। जूः। जूर्त्तिः। तूर्मा। तूः। तूर्णः ॥ १०९ ॥

राल्लुक् ।४।१।११०।

रात्परयोश्छ्वोरनुनासिकादौ क्वौ धुडादौ च प्रत्यये लुक् स्यात्। मोर्मा। मूः। मूर्त्तिः। तोर्मा। तूः। तूर्णः ॥ ११० ॥

क्ते ऽनिटश्चजोः कगौ घिति ।४।१।१११।

क्ते ऽनिटोधातोश्चजोर्घिति यथासङ्ख्यं कगौ स्याताम्। पाकः। भोग्यम्। क्तेऽनिट इति किम्। सङ्कोचः। कूजः ॥ १११ ॥

न्यङ्कूद्गमेघादयः ।४।१।११२।

न्यङ्क्वादयः कत्वे उद्गादयोगत्वे मेघादयोघत्वे कृते निपात्यन्ते। न्यङ्कुः। शोकः। उद्गः। न्युद्गः। मेघः। ओघः ॥ ११२ ॥

न वञ्चेर्गतौ । ४ । १ । ११३ ।

गत्यर्थस्य वञ्चेः कत्वं न स्यात् । वञ्चं वञ्चन्ति । गताविति किम् । वङ्कं काष्ठम् ॥ ११३ ॥

यजेर्यज्ञाङ्गे । ४ । १ । ११४ ।

यज्ञाङ्गवृत्तेर्यजेर्गत्वं न स्यात् । पञ्च प्रयाजाः । यज्ञाङ्ग इति किम् । प्रयागः ॥ ११४ ॥

ध्यण्यावश्यके । ४ । १ । ११५ ।

आवश्यकोपाधिके ध्यणि चजोः कगौ न स्याताम् । अवश्यपाच्यम् । अवश्यरञ्ज्यम् । आवश्यक इति किम् । पाक्यम् ॥ ११५ ॥

निप्राद्युजः शक्ये । ४ । १ । ११६ ।

आभ्यां युजः शक्ये गम्ये ध्यणि गो न स्यात् । नियोज्यः । प्रयोज्यः । शक्य इति किम् । नियोग्यः ॥ ११६ ॥

भुजोभक्ष्ये । ४ । १ । ११७ ।

भुजोभक्ष्यार्थे ध्यणि गो न स्यात् । भोज्यं पयः । भक्ष्य इति किम् । भोग्या भूः ॥ ११७ ॥

त्यज्यजप्रवचः । ४ । १ । ११८ ।

एषां ध्यणि कगौ न स्याताम् । त्याज्यम् । याज्यम् । प्रवाच्यः ॥ ११८ ॥

वचोऽशब्दनाम्नि । ४ । १ । ११९ ।

अशब्दसंज्ञायां वचेर्ध्यणि को न स्यात् । वाच्यम् । अशब्दनाम्नीति किम् । वाक्यम् ॥ ११९ ॥

भुजन्युब्जं पाणिरोगे । ४ । १ । १२० ।

भुजेर्न्युब्जेश्च घञन्तस्य पाणौ रोगे चार्थे यथा सङ्ख्यं भुजन्युब्जौ निपात्येते । भुजः पाणिः । न्युब्जोरोगः ॥१२० ॥

वीरुन्न्यग्रोधौ । ४ । १ । १२१ ।

विपूर्वस्य रुहेः क्विपि न्यक्पूर्वस्य वाचिवीरुन्न्यग्रोधौ एतौ धान्तौ निपात्येते । वीरुत् । न्यग्रोधः ॥ १२१ ॥

इत्याचार्यहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनलघुवृत्तौ चतुर्थस्याध्यायस्य प्रथमः पादः ॥

अर्हम्

आत्सन्ध्यक्षरस्य । ४ । २ । १ ।

धातोः सन्ध्यक्षरान्तस्यात्स्यात् । संव्याता । सुग्लः । धातोरित्येव । गोभ्याम् ॥ १ ॥

न शिति । ४ । २ । २ ।

सन्ध्यक्षरान्तस्य शिति विषयभूते आन्न स्यात् । संव्ययति ॥ २॥

व्यस्थवणवि । ४ । २ । ३ ।

व्यः थवि णवि च विषये आन्न स्यात् । संविव्याय । संविव्ययिथ ॥ ३ ॥

स्फुरस्फुलोर्घञि । ४ । २ । ४ ।

अनयोः सन्ध्यक्षरस्य घञि आत्स्यात् । विस्फारः। विस्फालः॥४॥

वापगुरोणमि । ४ । २ । ५ ।

अपपूर्वस्य गुरेः सन्ध्यक्षरस्य णम्याद्वा स्यात् । अपगारमपगारम् । अपगोरमपगोरम् ॥ ५ ॥

दीङः सनि वा । ४ । २ । ६ ।

दीङः सन्याद्वा स्यात्। दिदासते। दिदीषते ॥ ६ ॥

यबक्ङिति । ४ । २ । ७ ।

दीङोयप्यऽक्ङिति च विषये आत्स्यात् । उपदाय । उपदाता । उपदायो वर्त्तते ॥ ७ ॥

मिग्मीगोऽखलचलि। ४ । २ । ८ ।

अनयोर्यपि खल्अच्अल्वर्जेऽक्ङिति च विषये आत्स्यात्। निमाय। निमाता । प्रमाय । प्रमाता। अखलचलीति किम् । ईषन्नियमः । दुःप्रमयः । मयः । आमयः । निमयः । प्रमयः ॥ ८ ॥

लीङ्लिनोर्वा । ४ । २। ९ ।

अनयोर्यपि खल्अच्अल्वर्जे क्ङिति च विषये आद्वास्यात् । विलाय । विलीय। विलाता । विलेता । अखलचलीतिकिम् । ईषद्विलयः । विलयः । विलयोऽस्ति ॥ ९ ॥

णौ क्रीजीङः ।४।२।१०।

एषां णौ आत्स्यात् । क्रापयति । जापयति । अध्यापयति ॥१०॥

सिध्यतेरज्ञाने । ४ । २। ११।

अज्ञानार्थस्य सिध्यतेर्णौ स्वरस्यात् स्यात् । मन्त्रं साधयति । अज्ञान इति किम् । तपस्तापसं सेधयति ॥ ११ ॥

चिस्फुरोर्नवा ।४। २।१२ ।

चिस्फुरोर्णौ स्वरस्याद्वास्यात् । चापयति । चाययति । स्फारयति । स्फोरयति ॥ १२ ॥

वियः प्रजने । ४ । २ । १३ ।

गर्भाधानार्थस्य वियो णौ वा आत्स्यात् । पुरोवातोगाः । प्रवापयति । प्रवाययति ॥ १३ ॥

रुहः पः । ४ । २ । १४ ।

रुहेर्णौ प्वा स्यात् । रोपयति रोहयति वा तरुम् ॥ १४ ॥

लियोनोऽन्तः स्नेहद्रवे । ४ । २ । १५ ।

लियः स्नेहद्रवे गम्ये णौ नोन्तोवा स्यात् । घृतं विलीनयति । विलाययति । स्नेहद्रव इति किम् । अयोविलाययति ॥ १५ ॥

लोलः । ४ । २ । १६ ।

लारूपस्य णौ स्नेहद्रवे गम्ये लोऽन्तोवा स्यात् । घृतं विलालयति । विलापयति वा । स्नेहद्रव इत्येव । जटाभिरालापयते ॥ १६ ॥

पातेः । ४ । २ । १७ ।

पातेर्णौ लोऽन्तः स्यात् । पालयति ॥ १७ ॥

धूग्प्रीगोर्नः । ४ । २ । १८ ।

धूग्प्रीगोर्णौ नोऽन्तः स्यात् । धूनयति । प्रीणयति ॥ १८ ॥

वोविधूनने जः । ४ । २ । १९ ।

वा इत्यस्य विधूननेऽर्थे णौ जोऽन्तः स्यात् । पक्षेणोपवाजयति । विधूनन इति किम् । उच्चैः केशानावापयति ॥ १९ ॥

पाशाछासावेव्याह्वो यः । ४ । २ । २० ।

एषां णौ योऽन्तः स्यात् । पाययति । शाययति । अवच्छाययति । अवसाययति । वाययति । व्याययति । ह्वाययति ॥ २० ॥

अर्त्तिरीब्लीह्रीक्नूयिक्ष्माय्यातां पुः । ४ । २ । २१ ।

एषामादन्तानां च णौ पुरन्तः स्यात् । अर्पयति । रेपयति । ब्लेपयति । ह्रेपयति । क्नोपयति । क्ष्मापयति । दापयति । सत्यापयति ॥

स्फायः स्फाव् । ४ । २ । २२ ।

णौ स्फायः स्फाव् स्यात् । स्फावयति ॥ २२ ॥

शदिरगतौ शात् । ४ । २ । २३ ।

शदिरगत्यर्थे णौ शात्स्यात् । पुष्पाणि शातयति । अगताविति किम् । गाः शादयति ॥ २३ ॥

घटादेर्ह्रस्वोदीर्घस्तु वा ञिणम्परे ।४।२।२४।

घटादीनां णौ ह्रस्वः स्यात् ञिणम्परे तु णौ वा दीर्घः । घटयति । अघाटि । अघटि । घाटं घाटम् । घटं घटम् । व्यथयति । अव्याथि । अव्यथि । व्याथं व्याथम् । व्यथं व्यथम् ॥ २४ ॥

कगेवनूजनैजृष्क्नस्रञ्जः । ४ । २ । २५ ।

एषां णौ ह्रस्वः स्यात ञिणम्परे तु वा णौ दीर्घः । कगयति । अकागि । अकगि । कागंकागम् । कगंकगम् । उपवनयति । उपावानि । उपावनि । उपवानमुपवानम् । उपवनमुपवनम् । जनयति । अजानि । अजनि । जानंजानम् । जनंजनम् । जरयति । अजारि । अजरि । जारंजारम् । जरंजरम् । क्नसयति । अक्नासि । अक्नसि । क्नासंक्नासम् । क्नसंक्नसम् । रजयति । अराजि । अरजि । राजंराजम् । रजंरजम् ॥ २५ ॥

अमोऽकम्यमिचमः । ४ । २ । २६ ।

कम्यमिचमिवर्जस्यामन्तस्य णौ ह्रस्वः स्यात् ञिणम्परे तु वा णौ दीर्घः । रमयति । अरामि । अरमि । रामंरामम् । रमंरमम् । अकम्यमिचम इति किम् । कामयते । अकामि । कामंकामम् । आमयति । आचामयति ॥ २६ ॥

पर्यपात् स्खदः । ४ । २ । २७ ।

आभ्यामेव परस्य स्खदेर्णौ ह्रस्वः स्यात् ञिणम्परे तु वा दीर्घः । परिस्खदयति । पर्यस्खादि । पर्यस्खदि । परिस्खादंपरिस्खादम् । परिस्खदंपरिस्खदम् । अपस्खदयति । अपास्खादि । अपास्खदि । अपस्खादमपस्खादम् । अपस्खदमपस्खदम् । पर्यपादिति किम् । प्रस्खादयति ॥ २७ ॥

शमोऽदर्शने । ४ । २ । २८ ।

अदर्शनार्थस्य शमेर्णौ ह्रस्वः स्यात् ञिणम्परे तु वा दीर्घः । शमयति रोगम् । अशामि । अशमि । शामंशामम् । शमंशमम् । अदर्शन इति किम् । निशामयति रूपम् ॥ २८ ॥

यमोऽपरिवेषणे णिचि च । ४ । २ । २९ ।

अपरिवेषणार्थस्य यमोणिचि अणिचि च णौ ह्रस्वः स्यात् ञिणम्परे तु वा दीर्घः । यमयति । अयामि । अयमि । यामंयामम् । यमंयमम् । अपरिवेषण इति किम् । यामयत्यतिथिम् ॥ २९ ॥

मारणतोषणनिशाने ज्ञश्च । ४ । २ । ३० ।

एष्वर्थेषु ज्ञो णिचि अणिचि च णौ ह्रस्वः स्यात् ञिणम्परे तु वा दीर्घः । संज्ञपयति पशुम् । विज्ञपयति राजानम् । प्रज्ञपयति शस्त्रम् । अज्ञापि । अज्ञपि । ज्ञापंज्ञापम् । ज्ञपंज्ञपम् ॥ ३० ॥

चहणः शाठ्ये । ४ । २ । ३१ ।

चहेश्चुरादेः शाठ्यार्थस्य णिचि णौ ह्रस्वः स्यात् ञिणम्परे तु वा दीर्घः । चहयति । अचाहि । अचहि । चाहंचाहम् । चहंचहम् । शाठ्य इति किम् । अचाहि ॥ ३१ ॥

ज्वलह्वलह्मलग्लास्नावनूवमनमोऽनुपसर्गस्य वा । ४ । २ । ३२ ।

एषामनुपसर्गाणां णौ ह्रस्वो वा स्यात् । ज्वलयति । ज्वालयति । ह्वलयति । ह्वालयति । ह्मलयति । ह्मालयति । ग्लपयति । ग्लापयति । स्नपयति । स्नापयति । वनयति । वानयति । वमयति । वामयति । नमयति । नामयति । अनुपसर्गस्येति किम् । प्रज्वलयति । प्रह्वलयति । प्रह्मलयति । प्रग्लापयति । प्रस्नापयति । प्रवनयति । प्रवमयति । प्रणमयति ॥ ३२ ॥

छदेरिस्मन्त्रट्क्वौ । ४ । २ । ३३ ।

छदेरिस्मन्त्रट्क्विप्परे णौ ह्रस्वः स्यात् । छदिः । छद्म । छत्री । उपच्छत् ॥ ३३ ॥

एकोपसर्गस्य च घे । ४ । २ । ३४ ।

एकोपसर्गस्यानुपसर्गस्य च छदेर्घपरे णौ ह्रस्वः स्यात् । प्रच्छदः । छदः । एकोपसर्गस्य चेति किम् । समुपच्छादः ॥ ३४ ॥

उपान्त्यस्यासमानलोपिशास्वृदितो ङे । ४ । २ । ३५ ।

समानलोपिशास्वृदिद्वर्जस्य धातोरुपान्त्यस्य ङपरे णौ ह्रस्वः स्यात् । अपीपचत् । मामवानटिटत् । असमानलोपिशास्वृदित इति किम् । अत्यरराजत् । अशशासत् । मामवानोणिणत् ॥ ३५ ॥

भ्राजभासभाषदीपपीडजीवमीलकणरण-वणभणश्रणह्वेहेठलुटलुपलपां न-वा । ४ । २ । ३६ ।

एषां ङपरे णावुपान्त्यस्य ह्रस्वो वा स्यात् । अबिभ्रजत् । अबभ्राजत् । अबीभसत् । अबभासत् । अबीभषत् । अबभाषत् । अदीदिपत् । अदिदीपत् । अपीपिडत् । अपिपीडत् । अजीजिवत् । अजिजीवत् । अमीमिलत् । अमिमीलत् । अचीकणत् । अचकाणत् । अरीरणत् । अरराणत् । अवीवणत् । अववाणत् । अबीभणत् । अबभाणत् । अशिश्रणत् । अशिश्राणत् । अजूहवत् । अजुहावत् । अजीहिठत् । अजिहेठत् । अलूलुटत् । अलुलोटत् । अलूलुपत् । अलुलोपत् । अलीलपत् । अललापत् ॥ ३६ ॥

ॠदृवर्णस्य । ४ । २ । ३७ ।

उपान्त्यस्य ऋवर्णस्य ङपरे णौ वा ऋः स्यात् । अवीवृतत् । अववर्त्तत् । अचीकृतत् । अचिकीर्त्तत ॥ ३७ ॥

जिघ्रतेरिः । ४ । २ । ३८ ।

घ्रउपान्त्यस्य ङपरे णौ इर्वा स्यात् । अजिघ्रिपत् । अजिघ्रपत् ॥

तिष्ठतेः । ४ । २ । ३९ ।

स्थउपान्त्यस्य ङपरे णौ इः स्यात् । अतिष्ठिपत् ॥ ३९ ॥

ऊदुदुषोणौ । ४ । २ । ४० ।

दुषेरुपान्त्यस्य ङपरे णौ ऊत्स्यात् । दूषयति ॥ ४० ॥

चित्ते वा । ४ । २ । ४१ ।

चित्तकर्तृकस्य दुषेरुपान्त्यस्य णौ परे ऊद् वा स्यात् । मनोदूषयति । मनोदोषयति मैत्रः ॥ ४१ ॥

गोहः स्वरे । ४ । २ । ४२ ।

कृतगुणस्य गुहेः स्वरादावुपान्त्यस्योत्स्यात् । निगूहति । गोह इति किम् । निजुगुहुः ॥ ४२ ॥

भुवोवः परोक्षाद्यतन्योः । ४ । २ । ४३ ।

भुवोवन्तस्योपान्त्यस्य परोक्षाद्यतन्योरूत्स्यात् । बभूव । अभूवन् । व इति किम् । बभूवान् । अभूत् ॥ ४३ ॥

गमहनजनखनघसः स्वरेऽनङि क्ङिति लुक् । ४ । २ । ४४ ।

एषामुपान्त्यस्याङ्वर्जे स्वरादौ क्ङितिपरे लुक् स्यात् । जग्मुः जघ्नुः । जज्ञे । चख्नुः । जक्षुः । स्वर इति किम् । गम्यते । अनङीति किम् । अगमत् । क्ङिति किम् । गमनम् ॥ ४४ ॥

नोव्यञ्जनस्यानुदितः । ४ । २ । ४५ ।

व्यञ्जनान्तस्यानुदितोधातोरुपान्त्यस्य नः क्ङिति परे लुक् स्यात् । स्रस्तः । सनीस्रस्यते । व्यञ्जनस्येति किम् । नीयते । अनुदित इति किम् । नानन्द्यते ॥ ४५ ॥

अञ्चोऽनर्चायाम् । ४ । २ । ४६ ।

अनर्चार्थस्यैवाञ्चेरुपान्त्यनो क्ङिति परे लुक् स्यात् । उदक्तमुदकं कूपात् । अनर्चायामिति किम् । अञ्चिता गुरवः ॥ ४६ ॥

लङ्गिकम्प्योरुपतापाङ्गविकृत्योः । ४ । २ । ४७ ।

अनयोरुपान्त्यनो यथासङ्ख्यमुपतापेऽङ्गविकारे चार्थे क्ङिति परे लुक् स्यात् । विलगितः । विकपितः । उपतापाङ्गविकृत्योरिति किम् । विलङ्गितः । विकम्पितः ॥ ४७ ॥

भञ्जेर्ञौ वा ।४।२।४८।

भञ्जेरुपान्त्यनो ञौ परे लुग्वा स्यात् । अभाजि । अभञ्जि ॥ ४८ ॥

दंशसञ्जः शवि । ४ । २ । ४९ ।

अनयोरुपान्त्यनः शवि लुक् स्यात् । दशति । सजति ॥ ४९ ॥

अकट्घिनोश्च रञ्जेः ।४।२।५०।

रञ्जेरकटि घिनणि शवि चोपान्त्यनो लुक् स्यात् । रजकः । रागी । रजति ॥ ५० ॥

णौ मृगरमणे । ४ । २ । ५१ ।

रञ्जेरुपान्त्यनो णौ मृगाणां रमणेऽर्थे लुक् स्यात् । रजयति मृगं व्याधः। मृगरमण इति किम् । रञ्जयति रजको वस्त्रम् ॥ ५१ ॥

घञि भावकरणे । ४ । २ । ५२ ।

रञ्जेरुपान्त्यनो भावकरणार्थे घञि लुक् स्यात् । रागः । भावकरण इति किम् । आधारे, रङ्गः ॥ ५२ ॥

स्यदोजवे । ४ । २ । ५३ ।

स्यन्देर्घञि नलुक्वृद्ध्यभावौ निपात्येते वेगेऽर्थे । गोस्यदः। जव इति किम् । घृतस्यन्दः ॥ ५३ ॥

दशनाऽवोदैधोद्मप्रश्रथहिमश्रथम् ।४।२।५४।

एते नलुगादौ कृते निपात्यन्ते । दशनम् । अवोदः । एधः । उद्मः । प्रश्रथः । हिमश्रथः ॥ ५४ ॥

यमिरमिनमिगमिहनिमनिवनतितनादेर्धुटि क्ङिति । ४ । २ । ५५ ।

एषां तनादीनां च धुडादौ क्ङिति लुक् स्यात् । यतः। रत्वा । नतिः। गतः । हतः। मतः । वतिः । ततः । क्षतः । धुटीति किम् । यम्यते । क्ङितीति किम् । यन्ता ॥ ५५ ॥

यपि । ४ । २ । ५६ ।

यम्यादीनां यपि लुक् स्यात् । प्रहत्य । प्रमत्य । प्रवत्य । प्रतत्य । प्रसत्य ॥ ५६ ॥

वामः । ४ । २ । ५७ ।

यम्यादीनां मान्तानां यपि वा लुग्स्यात् । प्रयत्य । प्रयम्य । विरत्य । विरम्य । प्रणत्य । प्रणम्य । आगत्य । आगम्य ॥ ५७ ॥

गमां क्वौ । ४ । २ । ५८ ।

एषां गमादीनां यथादर्शनं क्वौ क्ङिति लुक् स्यात् । जनगत् । संयत् । परीतत् । सुमत् । सुवत् ॥ ५८ ॥

न तिकिदीर्घश्च । ४ । २ । ५९ ।

एषां तिकि लुक् दीर्घश्च न स्यात् । यन्तिः। रन्तिः। नन्तिः। गन्तिः। हन्तिः । मन्तिः । वन्तिः । तन्तिः ॥ ५९ ॥

आः खनिसनिजनः । ४ । २ । ६० ।

एषां धुडादौ क्ङिति आः स्यात् । खातः । सातः। जातः । जातिः। क्ङितीत्येव । चङ्खन्ति । धुटीत्येव । जनित्वा ॥ ६० ॥

सनि । ४ । २ । ६१ ।

एषां धुडादौ सनि आः स्यात् । सिषासति । धुटीत्येव । सिसनिषति ॥ ६१ ॥

ये नवा । ४ । २ । ६२ ।

एषां ये क्ङिति आः वा स्यात् । खायते । खन्यते । चाखायते । चङ्खन्यते । सायते । सन्यते । प्रजाय । प्रजन्य । क्ङितीत्येव । सान्यम् । जन्यम् ॥ ६२ ॥

तनः क्ये । ४ । २ । ६३ ।

तनः क्ये आः वा स्यात् । तायते । तन्यते । क्य इति किम् । तन्तन्यते ॥ ६३ ॥

तौ सनस्तिकि । ४ । २ । ६४ ।

सनस्तिकि तौ लुगातौ वा स्याताम् । सतिः । सातिः । सन्तिः ॥ ६४ ॥

वन्याङ्पञ्चमस्य । ४ । २ । ६५ ।

पञ्चमस्य वन्याङ् स्यात् । विजावा । द्यावा ॥ ६५ ॥

अपाच्चायश्चिः क्तौ । ४ । २ । ६६ ।

अपपूर्वस्य चायतेः क्तौ चिः स्यात् । अपचितिः ॥ ६६ ॥

ह्लादो ह्रद् क्तयोश्च । ४ । २ । ६७ ।

ह्लादेः क्तक्तवतोः क्तौ च ह्रद् स्यात् । ह्रन्नः । ह्रन्नवान् । ह्रत्तिः ॥

ऋल्वादेरेषां तो नोऽप्रः । ४ । २ । ६८ ।

पृवर्जात् ऋदन्तात् ल्वादिभ्यश्च परेषां क्तिक्तक्तवतूनां तो नः स्यात् । तीर्णिः । तीर्णः । तीर्णवान् । लूनिः । लूनः । लूनवान् । धूनिः । धूनः । धूनवान् । अप्रइति किम् । पूर्त्तिः । पूर्त्तः । पूर्त्तवान् ॥ ६८ ॥

रदादमूर्च्छमदः क्तयोर्दस्य च । ४ । २ । ६९ ।

मूर्च्छिमदिवर्जात् रदन्तात् परस्य क्तयोस्तस्य तद्योगे धातुदश्च नः स्यात् । पूर्णः पूर्णवान् । भिन्नः भिन्नवान् । अमूर्च्छमद इति किम् । मूर्त्तः । मत्तः । रदान्तस्येति किम् । चरितम् । मुदितम् ॥ ६९ ॥

सूयत्याद्योदितः । ४ । २ । ७० ।

सूयत्यादिभ्यो नवभ्य ओदिद्भ्यश्च परस्य क्तयोस्तो नः स्यात् । सूनः । सूनवान् । दूनः । दूनवान् । लग्नः । लग्नवान् ॥ ७० ॥

व्यञ्जनान्तस्थातोऽख्याध्यः ।४।२।७१।

ख्याध्यावर्जस्य धातोर्यद्व्यञ्जनं तस्मात्परा याऽन्तस्था तस्याः परो य आस्तस्मात् परस्य क्तयोस्तो नः स्यात् । स्त्यानः । स्त्यानवान् । व्यञ्जन इति किम् । यातः । अन्तस्था इति किम् । स्नातः । आत इति किम् । च्युतः । धातोर्व्यञ्जनेति किम् । निर्यातः । अख्याध्य इति किम् । ख्यातः ध्यातः । आतः । परस्येति किम् । दरिद्रितः ॥ ७१ ॥

पूदिव्यञ्चेर्नाशाद्यूताऽनपादाने । ४ ।२।७२।

एभ्यो यथासङ्ख्यं नाशाद्यर्थेभ्यः परस्य क्तयोस्तो नः स्यात् । पूना-यवाः । आद्यूनः । समक्नौ पक्षौ । नाशाद्यूतानपादान इति किम् । पूतम् । द्यू-तम् । उदक्तं जलम् ॥ ७२ ॥

सेर्ग्रासे कर्म्मकर्त्तरि । ४ । २ । ७३ ।

सेः परस्य क्तयोस्तो ग्रासे कर्मकर्त्तरि नः स्यात् । सिनोग्रासः स्वय-मेव । कर्म्मकर्त्तरीति किम् । सितो ग्रासो मैत्रेण ॥ ७३ ॥

क्षेः क्षीचाऽध्यार्थे । ४ । २ । ७४ ।

ध्यणोऽर्थौभावकर्म्मणी ततोऽन्यस्मिन्नर्थे क्तयोस्तः क्षेः परस्य नः स्यात् तद्योगे क्षेः क्षीश्च । क्षीणः । क्षीणवान् मैत्रः । अध्यार्थे इति किम् । क्षितमस्य ॥ ७४ ॥

वाक्रोशदैन्ये। ४ । २ । ७५ ।

आक्रोशे दैन्ये च गम्ये क्षेः परस्याऽध्यार्थेक्तयोस्तोन्वा स्यात् तद्योगे क्षीश्च । क्षीणायुः । क्षितायुर्जाल्मः । क्षीणकः । क्षितकस्तपस्वी ॥

ऋह्रीघ्राध्रात्रोंदनुदविन्तेर्वा। ४ । २ । ७६ ।

एभ्यः परस्य क्तयोस्तोन्वा स्यात् । ऋणम् । ऋतम् । ह्रीणः ह्रीतः। ह्रीणवान् । ह्रीतवान् । घ्राणः । घ्रातः । ध्राणः। ध्रातः । त्राणः । त्रातः। समुन्नः। समुत्तः। नुन्नः । नुत्तः। विन्नः। वित्तः ॥ ७६ ॥

दुगोरूच । ४ । २ । ७७ ।

दुगुभ्यां परस्य क्तयोस्तो नः स्यात् तद्योगे दुगोरूश्च । दूनः । दूनवान् । गूनः । गूनवान् ॥ ७७ ॥

क्षैशुषिपचोमकवम् । ४ । २ । ७८ ।

एभ्यः परस्य क्तयोस्तो यथासङ्ख्यं मकवाः स्युः। क्षामः । क्षामवान्। शुष्कः । शुष्कवान् । पक्वः । पक्ववान् ॥ ७८ ॥

निर्वाणमऽवाते। ४ । २ । ७९ ।

अवाते कर्त्तरि निरपूर्वाद् वातेः परस्य क्तयोस्तोनोनिपात्यते । निर्वाणोमुनिः । अवात इति किम् । निर्वातोवातः ॥ ७९ ॥

अनुपसर्गाः क्षीवोल्लाघकृशपरिकृशफुल्लोत्फुल्लसंफुल्लाः । ४ । २ । ८० ।

अनुपसर्गाः क्तान्ता एते निपात्यन्ते। क्षीवः। उल्लाघः । कृशः। परिकृशः। फुल्लः । उत्फुल्लः। संफुल्लः। अनुपसर्गा इति किम् । प्रक्षीवितः ॥

भित्तं शकलम् । ४ । २ । ८१ ।

भिदेः परस्य क्तस्य नत्वाभावो निपात्यते । शकलपर्यायश्चेत् । भित्तम् शकलमित्यर्थः । शकलमिति किम् । भिन्नम् ॥ ८१ ॥

वित्तं धनप्रतीतम् । ४ । २ । ८२ ।

विन्दतेः परस्य क्तस्य नत्वाभावो निपात्यते धनप्रतीतयोः पर्यायश्चेत् । वित्तं धनम् । वित्तः प्रतीतः । धनप्रतीतमिति किम् । विन्नः ॥

हुधुटोर्हेर्धिः । ४ । २ । ८३ ।

होर्धुडन्ताच्च परस्य हेर्धिः स्यात् । जुहुधि । त्रिन्द्धि ॥ ८३ ॥

शासऽस्हनः शाध्येधिजहि ।४।२।८४।

शास्अस्हनां ह्यन्तानां यथासंख्यम् शाधिएधिजहयः स्युः । शाधि । एधि । जहि ॥ ८४ ॥

अतः प्रत्ययाल्लुक् । ४ । २ । ८५ ।

धातोः परोयोऽदन्तः प्रत्ययस्ततः परस्य हेर्लुक् स्यात् । दीव्य । अत इति किम् । राध्नुहि । प्रत्ययादिति किम् । पापहि ॥ ८५ ॥

असंयोगादोः । ४ । २ । ८६ ।

असंयोगात्परो य उस्तदन्तात्प्रत्ययात्परस्य हेर्लुक् स्यात् । सुनु । असंयोगादिति किम् । अक्ष्णुहि । उरिति किम् । क्रीणीहि ॥ ८६ ॥

वम्यऽविति वा । ४ । २ । ८७ ।

असंयोगात्परोय उस्तदन्तस्य प्रत्ययस्य लुग् वा स्यात् वमादौ अविति परे । सुन्वः। सुनुवः। सुन्मः। सुनुमः। अवितीति किम् । सुनोमि । असंयोगादित्येव । तक्ष्णुवः ॥ ८७ ॥

कृगो यि च । ४ । २ । ८८ ।

कृगः परस्योतो यादौ वमि चाविति लुक् स्यात् । कुर्युः। कुर्वः। कुर्मः ॥

अतः शित्युत् । ४ । २ । ८९ ।

शित्यऽविति य उस्तन्निमित्तस्य कृगोऽत उः स्यात् । कुरु । अविती-तीत्येव । करोति ॥ ८९ ॥

श्नास्त्योर्लुक् । ४ । २ । ९० ।

श्नस्य अस्तेश्चातः शित्यऽविति लुक् स्यात् । रुन्द्धः । स्तः । अत इत्येव । आस्ताम् ॥ ९० ॥

वा द्विषातोऽनःपुस् । ४ । २ । ९१ ।

द्विष आदन्ताच्च परस्य शितोऽवितोऽनः स्थाने पुस् वा स्यात् । अद्विषुः । अद्विषन् । अयुः । अयान् ॥ ९१ ॥

सिज्विदोऽभुवः । ४ । २ । ९२ ।

सिच्प्रत्ययाद्विदश्च धातोः परस्य अनः पुस् स्यात् नचेत् भुवः परः सिच् स्यात् । अकार्षुः । अविदुः । अभुव इति किम् । अभूवन् ॥ ९२ ॥

द्व्युक्तजक्षपञ्चतः । ४ । २ । ९३ ।

कृताद्वित्वात् जक्षपञ्चकाच्च परस्य शितोऽवितोऽनः पुस् स्यात् । अजुहवुः । अजक्षुः । अदरिद्रुः । अजागरुः । अचकासुः । अशासुः ॥ ९३ ॥

अन्तोनोलुक् । ४ । २ । ९४ ।

द्व्युक्तजक्षपञ्चकात् परस्य शितोऽवितोऽन्तोनोलुक् स्यात् । जुह्वति । जुह्वत् । जक्षति । जक्षत् । दरिद्रति । दरिद्रत् ॥ ९४ ॥

शौ वा । ४ । २ । ९५ ।

द्व्युक्तजक्षपञ्चकात्परस्यान्तोऽनः शिविषये लुग्वा स्यात् । ददति ददन्ति कुलानि । जक्षति । जक्षन्ति । दरिद्रति । दरिद्रन्ति ॥ ९५ ॥

श्नश्चातः । ४ । २ । ९६ ।

द्व्युक्तजक्षपञ्चतः श्नश्च शित्यऽवित्यातो लुक् स्यात् । मिमते । दरिद्रति । क्रीणन्ति । अवितीत्येव । अजहाम् । अक्रीणाम् ॥ ९६ ॥

एषामीर्व्यञ्जनेऽदः । ४ । २ । ९७ ।

द्व्युक्तजक्षपञ्चतः श्नाश्नातः शित्यऽविति व्यञ्जनादावीः स्यात् नतु दासंज्ञस्य । मिमीते । लुनीतः । व्यञ्जन इति किम् । मिमते । अद इति किम् । दत्तः । धत्तः ॥ ९७ ॥

ईर्दरिद्रः । ४ । २ । ९८ ।

दरिद्रो व्यञ्जनादौ शित्यऽवित्यात ः स्यात् । दरिद्रितः । व्यञ्जन इत्येव । दरिद्रति ॥ ९८ ॥

भियो नवा । ४ । २ । ९९ ।

भियो व्यञ्जनादौ शित्यऽविति इर्वा स्यात् । बिभितः । बिभीतः ॥

हाकः । ४ । २ । १०० ।

हाको व्यञ्जनादौ शित्यऽविति आत इर्वा स्यात् । जहितः । जहीतः ॥

आ च हौ । ४ । २ । १०१ ।

हाको हौ आत् इश्च वा स्यात् । जहाहि । जहिहि । जहीहि ॥ १०१ ॥

यि लुक् । ४ । २ । १०२ ।

यादौ शिति हाक आ लुक् स्यात् । जह्यात् ॥ १०२ ॥

ओतः श्ये । ४ । २ । १०३ ।

धातोरोतः श्ये लुक् स्यात् । अवद्यति । श्य इति किम् । गौरिवाचरति गवति ॥

जा ज्ञाजनोऽत्यादौ । ४ । २ । १०४ ।

ज्ञाजनोः शिति जाः स्यात् नत्वऽनन्तरे तिवादौ । जानाति । जायते । अत्यादाविति किम् । जाज्ञाति । जज्ञन्ति ॥ १०४ ॥

प्वादेर्ह्रस्वः । ४ । २ । १०५ ।

प्वादेः शित्यऽत्यादौ ह्रस्वः स्यात् । पुनाति । लुनाति । प्वादेरिति किम् । व्रीणाति ॥ १०५ ॥

गमिषद्यमः श्छः । ४ । २ । १०६ ।

एषां शित्यऽत्यादौ छः स्यात् । गच्छति । इच्छति । यच्छति । आयच्छते । अत्यादाविति किम् । जङ्गन्ति ॥ १०६ ॥

वेगे सर्त्तेर्धाव् । ४ । २ । १०७ ।

सर्त्तेर्वेगे गम्ये शिति धाव् स्यात् अत्यादौ । धावति । वेग इति किम् । धर्ममनुसरति ॥ १०७ ॥

श्रौतिकृवुधिवुपाघ्राध्मास्थाम्नादाम् दृश्य-ऽर्त्तिशदसदः शृकृधिपिबजिघ्रधमतिष्ठम-नयच्छपश्यर्च्छशीयसीदम् । ४ । २ । १०८ ।

एषां शित्यऽत्यादौ यथासङ्ख्यं श्रादयः स्युः । शृणु । कृणु । धिनु । पिब । जिघ्र । धम । तिष्ठ । मन । यच्छ । पश्य । ऋच्छ । शीयते । सीद ॥ १०८ ॥

क्रमो दीर्घः परस्मै । ४ । २ । १०९ ।

क्रमेः परस्मैपदनिमित्ते शिति दीर्घः स्यात् अत्यादौ । क्राम । क्राम्यति । परस्मैपद इति किम् । आक्रमते सूर्यः ॥ १०९ ॥

ष्ठिवुक्लम्वाचमः । ४ । २ । ११० ।

एषां शित्यऽत्यादौ दीर्घः स्यात् । ष्ठीव । क्लाम । आचाम । आङिति किम् । चम ॥ ११० ॥

शमसप्तकस्य श्ये । ४ । २ । १११ ।

शमादीनां सप्तानां श्ये दीर्घः स्यात् । शाम्य । दाम्य । ताम्य । भ्राम्य । श्राम्य । क्षाम्य । माद्य । श्ये इति किम् । भ्रमति । अत्यादाविस्येत्र । शंशन्ति ॥ १११ ॥

ष्ठिव्सिवोऽनटि वा । ४ । २ । ११२ ।

ष्ठिव्सिवोरनटि दीर्घो वा स्यात् । निष्ठीवनम् । निष्ठेवनम् । सीवनम् । सेवनम् ॥ ११२ ॥

म्व्यस्याः । ४ । २ । ११३ ।

धातोर्विहिते मादौ वादौ चाऽत आ दीर्घः स्यात् । पचामि । पचावः पचामः ॥ ११३ ॥

अनतोऽन्तोऽदात्मने । ४ । २ । ११४ ।

अनतः परस्यात्मनेपदस्थस्यान्तोऽत् स्यात् । चिन्वते । आत्मनेपद इति किम् । चिन्वन्ति । अनत इति किम् । पचन्ते ॥ ११४ ॥

शीङोरत् । ४ । २ । ११५ ।

शीङः परस्यात्मनेपदस्थस्यान्तोरत् स्यात् । शेरते ॥ ११५ ॥

वेत्तेर्नवा । ४ । २ । ११६ ।

वेत्तेः परस्यात्मनेपदस्थस्यान्तोरद् वा स्यात् । संविद्रते । संविदते ॥

तिवां णवः परस्मै । ४ । २ । ११७ ।

वेत्तेः परेषां परस्मैपदानां तिवादीनां परस्मैपदान्येव णवादयो नव यथासङ्ख्यं वा स्युः । वेद । विदतुः । विदुः । वेत्थ । विदथुः । विद । वेद । विद्व । विद्म । पक्षे वेत्तीत्यादि ॥ ११७ ॥

ब्रूगः पञ्चानां पञ्चाहश्च । ४ । २ । ११८ ।

ब्रूगः परेषां तिवादीनां पञ्चानां यथासङ्ख्यं पञ्च णवादयो वा स्युः तद्योगे ब्रूग आहश्च । आह । आहतुः । आहुः । आत्थ । आहथुः । पक्षे ब्रवीतीत्यादि ॥ ११८ ॥

आशिषि तुह्योस्तातङ् । ४ । २ । ११९ ।

आशीरर्थयोस्तुह्योस्तातङ् वा स्यात् । जीवतात् । जीवतु भवान् । जीव तात् । जीव त्वम् । नन्दतात् । नन्द त्वम् । आशिषीति किम् । जीवत् ॥ ११९ ॥

आतो णव औः । ४ । २ । १२० ।

आतः परस्य णव औः स्यात् । पपौ ॥ १२० ॥

आतामाते आथामाथे आदिः । ४ । २ । १२१ ।

आत्परेषामेषामात इः स्यात् । पचेताम् । पचेते । पचेथाम् । पचेथे । आदिति किम् । मिमाताम् ॥ १२१ ॥

यः सप्तम्याः । ४ । २ । १२२ ।

आत्परस्य सप्तम्याया शब्दस्येः स्यात् । पचेत् । पचेः ॥ १२२ ॥

याम्युसो रियमियुसौ । ४ । २ । १२३ ।

आत्परयोर्याम्युसोर्यथासंख्यमियम्, इयुसौ स्याताम् । पचेयम् । पचेयुः ॥ १२३ ॥

इत्याचार्यहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनलघुवृत्तौ चतुर्थस्याध्यायस्य द्वितीयः पादः ॥

अर्हम्

नामिनो गुणोऽक्ङिति ।४।३।१।

नाम्यन्तस्य धातोः क्ङिद्वर्जे प्रत्यये गुणः स्यात् । चेता । अक्ङितीति किम् । युतः ॥ १ ॥

उश्नोः । ४ । ३ । २ ।

धातोरुश्नोः प्रत्यययोरक्ङिति गुणः स्यात् । तनोति । सुनोति ॥

पुस्पौ । ४ । ३ । ३ ।

नाम्यन्तस्य धातोः पुसि पौ च गुणः स्यात् । ऐयरुः । अपर्पीति ।३।

लघोरुपान्त्यस्य । ४ । ३ । ४ ।

धातोरुपान्त्यस्य नामिनोलघोरक्ङिति गुणः स्यात् । भेत्ता । लघोरिति किम् । ईहते । उपान्त्यस्येति किम् । भिनत्ति ॥ ४ ॥

मिदः श्ये । ४ । ३ । ५ ।

मिदेरुपान्त्यस्य श्ये गुणः स्यात् । मेद्यति ॥ ५ ॥

जागुः किति । ४ । ३ । ६ ।

जागुः किति गुणः स्यात् । जागरितः ॥ ६ ॥

ऋवर्णदृशोऽङि ।४।३।७।

ऋवर्णान्तानां दृशेश्चाऽङि परे गुणः स्यात् । आरत् । असरत् । अजरत् । अदर्शत् ॥ ७ ॥

स्कृच्छृतोऽकि परोक्षायाम् ।४।३।८।

स्कृच्छोः ऋदन्तानां च नामिनः परोक्षायां गुणः स्यात् नतु कोपलक्षितायां क्वसुकानोः । सञ्चस्करुः । आनर्च्छुः । तेरुः । अकीति किम् । सञ्चस्कृवान् ॥ ८ ॥

संयोगादृदर्त्तेः । ४ । ३ । ९ ।

संयोगात्परो य ऋत् तदन्तस्यार्त्तेश्च परोक्षायामकि गुणः स्यात्। सस्मरुः । सस्वरुः । आरुः । संयोगादिति किम् । चक्रुः ॥ ९ ॥

क्ययङाशीर्ये । ४ । ३ । १० ।

संयोगात् य ऋत्तदन्तस्यार्त्तेश्च क्ये यङ्याशीर्ये च गुणः स्यात् । स्मर्यते । स्वर्यते । अर्यते। सास्मर्यते। सास्वर्यते। अरार्यते । स्मर्यात् । अर्यात् ॥ १० ॥

न वृद्धिश्चाविति क्ङिल्लोपे।४।३।११।

अविति प्रत्यये यः कितोङितश्च लोपस्तस्मिन् सति गुणोवृद्धिश्च न स्यात् । चेच्यः । मरीमृजः ॥ ११ ॥

भवतेः सिज्लुपि । ४।३।१२ ।

भुवः सिज्लुपि गुणो न स्यात् । अभूत् । सिज्लुपीति किम् । व्यत्यभविष्ट ॥ १२ ॥

सूतेः पञ्चम्याम् । ४ । ३ । १३ ।

सूतेः पञ्चम्यां गुणो न स्यात् । सुवै ॥ १३ ॥

द्व्युक्तोपान्त्यस्य शिति स्वरे ।४।३।१४।

द्व्युक्तस्य धातोरुपान्त्यस्य नामिनः स्वरादौ शिति गुणो न स्यात्। नेनिजानि । उपान्त्यस्येति किम् । जुहवानि । शितीति किम् । निनेज ॥ १४ ॥

ह्विणोरप्विति व्यौ । ४ । ३ । १५ ।

ह्वोरिणश्च नामिनः स्वरादावपित्यविति शिति यथासङ्ख्यं व्यौ स्याताम् । जुह्वति । यन्तु । अप्वितीति किम् । अजुहवुः । अयानि ॥

इको वा । ४ । ३ । १६ ।

इकः स्वरादाविति शिति य्वा स्यात् । अधियन्ति । अधीयन्ति ॥

कुटादेर्ङिद्वदञ्णित् ।४।३।१७।

कुटादेः परोऽञ्णिद्वर्जप्रत्ययो ङिद्वत्स्यात् । कुटिता । गुता । अञ्णिदिति किम् । उत्कोटः । उच्चुकोट ॥ १७ ॥

विजेरिट् । ४ । ३ । १८ ।

विजेरिट् ङिद्वत्स्यात् । उद्विजिता । इडिति किम् । उद्वेजनम् ॥

वोर्णोः । ४ । ३ । १९ ।

ऊर्णोरिड् वा ङिद्वत्स्यात् । प्रोर्णुविता । प्रोर्णविता ॥ १९ ॥

शिदवित् । ४ । ३ । २० ।

धातोर्विद्वर्जः शित्प्रत्ययो ङिद्वत्स्यात् । इतः । क्रीणाति । अविदिति किम् । एति । शिदिति किम् । चेषीष्ट ॥ २० ॥

इन्ध्यसंयोगात्परोक्षा किद्वत् ।४।३ । २१।

इन्धेरसंयोगान्ताच्च परा अवित्परोक्षा किद्वत्स्यात् । समीधे । निन्युः । इन्ध्यसंयोगादिति किम् । सस्रंसे ॥ २१ ॥

स्वञ्जेर्नवा । ४ । ३ । २२ ।

स्वञ्जेः परोक्षा वा किद्वत्स्यात् । सस्वजे । सस्वञ्जे ॥ २२ ॥

जनशोन्युपान्त्ये तादिः क्त्वा ।४।३।२३।

जन्तान्नशेश्च न्युपान्त्ये सति तादिः क्त्वा किद्वद्वा स्यात् । रक्त्वा । रङ्क्त्वा । नष्ट्वा । नंष्ट्वा । नीति किम् । भुक्त्वा । उपान्त्य इति किम् । निक्त्वा । तादिरिति किम् । विभज्य ॥ २३ ॥

ऋतृषमृषकृशवञ्चलुञ्चथफः सेट् ।४।३।२४।

न्युपान्त्ये सत्येभ्योवा क्त्वा सेट् किद्वत्स्यात् । ऋतित्वा । अर्त्तित्वा । तृषित्वा । तर्षित्वा । मृषित्वा । मर्षित्वा । कृशित्वा । कर्शित्वा । वचित्वा । वञ्चित्वा । लुचित्वा । लुञ्चित्वा । श्रथित्वा । श्रन्थित्वा । गुफित्वा । गुम्फित्वा । न्युपान्त्य इति किम् । कोथित्वा । रेफित्वा । सेटिति किम् । वक्त्वा ॥ २४ ॥

वौ व्यञ्जनादेः सन्चाऽयः ।४।३।२५।

वौउदित्युपान्त्ये सति व्यञ्जनादेर्धातोः परः क्त्वा सन् च सेटौ किद्वा स्यातां नतु यन्तात् । द्युतित्वा । द्योतित्वा । दिद्युतिषते । दिद्योतिषते । लिखित्वा । लेखित्वा । लिलिखिषति । लिलेखिषति । वाविति किम् । वर्त्तित्वा । व्यञ्जनादेरिति किम् । उषित्वा । अय इति किम् । देवित्वा ॥ २५ ॥

उतिशवर्हाद्भ्यः क्तौ भावारम्भे ।४।३।२६।

उत्युपान्त्ये सति शवर्हेभ्यो अदादिभ्यश्च परौ भावारम्भयोः क्तक्तवतू सेटौ वा किद्वत्स्याताम् । कुचितम् । कोचितमनेन । प्रकुचितः । प्रकोचितः । प्रकुचितवान् । प्रकोचितवान् । रुदितम् । रोदितमेभिः । प्ररुदितः । प्ररोदितः । प्ररुदितवान् । प्ररोदितवान् । उतीति किम् । श्वितितमेभिः । शवर्हाद्य इति किम् । प्रगुधितः । भावारम्भ इति किम् । रुचितः ॥२६॥

न डीङ्शीङ्पूङ्धृषिक्ष्विदिस्विदिमिदः । ४ । ३ । २७ ।

एभ्यः परौ सेटौ क्तक्तवतू किद्वन्न स्याताम् । डयितः । डयितवान् । शयितः । शयितवान् । पवितः । पवितवान् । प्रधर्षितः । प्रधर्षितवान् । प्रक्ष्वेदितः । प्रक्ष्वेदितवान् । प्रस्वेदितः । प्रस्वेदितवान् । प्रमेदितः । प्रमेदितवान् । सेटावित्येव । डीनः । डीनवान् ॥ २७ ॥

मृषः क्षान्तौ । ४ । ३ । २८ ।

क्षमार्थान्मृषः सेटौ क्तक्तवतू किद्वन्न स्याताम् । मर्षितः । मर्षितवान् । क्षान्ताविति किम् । अपमृषितं वाक्यम् ॥ २८ ॥

क्त्वा । ४ । ३ । २९ ।

धातोः क्त्वा सेट् किद्वन्न स्यात् । देवित्वा । सेडित्येव द्यूत्वा ॥२९॥

स्कन्दस्यन्दः । ४ । ३ । ३० ।

आभ्यां क्त्वा किद्वन्न स्यात् । स्कन्त्वा । स्यन्त्वा ॥ ३० ॥

क्षुधक्लिशकुषगुधमृडमृदवदवसः।४।३।३१।

एभ्यः क्त्वा सेट् किद्वत्स्यात् । क्षुधित्वा । क्लिशित्वा । कुषित्वा । गुधित्वा । मृडित्वा । मृदित्वा । उदित्वा । उषित्वा ॥ ३१ ॥

रुदविदमुषग्रहस्वपप्रच्छः सन्च। ४।३।३२।

एभ्यः क्त्वा सन् च किद्वत्स्यात् । रुदित्वा । रुरुदिषति । विदित्वा । विविदिषति । मुषित्वा । मुमुषिषति । गृहीत्वा । जिघृक्षति । सुप्त्वा । सुषुप्सति । पृष्ट्वा । पिपृच्छिषति ॥ ३२ ॥

नामिनोऽनिट् । ४ । ३ । ३३ ।

नाम्यन्ताद्धातोरनिट् सन् किद्वत्स्यात् । चिचीषति । अनिडिति किम् । शिशयिषते ॥ ३३ ॥

उपान्त्ये । ४ । ३ । ३४ ।

नाम्युपान्त्ये सति धातोः सन्ननिट् किद्वत्स्यात् । बिभित्सति ॥३४॥

सिजाशिषावात्मने । ४ । ३ । ३५ ।

नाम्युपान्त्ये सति धातोरात्मनेपदविषयावनिटौ सिजाशिषौ किद्वत्स्याताम् । अभित्त । भित्सीष्ट । आत्मने इति किम् । अभ्राक्षीत् ॥३५॥

ऋवर्णात् । ४ । ३ । ३६ ।

ऋवर्णान्ताद्धातोरनिटावात्मनेपदविषयौ सिजाशिषौ किद्वत्स्याताम्। अकृत । कृषीष्ट । अतीर्ष्ट । तीर्षीष्ट ॥ ३६ ॥

गमो वा । ४ । ३ । ३७ ।

गमेरात्मनेपदविषयौ सिजाशिषौ किद्वद्वा स्याताम् । समगत । समगंस्त । संगसीष्ट । संगंसीष्ट ॥ ३७ ॥

हनः सिच् । ४ । ३ । ३८ ।

हन्तेरात्मनेपदविषयः सिच् किद्वत्स्यात् । आहत ॥ ३८ ॥

यमः सूचने । ४ । ३ । ३९ ।

सूचनार्थाद्यमेरात्मनेपदविषयः सिच् किद्वत्स्यात् । उदायत । सूचन इति किम् । आयंस्त रज्जुम् ॥ ३९ ॥

वा स्वीकृतौ । ४ । ३ । ४० ।

स्वीकारार्थाद्यमेरात्मनेपदविषयः सिच् किद्वद्वा स्यात् । उपायत । उपायंस्त महास्त्राणि । स्वीकृताविति किम् । आयंस्त पाणिम् ॥

इश्च स्थादः । ४ । ३ । ४१ ।

स्था दासंज्ञकाच्चात्मनेपदविषयः सिच् किद्वत्स्यात् तद्योगे च स्थादोरिश्च । उपास्थित । आदित । व्यधित ॥ ४१ ॥

मृजोऽस्य वृद्धिः । ४ । ३ । ४२ ।

मृजेर्गुणे सत्यऽस्य वृद्धिः स्यात् । मार्ष्टि । अत इति किम् । मृष्टः ॥ ४२ ॥

ऋतः स्वरे वा । ४ । ३ । ४३ ।

मृजे ऋतः स्वरादौ प्रत्यये वृद्धिर्वा स्यात्। परिमार्जन्ति। परिमृजन्ति। ऋत इति किम्। ममार्ज। स्वर इति किम्। मृज्वः॥ ४३॥

सिचि परस्मै समानस्याङिति।४।३।४४।

समानान्तस्य धातोः परस्मैपदविषये सिच्यङिति वृद्धिः स्यात्। अचैषीत्। परस्मैपद इति किम्। अच्योष्ट। समानस्येति किम्। अगवीत्। अङितीति किम्। न्यनुवीत्॥ ४४॥

व्यञ्जनानामनिटि।४।३।४५।

व्यञ्जनान्तस्य धातोः परस्मैपदविषये अनिटि सिचि समानस्य वृद्धिः स्यात्। अराङ्क्षीत्। समानस्येत्येव। उदवोढाम्। अनिटीति किम्। अतक्षीत्॥ ४५॥

वोर्णुगः सेटि।४।३।४६।

ऊर्णोः सेटि सिचि परस्मैपदे वृद्धिर्वा स्यात्। प्रौर्णावीत्। प्रौर्णवीत्। प्रौर्णुवीत्॥ ४६॥

व्यञ्जनादेर्वोपान्त्यस्यातः।४।३।४७।

व्यञ्जनादेर्धातोरुपान्त्यस्यातः सेटि सिचि परस्मैपदे वृद्धिर्वा स्यात्। अकाणीत्। अकणीत्। व्यञ्जनादेरिति किम्। माभवानटीत्। उपान्त्यस्येति किम्। अवधीत्। अत इति किम्। अदेवीत्। सेटीत्येव। अधाक्षीत्॥ ४७॥

वदव्रजलः।४।३।४८।

वदव्रजोर्लन्तरन्तयोश्चोपान्त्यस्याऽस्य परस्मैपदे सेटि सिचि वृद्धिः स्यात्। अवादीत्। अव्राजीत्। अज्वालीत्। अक्षारीत्॥ ४८॥

नश्विजागृशसक्षणह्म्येदितः।४।३।४९।

एषां ह्म्यन्तानामेदितां च परस्मैपदे सेटि सिचि वृद्धिर्न स्यात्। अश्व-

यीत् । अजागरीत् । अशसीत् अक्षणीत् । अग्रहीत् । अवमीत् । अहर्यीत् । अकगीत् ॥ ४९ ॥

ञ्णिति । ४ । ३ । ५० ।

ञिति णिति च परे धातोरुपान्त्यस्यातो वृद्धिः स्यात् । पाकः । पपाच ॥ ५० ॥

नामिनोऽकलिहले: । ४ । ३ । ५१ ।

नाम्यन्तस्य धातोर्नाम्नो वा कलिहलिवर्जस्य ञ्णिति वृद्धिः स्यात् । अत्रायि । कारकः । अपीपटत् । कलिहलि वर्जनं किम् । अचकलत् । अजहलत् ॥ ५१ ॥

जागुर्ञिणवि । ४ । ३ । ५२ ।

जागुर्ञौ णव्येव च ञ्णिति वृद्धिः स्यात् । अजागारि । जजागार । ञिणवीति किम् । जागरयति ॥ ५२ ॥

आत ऐः कृञ्ञौ । ४ । ३ । ५३ ।

आदन्तस्य धातोर्ञ्णिति कृति ञौ च ऐः स्यात् । दायः । दायकः । अदायि । कृदिति किम् । ददौ ॥ ५३ ॥

न जनवधः । ४ । ३ । ५४ ।

अनयोः कृति ञ्णिति ञौ च वृद्धिर्न स्यात् । प्रजनः । जन्यः । अजनि । वधः । वध्यः । अवधि ॥ ५४ ॥

मोऽकमियमिरमिनमिगमिवमा-चमः । ४ । ३ । ५५ ।

मन्तस्य धातोः कम्यादिवर्जस्य ञ्णिति कृति ञौ च वृद्धिर्न स्यात् शमः । शमकः । अशमि । कम्यादिवर्जनं किम् । कामः । कामुकः । अकामि । यामः । रामः । नामः । अगामि । वामः । आचामकः ॥ ५५ ॥

विश्रमेर्वा । ४ । ३ । ५६ ।

विश्रमेर्ञ्णिति कृति ञौ च वृद्धिर्वा स्यात् । विश्रामः । विश्रमः । विश्रामकः । विश्रमकः । व्यश्रामि । व्यश्रमि ॥ ५६ ॥

उद्यमोपरमौ । ४ । ३ । ५७ ।

उदुपाभ्यां यमिरम्योर्घञि वृद्ध्यभावो निपात्यते । उद्यमः।उपरमः॥५७॥

णिद्वाऽन्त्यो णव् । ४ । ३ । ५८।

परोक्षाया अन्त्यो णव् णिद्वा स्यात् । अहं चिचय । चिचाय । चुकुट । चुकोट । अन्त्य इति किम् । स पपाच ॥ ५८ ॥

उतऔर्विति व्यञ्जनेऽद्वेः । ४ ।३। ५९ ।

अद्व्युक्तस्योदन्तस्य धातोर्व्यञ्जनादौ विति औः स्यात् । यौति । उत इति किम् । एति । धातोरित्येव । सुनोति । वितीति किम् । रुतः। व्यञ्जन इति किम् । स्तवानि । अद्वेरिति किम् । जुहोति ॥ ५९ ॥

वोर्णोः । ४ । ३ । ६० ।

ऊर्णोरद्व्युक्तस्य व्यञ्जनादौ वित्यौर्वा स्यात् । प्रोर्णौति । प्रोर्णोति । अद्वेरित्येव । प्रोर्णोनोति ॥ ६० ॥

नदिस्योः । ४ । ३ । ६१ ।

ऊर्णोर्दिस्योः परयोरौर्न स्यात् । प्रौर्णोत् । प्रौर्णोः ॥ ६१ ॥

तृहः श्नादीत् । ४ । ३ । ६२ ।

तृहेः श्नात्परो व्यञ्जनादौ वितिपरे ईत् स्यात् । तृणेढि ॥ ६२ ॥

ब्रूतः परादिः । ४ । ३ । ६३ ।

ब्रुव ऊतः परो व्यञ्जनादौ विति परादिरीत् स्यात् । ब्रवीति । ऊत इति किम् । आत्थ ॥ ६३ ॥

यङ्तुरुस्तोर्बहुलम् । ४ । ३ । ६४ ।

यङ्लुबन्तात्तुरुस्तुभ्यश्च परो व्यञ्जनादौ विति ईत् बहुलं परादिः स्यात् क्वचिद्वा । बोभवीति । बोभोति । क्वचिन्न । वर्वर्त्ति । तवीति । तौति । रवीति । रौति । स्तवीति । स्तौति । अद्वेरित्येव । तुतोथ । तुष्टोथ ॥ ६४ ॥

सः सिजस्तेर्दिस्योः । ४ । ३ । ६५ ।

सिजन्ताद्धातोरस्तेश्च सन्तात्परो दिस्योः परयोः परादिरीत्स्यात् । अकार्षीत् । अकार्षीः । आसीत् । आसीः । स इति किम् । अदात् ॥ ६५ ॥

पिबैतिदाभूस्थः सिचोलुप् परस्मै न चेट् । ४ । ३ । ६६ ।

एभ्यः परस्य सिचः परस्मैपदे लुप् स्यात् लुब्योगे नचेट् । अपात् । अगात् । अध्यगात् । अदात् । अधात् । अभूत् । अस्थात् । परस्मैपद इति किम् । अपासत पयांसि तैः ॥ ६६ ॥

ट्घेघ्राशाच्छासो वा । ४ । ३ । ६७ ।

एभ्यः परस्य सिचः परस्मैपदे लुब् वा स्यात् लुब्योगे च नेट् । अधात् । अधासीत् । अघ्रात् । अघ्रासीत् । अशात् । अशासीत् । अच्छात् । अच्छासीत् । असात् । असासीत् ॥ ६७ ॥

तन्भ्योवा तथासि न्णोश्च । ४ । ३ । ६८ ।

तनादिभ्यः परस्य सिचस्तथासिच लुप् वा स्यात्तद्योगेन्णोश्च लुप्न चेट् । अतत । अतनिष्ट । अतथाः । अतनिष्ठाः । असत । असनिष्ट । असथाः । असनिष्ठाः ॥ ६८ ॥

सनस्तत्रावा । ४ । ३ । ६९ ।

सनोऽलुपि सत्यामावा स्यात् । असात । असत । असाथाः। असथाः। तत्रेति किम् । असनिष्ट ॥ ६९ ॥

धुट् ह्रस्वाल्लुगनिटस्तथोः ।४।३।७०।

धुडन्तात् ह्रस्वान्ताच्च धातोः परस्यानिटः सिचस्तादौ थादौ च लुक् स्यात् । अभित्त । अभित्थाः। अकृत। अकृथाः। अनिट इति किम्। व्यद्योतिष्ट ॥ ७० ॥

इट ईति । ४ । ३ । ७१ ।

इटः परस्य सिच ईति लुक् स्यात् । अलावीत् । इट इति किम् । अकार्षीत् । ईतीति किम् । अभाणिषम् ॥ ७१ ॥

सोधि वा । ४ । ३ । ७२ ।

धातोर्धादौ प्रत्यये सोऽलुग्वा स्यात् । चकाधि । चकाद्धि । अलविध्वम् । अलविढ्वम् ॥ ७२ ॥

अस्तेः सिहस्त्वेति । ४ । ३ । ७३ ।

अस्तेः सः सादौ प्रत्यये लुक् स्यात् एति तु सोहः । असि । व्यतिसे । व्यतिहे । भावयामहे ॥ ७३ ॥

दुहदिहलिहगुहोदन्त्यात्मने वा सकः । ४ । ३ । ७४ ।

एभ्यः परस्य सकोदन्त्यादौ आत्मनेपदे लुग्वा स्यात् । अदुग्ध । अधुक्षत । अदिग्ध । अधिक्षत । अलीढाः । अलिक्षथाः । न्यगुह्वहि । न्यघुक्षावहि । दन्त्य इति किम् । अधुक्षामहि ॥ ७४ ॥

स्वरेऽतः । ४ । ३ । ७५ ।

सकोऽस्य स्वरादौ प्रत्यये लुक स्यात् । अधुक्षाताम् ॥ ७५ ॥

दरिद्रोऽद्यतन्यां वा । ४ । ३ । ७६ ।

दरिद्रोऽद्यतन्यां विषये लुग्वा स्यात् । अदरिद्रीत् । अदरिद्रासीत् ॥ ७६ ॥

अशित्यस्सन्णकच्णकानटि ।४।३।७७।

सादिसन्नादिवर्जे अशिति विषये दरिद्रोलुग् स्यात् । दुर्दरिद्रम् । अशितीति किम् । दरिद्राति । सन्नादिवर्जनं किम् । दिदरिद्रासति । दरिद्रायको याति । दरिद्रायकः । दरिद्राणम् ॥ ७७ ॥

व्यञ्जनाद् देः सश्च दः ।४।३। ७८।

धातोर्व्यञ्जनान्तात्परस्य देर्लुक् स्याद् यथा सम्भवं धातोःसो द च । अचकात् । अजागः । अविभः । अन्वशात् । व्यञ्जनादिति किम् । अयात् ॥ ७८ ॥

सेः स्द्धाञ्चरुर्वा । ४ । ३ । ७९ ।

व्यञ्जनान्ताद्धातोः परस्य सेर्लुक् स्यात् यथासम्भवं सदधांवा रुश्च । अचकास्त्वम् । अचकात्त्वम् । अभिनस्त्वम् । अभिनत्त्वम् । अरुणस्त्वम् । अरुणत्त्वम् ॥ ७९ ॥

योऽशिति । ४ । ३ । ८० ।

धातोर्व्यञ्जनान्तात्परस्य योऽशिति प्रत्यये लुक् स्यात् । जङ्गमिता । व्यञ्जनादित्येव । लोलूयिता । अशितीति किम् । बेभिद्यते ॥ ८० ॥

क्यो वा । ४ । ३ । ८१ ।

धातोर्व्यञ्जनात्परस्य क्योऽशिति प्रत्यये लुग्वा स्यात् । समिधिष्यति । समिध्यिष्यति । दृषदिष्यते । दृषद्यिष्यते ॥ ८१ ॥

अतः । ४ । ३ । ८२ ।

अदन्ताद्धातोर्विहितेऽशिति प्रत्यये धातोरतो लुक् स्यात् । कथयति । विहितविशेषणं किम् । गतः ॥ ८२ ॥

णेरनिटि । ४ । ३ । ८३ ।

अनिट्यऽशिति प्रत्यये णेर्लुक् स्यात् । अततक्षत् । चेतनः । अनिटीति किम् । कारयिता ॥ ८३ ॥

सेट्क्तयोः । ४ । ३ । ८४ ।

सेटोः क्तयोः परयोर्णेर्लुक् स्यात् । कारितः । गणितवान् ॥ ८४ ॥

आमन्ताल्वाय्येत्न्वावय् । ४ । ३ । ८५ ।

एषु परेषु णेरय् स्यात् । कारयाञ्चकार । गण्डयन्तः । स्पृहयालुः । महयाय्यः । स्तनयित्नुः ॥ ८५ ॥

लघोर्यपि । ४ । ३ । ८६ ।

लघोः परस्य णेर्यप्यय् स्यात् । प्रशमय्य । लघोरिति किम् । प्रतिपाद्य ॥ ८६ ॥

वाऽऽप्नोः । ४ । ३ । ८७ ।

आप्नोः परस्य णेर्यप्यऽय् वा स्यात् । प्रापय्य । प्राप्य । आप्नोरिति किम् । अध्याप्य ॥ ८७ ॥

मेङो वा मित् । ४ । ३ । ८८ ।

मेङो यपि मिद्वा स्यात् । अपमित्य । अपमाय ॥ ८८ ॥

क्षेः क्षीः । ४ । ३ । ८९ ।

क्षेर्यपि क्षीः स्यात् । प्रक्षीय ॥ ८९ ॥

क्षय्यजय्यौ शक्तौ । ४ । ३ । ९० ।

क्षिज्योरन्तस्य शक्तौ गम्यायां ये प्रत्ययेऽय् निपात्यते । क्षय्यो व्याधिः । जय्यः शत्रुः । शक्ताविति किम् । क्षेयं पापम् । जेयं मनः ॥९०॥

क्रय्यः क्रयार्थे । ४ । ३ । ९१ ।

क्रियोऽन्तस्य ये प्रत्ययेऽय् निपात्यते । क्रयाय चेत्प्रसारितोऽर्थः । क्रय्यो गौः । क्रयार्थ इति किम् । क्रेयं ते धान्यं न चास्ति प्रसारितम्॥

सस्तः सि । ४ । ३ । ९२ ।

धातोः सन्तस्याऽशिति सादौ प्रत्यये विषयभूते तः स्यात् । वत्स्यति । स इति किम् । यक्षीष्ट । सीति किम् । वसिषीष्ट ॥ ९२ ॥

दीय् दीङः क्ङिति स्वरे । ४ । ३ । ९३ ।

दीङः क्ङिति अशिति स्वरे दीय् स्यात् । उपदिदीयते । क्ङितीति किम् । उपदानम् । स्वर इति किम् । उपदेदीयते ॥ ९३ ॥

इडेत्पुसि चातो लुक् । ४ । ३ । ९४ ।

क्ङित्यशिति स्वरे इटि एति पुसि च परे आदन्तस्य धातोर्लुक् स्यात् । पपुः । अदधत् । पपिथ । व्यतिरे । अदुः ॥ ९४ ॥

संयोगादेर्वाशिष्येः । ४ । ३ । ९५ ।

धातोः संयोगादेरादन्तस्य क्ङित्याशिषि एर्वा स्यात् । ग्लेयात् । ग्लायात् । संयोगादेरिति किम् । यायात् । क्ङितीत्येव । ग्लासीष्ट ॥

गापास्थासादामाहाकः । ४ । ३ । ९६ ।

एषां क्ङित्याशिष्येः स्यात् । गेयात् । पेयात् । स्थेयात् । अवसेयात् । देयात् । धेयात् । मेयात् । हेयात् ॥ ९६ ॥

ईर्व्यञ्जनेऽयपि । ४ । ३ । ९७ ।

गादेर्यब्वर्जे क्ङित्यशिति व्यञ्जनादावीः स्यात् । गीयते । जेगीयते । पीयते । स्थीयते । अवसीयते । दीयते । धीयते । मीयते । हीनः । व्यञ्जन इति किम् । तस्थुः । अयपीति किम् । प्रगाय ॥ ९७ ॥

घ्राध्मोर्यङि । ४ । ३ । ९८ ।

घ्राध्मोर्यङि ईः स्यात् । जेघ्रीयते । देध्मीयते ॥ ९८ ॥

हनोघ्नीर्वधे । ४ । ३ । ९९ ।

हन्तेर्वधार्थस्य यङि घ्नीः स्यात् । जेघ्नीयते । वध इति किम् । गतौ जङ्घन्यते ॥ ९९ ॥

ञ्णिति घात् । ४ । ३ । १०० ।

ञिति णिति च परे हन्तेर्घात्स्यात् । घातः । घातयति ॥ १०० ॥

ञिणवि घन् । ४ । ३ । १०१ ।

ञौ णवि च परे हन्तेर्घन् स्यात् । अघानि । जघान ॥ १०१ ॥

नशेर्नेश्वाऽङि । ४ । ३ । १०२ ।

नशेरङि नेश् वा स्यात् । अनेशत् । अनशत् ॥ १०२ ॥

श्वयत्यसूवचपतः श्वास्थवोचपप्तम् ।४।३।१०३।

एषामङि यथासङ्ख्यं श्वादयः स्युः । अश्वत । आस्थत् । अवोचत् । अपप्तत् ॥ १०३ ॥

शीङ एः शिति । ४ । ३ । १०४ ।

शीङः शीत्येः स्यात् । शेते ॥ १०४ ॥

क्ङिति यि शय् ।४।३।१०५।

शीङः क्ङिति यादौ शय् स्यात् । शय्यते । शाशय्यते । क्ङितीति किम् । शेयम् ॥ १०५ ॥

उपसर्गादूहो ह्रस्वः । ४ । ३ । १०६ ।

उपसर्गात्परस्योहतेरूतः क्ङिति यादौ परे ह्रस्वः स्यात् । समुह्यते । उपसर्गादिति किम् । ऊह्यते । यीत्येव । समूहितम् । ऊ ऊह इति प्रश्लेषः किम् । आउह्यते ओह्यते । समोह्यते ॥ १०६ ॥

आशिषीणः । ४ । ३ । १०७ ।

उपसर्गात्परस्येण ईतः क्ङिति यादावाशिषि ह्रस्वः स्यात् । उदियात् । ई इण इति प्रश्लेषः किम् । आ इयात् एयात् । समेयात् ॥

दीर्घश्च्वियङ्यक्क्येषु च । ४ । ३ । १०८ ।

एषु यादावाशिषि च दीर्घः स्यात् । शुचीकरोति । तोष्टूयते । मन्त्रयति । दधीयति । भृशायते । लोहितायते । स्तूयते । ईयात् ॥१०८॥

ऋतोरीः । ४ । ३ । १०९ ।

च्व्यादौ परे ऋदन्तस्य ऋतः स्थाने रीः स्यात् । पित्रीस्यात् । चेक्रीयते । मात्रीयते । पित्रीयते । ऋत इति किम् । चेकीर्यते ॥ १०९॥

रिः शक्याशीर्ये । ४ । ३ । ११० ।

ऋदन्तस्य धातोः ऋतः शक्ये आशीर्ये च परे रिः स्यात् । व्याप्रियते । क्रियते । ह्रियात् ॥ ११० ॥

ईश्च्वाववर्णस्याऽनव्ययस्य । ४ । ३ । १११ ।

अनव्ययस्यावर्णान्तस्य च्वावीः स्यात् । शुक्लीस्यात् । मालीस्यात् । अनव्ययस्येति किम् । दिवाभूता रात्रिः ॥ १११ ॥

क्यनि । ४ । ३ । ११२ ।

अवर्णान्तस्य क्यनि ईः स्यात् । पुत्रीयति । मालीयति ॥ ११२ ॥

क्षुत्तृड्गर्द्धेऽशनायोदन्यधनायम् ।४।३।११३।

एष्वर्थेषु यथासङ्ख्यमशनादयः क्यन्नन्ता निपात्यन्ते । अशनायति । उदन्यति । धनायति । क्षुदादाविति किम् । अशनीयति । उदकीयति । धनीयति दातुम् ॥ ११३ ॥

वृषाश्वान्मैथुने स्सोऽन्तः ।४।३।११४।

आभ्यां मैथुनार्थाभ्यां क्यनि स्सान्तः स्यात् । वृषस्यति गौः । अश्वस्यति वडवा । मैथुने इति किम् । वृषीयति । अश्वीयति ब्राह्मणी ॥

अश्च लौल्ये ।४।३।११५।

भोगेच्छातिरेको लौल्यं तत्र गम्ये क्यनि परे नाम्नः स्सोऽस्चान्तः स्यात् । दधिस्यति । दध्यस्यति । लौल्य इति किम् । क्षीरीयति दातुम् ॥ ११५ ॥

इत्याचार्यहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनलघुवृत्तौ चतुर्थस्याऽध्यायस्य तृतीयः पादः समाप्तः ।

॥ अर्हम् ॥

अस्तिब्रुवोर्भूवचावशिति ।४।४।१।

अस्तिब्रुवोर्यथासङ्ख्यं भूवचौ स्यातां अशिति विषये । भव्यम् । अवोचत् । अशितीति किम् । स्यात् । ब्रूते ॥ १ ॥

अघञ्क्यबलच्यजेर्वी ।४।४।२।

अघञादावशिति विषये अजेर्वी स्यात् । प्रवेयम् । अघञ्क्यबलचीति किम् । समाजः । समज्या । उदजः । अजः पशुः ॥ २ ॥

त्रने वा ।४।४।३।

त्रनयोर्विषयभूतयोरजेर्वी वा स्यात्। प्रवेता। प्राजिता। प्रवयणः। प्राजनो दण्डः ॥ ३॥

चक्षोवाचि क्शांग् ख्यांग् ।४।४।४।

चक्षोवागर्थस्याशिति विषये क्शांग्ख्यांगौ स्याताम् । आक्शास्यति । आक्शास्यते । आख्यास्यति । आख्यास्यते । आक्शेयम् । आख्येयम् । वाचीति किम् । बोधे विचक्षणः ॥ ४ ॥

नवा परोक्षायाम् ।४।४।५।

चक्षोवाचिक्शांग्ख्यांगौ परोक्षायां वा स्याताम्। आचक्शौ । आचख्यौ । आचचक्षे ॥ ५ ॥

भृज्जोभर्ज् ।४।४।६।

भृज्जतेराशिति भर्ज् वा स्यात्। भर्ष्टा भ्रष्टा ॥ ६ ॥

प्राद्दागस्त आरम्भे क्ते ।४।४।७।

आरम्भार्थस्य प्रपूर्वस्य दागः क्ते परे त्तो वा स्यात्।प्रत्तः।प्रदत्तः। प्रादिति किम् । परीत्तम् ॥ ७ ॥

निविस्वन्ववात् ।४।४।८।

एभ्यः परस्य दागः क्ते त्तो वा स्यात्। नीत्तम्। निदत्तम् । वीत्तम्। विदत्तम्। सूत्तम् । सुदत्तम् । अनूत्तम्। अनुदत्तम्। अवत्तम्। अवदत्तम् ॥

स्वरादुपसर्गाद्दस्तिकित्यधः ।४।४।९।

स्वरान्तादुपसर्गात्परस्य धावर्जस्य दासंज्ञस्य तादौ किति त्तो नित्यं स्यात्। प्रत्तः। परीत्त्रिमम्। उपसर्गादिति किम्। दधिदत्तम्। स्वरादिति किम् । निर्दत्तम् । द इति किम् । प्रदाता व्रीहयः। तीति किम् । प्रदाय । अध इति किम् । निर्धीतः ॥ ९ ॥

दत् । ४ । ४ । १० ।

अधो दासंज्ञस्य तादौ किति दत् स्यात् । दत्तः । दत्तिः । अध इत्येव । धीतः ॥ १० ॥

दोसोमास्थ इः । ४ । ४ । ११ ।

एषां तादौ किति इः स्यात् । निर्दितः । सित्वा । मितिः । स्थितवान् ॥

छाशोर्वा । ४ । ४ । १२ ।

छाशोस्तादौ किति इर्वा स्यात् । अवच्छितः । अवच्छातः । निशितः । निशातः ॥ १२ ॥

शो व्रते । ४ । ४ । १३ ।

श्यतेः क्ते व्रतविषये प्रयोगे नित्यमिः स्यात् । संशितं व्रतम् । संशितः साधुः ॥ १३ ॥

हाको हिः क्त्वि । ४ । ४ । १४ ।

हाकस्तादौ किति क्त्वायां हिः स्यात् । हित्वा । क्त्वीति किम् । हीनः । तीत्येव । प्रहाय ॥ १४ ॥

धागः । ४ । ४ । १५ ।

धागस्तादौ किति हिः स्यात् । विहितः । हित्वा ॥ १५ ॥

यपि चादो जग्ध् । ४ । ४ । १६ ।

तादौ किति यपि चादेर्जग्ध् स्यात् । जग्धिः । प्रजग्ध्य ॥ १६ ॥

घस्लृसनद्यतनीघञचलि । ४ । ४ । १७ ।

एष्वदेर्घस्लृः स्यात् । जिघत्सति । अघसत् । घासः । प्रादनं प्रघसः ॥ १७ ॥

परोक्षायां नवा । ४ । ४ । १८ ।

अदेः परोक्षायां घस्लृरादेशो वा स्यात् । जक्षुः । आदुः ॥ १८ ॥

वेर्वय् । ४ । ४ । १९ ।

वेगः परोक्षायां वय् वा स्यात् । ऊयुः । ववुः ॥ १९ ॥

ऋः शृदृप्रः । ४ । ४ । २०

एषां परोक्षायामृर्वा स्यात् । विशश्रतुः । विशशरतुः । विदद्रतुः। विददरतुः । निपप्रतुः । निपपरतुः ॥ २० ॥

हनो वध आशिष्यऽञौ । ४ । ४ । २१ ।

आशीर्विषये हन्तेर्वधः स्यात् नतु ञिटि । वध्यात् । अञाविति किम् । घानिषीष्ट ॥ २१ ॥

अद्यतन्यां वा त्वात्मने । ४ । ४ । २२ ।

अद्यतन्यां विषये हनोवधः स्यात् आत्मनेपदे तु वा । अवधीत्। अवधिष्ट । आहत ॥ २२ ॥

इणिकोर्गा । ४ । ४ । २३ ।

इणिकोरद्यतन्यां गाः स्यात् । अगात् । अध्यगात् ॥ २३ ॥

णावज्ञाने गमुः । ४ । ४ । २४ ।

इणिकोरज्ञानार्थयोर्णौ गमुः स्यात् । गमयति । अधिगमयति । अज्ञान इति किम् । अर्थान् प्रत्याययति ॥ २४ ॥

सनीङश्च । ४ । ४ । २५ ।

इङ इणिकोश्चाज्ञानार्थयोः सनि गमुः स्यात् । अधिजिगांसते । जिगमिषति ग्रामम् । मातुरधिजिगमिषति ॥ २५ ॥

गाः परोक्षायाम् । ४ । ४ । २६

इङः परोक्षाविषये गाः स्यात्। अधिजगे ॥ २६ ॥

णौ सन्ङे वा । ४ । ४ । २७ ।

सन्ङे परे णौ इङो गा वा स्यात्। अधिजिगापयिषति । अध्यापिपयिषति । अध्यजीगपत् । अध्यापिपत् । णाविति किम् । अधिजिगांसते । सन्ङ इति किम् । अध्यापयति ॥ २७ ॥

वाऽद्यतनीक्रियातिपत्त्योर्गीङ् ।४।४।२८।

अनयोरिङोगीङ् वा स्यात् । अध्यगीष्ट। अध्यैष्ट। अध्यगीष्यत । अध्यैष्यत ॥ २८ ॥

अड्धातोरादिर्ह्यस्तन्यां चामाङा।४।४।२९।

ह्यस्तन्यामद्यतनीक्रियातिपत्त्योश्च विषये धातोरादिरड् स्यात् नतु माङ्योगे। अयात् । अयासीत्। अयास्यत्। अमाङेति किम् । मास्मकार्षीत् । धातोरिति किम् । प्रायाः ॥ २९ ॥

एत्यस्तेर्वृद्धिः । ४ । ४ । ३० ।

इणिकोरस्तेश्चादेर्ह्यस्तन्यां विषये वृद्धिः स्यात् नतु माङा। आयन् । अध्यायन् । आस्ताम् । अमाङेत्येव । मास्म ते यन्॥ ३०॥

स्वरादेस्तासु । ४ । ४ । ३१ ।

स्वरादेर्धातोरादेरद्यतन्यां क्रियातिपत्तिह्यस्तनीषु विषये वृद्धिः स्यात् अमाङा । आटीत् । ऐषिष्यत् । औज्झत् । अमाङेत्येव। मा सोऽटीत् ॥ ३१ ॥

स्ताद्यशितोऽत्रोणादेरिट् ।४। ४ । ३२।

धातोः परस्य सादेस्तादेश्चाऽशित आदिरिट् स्यात् नतु त्रोणाद्योः।

लविष्यति । लविता । स्तादीति किम् । भूयात् । अशित इति किम् आस्से । अत्रोणादेरिति किम् । शस्त्रम् । वत्सः । हस्तः ॥ ३२ ॥

तेर्ग्रहादिभ्यः । ४ । ४ । ३३ ।

एभ्य एव परस्य स्ताद्यशितस्तेरादिरिट् स्यात् । निग्रहीतिः । अपस्निहितिः । ग्रहादिभ्य इति किम् । शान्तिः ॥ ३३ ॥

गृह्णोऽपरोक्षायां दीर्घः ।४।४।३४।

ग्रहेर्योविहित इट् तस्य दीर्घः स्यात् नतु परोक्षायाम् । ग्रहीता । अपरोक्षायामिति किम् । जगृहिव ॥ ३४ ॥

वृतो नवा ऽनाशीः सिच्परस्मै च । ४ । ४ । ३५ ।

वृभ्यामृदन्तेभ्यश्च परस्येटोदीर्घोवा स्यात् नतु परोक्षाशिषोः सिचि च परस्मैपदे । प्रावरीता । प्रावरिता । वरीता । वरिता । तितरीषति । तितरिषति । परोक्षादिवर्जनं किम् । ववरिथ । तेरिथ । प्रावरिषीष्ट । आस्तरिषीष्ट । प्रावारिषुः । आस्तारिषुः ॥ ३५ ॥

इट्सिजाशिषोरात्मने । ४ । ४ ।३६।

वृतः परयोरात्मनेपदविषये सिजाशिषोरादिरिट् वा स्यात्।प्रावृत। प्रावरिष्ट । अवृत । अवरीष्ट । आस्तीर्ष्ट । आस्तरिष्ट। प्रावृषीष्ट । प्रावरिषीष्ट । वृषीष्ट । वरिषीष्ट । आस्तीर्षीष्ट । आस्तरिषीष्ट । आत्मने इति किम् । प्रावारीत् ॥ ३६ ॥

संयोगादृतः ।४।४। ३७।

धातोः संयोगात्परोय ऋत्तदन्तात्परयोरात्मनेपदविषयशिजाशिषोरादिरिट् वा स्यात् । अस्मरिषाताम्। अस्मृषाताम् । स्मरिषीष्ट। स्मृषीष्ट । संयोगादिति किम् । अकृत ॥ ३७ ॥

धूगौदितः । ४ । ४ । ३८ ।

धूग् औदितश्च परस्य स्ताद्यशित आदिरिड् वा स्यात् । धोता । धविता । रद्धा । रधिता ॥ ३८ ॥

निष्कुषः । ४ । ४ । ३९ ।

निःपूर्वात् कुषः परस्य स्ताद्यशित आदिरिड् वा स्यात् । निष्कोष्टा। निष्कोषिता ॥ ३९ ॥

क्तयोः । ४ । ४ । ४० ।

निष्कुषः परयोः क्तयोरादिरिट् नित्यं स्यात् । निष्कुषितः । निष्कुषितवान् ॥ ४० ॥

जॄव्रश्चः क्त्वः । ४ । ४ । ४१ ।

आभ्यां परस्य क्त्व आदिरिट् स्यात् । जरीत्वा । व्रश्चित्वा ॥ ४१ ॥

ऊदितो वा । ४ । ४ । ४२ ।

ऊदितः परस्य क्त्व आदिरिड् वा स्यात् । दान्त्वा । दमित्वा ॥ ४२ ॥

क्षुधवसस्तेषाम् । ४ । ४ । ४३ ।

आभ्यां परेषां क्तक्तवतु क्त्वामादिरिट् स्यात् । क्षुधितः । क्षुधितवान् । क्षुधित्वा । उषितः । उषितवान् । उषित्वा ॥ ४३ ॥

लुभ्यञ्चेर्विमोहार्चे । ४ । ४ । ४४ ।

आभ्यां यथासङ्ख्यं विमोहनपूजार्थाभ्यां परेषां क्तक्तवतुक्त्वामादिरिट् स्यात् । विलुभितः । विलुभितवान् । लुभित्वा । अञ्चितः । अञ्चितवान् । अञ्चित्वा । विमोहार्चे इति किम् । लुब्धो जाल्मः । उदक्तं जलम् ॥ ४४ ॥

पूङ्क्लिशिभ्यो नवा । ४ । ४ । ४५ ।

पूङ्क्लिशिभ्यां च परेषां क्तक्तवतुक्त्वामादिरिड् वा स्यात् । पूतः । पूतवान् । पूत्वा । पवितः । पवितवान् । पवित्वा । क्लिष्टः । क्लिष्टवान् । क्लिष्ट्वा । क्लिशितः । क्लिशितवान् । क्लिशित्वा ॥ ४५ ॥

सहलुभेच्छरुषरिषस्तादेः । ४ । ४ । ४६ ।

एभ्यः परस्य स्ताद्यशितस्तादेरिट् वा स्यात् । सोढा । सहिता । लोब्धा । लोभिता । एष्टा । एषिता । रोष्टा । रोषिता । रेष्टुम् । रेषितुम् ॥ ४६ ॥

इवृधभ्रस्जदम्भश्रियूर्णुभरज्ञपिसनितनिपतिवृद्दरिद्रः सनः । ४ । ४ । ४७ ।

इवन्तात् ऋधादिभ्य ऋदन्तेभ्योदरिद्रश्च परस्य सन आदिरिट् वा स्यात् । दुद्यूषति । दिदेविषति । ईर्त्सति । अर्दिधिषति । बिभर्क्षति । बिभर्जिषति । धिप्सति । धीप्सति । दिदम्भिषति । शिश्रीषति । शिश्रयिषति । युयूषति । यियविषति । प्रोर्णुनूषति । प्रोर्णुनविषति । बुभूर्षति । बिभरिषति । ज्ञीप्सति । जिज्ञपयिषति । सिषासति । सिसनिषति । तितंसति । तितनिषति । पित्सति । पिपतिषति । प्रावुवूर्षति । प्रविवरिषति । वुवूर्षते । विवरीषते । तितीर्षति । तितरीषति । दिदरिद्रासति । दिदरिद्रिषति ॥ ४७ ॥

ऋस्मिपूङञ्जशौकृगृदृधृप्रच्छः । । ४।४।४८।

एभ्यः परस्य सनआदिरिट् स्यात् । अरिरिषति । सिस्मयिषति । पिपविषते । अञ्जिजिषति । अशिशिषते । चिकरीषति । जिगरीषति । आदिदरिषते । आदिधरिषते । पिपृच्छिषति ॥ ४८ ॥

हनृतः स्यस्य । ४ । ४ । ४९ ।

हन्तेः ऋदन्ताच्च परस्य स्यस्यादिरिट् स्यात् । हनिष्यति । करिष्यति ।

कृतचृतनृतच्छृदतृदोऽसिचःसादेर्वा।४।४।५०।

एभ्यः परस्यासिचः सादेस्ताद्यशितआदिरिट् वा स्यात्। कर्त्स्यति । कर्तिष्यति । चिचृत्सति । चिचर्तिषति । नर्त्स्यति । नर्तिष्यति । अच्छर्त्स्यत् । अच्छर्दिष्यत् । तितृत्सति । तितर्दिषति । असिच इति किम् । अकर्तीत् ॥ ५० ॥

गमोऽनात्मने । ४ । ४ । ५१ ।

गमः परस्य स्ताद्यशितः सादेरिट् स्यात् नत्वात्मनेपदे । गमिष्यति । अधिजिगमिषिता शास्त्रस्य । अनात्मने इति किम् । संगंसीष्ट ॥ ५१ ॥

स्नोः । ४ । ४ । ५२ ।

स्नोः परस्य स्ताद्यशितो अनात्मनेपदे आदिरिट् स्यात् । प्रस्नविष्यति । अनात्मन इत्येव । प्रास्नोष्ट ॥ ५२ ॥

क्रमः । ४ । ४ । ५३ ।

क्रमः परस्य स्ताद्यशित आदिरिट् स्यात् अनात्मनेपदे । क्रमिष्यति । प्रक्रमितुम् । अनात्मन इत्येव । प्रक्रंस्यते ॥ ५३ ॥

तुः । ४ । ४ । ५४ ।

अनात्मनेपदविषयात्क्रमः परस्य तुस्ताद्यशित आदिरिट् स्यात् । क्रमिता । अनात्मन इत्येव । प्रक्रन्ता ॥ ५४ ॥

न वृद्भ्यः । ४ । ४ । ५५ ।

वृदादिपञ्चकात् परस्य स्ताद्यशित आदिरिट् न स्यात् नचेदसावात्मनेपदनिमित्तम् । वर्त्स्यति। विवृत्सति। स्यन्त्स्यति। सिस्यन्त्सति ॥

एकस्वरादनुस्वारेतः । ४ । ४ । ५६ ।

एकस्वरादनुस्वारेतोधातोर्विहितस्य स्ताद्यशित आदिरिद् न स्यात्। पाता । एकस्वरादिति किम् । अवधीत् ॥ ५६ ॥

ऋवर्णश्र्यूर्णुगः कितः । ४ । ४ । ५७ ।

ऋवर्णान्ताद्धातोः श्रेरूर्णोश्च एकस्वराद्विहितस्य कित आदिरिद् न स्यात् । वृतः । तीर्त्वा । श्रितः । ऊर्णुत्वा । एकस्वरादित्येव । जागरितः । कित इति किम् । वरिता ॥ ५७ ॥

उवर्णात् । ४ । ४ । ५८ ।

उवर्णान्तादेकस्वराद्विहितस्य कित आदिरिद् न स्यात् । युतः । लूनः । कितइत्येव । यविता । लविता ॥ ५८ ॥

ग्रहगुहश्च सनः । ४ । ४ । ५९ ।

आभ्यामुवर्णान्ताच्च विहितस्य सन आदिरिद् न स्यात् । जिघृक्षति । जुघुक्षति । रुरूषति ॥ ५९ ॥

स्वार्थे । ४ । ४ । ६० ।

स्वार्थार्थस्य सन आदिरिद् न स्यात् । जुगुप्सते ॥ ६० ॥

डीयश्व्यैदितः क्तयोः । ४ । ४ । ६१ ।

डीयतेः श्वेरैदिद्भ्यश्च धातुभ्यः परयोः क्तक्तवत्वोरादिरिद् न स्यात् । डीनः । डीनवान् । शूनः । शूनवान् । त्रस्तः । त्रस्तवान् ॥ ६१ ॥

वेटोऽपतः । ४ । ४ । ६२ ।

अपतो विकल्पितेटो धातोरेकस्वरात्परयोः क्तयोरादिरिद् न स्यात् । रद्धः । रद्धवान् । अपत इति किम् । पतितः ॥ ६२ ॥

सन्निवेरर्दः । ४ । ४ । ६३ ।

एभ्यः परादर्देः परयोः क्तयोरादिरिट् न स्यात् । समर्ण्णः । समर्ण्णवान् । न्यर्ण्णः न्यर्ण्णवान् । व्यर्ण्णः । व्यर्ण्णवान् । संनिवेरिति किम् । अर्दितः ॥ ६३ ॥

अविदूरेऽभेः । ४ । ४ । ६४ ।

अभेः परादर्देः परयोः क्तयोरविदूरेऽर्थे आदिरिट् न स्यात् । अभ्यर्ण्णः। अभ्यर्ण्णवान् । अविदूर इति किम् । अभ्यर्दितो दीनः शीतेन॥६४॥

वृत्तेर्वृत्तं ग्रन्थे । ४ । ४ । ६५ ।

वृत्तेर्ण्यन्तात् क्ते वृत्तं ग्रन्थविषये निपात्यते । वृत्तो गुणश्छात्रेण । ग्रन्थ इति किम् । वर्त्तितं कुङ्कुमम् ॥ ६५ ॥

धृषशसः प्रगल्भे । ४ । ४ । ६६ ।

आभ्याम्परयोः क्तयोरादिः प्रगल्भ एवार्थ इट् न स्यात् । धृष्टः । विशस्तः । प्रगल्भ इति किम् । धर्षितः। विशसितः ॥ ६६ ॥

कषः कृच्छ्रगहने । ४ । ४ । ६७ ।

अनयोरर्थयोः कषेः परयोः क्तयोरादिरिट् न स्यात् । कष्टं दुःखम् । कष्टोऽग्निः । कष्टं वनं दुरवगाहम् । कृच्छ्रगहन इति किम् । कषितं स्वर्णम् ॥ ६७ ॥

घुषेरविशब्दे । ४ । ४ । ६८ ।

अविशब्दार्थात् घुषेः परयोः क्तयोरादिरिट् न स्यात् । घुष्टा रज्जुः। घुष्टवान् । अविशब्द इति किम् । अवघुषितं वाक्यम् ॥ ६८ ॥

बलिस्थूले दृढः । ४ । ४ । ६९ ।

बलिनि स्थूले चार्थे दृहेर्दृहेर्वा क्तान्तस्य दृढो निपात्यते। दृढः। बलिस्थूल इति किम् । दृहितम् । दृंहितम् ॥ ६९ ॥

क्षुब्धविरिब्धस्वान्तध्वान्तलग्नम्लिष्टफाण्ट-बाढपरिवृढं मन्थस्वरमनस्तमःसक्ताऽस्पष्टाऽनायासभृशप्रभौ।४।४।७०।

एते क्तान्ता मन्थादिष्वर्थेषु यथासङ्ख्यमनिटो निपात्यन्ते। क्षुब्धः समुद्रः। क्षुब्धं वल्लवैः। विरिब्धः स्वरः। स्वान्तं मनः। ध्वान्तं तमः। लग्नं सक्तम्। म्लिष्टमस्पष्टम्। फाण्टमनायाससाध्यम्। बाढं भृशम्। परिवृढः प्रभुः ॥ ७० ॥

आदितः । ४ । ४ । ७१ ।

आदितोधातोः परयोः क्तयोरादिरिट् न स्यात्। मिन्नः। मिन्नवान ॥ ७१ ॥

नवा भावारम्भे । ४ । ४ । ७२ ।

आदितोधातोर्भावारम्भार्थयोः क्तयोरादिरिट् वा न स्यात्। मिन्नम्। मेदितम्। प्रमिन्नः। प्रमिन्नवान्। प्रमेदितः। प्रमेदितवान् ॥ ७२ ॥

शकः कर्म्मणि । ४ । ४ । ७३ ।

शकेः कर्म्मणि क्तयोरादिरिट् वा न स्यात्। शक्तः। शकितो वा घटः कर्तुम् ॥ ७३ ॥

णौ दान्तशान्तपूर्णदस्तस्पष्टच्छन्न-ज्ञप्तम् । ४ । ४ । ७४ ।

दमादीनां णौ क्तान्तानामेते वा निपात्यन्ते। दान्तः। दमितः। शान्तः। शमितः। पूर्णः। पूरितः। दस्तः। दासितः। स्पष्टः। स्पाशितः। छन्नः। छादितः। ज्ञप्तः। ज्ञापितः ॥ ७४ ॥

श्वसजपवमरुषत्वरसंघुषास्वनामः । ४ । ४ । ७५ ।

एभ्यः क्तयोरादिरिट् वा न स्यात् । श्वस्तः । श्वसितः । विश्वस्तवान् । विश्वासितवान् । जप्तः । जप्तवान् । जपितः । जपितवान् । वान्तः । वान्तवान् । वमितः । वमितवान् । रुष्टः । रुष्टवान् । रुषितः । रुषितवान् । तूर्णः । तूर्णवान् । त्वरितः । त्वरितवान् । संघुष्टौ संघुषितौ दम्यौ । संघुष्टवान् । संघुषितवान् । आस्वान्तः । आस्वनितः । आस्वान्तवान् । आस्वनितवान् । अभ्यान्तः । अभ्यान्तवान् । अभ्यमितः । अभ्यमितवान् ॥ ७५ ॥

हृषेः केशलोमविस्मयप्रतिघाते । ४ । ४ । ७६ ।

हृषेः केशाद्यर्थेषु क्तयोरादिरिट् वा न स्यात् । हृष्टाः । हृषिताः केशाः । हृष्टं हृषितं लोमभिः । हृष्टो हृषितश्चैत्रः । हृष्टाः हृषिता दन्ताः ॥ ७६ ॥

अपचितः । ४ । ४ । ७७ ।

अपाच्चायेः क्तान्तस्य इडभावश्चिश्च निपात्यते वा । अपचितः । अपचायितः ॥ ७७ ॥

सृजिदृशिस्कस्वराऽत्वतस्तृज्नित्यानिटस्थवः । ४ । ४ । ७८ ।

सृजिदृशिभ्यां स्कगः स्वरान्तादत्वतश्च तृचि नित्यानिटोविहितस्य थव आदिरिट् वा न स्यात् । सस्रष्ठ । ससर्जिथ । दद्रष्ठ । ददर्शिथ । सञ्चस्कर्थ । सञ्चस्करिथ । ययाथ । ययिथ । पपक्थ । पेचिथ । तृज्नित्यानिट इति किम् । ररन्धिथ । शिश्रयिथ । विहितविशेषणं किम् । चकर्षिथ ॥ ७८ ॥

ऋतः । ४ । ४ । ७९ ।

ऋदन्तात् तृज्नित्यानिटो विहितस्य थव आदिरिट् न स्यात्। जहर्थ। तृज्नित्यानिट इत्येव। सस्वरिथ ॥ ७९ ॥

ऋवृव्येऽद इट्। ४। ४। ८०।

एभ्यः परस्य थव आदिरिट् स्यात्। आरिथ। ववरिथ। संविव्ययिथ। आदिथ ॥ ८० ॥

स्कृऽसृवृभृस्तुद्रुश्रुस्रोर्व्यञ्जनादेः परोक्षायाः। ४। ४। ८१।

स्कृगः स्रादिवर्जेभ्यश्च सर्वधातुभ्यः परस्याः परोक्षायाः व्यञ्जनादेरिट् स्यात्। संचस्करिव। ददिव। चिच्यिषहे। स्क्रिति किम्। चकृव। स्रादिवर्जनं किम्। ससृव। ववृव। ववृवहे। बभर्थ। तुष्टोथ। दुद्रोथ। शुश्रोथ। सुस्रोथ ॥ ८१ ॥

घसेकस्वरातः क्वसोः। ४। ४। ८२।

घसेरेकस्वरादादन्ताच्च धातोः परस्य क्वसोः परोक्षाया आदिरिट् स्यात्। जक्षिवान्। आदिवान्। ययिवान्। परोक्षाया इत्येव। विद्वान् ॥ ८२ ॥

गमहनविद्लविशदृशो वा। ४। ४। ८३।

एभ्यः परस्य क्वसोरादिरिट् वा स्यात्। जग्मिवान्। जगन्वान्। जघ्निवान्। जघन्वान्। विविदिवान्। विविद्वान्। विविशिवान्। विविश्वान्। ददृशिवान्। ददृश्वान् ॥ ८३ ॥

सिचोऽञ्जेः। ४। ४। ८४।

अञ्जेः सिच आदिरिट् स्यात्। आञ्जीत् ॥ ८४ ॥

धूग्सुस्तोः परस्मै। ४। ४। ८५।

एभ्यः परस्मैपदे सिच आदिरिट् स्यात्। अधावीत्। असावीत्। अस्तावीत्। परस्मै इति किम्। अधोष्ट ॥ ८५ ॥

यमिरमिनम्यातः सोऽन्तश्च ।४।४।८६।

एभ्य आदन्तेभ्यश्च परस्मैपदे सिच आदिरिट् स्यात्। एषां च सन्तः। अयंसीत्। व्यरंसीत्। अनंसीत्। अयासिष्टाम् ॥ ८६ ॥

ईशीडः सेध्वेस्वध्वमोः। ४। ४। ८७।

आभ्यां वर्त्तमाना सेध्वयोः पञ्चमी स्वध्वमोश्चादिरिट् स्यात्। ईशिषे। ईशिध्वे। ईशिष्व। ईशिध्वम्। ईडिषे। ईडिध्वे। ईडिष्व। ईडिध्वम् ॥

रुत्पञ्चकाच्छिदयः ॥ ४। ४। ८८।

रुदादेः पञ्चतः परस्य व्यञ्जनादेः शितोऽयादेरादिरिट् स्यात्। रोदिषि। स्वपिषि। प्राणिति। श्वसिति। जक्षिति। अयिति किम्। रुद्यात्। शित इति किम्। रोत्स्यति। स्वप्स्यति ॥ ८८ ॥

दिस्योरीट्। ४। ४। ८९।

रुत्पञ्चकात् दिस्योः शितोरादिरीट् स्यात्। अरोदीत्। अरोदीः॥८९॥

अदश्चाट्। ४। ४। ९०।

अत्तेरुत्पञ्चकाच्च दिस्योः शितोरादिरट् स्यात्। आदत्। आदः। अरोदत्। अरोदः ॥ ९० ॥

संपरेः कृगःस्सट्। ४। ४। ९१।

आभ्यां परस्य कृग आदिस्सट् स्यात्। संस्करोति कन्याम्। परिष्करोति ॥ ९१ ॥

उपाद्भूषासमवायप्रतियत्नविकारवाक्या-

ऽध्याहारे।४।४।९२।४।४।९२।

उपात्परस्य कृगो भूषादिष्वर्थेष्वादिस्सट् स्यात्। कन्यामुपस्करोति। तत्र न उपस्कृतम्। एधोदकस्योपस्कुरुते। उपस्कृतं भुङ्क्ते। सोपस्कारं सूत्रम्॥ ९२॥

किरो लवने।४।४।९३।

उपात् किरतेस्सडादिः स्यात् लवनविषयार्थश्चेत्। उपस्कीर्य मद्रका लुनन्ति। लवन इति किम्। उपाकिरति पुष्पम्॥ ९३॥

प्रतेश्च वधे।४।४।९४।

प्रतेरुपाच्च किरतेर्हिंसायां विषयेऽर्थे स्सडादिः स्यात्। प्रतिस्कीर्णम्। उपस्कीर्णम्। वा हते वृषल भूयात्। प्रतिचस्करे नखैः। वध इति किम्। प्रतिकीर्णं बीजम्॥ ९४॥

अपाच्चतुष्पात्पक्षिशुनि हृष्टान्नाश्रयार्थे।४।४।९५।

अपात् किरतेः चतुष्पदि पक्षिणि शुनि च कर्तरि यथासङ्ख्यं हृष्टेऽन्नार्थिनि आश्रयार्थिनि स्सडादिः स्यात्। अपस्किरते गौर्हृष्टः, कुक्कुटोभक्ष्यार्थी, आश्रयार्थी वा श्वा॥ ९५॥

वौ विष्किरो वा।४।४।९६।

पक्षिणि वाच्ये विकिरतेः स्सड्वादिः स्यात्। विष्किरः विकिरो वा पक्षी॥ ९६॥

प्रात्तुम्पतेर्गवि।४।४।९७।

प्रात्तुम्पतेर्गवि कर्त्तरि स्सडादिः स्यात्। प्रस्तुम्पति गौः। गवीति किम्। प्रतुम्पति तरुः॥ ९७॥

उदितः स्वरान्नोऽन्तः । ४ । ४ । ९८ ।

उदितो धातोः स्वरात्परो न् अन्तः स्यात् । नन्दति । कुण्डा ॥९८॥

मुचादितृफदृफगुफशुभोभः शे ।४।४। ९९।

एषां शे परे स्वरान्नोऽन्तः स्यात् । मुञ्चति । पिंशति । तृम्फति । दृम्फति । गुम्फति । शुम्भति । उम्भति ॥ ९९ ॥

जभः स्वरे । ४ । ४। १०० ।

जभेः स्वरात्परः स्वरादौ प्रत्यये नोऽन्तः स्यात् । जम्भः ॥१००॥

रध इटि तु परोक्षायामेव । ४ । ४।१०१।

रधः स्वरात्परः स्वरादौ प्रत्यये नोऽन्तः स्यात् इडादौ तु परोक्षायामेव । रन्धः । ररन्धिव । परोक्षायामेवेति किम् । रधिता ॥ १०१ ॥

रभोऽपरोक्षाशवि । ४ । ४ । १०२ ।

रभेः स्वरात्परः परोक्षाशव्वर्जे स्वरादौ प्रत्यये न् अन्तः स्यात् । आरम्भः । अपरोक्षाशवीति किम् । आरेभे । आरभते ॥ १०२ ॥

लभः । ४ । ४ । १०३ ।

लभः स्वरात्परः परोक्षाशव्वर्जे स्वरादौ प्रत्यये न् अन्तः स्यात् । लम्भकः ॥ १०३ ॥

आङो यि । ४ । ४ । १०४ ।

आङः परस्य लभः स्वरात्परो यादौ प्रत्यये न् अन्तः स्यात् । आलम्भ्या गौः । यीति किम् । आलभ्याः ॥ १०४ ॥

उपात्स्तुतौ । ४ । ४ । १०५ ।

उपात्परस्य लभः स्वरात्परो यादौ प्रत्यये स्तुतौ गम्यायां न् अन्तः स्यात् । उपलम्भ्या विद्या । स्तुताविति किम् । उपलभ्या वार्त्ता ॥ १०५॥

ञिरुणमोर्वा । ४ । ४ । १०६ ।

ञौ रुणमि च लभः स्वरात्परो न् अन्तो वा स्यात् । अलाभि । अलम्भि । लम्भंलम्भम् । लाभंलाभम् ॥ १०६ ॥

उपसर्गात् खल्घञोश्च । ४ । ४ । १०७ ।

उपसर्गाल्लभः स्वरात्परः खल्घञोर्ञिरुणमोश्च परयोर्न् अन्तः स्यात् । दुष्प्रलम्भम् । प्रलम्भः । प्रालम्भि । प्रलम्भंप्रलम्भम् । उपसर्गादिति किम् । लाभः ॥ १०७ ॥

सुदुर्भ्यः । ४ । ४ । १०८ ।

आभ्यां समस्तव्यस्ताभ्यां उपसर्गात्पराभ्यां परस्य लभः स्वरात्परः खल्घञोर्नोऽन्तः स्यात् । अतिसुलम्भम् । अतिदुर्लम्भम् । अतिसुलम्भः । अतिदुर्लम्भः। अतिसुदुर्लम्भम् । अतिसुदुर्लम्भः। उपसर्गादित्येव । सुलभम्॥

नशोधुटि । ४ । ४ । १०९ ।

नशेः स्वरात्परोधुडादौ प्रत्यये न् अन्तः स्यात् । नंष्टा । धुटीति किम् । नशिता ॥ १०९ ॥

मस्जेः सः । ४ । ४ । ११० ।

मस्जेः स्वरात्परस्य सस्य धुडादौ प्रत्यये न् अन्तः स्यात् । मङ्क्ता ॥

अः सृजिदृशोऽकिति । ४ । ४ । १११ ।

अनयोः स्वरात्परो धुडादौ प्रत्यये अदन्तः स्यात् नतु किति । स्रष्टा । द्रष्टुम् । अकितीति किम् । सृष्टः॥ १११ ॥

स्पृशादिसृपो वा । ४ । ४ । ११२ ।

स्पृशमृशकृषतृपदृपां सृपश्च स्वरात्परो धुडादौ प्रत्यये अदन्तो वा स्यात् अकिति । स्प्रष्टा । स्पर्ष्टा । म्रष्टा । मर्ष्टा । क्रष्टा । कर्ष्टा । त्रप्ता । तर्प्ता । द्रप्ता । दर्प्ता । स्रप्ता । सर्प्ता ॥ ११२ ॥

ह्रस्वस्य तः पित्कृति । ४ । ४ । ११३ ।

ह्रस्वान्तस्य धातोः पिति कृति त् अन्तः स्यात् । जगत् । ह्रस्व-स्येति किम् । ग्रामणीः । कृतीति किम् । अजुहवुः ॥ ११३ ॥

अतो म आने । ४ । ४ । ११४ ।

धातोर्विहिते आने अतो मोऽन्तः स्यात् । पचमानः । अत इति किम् । शयानः ॥ ११४ ॥

आसीनः । ४ । ४ । ११५ ।

आस्तेः परस्यानस्यादेरीर्निपात्यते । सीनः। उदासीनः ॥ ११५ ॥

ऋतां क्ङितीर् । ४ । ४ । ११६ ।

ऋदन्तस्य धातोः क्ङिति प्रत्यये ऋत इर् स्यात् । तीर्णम्। किरति॥

ओष्ठ्यादुर् । ४ । ४ । ४ । ११७ ।

धातोरोष्ठ्यात्परस्य ऋतः क्ङित्युर् स्यात् । पूः । बुभूर्षति । वुवूर्षते ॥ ११७ ॥

इसासः शासोऽङ्व्यञ्जने । ४ । ४ । ११८ ।

शास्तेः शस्यासोऽङि क्ङिति व्यञ्जनादौ च परे इस्स्यात् । अशिषत् । शिष्टः । अङ्व्यञ्जन इति किम् । शासति ॥ ११८ ॥

क्वौ । ४ । ४ । ११९ ।

शास आसः क्वौ इस्स्यात् । मित्रशीः ॥ ११९ ॥

आङः । ४ । ४ । १२० ।

आङः परस्य शास आसः क्वावेव इस्स्यात् । आशीः। क्वावित्येव । आशास्ते ॥ १२० ॥

य्वोः प्वऽय्व्यञ्जने लुक् ।४।४।१२१।

पौ य्वर्जव्यञ्जनादौ च परे य्वोर्लुक् स्यात् । क्नोपयति । क्ष्मातम् । देदिवः । कण्डूः । य्वर्जनं किम् । क्नूय्यते ॥ १२१ ॥

कृतः कीर्त्तिः ।४।४।१२२।

कृतणः कीर्त्तिः स्यात् । कीर्त्तयति ॥ १२२ ॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनलघुवृत्तौ चतुर्थोऽध्यायः समाप्तः । आख्यातवृत्तिः समाप्ता ॥

ॐ

अर्हम्

आतुमोऽत्यादिः कृत् । ५ । १ । १ ।

धातोर्विधीयमानस्त्यादिवर्जो वक्ष्यमाणः प्रत्ययस्तुमभिव्याप्य कृत् स्यात् । घनघात्यः । अत्यादेरिति किम् । मणिस्ते ॥ १ ॥

बहुलम् । ५ । १ । २ ।

कृन्निर्दिष्टादर्थादन्यत्रापि बहुलं स्यात् । पादहारकः । मोहनीयं कर्म । संप्रदानम् ॥ २ ॥

कर्त्तरि । ५ । १ । ३ ।

कृदर्थविशेषोक्तिं विना कर्त्तरि स्यात् । कर्त्ता ॥ ३ ॥

व्याप्ये घुरकेलिमकृष्टपच्यम् । ५ । १ । ४ ।

घुरकेलिमौ प्रत्ययौ कृष्टपच्यश्च व्याप्ये कर्त्तरि स्युः । भङ्गुरं काष्ठम् । पचेलिमा माषाः । कृष्टपच्याः शालयः ॥ ४ ॥

संगते ऽजर्यम् । ५ । १ । ५ ।

संगमनं संगतम् । तस्मिन् कर्त्तरि नञ्पूर्वात् जृषो यो निपात्यते । अजर्यं आर्यसंगतम् । संगत इति किम् । अजरः पटः ॥ ५ ॥

रुच्याऽव्यथ्यवास्तव्यम् । ५ । १ । ६ ।

एते कर्त्तरि निपात्यन्ते । रुच्यः । अव्यथ्यः । वास्तव्यः ॥ ६ ॥

भव्यगेयजन्यरम्यापात्याप्लाव्यं नवा । ५ । १ । ७ ।

एते कर्त्तरि वा निपात्यन्ते। भव्यः। गेयः साम्नाम्। जन्यः। रम्यः। आपात्यः। आप्लाव्यः। पक्षे। भव्यम्। गेयानि सामानि। जन्यम्। रम्यम्। आपात्यम्। आप्लाव्यम्॥ ७॥

प्रवचनीयादयः। ५। १। ८।

एते अनीयप्रत्ययान्ताः कर्त्तरि वा निपात्यन्ते। प्रवचनीयो गुरुः शास्त्रस्य। प्रवचनीयं गुरुणा शास्त्रम्। उपस्थानीयः शिष्यो गुरोः। उपस्थानीयः शिष्येण गुरुः॥ ८॥

श्लिषशीङ्स्थासवसजनरुहजॄभजेः क्तः। ५। १। ९।

एभ्यः क्तो यो विहितः स कर्त्तरि वा स्यात्। आश्लिष्टः कान्तां चैत्रः। आश्लिष्टा कान्ता चैत्रेण। अतिशयितो गुरुं शिष्यः। अतिशयितो गुरुः शिष्यैः। उपस्थितो गुरुं शिष्यः। उपस्थितो गुरुः शिष्यैः। उपासिता गुरुं ते। उपासितो गुरुस्तैः। अनूषिता गुरुं ते। अनूषितो गुरुस्तैः। अनुजातास्तां ते। अनुजाता सा तैः। आरूढोऽश्वं सः। आरूढोऽश्वस्तैः। अनुजीर्णास्तां ते। अनुजीर्णा सा तैः। विभक्ताः स्वं ते। विभक्तं स्वं तैः॥ ९॥

आरम्भे। ५। १। १०।

आरम्भार्थाद्धातोर्भूतादौ यः क्तो विहितः स कर्त्तरि वा स्यात्। प्रकृताः कटं ते। प्रकृतः कटस्तैः॥ १०॥

गत्यर्थाऽकर्मकपिबभुजेः। ५। १। ११।

भूतादौ यः क्तो विहितः स एभ्यः कर्त्तरि वा स्यात्। गतोऽसौ ग्रामम्। गतोऽसौ तैः। आसितोऽसौ। आसितं तैः। पीताः पयः। पीतं पयः। भुक्तास्ते। इदं तैर्भुक्तम्॥ ११॥

अद्यर्थाच्चाधारे । ५ । १ । १२ ।

आहारार्थाद्धातोर्गत्यर्थादेश्च यः क्तः स आधारे वा स्यात्। इदमेषां जग्धम्। तैर्जग्धम्। इदं तेषां यातम्। तैर्यातम्। इदमेषां शयितम्। तैः शयितम्। इदं गवां पीतम्। गोभिः पीतम्। इदं तेषां भुक्तम्। तैर्भुक्तम् ॥१२॥

क्त्वातुमम् भावे।५।१। १३ ।

एते धात्वर्थमात्रे स्युः। कृत्वा। कर्त्तुम्। कारंकारं याति ॥ १३ ॥

भीमादयोऽपादाने । ५ । १ । १४ ।

एते ऽपादाने स्युः। भीमः। भयानकः ॥ १४ ॥

संप्रदानाच्चान्यत्रोणादयः । ५ । १ । १५ ।

संप्रदानादपादानाच्चान्यत्रार्थे उणादयः स्युः। कारुः। कषिः ॥

असरूपोऽपवादे वोत्सर्गः प्राक् क्तेः । ५ । १ । १६ ।

इतः सूत्रादारभ्य स्त्रियां क्तिरित्यतः प्राक् योऽपवादस्तद्विषयेऽपवादेनाऽसमानरूपऔत्सर्गिकः प्रत्ययो वा स्यात्। अवश्यलाव्यम्। अवश्यलवितव्यम्। असरूप इति किम्। घ्यणि यो न स्यात्। कार्यम्। प्राक्क्तेरिति किम्। कृतिः। चिकीर्षा ॥ १६ ॥

ऋवर्णव्यञ्जनान्ताद् घ्यण् । ५ । १ । १७ ।

ऋवर्णान्तात् व्यञ्जनान्ताच्च धातोर्घ्यण् स्यात्। कार्यम्। पाक्यम् ॥१७॥

पाणिसमवाभ्यां सृजः । ५ । १ । १८ ।

आभ्यां परात् सृजेर्घ्यण् स्यात्। पाणिसर्ग्या। समवसर्ग्या रज्जुः ॥ १८ ॥

उवर्णादावश्यके । ५ । १ । १९ ।

अवश्यम्भावे द्योत्ये धातोरुवर्णान्तात् घ्यण् स्यात्। लाव्यम्। अवश्यपाव्यम् ॥ १९ ॥

आसुयुवपिरपिलपित्रपिडिपिदभिचम्यानमः। ५। १। २०।

आङ्पूर्वाभ्यां सुनम्भ्यां यौत्यादेश्च घ्यण् स्यात्। आसाव्यम् याव्यम्। वाप्यम्। राप्यम्। लाप्यम्। अपत्राप्यम्। डेप्यम्। दाभ्यम्। आचाम्यम्। आनाम्यम् ॥ २० ॥

वाऽऽधारेऽमावास्या। ५। १। २१।

अमापूर्वाद्वसतेराधारे घ्यण् धातोर्वा ह्रस्वश्च निपात्यते। अमावस्या। अमावास्या ॥ २१ ॥

संचाय्यकुण्डपाय्यराजसूयं क्रतौ। ५। १। २२।

एते क्रतावर्थे घ्यणन्ता निपात्यन्ते। संचाय्यः। कुण्डपाय्यः। राजसूयः क्रतुः ॥ २२ ॥

प्रणाय्योऽनिष्कामासंमते। ५। १। २३।

प्राग्नियो घ्यणायादेशौ स्यातां निष्कामेऽसंमते चार्थे। प्रणाय्यः शिष्यश्चौरो वा ॥ २३ ॥

धाय्यापाय्यसान्नाय्यनिकाय्यमृङ्मानहविर्निवासे। ५। १। २४।

एते ऋगादिषु यथासङ्ख्यं घ्यणन्ता निपात्यन्ते। धाय्या ऋक्। पाय्यं मानम्। सान्नाय्यं हविः। निकाय्यो निवासः ॥ २४ ॥

परिचाय्योपचाय्यानाय्यसमूह्यचित्य-

भय्यौ । ५ । १ । २५ ।

एतेऽर्थौ निपात्यन्ते । पारिचाय्यः । उपचाय्यः । आनाय्यः । समूह्यः । चित्यो वा ऽग्निः ॥ २५ ॥

याज्या दानर्चि । ५ । १ । २६ ।

यजेः करणदानार्चे ध्यण् स्यात् । याज्या ॥ २६ ॥

तव्यानीयौ । ५ । १ । २७ ।

एतौ धातोः स्याताम् । कर्त्तव्यः । करणीयः ॥ २७ ॥

य एच्चातः । ५ । १ । २८ ।

स्वरान्ताद्धातोर्यः स्यात् आत एच्च । चेयम् । जेयम् । देयम् । ध्येयम् ॥ २८ ॥

शकितकिचतियतिशसिसहियजिभजि-पवर्गात् । ५ । १ । २९ ।

एभ्यः पवर्गान्ताच्च यः स्यात् । शक्यम् । तक्यम् । चत्यम् । यत्यम् । शस्यम् । सह्यम् । यज्यम् । भज्यम् । तप्यम् । गम्यम् ॥ २९ ॥

यमिमदिगदोऽनुपसर्गात् । ५ । १ । ३० ।

एभ्योऽनुपसर्गेभ्यो यः स्यात् । यम्यम् । मद्यम् । गद्यम् । अनुपसर्गादिति किम् । आयाम्यम् ॥ ३० ॥

चरेराङस्त्वगुरौ । ५ । १ । ३१ ।

अनुपसर्गाच्चरेराङ् पूर्वात्त्वगुरौ यः स्यात् । चर्यः । आचर्यो देशः । अगुराविति किम् । आचार्यः ॥ ३१ ॥

वर्योपसर्यावद्यपण्यमुपेयर्तुमतीगर्ह्य-

विक्रेये । ५ । १ । ३२ ।

एते उपेयादिषु यथासङ्ख्यं यान्ता निपात्यन्ते । वर्या कन्या । उपसर्या गौः । अवद्यं गर्ह्यम् । पण्या गौः ॥ ३२ ॥

स्वामिवैश्येऽर्यः । ५ । १ । ३३ ।

अर्त्तेः स्वामिवैश्ययोर्यः स्यात् । अर्यः स्वामी वैश्यो वा । आर्योऽन्यः ॥ ३३ ॥

वह्यं करणे । ५ । १ । ३४ ।

वहेः करणे यः स्यात् । वह्यं शकटम् ॥ ३४ ॥

नाम्नोवदः क्यप्च । ५ । १ । ३५ ।

अनुपसर्गान्नाम्नः पराद्वदेः क्यप् यौ स्याताम् । ब्रह्मोद्यम् । ब्रह्मवद्यम् । नाम्न इति किम् । वाद्यम् । अनुपसर्गादित्येव । प्रवाद्यम् ॥ ३५ ॥

हत्याभूयं भावे । ५ । १ । ३६ ।

अनुपसर्गान्नाम्नः परौ हत्याभूयौ भावे क्यबन्तौ साधू स्तः । ब्रह्महत्या । देवभूयं गतः । भाव इति किम् । श्वघात्या सा ॥ ३६ ॥

अग्निचित्या । ५ । १ । ३७ ।

अग्नेः पराच्चेः स्त्रीभावे क्यप् स्यात् । अग्निचित्या ॥ ३७ ॥

खेयमृषोद्ये । ५ । १ । ३८ ।

एतौ क्यबन्तौ साधू स्तः । निखेयम् । मृषोद्यम् ॥ ३८ ॥

कुप्यभिद्योध्यसिध्यतिष्यपुष्ययुग्याज्यसूर्य नाम्नि । ५ । १ । ३९ ।

एते क्यबन्ता संज्ञायां निपात्यन्ते। कुप्यं धनम्। भिद्यम्। उध्यः नदः। सिध्यः। तिष्यः। पुष्यः। युग्यं वाहनम्। आज्यं घृतम्। सूर्यो-रविः॥ ३९॥

दृवृग्स्तुजुषेतिशासः। ५। १। ४०।

एभ्यः क्यप् स्यात्। आदृत्यः। प्रावृत्यः। अवश्यस्तुत्यः। जुष्यः। इत्यः। शिष्यः॥ ४०॥

ऋदुपान्त्यादक्लृपिचृदृचः। ५। १। ४१।

ऋदुपान्त्याद्धातोः कृपिचृतिऋचिवर्जात् क्यप् स्यात्। वृत्यम्। अक्लृपिचृदृच इति किम्। कल्प्यम्। चर्त्यम्। अर्च्यम्॥ ४१॥

कृवृषिमृजिशंसिगुहिदुहिजपो वा। ५। १। ४२।

एभ्यः क्यप् वा स्यात्। कृत्यम्। कार्यम्। वृष्यम्। वर्ष्यम्। मृज्यम्। मार्ग्यम्। शस्यम्। शंस्यम्। गुह्यम्। गोह्यम्। दुह्यम्। दोह्यम्। जप्यम्। जाप्यम्॥ ४२॥

जिविपून्योहलिमुञ्जकल्के। ५। १। ४३।

जेर्विपूर्वाभ्यां च पूनीभ्यां यथासङ्ख्यं हलिमुञ्जकल्केषु कर्मसु क्यप् स्यात्। जित्यो हलिः। विपूयो मुञ्जः। विनीयः कल्कः। हलिमुञ्जकल्क इति किम्। जेयम्। विपव्यम्। विनेयम्॥ ४३॥

पदास्वैरिबाह्यापक्ष्ये ग्रहः। ५। १। ४४।

एष्वर्थेषु ग्रहेः क्यप् स्यात्। प्रगृह्यं पदम्। गृह्याः परतन्त्राः। ग्रामगृह्या, बाह्येत्यर्थः। गुणगृह्या गुणपक्ष्या॥ ४४॥

भृगोऽसंज्ञायाम्। ५। १। ४५।

भृगोऽसंज्ञायां क्यप् स्यात्। भृत्यः पोष्यः। असंज्ञायामिति किम्। भार्या पत्नी॥ ४५॥

समो वा । ५ । १ । ४६ ।

संपूर्वाद्भृगः क्यप् वा स्यात् । संभृत्यः । संभार्यः ॥ ४६ ॥

ते कृत्याः । ५ । १ । ४७ ।

घ्यण्तव्यानीययक्यप्प्रत्ययाः कृत्याः स्युः ॥ ४७ ॥

णकतृचौ । ५ । १ । ४८ ।

धातोरेतौ कर्त्तरि स्याताम् । पाचकः । पक्ता ॥ ४८ ॥

अच् । ५ । १ । ४९ ।

धातोरच् स्यात् । करः । हरः ॥ ४९ ॥

लिहादिभ्यः । ५ । १ । ५० ।

एभ्योऽच् स्यात् । लेहः । श्लेषः ॥ ५० ॥

ब्रुवः । ५ । १ । ५१ ।

भूगोऽपि ब्रुवः स्यात् । [illegible] ॥ ५१ ॥

नन्द्यादिभ्योऽनः । ५ । १ । ५२ ।

एभ्योनाम गणदृष्टेभ्योऽनः स्यात् । नन्दनः । वासनः । सहनः । संक्रन्दनः । सर्वदमनः । नर्दनः ॥ ५२ ॥

ग्रहादिभ्यो णिन् । ५ । १ । ५३ ।

एभ्यो णिन् स्यात् । ग्राही । स्थायी ॥ ५३ ॥

नाम्युपान्त्यप्रीकृगृज्ञः कः । ५ । १ । ५४ ।

नाम्युपान्त्येभ्यो धातुभ्यः प्रीआदिभ्यश्च कः स्यात् । विक्षिपः । प्रियः । किरः । गिरः । ज्ञः ॥ ५४ ॥

गेहे ग्रहः । ५ । १ । ५५ ।

गेहेऽर्थे ग्रहेः कः स्यात् । गृहम् । गृहाः ॥ ५५ ॥

उपसर्गादातोडोऽश्यः । ५ । १ । ५६ ।

उपसर्गात्परात् श्यैङ्वर्जादाकारान्ताद्धातोर्डः स्यात् । आह्वः ॥ उपसर्गादिति किम् । दायः । अश्य इति किम् । अवश्यायः ॥ ५६ ॥

व्याघ्राघ्रे प्राणिनसोः । ५ । १ ५७ ।

एतौ यथासङ्ख्यं प्राणिनि नासिकायां चार्थे घ्रो डे निपात्यते । व्याघ्रः । आघ्रा ॥ ५७ ॥

घ्राध्मापाट्धेदृशः शः । ५ । १ । ५८ ।

एभ्यः शः स्यात् । जिघ्रः । उद्धमः । पिबः । उद्धयः । उत्पश्यः ॥

साहिसातिवेद्युदेजिधारिपारिचेतेरनुपसर्गात् । ५ । १ । ५९ ।

एभ्योऽनुपसर्गेभ्यो ण्यन्तेभ्यः शः स्यात् । साहयः । सातयः । वेदयः । उदेजयः । धारयः । पारयः । चेतयः । अनुपसर्गादिति किम् । प्रसाहयिता ॥ ५९ ॥

लिम्पविन्दः । ५ । १ । ६० ।

आभ्यामनुपसर्गाभ्यां शः स्यात् । लिम्पः । विन्दः ॥ ६० ॥

निगवादेर्नाम्नि । ५ । १ । ६१ ।

यथासङ्ख्यं निपूर्वाल्लिम्पेर्गवादिपूर्वाच्च विन्देः संज्ञायां शः स्यात् । निलिम्पा देवाः । गोविन्दः । कुविन्दः । नाम्नीति किम् । निलिपः ॥ ६१ ॥

वा ज्वलादिदुनीभूग्रहास्रोर्णः । ५ । १ । ६२ ।

ज्वलादेर्धातोर्दुनोत्यादेरास्रोश्चानुपसर्गाण्णो वा स्यात् । ज्वलः । ज्वालः । चलः । चालः । दवः । दावः । नयः । नायः । भवः । भावः । माहो मकारादिः । ग्रहः सूर्यादिः । आस्रवः । आस्रावः । अनुपसर्गादिति किम् । प्रज्वलः ॥ ६२ ॥

अवहृसासंस्रोः । ५ । १ । ६३ ।

अवपूर्वाभ्यां हृसाभ्यां संपूर्वाच्च स्रोर्णः स्यात् । अवहारः । अवसायः । संस्रावः ॥ ६३ ॥

तन्व्यधीण्श्वसातः । ५ । १ । ६४ ।

एभ्य आदन्तेभ्यश्च धातुभ्यो णः स्यात् । तानः । व्याधः । प्रत्यायः । श्वासः । अवश्यायः ॥ ६४ ॥

नृत्खन्रञ्जः शिल्पिन्यऽकट् । ५ । १ । ६५ ।

एभ्यः शिल्पिनि कर्त्तर्यऽकट् स्यात् । नर्त्तकी । खनकः । रजकः । शिल्पिनीति किम् । नर्त्तिका ॥ ६५ ॥

गस्थकः । ५ । १ । ६६ ।

गः शिल्पिनि कर्त्तरि थकः स्यात् । गाथकः ॥ ६६ ॥

टनण् । ५ । १ । ६७ ।

गः शिल्पिनि टनण् स्यात् । गायनी ॥ ६७ ॥

हः कालव्रीह्योः । ५ । १ । ६८ ।

हाकोहाङो वा कालव्रीह्योष्टनण् स्यात् । हायनो वर्षम् । हायना व्रीहयः । हाताऽन्यः ॥ ६८ ॥

प्रुसृल्वोऽकः साधौ । ५ । १ । ६९ ।

एभ्यः साध्वर्थेभ्योऽकः स्यात् । प्रवकः । सरकः । लवकः । साधाविति किम् । प्रावकः ॥ ६९ ॥

आशिष्यऽकन् । ५ । १ । ७० ।

आशिषि गम्यायां धातोरकन् स्यात् । जीवका । आशिषीति किम् । जीविका ॥ ७० ॥

तिक्कृतौ नाम्नि । ५ । १ । ७१ ।

आशीर्विषये संज्ञायां गम्यमानायां धातोस्तिक् कृतश्च स्युः । शान्तिः । वीरभूः । वर्द्धमानः ॥ ७१ ॥

कर्मणोऽण् । ५ । १ । ७२ ।

कर्मणः पराद्धातोरण् स्यात् । कुम्भकारः ॥ ७२ ॥

शीलिकामिभक्ष्याचरीक्षिक्षमो णः।५।१।७३।

कर्मणः परेभ्यः एभ्यो णः स्यात् । धर्मशीला । धर्मकामा । वायुभक्षा । कल्याणाचारा । सुखप्रतीक्षा । बहुक्षमा ॥ ७३ ॥

गायोऽनुपसर्गाट्टक् । ५ । १ । ७४ ।

कर्मणः परादनुपसर्गात् गायतेष्टक् स्यात् । वक्रगी । अनुपसर्गादिति किम् । खरुसंगायः ॥ ७४ ॥

सुरासीधोः पिबः । ५ । १ । ७५ ।

आभ्यां कर्मभ्यां परादनुपसर्गात्पिबतेष्टक् स्यात् । सुरापी । सीधुपी ॥ ७५ ॥

आतोडोऽह्वावामः । ५ । १ । ७६ ।

कर्मणः परादनुपसर्गादह्वावामावर्जादादन्ताद्धातोर्डः स्यात् । गोदः । अह्वावाम इति किम् । स्वर्गह्वायः । तन्तुवायः । धान्यमायः ॥ ७६ ॥

समः ख्यः । ५ । १ । ७७ ।

कर्मणः परात् संपूर्वात् ख्यो डः स्यात् । गोसङ्ख्यः ॥ ७७ ॥

दश्चाङः । ५ । १ । ७८ ।

कर्मणः परादाङ्पूर्वात् दागः ख्यश्च डः स्यात् । दायादः । स्त्र्याख्यः॥

प्राद् ज्ञश्च । ५ । १ । ७९ ।

कर्मणः परात् प्रपूर्वात् ज्ञोदागश्च डः स्यात् । पथिप्रज्ञः। प्रपाप्रदः॥

आशिषि हनः । ५ । १ । ८० ।

कर्मणः पराद्धन्तेराशिषि डः स्यात् । शत्रुहः ॥ ८० ॥

क्लेशादिभ्योऽपात् । ५ । १ । ८१ ।

क्लेशादिकर्मणः परादपाद्धन्तेर्डः स्यात् । क्लेशापहः । तमोपहः ॥

कुमारशीर्षाण्णिन् । ५ । १ । ८२ ।

आभ्यां कर्मभ्यां पराद्धन्तेर्णिन् स्यात् । कुमारघाती । शीर्षघाती ॥ ८२ ॥

अचित्ते टक् । ५ । १ । ८३ ।

कर्मणः पराद्धन्तेरचित्तवति कर्त्तरि टक् स्यात् । वातघ्नं तैलम् । अचित्त इति किम् । पापघाती यतिः ॥ ८३ ॥

जायापतेश्चिह्नवति । ५ । १ । ८४ ।

आभ्यां कर्मभ्यां पराद्धन्तेश्चिह्नवति कर्त्तरि टक् स्यात् । जायाघ्नो ब्राह्मणः । पतिघ्नी कन्या ॥ ८४ ॥

ब्रह्मादिभ्यः । ५ । १ । ८५ ।

एभ्यः कर्मभ्यः पराद्धन्तेष्टक् स्यात् । ब्रह्मघ्नः। गोघ्नः पापी ॥ ८५ ॥

हस्तिबाहुकपाटाच्छक्तौ । ५ । १ । ८६ ।

एभ्यः कर्मभ्यः पराद्धन्तेः शक्तौ गम्यायां टक् स्यात् । हस्तिघ्नः । बाहुघ्नः । कपाटघ्नः । शक्ताविति किम् । हस्तिघातो विषदः ॥ ८६ ॥

नगरादगजे । ५ । १ । ८७ ।

नगरात्कर्मणः पराद्धन्तेरगजे कर्त्तरि टक् स्यात् । नगरघ्नो व्याघ्रः । अगज इति किम् । नगरघातो हस्ती ॥ ८७ ॥

राजघः । ५ । १ । ८८ ।

राज्ञः कर्मणः पराद्धन्तेष्टक् घादेशश्च निपात्यते । राजघः ॥ ८८ ॥

पाणिघताडघौ शिल्पिनि । ५ । १ । ८९ ।

एतौ शिल्पिनि टगन्तौ निपात्येते । पाणिघः । ताडघः । शिल्पिनीति किम् । पाणिघातः । ताडघातः ॥ ८९ ॥

कुक्ष्यात्मोदरात् भृगः खिः । ५ । १ । ९० ।

एभ्यः कर्मभ्यः पराद्भृगः खिः स्यात् । कुक्षिम्भरिः । आत्मम्भरिः । उदरम्भरिः ॥ ९० ॥

अर्होऽच् । ५ । १ । ९१ ।

कर्मणः परादर्हेरच् स्यात् । पूजार्हा साध्वी ॥ ९१ ॥

धनुर्दण्डत्सरुलाङ्गलाङ्कुशर्ष्टियष्टिशक्तितो-मरघटाद्ग्रहः । ५ । १ । ९२ ।

एभ्यः कर्मभ्यः पराद्ग्रहोऽच् स्यात् । धनुर्ग्रहः । दण्डग्रहः । त्सरुग्रहः । लाङ्गलग्रहः । अङ्कुशग्रहः । ऋष्टिग्रहः । यष्टिग्रहः । शक्तिग्रहः । तोमरग्रहः । घटग्रहः ॥ ९२ ॥

सूत्राद्धारणे । ५ । १ । ९३ ।

सूत्रात्कर्मणः पराद् ग्रहो ग्रहणपूर्वकधारणार्थादच् स्यात् । सूत्रग्रहः प्राज्ञः सूत्रधारो वा । धारण इति किम् । सूत्रग्राहः ॥ ९३ ॥

आयुधादिभ्यो धृगोऽदण्डादेः । ५ । १ । ९४ ।

दण्डादिवर्जादायुधादेः कर्मणः पराद् धृगोऽच् स्यात् । धनुर्द्धरः । भूधरः । अदण्डादेरिति किम् । दण्डधारः । कुण्डधारः ॥ ९४ ॥

हृगोवयोऽनुद्यमे । ५ । १ । ९५ ।

कर्मणः पराद्धृगो वयस्यनुद्यमेच गम्येऽच् स्यात् । अस्थिहरः श्वशिशुः । उद्यमः उत्क्षेपणमाकाशे धारणं वा तदभावे । अंशहरो दायादः । मनोहरा माला । वयोऽनुद्यम इति किम् । भारहारः ॥ ९५ ॥

आङः शीले । ५ । १ । ९६ ।

कर्मणः परादाङ्पूर्वाद्धृगः शीले गम्येऽच् स्यात् । पुष्पाहरः । शील इति किम् । पुष्पाहारः ॥ ९६ ॥

दृतिनाथात् पशाविः । ५ । १ । ९७ ।

आभ्यां कर्मभ्यां पराद्धृगः पशौ कर्त्तरि इः स्यात् । दृतिहरिः श्वा । नाथहरिः सिंहः ॥ ९७ ॥

रजःफलेमलाद् ग्रहः । ५ । १ । ९८ ।

एभ्यः कर्मभ्यः पराद् ग्रहेरिः स्यात् । रजोग्रहिः । फलेग्रहिः । मलग्रहिः ॥ ९८ ॥

देववातादापः । ५ । १ । ९९ ।

आभ्यां कर्मभ्यां परादापेरिः स्यात् । देवापिः । वातापिः ॥ ९९ ॥

सकृत्स्तम्बाद्वत्सव्रीहौ कृगः । ५ । १ । १०० ।

आभ्यां कर्मभ्यां परात् कृगो यथासङ्ख्यं वत्सव्रीह्योः कर्त्रोरिः स्यात् । सकृत्करिर्वत्सः । स्तम्बकरिर्व्रीहिः ॥ १०० ॥

किंयत्तद्बहोरः । ५ । १ । १०१ ।

एभ्यः कर्मभ्यः परात् कृगो, अः स्यात् । किंकरा । यत्करा । तत्करा । बहुकरा ॥ १०१॥

सङ्ख्याऽहर्दिवाविभानिशाप्रभाभाश्चित्रकर्त्राद्यन्तानन्तकारबाह्वरुर्धनुर्नान्दीलिपिलिविबलिभक्तिक्षेत्रजङ्घाक्षपाक्षणदारजनिदोषादिनदिवसाट्टः ।५।१।१०२।

सङ्ख्येत्यर्थप्रधानमपि एभ्यः कर्मभ्यः परात्कृगष्टः स्यात् । सङ्ख्याकरः । द्विकरः । अहस्करः । दिवाकरः । विभाकरः । निशाकरः । प्रभाकरः । भास्करः । चित्रकरः । कर्तृकरः । आदिकरः । अन्तकरः । अनन्तकरः । कारकरः । बाहुकरः । अरुष्करः । धनुष्करः । नान्दीकरः । लिपिकरः । लिविकरः । बलिकरः । भक्तिकरः । क्षेत्रकरः । जङ्घाकरः । क्षपाकरः । क्षणदाकरः । रजनिकरः । दोषाकरः । दिनकरः । दिवसकरः ॥ १०२ ॥

हेतुतच्छीलानुकूले ऽशब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदात् । ५ । १ । १०३ ।

एषु कर्तृषु शब्दादिवर्जात् कर्मणः परात्कृगष्टः स्यात् । यशस्करी विद्या । श्राद्धकरः । प्रेषणकरः । शब्दादिनिषेधः किम् । शब्दकार इत्यादि ॥

भृतौ कर्मणः । ५ । १ । १०४ ।

कर्मशब्दात् कर्मणः परात्कृगो भृतौ गम्यायां टः स्यात् । कर्मकरी दासी ॥ १०४ ॥

क्षेमप्रियमद्रभद्रात् खाऽण् । ५ ।१।१०५।

एभ्यः कर्मभ्यः परात् कृगः खाणौ स्याताम् । क्षेमङ्करः। क्षेमकारः । प्रियङ्करः । प्रियकारः । मद्रङ्करः । मद्रकारः। भद्रङ्करः । भद्रकारः ॥१०५॥

मेघर्त्तिभयाभयात्खः ।५। १ । १०६ ।

एभ्यः कर्मभ्यः परात्कृगः खः स्यात्। मेघङ्करः। ऋतिङ्करः। भयङ्करः। अभयङ्करः ॥ १०६ ॥

प्रियवशाद्वदः । ५ । १ । १०७।

आभ्यां कर्मभ्यां पराद्वदः खः स्यात्। प्रियम्वदः। वशम्वदः॥१०७॥

द्विषन्तपपरन्तपौ । ५ । १ । १०८ ।

द्विषत्पराभ्यां कर्मभ्यां परात् ण्यन्तात् तपेः खो ह्रस्वो द्विषतोऽन्च निपात्यते । द्विषन्तपः। परन्तपः ॥ १०८ ॥

परिमाणार्थमितनखात्पचः । ५।१।१०९।

प्रस्थादिमितनखेभ्यः कर्मभ्यः परात्पचेः खः स्यात्। प्रस्थम्पचः। मितम्पचः। नखम्पचः ॥ १०९ ॥

कूलाभ्रकरीषात्कषः । ५ । १ । ११० ।

एभ्यः कर्मभ्यः कषेः खः स्यात् । कूलङ्कषा । अभ्रङ्कषा । करीषङ्कषा ॥ ११० ॥

सर्वात्सहश्च । ५ । १ । १११ ।

सर्वात्कर्मणः परात् सहेः कषेश्च खः स्यात् । सर्वंसहः। सर्वङ्कषः ॥

भृवृजितॄतपदमेश्च नाम्नि ।५।१।११२।

कर्मणः परेभ्य एभ्यः सहेश्च संज्ञायां खः स्यात् । विश्वम्भरा भूः । पतिम्वरा कन्या । शत्रुञ्जयोऽद्रिः । रथन्तरं साम । शत्रुन्तपो राजा । बलिन्दमः कृष्णः । शत्रुंसहो राजा । नाम्नीति किम् । कुटुम्बभारः ॥ ११२॥

धारेर्धर्च् । ५ । १ । ११३ ।

कर्मणः पराद्धारेः संज्ञायां खः स्यात् धारेश्च धर् । वसुन्धरा भूः॥११३॥

पुरन्दरभगन्दरौ । ५ । १ । ११४ ।

एतौ संज्ञायां खान्तौ निपात्येते । पुरन्दरः शक्रः । भगन्दरो व्याधिः॥

वाचंयमो व्रते । ५ । १ । ११५ ।

व्रते गम्यमाने वाचः कर्मणः परायमेः खो वाचो ऽमन्तश्च स्यात् । वाचंयमो व्रती ॥ ११५ ॥

मन्याण्णिन् । ५ । १ । ११६ ।

कर्मणः परान्मन्यतेर्णिन् स्यात् । पण्डितमानी बन्धोः ॥ ११६ ॥

कर्तुः खश् । ५ । १ । ११७ ।

प्रत्ययार्थात्कर्तुः कर्मणः परान्मन्यतेः खश् स्यात् । पण्डितम्मन्यः कर्तुरिति किम् । पटुमानी चैत्रस्य ॥ ११७ ॥

एजेः । ५ । १ । ११८ ।

कर्मणः परादेजयतेः खश् स्यात् । अरिमेजयः ॥ ११८ ॥

शुनीस्तनमुञ्जकूलास्यपुष्पात् ट्धेः । ५ । १ । ११९ ।

एभ्यः कर्मभ्यः ट्धेः खश् स्यात् । शुनिन्धयः। स्तनन्धयः। मुञ्जन्धयः। कूलन्धयः । आस्यन्धयः । पुष्पन्धयः ॥ ११९ ॥

नाडीघटीखरीमुष्टिनासिकावाताद् ध्मश्च । ५ । १ । १२० ।

एभ्यः कर्मभ्यः परादृध्मद्धेश्च खश् स्यात् । नाडिन्धमः । नाडिन्धयः । घटिन्धमः । घटिन्धयः । खरिन्धमः । खरिन्धयः । मुष्टिन्धमः । मुष्टिन्धयः । नासिकन्धमः । नासिकन्धयः । वातन्धमः । वातन्धयः ॥ १२० ॥

पाणिकरात् । ५ । १ । १२१ ।

आभ्यां कर्मभ्यां परात् ध्मः खश् स्यात् । पाणिन्धमः । करन्धमः ॥

कूलादुद्रुजोद्वहः । ५ । १ । १२२ ।

कूलात्कर्मणः पराभ्यामाभ्यां खश् स्यात् । कूलमुद्रुजः । कूलमुद्वहः १२२॥

वहाभ्राल्लिहः । ५ । १ । १२३ ।

आभ्यां कर्मभ्यां परालिलहः खश् स्यात् । वहंलिहः । अभ्रंलिहः ॥

बहुविध्वरुस्तिलात्तुदः । ५ । १ । १२४ ।

एभ्यः कर्मभ्यः परात्तुदेः खश् स्यात् । बहुन्तुदः । विधुन्तुदः । अरुन्तुदः । तिलन्तुदः ॥ १२४ ॥

ललाटवातशर्द्धात्तपाऽजहाकः । ५ । १ । १२५ ।

एभ्यः कर्मभ्यः परेभ्यो यथासङ्ख्यं तपाऽजहाग्भ्यः खश् स्यात् । ललाटन्तपः । वातमजः । शर्द्धञ्जहः ॥ १२५ ॥

असूर्योग्राद् दृशः । ५ । १ । १२६ ।

आभ्यां कर्मभ्यां परादृशेः खश् स्यात् । असूर्यम्पश्यः । उग्रम्पश्यः ॥

इरम्मदः । ५ । १ । १२७ ।

इरापूर्वान्मदेः खश् स्यात् । इरम्मदः ॥ १२७ ॥

नग्नपलितप्रियान्धस्थूलसुभगाढ्यतदन्ताच्व्यर्थेऽच्वेर्भुवः खिष्णुखुकञौ ।५।१।१२८।

नग्नादिभ्यः केवलेभ्यस्तदन्तेभ्यश्चाऽच्व्यन्तेभ्यश्च्व्यर्थवृत्तिभ्यः परात् भुवः खिष्णुखुकञौ स्याताम्। नग्नम्भविष्णुः । नग्नम्भावुकः । पलितम्भविष्णुः। पलितम्भावुकः। प्रियम्भविष्णुः। प्रियम्भावुकः । अन्धम्भविष्णुः। अन्धम्भावुकः । स्थूलम्भविष्णुः । स्थूलम्भावुकः । सुभगम्भविष्णुः । सुभगम्भावुकः। आढ्यम्भविष्णुः । आढ्यम्भावुकः । तदन्तः । सुनग्नम्भविष्णुः । सुनग्नम्भावुक इत्यादि। अच्वेरिति किम् । आढ्यीभविता ॥

कृगः खनट् करणे । ५ । १ । १२९ ।

नग्नादिभ्योऽच्व्यन्तेभ्यश्च्व्यर्थवृत्तिभ्यः परात् कृगः करणे खनट् स्यात्। नग्नङ्करणं द्यूतम् । पलितङ्करणम् । प्रियङ्करणम् । अन्धङ्करणम् । स्थूलङ्करणम्। सुभगङ्करणम् । आढ्यङ्करणम् ।सुनग्नङ्करणम्। च्व्यर्थ इति किम्। नग्नङ्करोति द्यूतेन ॥ १२९ ॥

भावे चाशिताद् भुवः खः । ५ । १ । १३० ।

आशितात्पराद्भुवोभावकरणयोः खः स्यात् । आशितम्भवस्ते । आशितम्भव ओदनः ॥ १३० ॥

नाम्नोगमः खड्डौच विहायसस्तु विहः । ५ । १ । १३१ ।

नाम्नः पराद् गमेः खड्डखाः स्युः विहायसो विहश्च। तुरङ्गः । तुरगः। विहङ्गः। विहगः । तुरङ्गमः । विहङ्गमः । सुतङ्गमो मुनिः ॥ १३१ ॥

सुगदुर्गमाधारे ।५।१।१३२ ।

सुदुर्भ्यां पराद् गमेराधारे डः स्यात्। सुगः । दुर्गःपन्थाः ॥१३२॥

निर्गो देशे । ५ । १ । १३३ ।

निः पूर्वाद् गमेराधारे देशे डः स्यात् । निर्गो देशः ॥ १३३ ॥

शमो नाम्न्यः । ५ । १ । १३४ ।

शमो नाम्नः पराद्धातोः संज्ञायामः स्यात् । शम्भवोऽर्हन् । नाम्नीति किम् । शङ्करी दीक्षा ॥ १३४ ॥

पार्श्वादिभ्यः शीङः । ५ । १ । १३५ ।

एभ्यो नामभ्यः पराच्छीङो अः स्यात् । पार्श्वशयः ॥ १३५ ॥

ऊर्ध्वादिभ्यः कर्तुः । ५ । १ । १३६ ।

एभ्यः कर्तृवाचिभ्यः पराच्छीङो अः स्यात् । ऊर्ध्वशयः । उत्तानशयः ॥ १३६ ॥

आधारात् । ५ । १ । १३७ ।

आधारान्नाम्नः पराच्छीङो अः स्यात् । खशयः ॥ १३७ ॥

चरेष्टः । ५ । १ । १३८ ।

आधारात् परात् चरेष्टः स्यात् । कुरुचरी ॥ १३८ ॥

भिक्षासेनादायात् । ५ । १ । १३९ ।

एभ्यः परात् चरेष्टः स्यात् । भिक्षाचरी । सेनाचरः । आदायचरः ॥ १३९ ॥

पुरोऽग्रतोऽग्रे सर्त्तेः । ५ । १ । १४० ।

एभ्यः परात्सर्त्तेष्टः स्यात् । पुरःसरी । अग्रतःसरः । अग्रेसरः ॥ १४० ॥

पूर्वात् कर्तुः । ५ । १ । १४१ ।

पूर्वात् कर्तृवृत्तेः परात् सर्त्तेष्टः स्यात् । पूर्वसरः । कर्तुरिति किम् । पूर्वसारः ॥ १४१ ॥

स्थापास्नात्रः कः । ५ । १ । १४२ ।

नाम्नः परेभ्य एभ्यः कः स्यात् । समस्थः । कच्छपः । नदीष्णः । धर्मत्रम् ॥ १४२ ॥

शोकापनुदतुन्दपरिमृजस्तम्बेरमकर्णेजपं-प्रियालसहस्तिसूचके । ५ । १ । १४३ ।

एते यथासङ्ख्यं प्रियादिष्वर्थेषु कान्ता निपात्यन्ते । शोकापनुदः प्रियः । तुन्दपरिमृजोऽलसः । स्तम्बेरमो हस्ती । कर्णेजपोऽतिखलः। एष्विति किम् । शोकापनोदो धर्माचार्यः ॥ १४३ ॥

मूलविभुजादयः । ५ । १ । १४४ ।

एते कान्ता यथादर्शनं निपात्यन्ते । मूलविभुजो रथः। कुमुदं कैरवम् ॥

दुहेर्दुघः । ५ । १ । १४५ ।

नाम्नः पराद् दुहेर्दुघः स्यात् । कामदुघा ॥ १४५ ॥

भजो विण् । ५ । १ । १४६ ।

नाम्नः पराद् भजेर्विण् स्यात् । अर्द्धभाक् ॥ १४६ ॥

मन्वन्क्वनिप्विच् क्वचित् ।५।१। १४७।

नाम्नः पराद्धातोरेते यथा लक्ष्यं स्युः । मन् । इन्द्रशर्मा । वन् । विजावा। क्वनिप् । सुधीवा । विच् । शुभंयाः ॥ १४७ ॥

क्विप् । ५ । १ । १४८ ।

नाम्नः पराद्धातोर्यथालक्ष्यं क्विप् स्यात् । उखाश्रत् ॥ १४८ ॥

स्पृशोऽनुदकात् । ५ । १ । १४९ ।

नाडीघटीखरीमुष्टिनासिकावाताद् ध्मश्च । ५ । १ । १२० ।

एभ्यः कर्मभ्यः पराद् ध्मद्धेश्च खश् स्यात्। नाडिन्धमः। नाडिन्धयः। घटिन्धमः । घटिन्धयः। खरिन्धमः। खरिन्धयः। मुष्टिन्धमः। मुष्टिन्धयः। नासिकन्धमः । नासिकन्धयः । वातन्धमः । वातन्धयः ॥ १२० ॥

पाणिकरात् । ५ । १ । १२१ ।

आभ्यां कर्मभ्यां परात् ध्मः खश् स्यात् । पाणिन्धमः । करन्धमः ॥

कूलादुद्रुजोद्वहः । ५ । १ । १२२ ।

कूलात्कर्मणः पराभ्यामाभ्यां खश् स्यात् । कूलमुद्रुजः। कूलमुद्वहः १२२॥

वहाभ्राल्लिहः । ५ । १ । १२३ ।

आभ्यां कर्मभ्यां पराल्लिहः खश् स्यात् । वहंलिहः । अभ्रंलिहः ॥

बहुविध्वरुस्तिलात्तुदः । ५ । १ । १२४ ।

एभ्यः कर्मभ्यः परात्तुदेः खश् स्यात् । बहुन्तुदः । विधुन्तुदः । अरुन्तुदः। तिलन्तुदः ॥ १२४ ॥

ललाटवातशर्द्धात्तपाऽजहाकः।५।१।१२५।

एभ्यः कर्मभ्यः परेभ्यो यथासङ्ख्यं तपाऽजहाग्भ्यः खश् स्यात् । ललाटन्तपः । वातमजः। शर्द्धञ्जहः ॥ १२५ ॥

असूर्योग्राद् दृशः । ५ । १ । १२६ ।

आभ्यां कर्मभ्यां पराद्दृशेः खश् स्यात्। असूर्यम्पश्यः । उग्रम्पश्यः॥

इरम्मदः । ५ । १ । १२७।

इरापूर्वान्मदेः खश् स्यात् । इरम्मदः ॥ १२७ ॥

ब्रह्मणः पराद्वदेर्णिन् स्यात् । ब्रह्मवादी ॥ १५६ ॥

व्रताभीक्ष्ण्ये । ५ । १ । १५७ ।

अनयोर्गम्यमानयो र्नाम्नः पराद्धातोर्णिन् स्यात् । स्थण्डिलवर्त्ती । क्षीरपायिण उशीनराः ॥ १५७ ॥

करणाद्यजो भूते । ५ । १ । १५८ ।

करणार्थान्नाम्नः पराद्भूतार्थात् यजेर्णिन् स्यात् । अग्निष्टोमयाजी ॥ १५८ ॥

निन्द्ये व्याप्यादिन्विक्रियः । ५ । १ । १५९ ।

व्याप्यान्नाम्नः परात् भूतार्थाद्विक्रियः कुत्से कर्त्तरीन् स्यात् । सोमविक्रयी । निन्द्य इति किम् । धान्यविक्रायः ॥ १५९ ॥

हनो णिन् । ५ । १ । १६० ।

व्याप्यात् परात् भूतार्थाद्धन्ते र्निन्द्ये कर्त्तरि णिन् स्यात् । पितृघाती ॥ १६० ॥

ब्रह्मभ्रूणवृत्रात क्विप् । ५ । १ । १६१ ।

एभ्यः कर्मभ्यः पराद्भूतार्थाद्धन्तेः क्विप् स्यात् । ब्रह्महा । भ्रूणहा । वृत्रहा ॥ १६१ ॥

कृगः सुपुण्यपापकर्ममन्त्रपदात् । ५ । १ । १६२ ।

सोः पुण्यादेश्च कर्मणः परात् भूतार्थात् कृगः क्विप् स्यात् । सुकृत् । पुण्यकृत् । पापकृत् । कर्मकृत् । मन्त्रकृत् । पदकृत् ॥ १६२ ॥

सोमात्सुगः । ५ । १ । १६३ ।

सोमाद्व्याप्यात्परात् भूतार्थात् सुगः क्विप् स्यात् । सोमसुत् ॥

अग्नेश्चेः । ५ । १ । १६४ ।

अग्नेर्व्याप्यात्परात् भूतार्थाच्चेः क्विप् स्यात् । अग्निचित् ॥ १६४ ॥

कर्मण्यग्न्यर्थे । ५ । १ । १६५ ।

कर्मणः परात् भूतार्थाच्चेः कर्मण्यग्न्यर्थे क्विप् स्यात् । श्येनचित् ॥

दृशः क्वनिप् । ५ । १ । १६६ ।

व्याप्यात्परात् भूतार्थात् दृशेः क्वनिप् स्यात् । बहुदृश्वा ॥ १६६ ॥

सहराजभ्यां कृग्युधेः । ५ । १ । १६७ ।

आभ्यां कर्मभ्यां परात् भूतार्थात् कृगो युधेश्च क्वनिप् स्यात् । सहकृत्वा । सहयुध्वा । राजकृत्वा । राजयुध्वा ॥ १६७ ॥

अनोर्जने र्डः । ५ । १ । १६८ ।

कर्मणः परादनुपूर्वात् भूतार्थाज्जनेर्डः स्यात् । पुमनुजः ॥ १६८ ॥

सप्तम्याः । ५ । १ । १६९ ।

सप्तम्यन्ताद्भूतार्थाज्जनेर्डः स्यात् । मन्दुरजः ॥ १६९ ॥

अजातेः पञ्चम्याः । ५ । १ । १७० ।

पञ्चम्यन्तादजात्यर्थात् भूतार्थात् जनेर्डः स्यात् । बुद्धिजः । अजातेरिति किम् । गजाज्जातः ॥ १७० ॥

क्वचित् । ५ । १ । १७१ ।

उक्तादन्यत्रापि यथालक्ष्यं डः स्यात् । किञ्जः । अनुजः । अजः । स्त्रीजः । ब्रह्मज्यः । वराहः । आखः ॥ १७१ ॥

सुयजोर्ङ्वनिप् । ५ । १ । १७२ ।

आभ्यां भूतार्थाभ्यां ङ्वनिप् स्यात् । सुत्वानौ । यज्वा ॥ १७२ ॥

जॄषोऽतृः । ५ । १ । १७३ ।

जॄषेर्भूतार्थादतृः स्यात् । जरती ॥ १७३ ॥

क्तक्तवतू । ५ । १ । १७४ ।

भूतार्थाद्धातोरेतौ स्याताम् । कृतः । कृतवान् ॥१७४ ॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनलघुवृत्तौ पञ्चमस्याध्यायस्य प्रथमः पादः समाप्तः ।

अर्हम् ।

श्रुसदवस्भ्यः परोक्षा वा । ५ । २ । १ ।

एभ्यो भूतार्थेभ्यः परोक्षा वा स्यात् । उपशुश्राव । उपससाद । अनूवास । पक्षे । उपाश्रौषीत् । उपाशृणोत् । उपासदत् । उपासीदत् । अन्ववात्सीत् । अन्ववसत् ॥ १ ॥

तत्र क्वसुकानौ तद्वत् । ५ । २ । २ ।

परोक्षामात्रविषये धातोः परौ क्वसुकानौ स्यातां तौ च परोक्षेव । शुश्रुवान् । सेदिवान् । ऊषिवान् । पेचिवान् । पेचानः ॥ २ ॥

वेयिवदनाश्वदनूचानम् । ५ । २ । ३ ।

एते भूतेऽर्थे क्वसुकानान्ताः कर्त्तरि वा निपात्यन्ते । समीयिवान् । अनाश्वान् । अनूचानः । पक्षे । अगात् । उपैत् । उपेयाय । नाशीत् । नाश्नात् । नाश । अन्ववोचत् । अन्ववक् । अन्वब्रवीत् । अनूवाच ॥

अद्यतनी । ५ । २ । ४ ।

भूतार्थाद्धातोरद्यतनी स्यात् । अकार्षीत् ॥ ४ ॥

विशेषाऽविवक्षाव्यामिश्रे । ५ । २ । ५ ।

अनद्यतनादिविशेषाऽविवक्षायां व्यामिश्रणे च सति भूतार्थाद्धातो-रद्यतनी स्यात् । रामो वनमगमत् । अद्य ह्यो वाऽभुक्ष्महि ॥ ५ ॥

रात्रौ वसोऽन्त्ययामास्वप्तर्यद्य ।५।२।६।

रात्रौ भूतार्थवृत्तेर्वसतेरद्यतनी स्यात् सचेदर्थो यस्यां रात्रौ भूत-स्तस्या एवान्त्ययामंव्याप्त्याऽस्वप्तरि कर्त्तरि स्यात् । अद्यतनेनैवान्त्ययामे-नावच्छिन्ने अद्यतने चेत्प्रयोगोऽस्ति नाद्यतनान्तरे । अमुत्रावात्सम् । रात्र्य ऽन्त्ययामे तु मुहूर्त्तमपि स्वापेऽमुत्रावसमिति ॥ ६ ॥

अनद्यतने ह्यस्तनी ।५।२।७।

आन्याय्यादुत्थानादान्याय्याच्च संवेशनादहरुभयतः सार्द्धरात्रं वा-ऽद्यतनः, तस्मिन्नसति भूतार्थाद्धातोर्ह्यस्तनी स्यात् । अकरोत् ॥ ७ ॥

ख्याते दृश्ये ।५।२।८।

लोकविज्ञाते प्रयोक्तुः शक्यदर्शने भूतानद्यतनेऽर्थे वर्त्तमानाद्धातोर्ह्य-स्तनी स्यात् । अरुणत्सिद्धराजोऽवन्तीम् । ख्यात इति किम् । चकार कटम् । दृश्य इति किम् । जघान कंसं किल वासुदेवः ॥ ८ ॥

अयदि स्मृत्यर्थे भविष्यन्ती ।५।२।९।

स्मृत्यर्थे धातावुपपदे भूतानद्यतनार्थवृत्तेर्धातोर्भविष्यन्ती स्यात् अयद्योगे । स्मरसि साधो स्वर्गे स्थास्यामः । अयदीति किम् । अभिजा-नासि मित्र यत्कलिङ्गेष्ववसाम ॥ ९ ॥

वा काङ्क्षायाम् ।५।२।१०।

स्मृत्यर्थे धातावुपपदे प्रयोक्तुः क्रियान्तराकाङ्क्षायां सत्यां भूतानद्यतना-र्थाद्धातोर्भविष्यन्ती वा स्यात् । स्मरसि मित्र कार्श्मीरेषु वत्स्यामोऽवसाम वा । तत्रौदनं भोक्ष्यामहे, अभुञ्जमहि वा ॥

कृतास्मरणाऽतिनिन्हवे परोक्षा ।५।२।११।

कृतस्यापि चित्तविक्षेपादिनाऽस्मरणेऽत्यन्तनिह्नवे वा गम्ये भूतानद्यतनार्थाद्धातोः परोक्षा स्यात् । सुप्तोऽहं किल विललाप । कलिङ्गेषु ब्राह्मणो हतस्त्वया । नाहं कलिङ्गान् जगाम ॥ ११ ॥

परोक्षे । ५ । २ । १२ ।

भूतानद्यतने परोक्षार्थाद्धातोः परोक्षा स्यात् । धर्मं दिदेश तीर्थङ्करः ॥

ह शश्वद्युगान्तःप्रच्छ्ये ह्यस्तनी च ।५।२।१३।

हे शश्वतिच प्रयुक्ते पञ्चवर्षमध्यप्रच्छ्ये च भूतानद्यतने परोक्षेऽर्थे वर्त्तमानाद्धातोर्ह्यस्तनीपरोक्षे स्याताम् । इतिहाकरोत् । इतिह चकार । शश्वदकरोत् । शश्वच्चकार । किमगच्छस्त्वं मथुराम् । किं जगन्थ त्वं मथुराम् ॥

अविवक्षिते । ५ । २ । १४ ।

भूतानद्यतने परोक्षे परोक्षत्वेनाविवक्षितेऽर्थे वर्त्तमानाद्धातोर्ह्यस्तनी स्यात् । अहन् कंसं किल वासुदेवः ॥ १४ ॥

वाऽद्यतनी पुरादौ । ५ । २ । १५ ।

भूतानद्यतने परोक्षे परोक्षत्वेनाविवक्षितेऽर्थे वर्त्तमानाद्धातोः पुरादावुपपदे अद्यतनी वा स्यात् । अवात्सुरिह पुरा छात्राः । पक्षे । अवसन् । ऊषुर्वा । तदाभाषिष्ट राघवः । पक्षे । अभाषत । बभाषे वा ॥ १५ ॥

स्मे च वर्त्तमाना । ५ । २ । १६ ।

भूतानद्यतनेऽर्थे वर्त्तमानाद्धातोः स्मे पुरादौ चोपपदे वर्त्तमाना स्यात् । पृच्छति स्म पुरोधसम् । वसन्तीह पुरा छात्राः । अथाह वर्णी ॥ १६ ॥

ननौ पृष्टोक्तौ सद्वत् । ५ । २ । १७ ।

ननावुपपदे पृष्टप्रतिवचने भूतेऽर्थे वर्त्तमानाद्धातोर्वर्त्तमानेव वर्त्तमाना स्यात् । किमकार्षीः कटं चैत्र । ननु करोमि भोः । ननु कुर्वन्तं मां पश्य ॥१७॥

नन्वोर्वा । ५ । २ । १८ ।

नन्वोरुपपदयोः पृष्टोक्तौ भूतेऽर्थे वर्त्तमानाद्धातोर्वा वर्त्तमाना स्यात् साच सद्वत । किमकार्षीः कटं चैत्र । न करोमि भोः । न कुर्वन्तं मां पश्य। नाकर्षम् । नु करोमि भोः । नुकुर्वाणं मां पश्य । न्वकार्षम् ॥ १८ ॥

सति । ५ । २ । १९ ।

वर्त्तमानार्थाद्धातोर्वर्त्तमाना स्यात् । अस्ति कूरं पचति । मांसं न भक्षयति । इहाधीमहे । तिष्ठन्ति पर्वताः १९ ॥

शत्रानशावेष्यति तु सस्यौ । ५ । २ । २० ।

सदर्थाद्धातोः शत्रानशौ स्यातां भविष्यन्ती विषयेऽर्थेऽस्य युक्तौ । यान् । शयानः । यास्यन् । शयिष्यमाणः ॥ २० ॥

तौ माङ्याक्रोशेषु । ५ । २ । २१ ।

माङ्युपपदे आक्रोशे गम्ये तौ शत्रानशावेव स्याताम् । मापचन् वृषलो ज्ञास्यति । मापचमानोऽसौ मर्तुकामः ॥ २१ ॥

वा वेत्तेः क्वसुः । ५ । २ । २२ ।

सदर्थाद्वेत्तेः क्वसुर्वा स्यात् । तत्त्वं विद्वान् । विदन् ॥ २२ ॥

पूङ्यजः शानः । ५ । २ । २३ ।

आभ्यां सदर्थाभ्यां परः शानः स्यात् । पवमानः। यजमानः ॥ २३ ॥

वयः शक्तिशीले । ५ । २ । २४ ।

एषु गम्येषु सदर्थाद्धातोः शानः स्यात् । स्त्रियं गच्छमानाः । समश्नानाः । परान्निन्दमानाः ॥ २४ ॥

धारीङोऽकृच्छ्रेऽतृश् । ५ । २ । २५ ।

सुखसाध्ये सत्यर्थे वर्त्तमानाद्धारेरिङश्च परोऽतृश् स्यात्। धारयन्नाचाराङ्गम्। अधीयन् द्रुमपुष्पीयम् ॥ २५ ॥

सुग्द्विषार्हः सत्रिशत्रुस्तुत्ये ।५।२।२६।

सदर्थेभ्य एभ्यो यथासङ्ख्यं सत्रिणि शत्रौ स्तुत्ये च कर्त्तर्यतृश् स्यात्। सर्वे सुन्वन्तः। चौरं द्विषन्। पूजामर्हन्। एष्विति किम्। सुरां सुनोति ॥२६॥

तृन्शीलधर्मसाधुषु ।५।२।२७।

शीलादिषु सदर्थाद्धातोस्तृन् स्यात्। कर्त्ता कटम्। वधूमूढां मुण्डयितारः श्राविष्टायनाः। गन्ता खेलः ॥ २७ ॥

भ्राज्यऽलङ्कृगनिराकृग्भूसहिरुचिवृतिवृधिचरिप्रजनापत्रप इष्णुः ।५।२।२८।

एभ्यः शीलादिसदर्थेभ्य इष्णुः स्यात्। भ्राजिष्णुः। अलङ्करिष्णुः। निराकरिष्णुः। भविष्णुः। सहिष्णुः। रोचिष्णुः। वर्त्तिष्णुः। वर्द्धिष्णुः। चरिष्णुः। प्रजनिष्णुः। अपत्रपिष्णुः ॥ २८ ॥

उदः पचिपतिपदिमदेः ।५।२।२९।

उत्पूर्वेभ्य एभ्यः शीलादिसदर्थेभ्य इष्णुः स्यात्। उत्पचिष्णुः। उत्पतिष्णुः। उत्पदिष्णुः। उन्मदिष्णुः ॥ २९ ॥

भूजेः ष्णुक् ।५।२।३०।

आभ्यां शीलादिसदर्थाभ्यां ष्णुक् स्यात्। भूष्णुः। जिष्णुः ॥३०॥

स्थाग्लाम्लापचिपरिमृजिक्षेः स्नुः ।५।२।३१।

एभ्यः शीलादिसदर्थेभ्यः स्नुः स्यात्। स्थास्नुः। ग्लास्नुः। म्लास्नुः। पक्ष्णुः। परिमार्क्ष्णुः। क्षेष्णुः ॥ ३१ ॥

त्रसिगृधिधृषिक्षिपः क्नुः ।५।२।३२।

एभ्यः शीलादिसदर्थेभ्यः क्नुः स्यात् । त्रस्नुः । गृध्नुः । धृष्णुः । क्षिप्नुः ॥ ३२ ॥

सन्भिक्षाशंसेरुः । ५ । २ । ३३ ।

शीलादिसदर्थात्सन्नन्ताद् भिक्षाशंसिभ्यां च उः स्यात् । लिप्सुः भिक्षुः आशंसुः ॥ ३३ ॥

विन्द्विच्छू । ५ । २ । ३४ ।

शीलादिसदर्थाभ्यां वेत्तीच्छतिभ्यामुर्यथासङ्ख्यं नुपान्त्यच्छान्तादेशौ च निपात्येते । विन्दुः । इच्छुः ॥ ३४ ॥

शॄवन्देरारुः । ५ । २ । ३५ ।

आभ्यां शीलादिसदर्थाभ्यां आरुः स्यात् । विशरारुः । वन्दारुः ॥ ३५ ॥

दाधेसिशदसदो रुः । ५ । २ । ३६ ।

शीलादिसदर्थेभ्यो दारूपट्धेसिशदसद्भ्यो रुः स्यात् । दारुः । धारुः । सेरुः । शद्रुः । सद्रुः ॥ ३६ ॥

शीङ्श्रद्धानिद्रातन्द्रादयिपतिगृहिस्पृहेरालुः । ५ । २ । ३७ ।

एभ्यः शीलादिसदर्थेभ्य आलुः स्यात् । शयालुः । श्रद्धालुः । निद्रालुः । दयालुः । तन्द्रालुः । पतयालुः । गृहयालुः । स्पृहयालुः ॥ ३७ ॥

ङौ सासहिवावहिचाचलिपापतिः । ५ । २ । ३८ ।

शीलादिसदर्थानां सहिवहिचलिपतां यङन्तानां ङौ सति यथासङ्ख्यमेते निपात्यन्ते । सासहिः । वावहिः । चाचलिः । पापतिः ॥ ३८ ॥

सस्त्रिचक्रिदधिजज्ञिनेमिः । ५ । २ । ३९ ।

एते शीलादौ सदर्थाद्युक्तमन्तो ङ्यन्ता निपात्यन्ते । सस्त्रिः । चक्रिः । दधिः । जज्ञिः । नेमिः ॥ ३९ ॥

शॄकमगमहनवृषभूस्थ उकण् । ५ । २ । ४० ।

शीलादिसदर्थेभ्य एभ्य उकण् स्यात् । शारुकः । कामुकः । आगामुकः । घातुकः । वार्षुकः । भावुकः । स्थायुकः ॥ ४० ॥

लषपतपदः । ५ । २ । ४१ ।

शीलादिसदर्थेभ्य एभ्य उकण् स्यात् । अभिलाषुकः । प्रपातुकः । उपपादुकः ॥ ४१ ॥

भूषाक्रोधार्थजुसृगृधिज्वलशुच-श्चानः । ५ । २ । ४२ ।

भूषार्थेभ्यः क्रोधार्थेभ्योज्वादेर्लषादेश्च शीलादिसदर्थेभ्योऽनः स्यात् । भूषणः । क्रोधनः । कोपनः । जवनः । सरणः । गर्द्धनः । ज्वलनः । शोचनः । अभिलषणः । पतनः । अर्थस्य पदनः ॥ ४२ ॥

चालशब्दार्थादकर्मकात् । ५ । २ । ४३ ।

चालार्थाच्छब्दार्थाच्च धातोः शीलादिसदर्थादकर्मकादनः स्यात् । चलनः । रवणः । अकर्मकादिति किम् । पठिता विद्या ॥ ४३ ॥

इङितो व्यञ्जनाद्यन्तात् । ५ । २ । ४४ ।

व्यञ्जनमादिरन्तश्च यस्य तस्मादिदितोङितश्च धातोः शीलादिसदर्थादनः स्यात् । स्पर्द्धनः । वर्त्तनः । व्यञ्जनाद्यन्तादिति किम् । एधिता । शयिता । अकर्मकादित्येव । वसिता वस्त्रम् ॥ ४४ ॥

न णिङ्यसूददीपदीक्षः । ५ । २ । ४५ ।

णिङन्तात् यन्तात् सूदादिभ्यश्च शीलादि सदर्थेभ्योऽनो न स्यात्। भावयिता। क्ष्मायिता। सूदिता। दीपिता। दीक्षिता॥ ४५॥

द्रमक्रमो यङः। ५। २। ४६।

शीलादिसदर्थाभ्यां यङन्ताभ्यामाभ्यामनः स्यात्। दन्द्रमणः। चङ्क्रमणः॥ ४६॥

यजिजपिदंशिवदादूकः। ५। २। ४७।

एभ्यो यङन्तेभ्यः शीलादिसदर्थेभ्य ऊकः स्यात्। यायजूकः। जञ्जपूकः। दन्दशूकः। वावदूकः॥ ४७॥

जागुः। ५। २। ४८।

शीलादिसदर्थाज्जागुरूकः स्यात्। जागरूकः॥ ४८॥

शमष्टकात् घिनण्। ५। २। ४९।

शीलादिसदर्थेभ्यः शमादिभ्योऽष्टभ्यो घिनण् स्यात्। शमी। दमी। तमी। श्रमी। भ्रमी। क्षमी। प्रमादी। क्लमी॥ ४९॥

युजभुजभजत्यजरञ्जद्विषदुषद्रुहदुहाभ्याहनः। ५। २। ५०।

शीलादिसदर्थेभ्य एभ्यो घिनण् स्यात्। योगी। भोगी। भागी। त्यागी। रागी। द्वेषी। दोषी। द्रोही। दोही। अभ्याघाती। अकर्मकादित्येव। गां दोग्धा॥ ५०॥

आङः क्रीडमुषः। ५। २। ५१।

शीलादिसदर्थाभ्यामाभ्यां आङ्पूर्वाभ्यां घिनण् स्यात्। आक्रीडी। आमोषी॥ ५१॥

प्राच्च यमयसः। ५। २। ५२।

शीलादिसदर्थाभ्यामाङः प्राच्च पराभ्यामाभ्यां घिनण् स्यात् । प्रयामी । आयामी । प्रयासी । आयासी ॥ ५२ ॥

मथलपः । ५ । २ । ५३ ।

प्रात्पराभ्यामाभ्यां शीलादिसदर्थाभ्यां घिनण् स्यात् । प्रमाथी । प्रलापी ॥ ५३ ॥

वेश्च द्रोः । ५ । २ । ५४ ।

वेः प्राच्च परात् द्रोः शीलादिसदर्थाद् घिनण् स्यात् । विद्रावी । प्रद्रावी ॥ ५४ ॥

विपरिप्रात्सर्त्तेः । ५ । २ । ५५ ।

एभ्यः पराच्छीलादिसदर्थात्सर्त्तेर्घिनण् स्यात् । विसारी । परिसारी । प्रसारी ॥ ५५ ॥

समः पृचैपृज्वरेः । ५ । २ । ५६ ।

शीलादिसदर्थाभ्यां समः पराभ्यां पृणक्तिज्वरिभ्यां घिनण् स्यात् । संपर्की । संज्वरी ॥ ५६ ॥

संवेः सृजः । ५ । २ । ५७ ।

शीलादिसदर्थात्संविभ्यां परात्सृजेर्घिनण् स्यात् । संसर्गी । विसर्गी ॥ ५७ ॥

संपरिव्यनुप्राद्वदः । ५ । २ । ५८ ।

शीलादिसदर्थादेभ्यः पराद्वदेर्घिनण् स्यात् । संवादी । परिवादी । विवादी । अनुवादी । प्रवादी ॥ ५८ ॥

वेर्विचकत्थस्रम्भकषकसलसहनः । ५ । २ । ५९ ।

शीलादिसदर्थेभ्यो विपूर्वेभ्य एभ्यो घिनण् स्यात्। विवेकी। विकत्थी। विस्रम्भी। विकाषी। विकासी। विलासी। विघाती ॥ ५९ ॥

व्यपाभेर्लषः । ५ । २ । ६० ।

एभ्यः परात्लषेः शीलादिसदर्थाद् घिनण् स्यात् । विलाषी। अपलाषी। अभिलाषी ॥ ६० ॥

सम्प्राद्वसात् । ५ । २ । ६१ ।

आभ्यां पराद्वसतेः शीलादिसदर्थाद् घिनण् स्यात्। संवासी। प्रवासी ॥ ६१ ॥

समत्यपाभिव्यभेश्चरः । ५ । २ । ६२ ।

एभ्यः पराच्चरेः शीलादिसदर्थाद् घिनण् स्यात् । सञ्चारी। अतिचारी। अपचारी। अभिचारी। व्यभिचारी ॥ ६२ ॥

समनुव्यवाद्रुधः । ५ । २ । ६३ ।

एभ्यः पराच्छीलादिसदर्थाद्रुधो घिनण् स्यात्। संरोधी। अनुरोधी। विरोधी। अवरोधी ॥ ६३ ॥

वेर्दहः । ५ । २ । ६४ ।

विपूर्वाच्छीलादिसदर्थाद्दहेर्घिनण् स्यात्। विदाही ॥ ६४ ॥

परेर्देविमुहश्च । ५ । २ । ६५ ।

परिपूर्वाभ्यां शीलादिसदर्थाभ्यामाभ्यां दहेश्च घिनण् स्यात्। परिदेवी। परिमोही। परिदाही ॥ ६५ ॥

क्षिपरटः । ५ । २ । ६६ ।

परिपूर्वाभ्यामाभ्यां शीलादिसदर्थाभ्यां घिनण् स्यात्। परिक्षेपी। परिराटी ॥ ६६ ॥

वादेश्च णकः । ५ । २ । ६७ ।

परिपूर्वाच्छीलादिसदर्थाद्वादयतेः क्षिपरटिभ्यां च णकः स्यात् । परिवादकः । परिक्षेपकः । परिराटकः ॥ ६७ ॥

निन्दहिंसक्लिशखादविनाशिव्याभाषासूयानेकस्वरात् । ५ । २ । ६८ ।

एभ्यः शीलादिसदर्थेभ्यो णकः स्यात् । निन्दकः । हिंसकः । क्लेशकः । खादकः । विनाशकः । व्याभाषकः । असूयकः । चकासकः॥

उपसर्गाद्देवृदेविक्रुशः । ५ । २ । ६९ ।

उपसर्गात्परेभ्यः शीलादिसदर्थेभ्य एभ्यो णकः स्यात् । आदेवकः । परिदेवकः । आक्रोशकः ॥ ६९ ॥

वृङ्भिक्षिलुण्टिजल्पिकुट्टाट्टाकः । ५ । २ । ७० ।

एभ्यः शीलादिसदर्थेभ्यष्टाकः स्यात् । वराकी । भिक्षाकः । लुण्टाकः । जल्पाकः । कुट्टाकः ॥ ७० ॥

प्रात्सूजोरिन् । ५ । २ । ७१ ।

आभ्यां प्रात्पराभ्यां शीलादिसदर्थाभ्यां इन् स्यात् । प्रसवी । प्रजवी ॥ ७१ ॥

जीण्दृक्षिविश्रिपरिभूवमाभ्यमाव्यथः । ५ । २ । ७२ ।

एभ्यः शीलादिसदर्थेभ्य इन् स्यात् । जयी । अत्ययी । आदरी । क्षयी । विश्रयी । परिभवी । वमी । अभ्यमी । अव्यथी ॥ ७२ ॥

सृघस्यदो मरक् । ५ । २ । ७३ ।

एभ्यः शीलादिसदर्थेभ्यो मरक् स्यात् । सृमरः। घस्मरः । अद्मरः ॥७३॥

भञ्जिभासिमिदो घुरः । ५ । २ । ७४ ।

एभ्यः शीलादिसदर्थेभ्यो घुरः स्यात् । भङ्गुरम् । भासुरम् । मेदुरम् ॥

वेत्तिच्छिदभिदः कित् । ५ । २ । ७५ ।

एभ्यः शीलादिसदर्थेभ्यः कित् घुरः स्यात् । विदुरः । छिदुरः । भिदुरः ॥ ७५ ॥

भियोरुरुकलुकम् । ५ । २ । ७६ ।

शीलादिसदर्थाद्भियः कित एते स्युः । भीरुः । भीरुकः । भीलुकः॥७६॥

सृजीण्नशष्ट्वरप् । ५ । २ । ७७ ।

एभ्यः शीलादिसदर्थेभ्यः कित् ट्वरप् स्यात् । सृत्वरी । जित्वरी । इत्वरः। नश्वरः ॥ ७७ ॥

गत्वरः । ५ । २ । ७८ ।

गमेष्ट्वरप्मश्च त् निपात्यते । गत्वरी ॥ ७८ ॥

स्म्यजसहिंसदीपकम्पकमनमो रः।५।२।७९।

एभ्यः शीलादिसदर्थेभ्यो रः स्यात् । स्मेरम् । अजस्रम् । हिंस्रः । दीप्रः । कम्प्रः । कम्रः । नम्रः ॥ ७९ ॥

तृषिधृषिस्वपो नजिङ् । ५ । २ । ८० ।

एभ्यः शीलादिसदर्थेभ्यो नजिङ् स्यात् । तृष्णक् । धृष्णक् । स्वप्नजौ॥

स्थेशभासपिसकसो वरः । ५ । २ । ८१ ।

एभ्यः शीलादिसदर्थेभ्यो वरः स्यात् । स्थावरः । ईश्वरः । भास्वरः । पेस्वरः । विकस्वरः ॥ ८१ ॥

यायावरः । ५ । २ । ८२ ।

यातेर्यङन्ताच्छीलादिस्तदर्थाद्वरः स्यात् । यायावरः ॥ ८२ ॥

दिद्युद्दद्दृज्जगज्जुहूवाक्प्राड्धीश्रीद्रूस्रू-ज्वायतस्तूकटप्रूपरिव्राड्भ्राजादयः क्विप् । ५ । २ । ८३ ।

एते क्विबन्ताः शीलादौ सत्यर्थे निपात्यन्ते । दिद्युत् । ददृत् । जगत् । जुहूः । वाक् । तत्वप्राट् । धीः । श्रीः । शतद्रूः । स्रूः । जूः । आयतस्तूः । कटप्रूः । परिव्राट् । विभ्राट् । भाः ॥ ८३ ॥

शंसंस्वयंविप्राद् भुवो डुः । ५ । २ । ८४ ।

एभ्यः पराद्भुवः सदर्थात् डुः स्यात् । शम्भुः । सम्भुः । स्वयम्भुः । विभुः । प्रभुः ॥ ८४ ॥

पुव इत्रो दैवते । ५ । २ । ८५ ।

सदर्थात्पुवो दैवते कर्त्तरि इत्रः स्यात् । पवित्रोऽर्हन् ॥ ८५ ॥

ऋषिनाम्नोः करणे । ५ । २ । ८६ ।

ऋषिसंज्ञयोः सदर्थात्पुवः करणे इत्रः स्यात् । पवित्रोयमृषिः । दर्भः पवित्रः ॥ ८६ ॥

लूधूसूखनिचरसहार्त्तेः । ५ । २ । ८७ ।

एभ्यः सदर्थेभ्यः करणे इत्रः स्यात् । लवित्रम् । धवित्रम् । सवित्रम् । खनित्रम् । चरित्रम् । सहित्रम् । अरित्रम् ॥ ८७ ॥

नीदाम्ब्शसूयुयुजस्तुतुदसिसिचमिहपतपा-

नहस्त्रट् । ५ । २ । ८८ ।

एभ्यः सदर्थेभ्यः करणे त्रट् स्यात् । नेत्रम् । दात्रम् । शस्त्रम् । योत्रम् । योक्त्रम् । स्तोत्रम् । तोत्रम् । सेत्रम् । सेक्त्रम् । मेढ्रम् । पत्रम् । पात्री । नध्री ॥ ८८ ॥

हलक्रोडास्ये पुवः । ५ । २ । ८९ ।

सदर्थात्पुवो हलक्रोडयोर्मुखे करणे त्रट् स्यात् । पोत्रम् ॥ ८९ ॥

दंशेस्त्रः । ५ । २ । ९० ।

सदर्थाद्दंशेः करणे त्रः स्यात् । दंष्ट्रा ॥ ९० ॥

धात्री । ५ । २ । ९१ ।

द्वर्धागो वा कर्म्मणि त्रट् स्यात् । धात्री ॥ ९१ ॥

ज्ञानेच्छार्चार्थञीच्छील्यादिभ्यः क्तः । ५ । २ । ९२ ।

ज्ञानेच्छार्चार्थेभ्यो ञीभ्यः शील्यादिभ्यश्च सदर्थेभ्यः क्तः स्यात् । राज्ञां ज्ञातः । राज्ञामिष्टः । राज्ञां पूजितः । भिन्नः । शीलितः । रक्षितः ॥

उणादयः । ५ । २ । ९३ ।

सदर्थाद्धातोरुणादयो बहुलं स्युः । कारुः । इंडुः ॥ ९३ ॥

इत्याचार्यहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनलघुवृत्तौ पञ्चमस्याध्यायस्य द्वितीयः पादः समाप्तः ॥

अर्हम्

वर्त्स्यतिगम्यादिः । ५ । ३ । १ ।

गम्यादयो भविष्यत्यर्थे इन्नाद्यन्ताः साधवः स्युः । गमी ग्रामम् । आगामी ॥ १ ॥

वा हेतुसिद्धौ क्तः । ५ । ३ । २ ।

वर्त्स्यदर्थाद्धातोर्धात्वर्थहेतोः सिद्धौ सत्यां क्तो वा स्यात् । मेघश्चेद् वृष्टः सम्पन्नाः सम्पत्स्यन्ते वा शालयः ॥ २ ॥

कषोऽनिटः । ५ । ३ । ३ ।

कषेः कृच्छ्रगहनयोरनिट्धातोर्वर्त्स्यदर्थात् क्तः स्यात् । कष्टम् । कष्टादिशस्तमसा । अनिट इति किम् । कषिताः शत्रवः ॥ ३ ॥

भविष्यन्ती । ५ । ३ । ४ ।

वर्त्स्यदर्थाद्धातोर्भविष्यन्ती स्यात् । भोक्ष्यते ॥ ४ ॥

अनद्यतने श्वस्तनी । ५ । ३ । ५ ।

नास्त्यद्यतनोयत्रतस्मिन् वर्त्स्यत्यर्थे वर्त्तमानाद्धातोः श्वस्तनी स्यात् । कर्त्ता । अनद्यतन इति किम् । अद्य श्वो वा गमिष्यति ॥ ५ ॥

परिदेवने । ५ । ३ । ६ ।

अनुशोचने गम्ये वर्त्स्यदर्थाद्धातोः श्वस्तनी स्यात् । इयं तु कदा गन्ता यैवं पादौ निधत्ते ॥ ६ ॥

पुरायावतोर्वर्त्तमाना । ५ । ३ । ७ ।

अनयोरुपपदयोर्वर्त्स्यदर्थाद्धातोर्वर्त्तमाना स्यात् । पुरा भुङ्क्ते । यावद्भुङ्क्ते ॥ ७ ॥

कदाकर्ह्योर्नवा । ५ । ३ । ८ ।

अनयोरुपपदयोर्वर्त्स्यदर्थाद्धातोर्वर्त्तमाना वा स्यात् । कदा भुङ्क्ते । कदा भोक्ष्यते । कदा भोक्ता । कर्हि भुङ्क्ते । कर्हि भोक्ष्यते । कर्हि भोक्ता ॥

किंवृत्ते लिप्सायाम् । ५ । ३ । ९ ।

विभक्तिडतरडतमान्तस्य किमो वृत्तं किंवृत्तं तस्मिन्नुपपदे प्रष्टुर्लिप्सायां गम्यमानायां वर्त्स्यदर्थाद्धातोर्वर्त्तमाना वा स्यात् । को भवतां भिक्षां ददाति । दास्यति । दाता वा । एवं कतरः । कतमः । किंवृत्त इति किम् । भिक्षां दास्यति । लिप्सायामिति किम् । कः पुरं यास्यति ॥ ९ ॥

लिप्स्यसिद्धौ । ५ । ३ । १० ।

लब्धुमिष्यमाणाद्भक्तादेः सिद्धौ फलवाप्तौ गम्यायां वर्त्स्यदर्थाद्धातोर्वर्त्तमाना वा स्यात् । योभिक्षां ददाति, दास्यति, दाता वा स स्वर्गलोकं याति, यास्यति याता वा ॥ १० ॥

पञ्चम्यर्थहेतौ । ५ । ३ । ११ ।

पञ्चम्यर्थः प्रैषादिः तस्य हेतुरुपाध्यायागमनादिः तस्मिन्नर्थे वर्त्स्यति वर्त्तमानाद्धातोर्वर्त्तमाना वा स्यात् । उपाध्यायश्चेदागच्छति, आगमिष्यति, आगन्ता वा । अथ त्वं सूत्रमधीष्व ॥ ११ ॥

सप्तमी चोर्द्ध्वमौहूर्त्तिके । ५ । ३ । १२ ।

उर्द्ध्वमुहूर्त्ताद्भव और्द्ध्वमौहूर्त्तिकः तस्मिन्पञ्चम्यर्थहेतौ वर्त्स्यत्यर्थे वर्त्तमानाद्धातोः सप्तमी वर्त्तमाना च वा स्यात् । ऊर्द्ध्वमुहूर्त्तादुपाध्यायश्चेदागच्छेत, आगच्छति, आगन्ता वा । अथ त्वं तर्कमधीष्व ॥ १२ ॥

क्रियायां क्रियार्थायां तुम् णकच् भविष्यन्ती । ५ । ३ । १३ ।

यस्माद्धातोस्तुमादिविधिस्तद्वाच्या क्रियाऽर्थः प्रयोजनं यस्यास्तस्यां क्रियायामुपपदे वत्स्यर्दर्थाद्धातोस्तुमादयः स्युः। कर्तुम्। कारकः। करिष्यामीति वा याति। क्रियायामिति किम्। भिक्षिष्ये इत्यस्य जटाः। क्रियार्थायामिति किम्। धावतस्ते पतिष्यति वासः ॥ १३ ॥

कर्मणोऽण् । ५ । ३ । १४ ।

क्रियायां क्रियार्थायामुपपदे कर्म्मणः परात्दत्स्यर्दर्थाद्धातोरण् स्यात्। कुम्भकारो याति ॥ १४ ॥

भाववचनाः । ५ । ३ । १५ ।

भाववचना घञ्क्त्यादयः ते क्रियायां क्रियार्थायामुपपदे वत्स्यर्दर्थाद्धातोः स्युः। पाकाय, पक्तये, पचनाय, वा याति ॥ १५ ॥

पदरुजविशस्पृशो घञ् । ५ । ३ । १६ ।

एभ्यो घञ् स्यात्। पादः। रोगः। वेशः। स्पर्शः ॥ १६ ॥

सर्त्तेः स्थिरव्याधिबलमत्स्ये । ५ । ३ । १७ ।

सर्त्तेरेषु कर्तृषु घञ् स्यात्। सारः स्थिरः। अतीसारो व्याधिः। सारो बलम्। विसारो मत्स्यः ॥ १७ ॥

भावाऽकर्त्रोः । ५ । ३ । १८ ।

भावे कर्तृवर्जे च कारके धातोर्घञ् स्यात्। पाकः प्राकारः। दायो दत्तः ॥ १८ ॥

इङोऽपादाने तु टिद्वा । ५ । ३ । १९ ।

इङो भावाकर्त्रोर्घञ् स्यात् सचापादाने वा टित्। अध्यायः। उपाध्यायी। उपाध्यायः ॥ १९ ॥

श्रोर्वायुवर्णनिवृत्ते । ५ । ३ । २० ।

श्रोर्भावाकर्त्रोरेष्वर्थेषु घञ्स्यात् । शारो वायुः वर्णो वा । नीशारः प्रावरणम् ॥ २० ॥

निरभेः पूल्वः । ५ । ३ । २१ ।

निरभिभ्यां यथासङ्ख्यमाभ्यां भावाकर्त्रोर्घञ्स्यात् । निष्पावः । अभिलावः ॥ २१ ॥

रोरुपसर्गात् । ५ । ३ । २२ ।

उपसर्गपूर्वाद्रौतेर्भावाकर्त्रोर्घञ्स्यात् । संरावः ॥ २२ ॥

भूश्र्यदोऽल् । ५ । ३ । २३ ।

एभ्य उपसर्गपूर्वेभ्यो भावाकर्त्रोरल् स्यात् । प्रभवः । संश्रयः । विघसः । उपसर्गादित्येव । भावः । श्रायः । घासः ॥ २३ ॥

न्यादो नवा । ५ । ३ । २४ ।

निपूर्वाददेरलि घस्लऽभावो ऽतो दीर्घश्च वा स्यात् । न्यादः । निघसः ॥ २४ ॥

संनिव्युपाद्यमः । ५ । ३ । २५ ।

एभ्य उपसर्गेभ्यः पराद्यमेर्भावाकर्त्रोरल् वा स्यात् । संयमः । संयामः । नियमः । नियामः । वियमः । वियामः । उपयमः । उपयामः ॥ २५ ॥

नेर्नदगदपठस्वनक्वणः । ५ । ३ । २६ ।

निरुपसर्गात् परेभ्य एभ्यो भावाकर्त्रोरल् वा स्यात् । निनदः । निनादः । निगदः । निगादः । निपठः । निपाठः । निस्वनः । निस्वानः । निक्वणः । निक्वाणः ॥ २६ ॥

वैणे क्वणः । ५ । ३ । २७ ।

वीणायां भवो वैणः । तदर्थादुपसर्गपूर्वात्क्वणेर्भावाकर्त्रोरल्वा स्यात् । प्रक्वणः । प्रक्वाणो वीणायाः । वैण इति किम् । प्रक्वाणः शृङ्खलस्य ॥२७॥

युवर्णवृदृवशरणगमृद्ग्रहः । ५ । ३ । २८ ।

इवर्णोवर्णान्तेभ्योवृादेर्ऋदन्तेभ्यो ग्रहेश्च भावाकर्त्रोरल् स्यात् । चयः । क्रयः । रवः । लवः । वरः । आदरः । वशः । रणः । गमः । करः । ग्रहः ॥ २८ ॥

वर्षादयः क्लीबे । ५ । ३ । २९ ।

एतेऽलन्ताः क्लीबे यथादर्शनं भावाकर्त्रोर्निपात्यन्ते । वर्षम् । भयम् ॥

समुदोऽजः पशौ । ५ । ३ । ३० ।

आभ्यां परादजः पशुविषयार्थवृत्तेर्भावाकर्त्रोरल् स्यात् । समजः पशूनाम् । उदजः पशूनाम् । पशाविति किम् । समाजो नृणाम् ॥ ३० ॥

सृग्लहः प्रजनाक्षे । ५ । ३ । ३१ ।

आभ्यां यथासङ्ख्यं प्रजनाक्षविषयार्थवृत्तिभ्यां भावाकर्त्रोरल् स्यात् । गवामुपसरः । अक्षाणां ग्लहः । प्रजनाक्ष इति किम् । उपसारो भृत्यै राज्ञाम् ॥ ३१ ॥

पणेर्माने । ५ । ३ । ३२ ।

पणेर्मानार्थाद्भावाकर्त्रोरल् स्यात् । मूलकपणः । मान इति किम् । पाणः ॥ ३२ ॥

संमदप्रमदौ हर्षे । ५ । ३ । ३३ ।

एतौ भावाकर्त्रोर्हर्षेऽर्थे ऽलन्तौ स्याताम् । संमदः प्रमदो वा स्त्रीणाम् । हर्ष इति किम् । संमादः । प्रमादः ॥ ३३ ॥

हनोऽन्तर्घनान्तर्घणौ देशे । ५ । ३ । ३४ ।

अन्तःपूर्वाद्धन्तेरल् घन्घणादेशौ च निपात्येते देशेऽर्थे भावाकर्त्रोः । अन्तर्घनः । अन्तर्घणो वा देशः । अन्तर्घातोऽन्यः ॥ ३४ ॥

प्रघणप्रघाणौ गृहांशे । ५ । ३ । ३५ ।

प्रपूर्वाद्धन्तेर्गृहांशेऽर्थेऽल् घणघाणादेशौ च निपात्येते । प्रघणः । प्रघाणो वा द्वारालिन्दकः । प्रघातोऽन्यः ॥ ३५ ॥

निघोद्घसङ्घोद्घनाऽपघनोपघ्नं निमितप्रशस्तगणात्याधानाङ्गासन्नम् ।५।३।३६।

हन्तेर्निघादयो यथासङ्ख्यं निमिताद्यर्थेषु कृतघत्वादयोऽलन्ता निपात्यन्ते । समन्ततो मितं निमितम् । निघा वृक्षाः । उद्घः प्रशस्तः । सङ्घः प्राणिसमूहः । अत्याधीयन्ते च्छेदनार्थं कुट्टनार्थं वा काष्ठादीनि यत्र तदत्याधानम् । उद्घनः । अपघनः शरीरावयवः । उपघ्नः आसन्नः ॥ ३६ ॥

मूर्त्तिनिचिताऽभ्रे घनः ।५ । ३ । ३७ ।

हन्तेर्मूर्त्यादावर्थेऽल्घनादेशश्च निपात्यते । मूर्त्तिः काठिन्यम् । अभ्रस्य घनः । निचितं निरन्तरम् । घनाः केशाः । अभ्रं मेघः । घनः ॥ ३७ ॥

व्ययोद्रोः करणे । ५ । ३ । ३८ ।

एभ्यः पराद्धन्तेः करणेऽल् घनादेशश्च निपात्यते । विघनः। अयोघनः । द्रुघनः ॥ ३८ ॥

स्तम्बाद् घ्नश्च । ५ । ३ । ३९ ।

स्तम्बात्पराद्धन्तेरल् घ्नघनादेशौ च निपात्येते करणे । स्तम्बघ्नो दण्डः । स्तम्बघनो यष्टिः ॥ ३९ ॥

परेर्घः । ५ । ३ । ४० ।

परिपूर्वाद्धन्तेरल् घादेशश्च करणे निपात्यते । परिघोऽर्गला ॥४०॥

ह्वः समाह्वयाह्वयौ द्यूतनाम्नोः ।५। ३ ।४१।

द्यूते नाम्नि चार्थे यथासङ्ख्यं समाङ्पूर्वादाङ् पूर्वाच्च ह्वोऽल् ह्वयादेशश्च निपात्यते । समाह्वयः प्राणिद्यूतम् । आह्वयः संज्ञा ॥४१॥

न्यभ्युपवेर्वाऽश्चोत् । ५ । ३ । ४२ ।

एभ्यः परात् ह्वोभावाकर्त्रोरल् स्यात्तद्योगे वा उश्च । निहवः । अभिहवः । उपहवः । विहवः ॥ ४२ ॥

आङो युद्धे । ५ । ३ । ४३ ।

आङोह्वोयुद्धेऽर्थे भावाकर्त्रोरल् स्यात् वा उश्च । आहवो युद्धम् । युद्ध इति किम् । आह्वायः ॥ ४३ ॥

आहावो निपानम् । ५ ।३ । ४४ ।

निपानं पश्वादिपानार्थो जलाधारः तस्मिन्नर्थे आङ् पूर्वात् ह्वोभावाकर्त्रोरल् आहावादेशश्च निपात्यते । आहावो वीनाम् ॥४४॥

भावेऽनुपसर्गात् । ५ । ३ । ४५ ।

अनुपसर्गात् भावे ह्वोऽल् स्यात् वा उश्च । हवः । भाव इति किम् । व्याप्ये ह्वायः । अनुपसर्गादिति किम् । आह्वायः ॥ ४५ ॥

हनो वा वध् च । ५ । ३ ४६।

अनुपसर्गाद्धन्तेर्भावेऽल् वा स्यात् तद्योगेच हनोवध् । वधः । घातः ॥ ४६ ॥

व्यधजपमद्भ्यः । ५ । ३ । ४७ ।

एभ्योऽनुपसर्गेभ्योभावाकर्त्रोरल् स्यात् । व्यधः । जपः । मदः ॥

नवा क्वणयमहसस्वनः । ५ । ३ । ४८ ।

अनुपसर्गेभ्य एभ्यो भावाकर्त्रोरल् वा स्यात् । क्वणः । क्वाणः । यमः । यामः । हसः । हासः । स्वनः । स्वानः ॥ ४८ ॥

आङो रुप्लोः । ५ । ३ । ४९ ।

आङः पराभ्यां रुप्लुभ्यां भावाकर्त्रोरल् वा स्यात् । आरवः । आरावः । आप्लवः । आप्लावः ॥ ४९ ॥

वर्षविघ्नेऽवाद् ग्रहः । ५ । ३ । ५० ।

अवपूर्वाद् ग्रहेर्वर्षविघ्नेऽर्थे भावाकर्त्रोरल् वा स्यात् । अवग्रहः । अवग्राहः । वर्षविघ्न इति किम् । अवग्रहोऽर्थस्य ॥ ५० ॥

प्राद्रश्मितुलासूत्रे । ५ । ३ । ५१ ।

प्रपूर्वात् ग्रहेरश्मौ तुलासूत्रे चार्थे भावाकर्त्रोरल् वा स्यात् । प्रग्रहः । प्रग्राहः ॥ ५१ ॥

वृगो वस्त्रे । ५ । ३ । ५२ ।

प्रपूर्वाद्वृगोवस्त्रविशेषेऽर्थे भावाकर्त्रोरल् वा स्यात् । प्रवरः । प्रावारः । वस्त्र इति किम् । प्रवरो यतिः ॥ ५२ ॥

उदः श्रेः । ५ । ३ । ५३ ।

उत्पूर्वाच्छ्रेर्भावाकर्त्रोरल् वा स्यात् । उच्छ्रयः । उच्छ्रायः ॥ ५३ ॥

युपुद्रोर्घञ् । ५ । ३ । ५४ ।

उत्पूर्वेभ्य एभ्यो भावाकर्त्रोर्घञ्स्यात् । उद्यावः । उत्पावः । उद्द्रावः॥

ग्रहः । ५ । ३ । ५५ ।

उत्पूर्वात् ग्रहेर्भावाकर्त्रोर्घञ् स्यात् । उद्ग्राहः ॥ ५५ ॥

न्यवाच्छापे । ५ । ३ । ५६ ।

आभ्यां परात् ग्रहेराक्रोशगम्ये भावाकर्त्रोर्घञ् स्यात् । निग्राहः । अवग्राहो वा ते जाल्म भूयात् । शाप इति किम् । निग्रहश्चौरस्य ॥५६॥

प्राल्लिप्सायाम् । ५ । ३ । ५७ ।

प्रपूर्वात् ग्रहेर्लिप्सायां गम्यायां भावाकर्त्रोर्घञ् स्यात् । पात्रप्रग्राहेण चरति पिण्डपातार्थी भिक्षुः । लिप्सायामिति किम् । स्रुवः प्रग्रहः शिष्यस्य ॥ ५७ ॥

समोमुष्टौ । ५ । ३ । ५८ ।

संपूर्वात् ग्रहेर्मुष्टिविषये धात्वर्थे भावाकर्त्रोर्घञ् स्यात् । संग्राहो मल्लस्य । मुष्टाविति किम् । संग्रहः शिष्यस्य ॥ ५८ ॥

युदुद्रोः । ५ । ३ । ५९ ।

संपूर्वेभ्य एभ्यो भावाकर्त्रोर्घञ् स्यात् । संयावः। संदावः । संद्रावः ॥

नियश्चानुपसर्गाद्वा । ५ । ३ । ६० ।

अनुपसर्गान्नियो युदुद्रोश्च भावाकर्त्रोर्घञ् वा स्यात् । नयः । नायः। यवः । यावः । दवः । दावः । द्रवः । द्रावः । अनुपसर्गादिति किम् । प्रणयः ॥ ६० ॥

वोदः । ५ । ३ । ६१ ।

उत्पूर्वान्नियो भावाकर्त्रोर्घञ् स्यात् वा । उन्नायः । उन्नयः ॥६१॥

अवात् । ५ । ३ । ६२ ।

अवपूर्वान्नियोभावाकर्त्रोर्घञ् स्यात् । अवनायः ॥ ६२ ॥

परेर्द्यूते । ५ । ३ । ६३ ।

परिपूर्वान्नियो द्यूतविषयार्थाद्भावाकर्त्रोर्घञ् स्यात् । परिणायेन[redacted]रीन् हन्ति । द्यूत इति किम् । परिणयोऽस्याः ॥ ६३ ॥

भुवोऽवज्ञाने वा । ५ । ३ । ६४ ।

परिपूर्वात् भुवोऽवज्ञानार्थात् भावाकर्त्रोर्घञ् स्यात् वा । प[redacted]भावः । परिभवः । अवज्ञान इति किम् । समन्ताद्भूतिः परिभवः ॥

यज्ञे ग्रहः । ५ । ३ । ६५ ।

परिपूर्वाद् ग्रहेर्यज्ञविषये भावाकर्त्रोर्घञ् स्यात् । पूर्वपरिग्राहः । यज्ञ[redacted] इति किम् । परिग्रहोऽर्थस्य ॥ ६५ ॥

संस्तोः । ५ । ३ । ६६ ।

संपूर्वात्स्तौतेर्भावाकर्त्रोर्घञ् स्यात् यज्ञविषये । संस्तावः छन्दोगानाम् ॥ ६६ ॥

प्रात् स्नुद्रुस्तोः । ५ । ३ । ६७ ।

प्रात् परेभ्य एभ्यो भावाकर्त्रोर्घञ् स्यात् । प्रस्नावः । प्रद्रावः । प्रस्तावः ॥ ६७ ॥

अयज्ञे स्त्रः । ५ । ३ । ६८ ।

प्रपूर्वात्स्त्रो भावाकर्त्रोर्घञ् स्यात् नचेद्यज्ञविषयः । प्रस्तारः । अयज्ञ इति किम् । बर्हिष्प्रस्तरः ॥ ६८ ॥

वेरशब्दे प्रथने । ५ । ३ । ६९ ।

वेः परात्स्त्रोऽशब्दविषये विस्तीर्णत्वेऽर्थे घञ् स्यात् । विस्तारः पटस्य । प्रथन इति किम् । तृणस्य विस्तरः । अशब्द इति किम् । वाक्यविस्तरः ॥ ६९ ॥

छन्दोनाम्नि । ५ । ३ । ७० ।

विपूर्वात् स्त्रो गायत्र्यादिसंज्ञाविषये भावाकर्त्रोर्घञ् स्यात्। विष्टार-पङ्क्तिः ॥ ७० ॥

क्षुश्रोः । ५ । ३ । ७१ ।

विपूर्वाभ्यामाभ्यां भावाकर्त्रोर्घञ् स्यात् । विक्षावः । विश्रावः ॥७१॥

न्युदो ग्रः । ५ । ३ । ७२ ।

आभ्यां पराद् ग्रो भावाकर्त्रोर्घञ् स्यात् । निगारः । उद्गारः॥७२ ॥

किरो धान्ये । ५ । ३ । ७३।

न्युत्पूर्वात्किरतेर्धान्यविषयार्थात् भावाकर्त्रोर्घञ् स्यात् । निकारः। उत्कारो धान्यस्य । धान्य इति किम् । फलनिकरः ॥ ७३ ॥

नेर्वुः । ५ । ३ । ७४ ।

निपूर्वात् धान्यविशेषेऽर्थे भावाकर्त्रोर्घञ् स्यात् । नीवारा व्रीहयः ॥

इणोऽभ्रेषे । ५ । ३ । ७५ ।

स्थितेरचलनमभ्रेषः, तद्विषयार्थात् निपूर्वादिणो भावाकर्त्रोर्घञ् स्यात् । न्यायः। अभ्रेष इति किम् । न्ययं गतश्चौरः ॥ ७५ ॥

परेः क्रमे । ५ । ३ । ७६ ।

क्रमः परिपाटिः, तद्विषयार्थात्परिपूर्वादिणोभावाकर्त्रोर्घञ्स्यात् । तव पर्यायोभोक्तुम् । क्रम इति किम् । पर्ययो गुरोः ॥ ७६ ॥

व्युपाच्छीङः । ५ । ३ । ७७ ।

आभ्यां परात्क्रमविषयार्थात् शीङो भावाकर्त्रोर्घञ्स्यात् । तव राज-विशायः । मम राजोपशायः । क्रम इति किम् । विशयः ॥ ७७॥

हस्तप्राप्ये चेरस्तेये ।५।३।७८।

हस्तेन प्राप्तुं शक्यं हस्तप्राप्यं, तद्विषयाच्चिगो भावाकर्त्रोर्घञ्स्यात्, नचेच्चेरर्थश्चौर्येण । पुष्पप्रचायः । हस्तप्राप्य इति किम् । पुष्पप्रचयं करोति वृक्षाग्रे । अस्तेय इति किम् । स्तेयेन पुष्पप्रचयः करोति ॥ ७८ ॥

चितिदेहावासोपसमाधाने कश्चादेः ।५।३।७९।

एष्वर्थेषु चेर्भावाकर्त्रोर्घञ्स्यात् तद्योगेच चेरादेः कः । चीयत इति चितिः यज्ञेऽग्निविशेषस्तदाधारो वा । आकायमग्निं चिन्वीत । कायो देहः । ऋषिनिकायः । उपसमाधानमुपर्युपरि राशीकरणम् । गोमयनिकायः ॥७९॥

सङ्घेऽनूर्द्धे । ५ । ३ । ८० ।

नास्ति कुतश्चिदूर्द्धमुपरिकिञ्चिद्यस्मिन् सोऽनूर्द्धः, तस्मिन् प्राणिसमुदाये ऽर्थे भावाकर्त्रोर्घञ् स्यात् तद्योगेचादेः कः । तार्किकनिकायः । सङ्घ इति किम् । सारसमुच्चयः । अनूर्द्ध इति किम् । शूकरनिचयः ॥ ८० ॥

माने । ५ । ३ । ८१ ।

माने गम्ये धातोर्भावाकर्त्रोर्घञ्स्यात् । एकोनिष्पावः। समित्संग्राहः । मान इति किम् । निश्चयः ॥ ८१ ॥

स्थादिभ्यः कः । ५ । ३ । ८२ ।

एभ्यो भावाकर्त्रोः कः स्यात् । आखूत्थो वर्तते । प्रस्थः । प्रपा॥

ट्वितोऽथुः । ५ । ३ । ८३ ।

ट्वितोधातोर्भावाकर्त्रोरथुः स्यात् । वेपथुः ॥ ८३ ॥

ड्वितस्त्रिमक्तत्कृतम् । ५ । ३ । ८४ ।

ड्वितोधातोर्भावाकर्त्रोस्त्रिमक् स्यात् तेन धात्वर्थेन कृतमित्यर्थे । पक्त्रिमम् ॥ ८४ ॥

यजिस्वपिरक्षियतिप्रच्छो नः ।५।३।८५।

एभ्यो भावाकर्त्रोर्नः स्यात् । यज्ञः । स्वप्नः । रक्ष्णः । यत्नः । प्रश्नः ॥ ८५ ॥

विच्छो नङ् । ५ । ३ । ८६ ।

विच्छेर्भावाकर्त्रोर्नङ् स्यात् । विश्नः ॥ ८६ ॥

उपसर्गाद्दः किः । ५ । ३ । ८७ ।

उपसर्गपूर्वाद्दासंज्ञात् भावाकर्त्रोः किः स्यात् । आदिः । निधिः ॥

व्याप्यादाधारे । ५ । ३ । ८८ ।

व्याप्यात् परात् दासंज्ञादाधारे किः स्यात् । जलधिः ॥ ८८ ॥

अन्तर्द्धिः । ५ । ३ । ८९ ।

अन्तः पूर्वाद्धागो भावाकर्त्रोः किः स्यात् । अन्तर्द्धिः ॥ ८९ ॥

अभिव्याप्तौ भावेऽनञिन् ।५।३।९०।

अभिव्याप्तौ गम्यायां धातोर्भावेऽनञिनौ स्याताम् । संरवणम् । सांराविणम् । अभिव्याप्तौ इति किम् । संरावः ॥ ९० ॥

स्त्रियां क्तिः । ५ । ३ । ९१ ।

धातोर्भावाकर्त्रोः स्त्रियां क्तिः स्यात् । कृतिः । स्त्रियामिति किम् । कारः ॥ ९१ ॥

श्र्वादिभ्यः । ५ । ३ । ९२ ।

एभ्यो धातुभ्यो भावाकर्त्रोः स्त्रियां क्तिः स्यात् । श्रुतिः प्रतिश्रुत् । संपत्तिः संपत् ॥ ९२ ॥

समिणा सुगः । ५ । ३ । ९३ ।

संपूर्वादिण आङ्पूर्वात्सुगश्च भावाकर्त्रोः स्त्रियां क्तिः स्यात् । समितिः । आसुतिः ॥ ९३ ॥

सातिहेतियूतिजूतिज्ञप्तिकीर्त्तिः ।५।३।९४।

एते भावाकर्त्रोः क्त्यन्ता निपात्यन्ते । सातिः। हेतिः। यूतिः । जूतिः। ज्ञप्तिः । कीर्त्तिः ॥ ९४ ॥

गापापचो भावे । ५ । ३ । ९५ ।

एभ्योभावे स्त्रियां क्तिः स्यात् । सङ्गीतिः । प्रपीतिः । पक्तिः ॥९५॥

स्थो वा । ५ । ३ । ९६ ।

स्थोभावे स्त्रियां क्तिर्वा स्यात् । प्रस्थितिः। आस्था ॥ ९६ ॥

आस्यटिव्रज्यजः क्यप् ।५।३।९७।

एभ्योभावे स्त्रियां क्यप् स्यात् । आस्या । अट्या । व्रज्या । इज्या ॥

भृगो नाम्नि । ५ । ३ । ९८ ।

भृगोभावे स्त्रियां संज्ञायां क्यप् स्यात्। भृत्या । नाम्नीति किम् । भृतिः ॥ ९८ ॥

समजनिपन्निषद्शीङ्सुग्विदिचरिमनीणः । ५ । ३ । ९९ ।

एभ्यो भावाकर्त्रोः स्त्रियां नाम्नि क्यप् स्यात । समज्या । निपत्या । निषद्या । शय्या । सुत्या । विद्या । चर्या । मन्या । इत्या । नाम्नीत्येव । संवीतिः ॥ ९९ ॥

कृगः शच वा । ५ । ३ । १०० ।

कृगो भावाकर्त्रोः स्त्रियां शो वा स्यात् क्यप् च । क्रिया। कृत्या। कृतिः ॥ १०० ॥

मृगयेच्छायाच्ञातृष्णाकृपाभाश्रद्धाऽन्तर्द्धा । ५ । ३ । १०१ ।

एते स्त्रियां निपात्यन्ते ॥ १०१ ॥

परेः सृचरेर्यः । ५ । ३ । १०२ ।

परिपूर्वाभ्यामाभ्यां भावाकर्त्रोः स्त्रियां यः स्यात् । परिसर्या । परिचर्या ॥ १०२ ॥

वाऽटाट्यात् । ५ । ३ । १०३ ।

अटेर्यङन्तात् स्त्रियां भावाकर्त्रोर्यो वा स्यात् । अटाट्या । अटाटा १०३॥

जागुरश्च । ५ । ३ । १०४ ।

जागुः स्त्रियां भावाकर्त्रोरोयश्च स्यात् । जागरा । जागर्या ॥१०४॥

शंसि प्रत्ययात् । ५ । ३ । १०५ ।

शंसेः प्रत्ययान्तात् च भावाकर्त्रोः स्त्रियामः स्यात । प्रशंसा । गोपाया ॥ १०५ ॥

क्तेटोगुरोर्व्यञ्जनात् । ५ । ३ । १०६ ।

क्तस्येट्यस्मात् ततोगुरुमतोव्यञ्जनान्ताद्धातोर्भावाकर्त्रोः स्त्रियामः स्यात् । ईहा । क्तेट इति किम् । स्रस्तिः । गुरोरिति किम् । स्फूर्त्तिः । व्यञ्जनादिति किम् । संशीतिः ॥ १०६ ॥

षितोऽङ् । ५ । ३ । १०७ ।

षितोधातोर्भावाकर्त्रोः स्त्रियामङ् स्यात् । पचा ॥१०७॥

भिदादयः । ५ । ३ । १०८ ।

एते भावाकर्त्रोः स्त्रियामङन्ता यथालक्ष्यं निपात्यन्ते । भिदा । छिदा ॥ १०८ ॥

भीषिभूषिचिन्तिपूजिकथिकुम्बिचर्चिस्पृहि-तोलिदोलिभ्यः ।५।३।१०९।

एभ्यो णयन्तेभ्यः स्त्रियां भावाकर्त्रोरङ् स्यात् । भीषा । भूषा । चिन्ता । पूजा । कथा । कुम्बा । चर्चा । स्पृहा । तोला । दोला ॥ १०९ ॥

उपसर्गादातः । ५ । ३ । ११० ।

उपसर्गपूर्वादादन्तात् स्त्रियां भावाकर्त्रोरङ् स्यात् । उपदा । उपसर्गादिति किम् । दत्तिः ॥ ११० ॥

णिवेत्त्यासश्रन्थघट्टवन्देरनः ।५। ३।१११।

णयन्ताद्वेत्त्यादिभ्यश्च स्त्रियां भावाकर्त्रोरनः स्यात् । कारणा । वेदना । आसना । श्रन्थना । घट्टना । वन्दना ॥ १११ ॥

इषोऽनिच्छायाम् ।५।३।११२।

अनिच्छार्थादिषेः स्त्रियां भावाकर्त्रोरनः स्यात् । अन्वेषणा । अनिच्छायामिति किम् । इष्टिः ॥ ११२ ॥

पर्यधेर्वा । ५ । ३ । ११३ ।

आभ्यां परादनिच्छार्थादिषेर्भावाकर्त्रोः स्त्रियामनो वा स्यात् । पर्येषणा । परीष्टिः । अध्येषणा । अधीष्टिः ॥ ११३ ॥

क्रुत्संपदादिभ्यः क्विप् ।५।३।११४।

क्रुधादिभ्योऽनुपसर्गेभ्यः पदादिभ्यश्च समादिपूर्वेभ्यः स्त्रियां भावाकर्त्रोः क्विप् स्यात् । क्रुत् । युत् । संपत् । विपत् ॥ ११४ ॥

भ्यादिभ्यो वा । ५ । ३ । ११५ ।

एभ्यः स्त्रियां भावाकर्त्रोः क्विप् वा स्यात् । भीः । भीतिः । ह्रीः । ह्रीतिः ॥ ११५ ॥

व्यतिहारेऽनीहादिभ्यो ञः ।५।३।११६।

व्यतीहारविषयेभ्य ईहादिवर्जेभ्योधातुभ्यः स्त्रियां ञः स्यात् बाहुलकाद्भावे । व्यावक्रोशी । अनीहादिभ्य इति किम् । व्यतीहा । व्यतीक्षा ॥ ११६ ॥

नञोऽनिःशापे । ५ । ३ । ११७ ।

नञः पराद्धातोः शापेगम्ये भावाकर्त्रोः स्त्रियामनिः स्यात् । अजननिस्ते भूयात् । शाप इति किम् । अकृतिः पटस्य ॥ ११७ ॥

ग्लाहाज्यः । ५ । ३ । ११८ ।

एभ्यः स्त्रियां भावाकर्त्रोरनिः स्यात् । ग्लानिः । हानिः । ज्यानिः ॥

प्रश्नाख्याने वेञ् । ५ । ३ । ११९ ।

प्रश्ने आख्यानेच गम्ये स्त्रियां भावाकर्त्रोर्धातोरिञ् वा स्यात् । कां कारिं, कारिकां, क्रियां, कृत्यां, कृतिं, वा अकार्षीः । सर्वां कारिं, कारिकां, क्रियां, कृत्यां, कृतिं, वा अकार्षम् ॥ ११९ ॥

पर्यायार्हणोत्पत्तौ च णकः ।५।३।१२०।

एष्वर्थेषु प्रश्नाख्यानयोश्च गम्ययोः स्त्रियां भावाकर्त्रोर्धातोर्णकः स्यात् । भवतः आसिका । भवतः शायिका । अर्हसि त्वमिक्षुभक्षिकाम् । क्षणे इक्षुभक्षिकां मे धारयसि । इक्षुभक्षिका उदपादि । कां कारिकामकार्षीः । सर्वां कारिकामकार्षम् ॥ १२० ॥

नाम्नि पुंसि च । ५ । ३ । १२१ ।

धातोः परो भावाकर्त्रोः स्त्रियां संज्ञायां णकः स्यात् यथालक्ष्यं पुंसि च । प्रच्छर्दिका । शालभञ्जिका । अरोचकः ॥१२१॥

भावे । ५ । ३ । १२२ ।

धात्वर्थनिर्देशे स्त्रियां धातोर्णकः स्यात् । शायिका ॥१२२ ॥

क्लीबे क्तः । ५ । ३ । १२३ ।

नपुंसके भावे धातोः क्तः स्यात् । हसितं तव । क्लीबे इति किम् । हासः ॥ १२३ ॥

अनट् । ५ । ३ । १२४ ।

क्लीबे भावेऽर्थे धातोरनट् स्यात् । गमनम् ॥१२४ ॥

यत्कर्मस्पर्शात्कर्त्रङ्गसुखं ततः । ५ । २ । १२५ ।

येन कर्मणा संस्पृष्टस्य कर्तुरङ्गस्य सुखं स्यात्ततः पराद्धातोः क्लीबे भावेऽनट् स्यात् । पयः पानं सुखम् । कर्मेति किम् । तूलिकाया उत्थानं सुखम् । स्पर्शादिति किम् । अग्निकुण्डस्योपासनं सुखम् । कर्त्रेति किम् । शिष्येण गुरोः स्थापनं सुखम् । अङ्गेति किम् । पुत्रस्य परिष्वञ्जनं सुखम् । सुखमिति किम् । कण्टकानां मर्दनम् । नित्यसमासार्थमिदम् ॥ १२५ ॥

रम्यादिभ्यः कर्त्तरि । ५ । ३ । १२६ ।

एभ्यः कर्त्तरि अनट् स्यात् । रमणी । कमनी ॥ १२६ ॥

कारणम् । ५ । ३ । १२७ ।

कृगः कर्त्तर्यनट् वृद्धिश्च स्यात् । कारणम् ॥ १२७ ॥

भुजिपत्यादिभ्यः कर्मापादाने । ५ । ३ । १२८ ।

भुज्यादेः कर्मणि पत्यादेश्चापादानेऽनट् स्यात् । भोजनम् । निरदनम् । प्रपतनः । अपादानम् ॥ १२८ ॥

करणाधारे । ५ । ३ । १२९ ।

अनयोरर्थयोर्धातोरनट् स्यात् । एषणी । सक्तुधानी ॥ १२९ ॥

पुन्नाम्नि घः । ५ । ३ । १३० ।

पुंसः संज्ञायां गम्यायां धातोः करणाधारयोर्घः स्यात् । दन्तच्छदः । आकरः । पुमिति किम् । विचयनी । नाम्नीति किम् । प्रहरणो दण्डः ॥ १३० ॥

गोचरसंचरवहव्रजव्यजखलापणनिगमबक-भगकषाकषनिकषम् । ५ । ३ । १३१ ।

एते करणाधारयोः पुन्नाम्नि घान्ता निपात्यन्ते । गोचरः । संचरः । वहः । व्रजः । व्यजः । खलः । आपणः । निगमः । बकः । बाहुलकात्कर्त्तरि भगः । बाहुलकाद्भगम् । कषः । आकषः । निकषः ॥१३१॥

व्यञ्जनाद् घञ् । ५ । ३ । १३२ ।

व्यञ्जनान्ताद्धातोः पुन्नाम्नि करणाधारयोर्घञ् स्यात् । वेदः॥१३२॥

अवात्तृस्तृभ्याम् । ५ । ३ । १३३ ।

आभ्यामवपूर्वाभ्यां करणाधारयोः पुन्नाम्नि घञ् स्यात् । अवतारः । अवस्तारः ॥ १३३ ॥

न्यायावायाध्यायोद्यावसंहारावहाराधार-दारजारम् । ५ । ३ । १३४ ।

एते पुन्नाम्नि करणाधारयोर्घञन्ता निपात्यन्ते । न्यायः । अवायः । अध्यायः । उद्यावः । संहारः । अवहारः । आधारः । दाराः । जारः ॥ १३४ ॥

उदङ्को ऽतोये । ५ । ३ । १३५ ।

उत्पूर्वादञ्चेः पुन्नाम्नि करणाधारयोर्घञ् स्यात्, नचेत्तोयविषयो-धात्वर्थः। तैलोदङ्कः। अतोय इति किम्। उदकोदञ्चनः॥ १३५॥

आनायो जालम्। ५। ३। १३६।

आङ्पूर्वान्नियः कारणाधारे पुन्नाम्नि जालेऽर्थे घञ् स्यात्। आनायो मत्स्यानाम्॥ १३६॥

खनो डडरेकेकवकघञ्च। ५। ३। १३७।

खनेः पुन्नाम्नि करणाधारयोरेते घञ्च स्युः। आखः। आखरः। आख-निकः। आखनिकवकः। आखनः। आखानः॥ ३७॥

इकिश्तिव्स्वरूपार्थे। ५। ३। १३८।

धातोः स्वरूपेऽर्थे च वाच्ये एते स्युः। भञ्जिः। कुधिः। वेत्तिः। अर्थे। यजेरङ्गानि। भुजिः क्रियते। पचतिः परिवर्त्तते॥ १३८॥

दुःस्वीषतः कृच्छ्राकृच्छ्रार्थात्खल्। ५। ३। १३९।

कृच्छ्रवृत्तेर्दुरोऽर्थादकृच्छ्रवृत्तिभ्यां च स्वीषद्भ्यां पराद्धातोः खल् स्यात्। दुःशयम्। दुष्करः। सुशयम्। सुकरः। ईषच्छयम्। ईषत्करः। कृच्छ्रा-कृच्छ्रार्थ इति किम्। ईषल्लभ्यं धनम्॥ १३९॥

च्व्यर्थे कर्त्राप्याद् भूकृगः। ५। ३। १४०।

कृच्छ्राकृच्छ्रार्थेभ्यो दुःस्वीषद्भ्यः पराभ्यां च्व्यर्थवृत्तिकर्तृकर्मवा-चिभ्यां यथासङ्ख्यं भूकृग्भ्यां परः खल् स्यात्। दुराढ्यंभवम्। स्वाढ्यंभवम्। इषदाढ्यंभवं भवता। दुराढ्यंकरः। स्वाढ्यंकरः। इषदाढ्यं करश्चैत्रस्त्वया। च्व्यर्थ इति किम्। दुराढ्येन भूयते॥ १४०॥

शासूयुधिदृशिधृषिमृषातोऽनः। ५। ३। १४१।

कृच्छ्राकृच्छ्रार्थदुःस्वीषत्पूर्वेभ्य एभ्य आदन्ताच्च धातोरनः स्यात् । दुःशासनः । सुशासनः । ईषच्छासनः । एवं दुर्योधनः । सुयोधनः । ईषद्योधनः । दुर्दर्शनः । दुर्धर्षणः । दुर्मर्षणः । दुरुत्थानम् ।। १४१ ॥

इत्याचार्यहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनलघुवृत्तौ पञ्चमस्याध्यायस्य तृतीयः पादः समाप्तः ॥

अर्हम्

सत्सामीप्ये सद्वद्वा । ५ । ४ । १ ।

समीपमेव सामीप्यं, वर्त्तमानस्य सामीप्ये भूते भविष्यति चार्थे वर्त्तमानाद्धातोर्वर्त्तमाना इव प्रत्यया वा स्युः। कदा चैत्रागतोसि।अयमागच्छामि। आगच्छन्तमेव मां विद्धि । पक्षे । अयमागमम् । एषोऽस्म्यागतः । कदा चैत्र गमिष्यसि । एष गच्छामि । गच्छन्तमेव मां विद्धि । पक्षे । एष गमिष्यामि । गन्तास्मि । गमिष्यन्तमेव मां विद्धि ॥ १ ॥

भूतवच्चाशंस्ये वा । ५ । ४ । २ ।

अनागतस्यार्थस्य प्राप्तुमिच्छा आशंसा तद्विषय आशंस्यः, तदर्थाद्धातोर्भूतवत्सद्वच्च प्रत्यया वा स्युः । उपाध्यायश्चेदागमत् । एते तर्कमध्यगीष्महे । उपाध्यायश्चेदागच्छति । एते तर्कमधीमहे । पक्षे । उपाध्यायश्चेदागमिष्यत्यागन्ता वा । एते तर्कमध्येष्यामहे । अध्येतास्महे वा । आशंस्य इति किम् । उपाध्याय आगमिष्यति । तर्कमध्येष्यते मैत्रः ॥ २ ॥

क्षिप्राशंसार्थयोर्भविष्यन्तीसप्तम्यौ । ५ । ४ । ३ ।

क्षिप्रार्थाशंसार्थयोरुपपदयोराशंस्यार्थाद्धातोर्यथासङ्ख्यं भविष्यन्ती सप्तम्यौ स्याताम् । उपाध्यायश्चेदागच्छति । आगमत् । आगमिष्यति । आगन्ता । क्षिप्रमाशु एते सिद्धान्तमध्येष्यामहे । उपाध्यायश्चेदागच्छति । आगमत् । आगमिष्यति । आगन्ता वा । आशंसे संभावये युक्तो ऽधीयीय ॥

सम्भावने सिद्धवत् । ५ । ४ । ४ ।

हेतोः शक्तिश्रद्धानं सम्भावनं, तस्मिन्विषयेऽसिद्धेऽपि वस्तुनि सिद्धवत् प्रत्ययाः स्युः । समयेचेत्प्रयतोऽभूदुद्भूवान्विभूतयः ॥ ४ ॥

नानद्यतनः प्रबन्धासत्त्योः । ५ । ४ । ५ ।

धात्वर्थस्य प्रबन्धे आसत्तौ च गम्यायां धातोरनद्यतनविहितः प्रत्ययो न स्यात् । यावज्जीवं भृशमन्नमदात् । दास्यति वा । येयं पौर्णमास्यतिक्रान्ता एतस्यां जिनमहः प्रावर्त्तिष्ट । येयं पौर्णमास्यागामिन्येतस्यां जिनमहः प्रवर्त्तिष्यते ॥ ५ ॥

एष्यत्यवधौ देशस्यार्वाग्भागे । ५ । ४ । ६ ।

देशस्ययोऽवधिस्तद्वाचिन्युपपदे देशस्यैवार्वाग्भागे यएष्यन्नर्थस्तद्वृत्तेर्धातोरनद्यतनविहितः प्रत्ययो न स्यात्। योऽयमध्वागन्तव्य आशत्रुञ्जयात् तस्य यदवरं वलभ्यास्तत्र द्विरोदनं भोक्ष्यामहे । एष्यतीति किम् । योऽयमध्वा अतिक्रान्त आशत्रुञ्जयात्तस्ययदवरं वलभ्यास्तत्र युक्तादद्विरध्येमहि । अवधाविति किम् । योयमध्वा निरवधिको गन्तव्यस्तस्य यदवरं वलभ्यास्तत्र द्विरोदनं भोक्तास्महे । अर्वाग्भाग इति किम् । योयमध्वागन्तव्य आशत्रुञ्जयात्तस्य यत्परं वलभ्यास्तत्र द्विरोदनं भोक्तास्महे ॥६॥

कालस्यानहोरात्राणाम् । ५ । ४ । ७ ।

कालस्य योऽवधिस्तद्वाचिन्युपपदे कालस्यैवार्वाग्भागे य एष्यन्नर्थस्तद्वृत्तेर्धातोरनद्यतनविहितः प्रत्ययो न स्यात्, नचेत्सोऽर्वाग्भागोऽहोरात्राणाम् । योऽयमागामी संवत्सरः तस्य यदवरमाग्रहायण्यास्तत्र जिनपूजां

करिष्यामः । अनहोरात्राणामिति किम् । योऽयं मास आगामी तस्य योऽवरः पञ्चदशरात्रस्तत्र युक्ताद् द्विरध्येतास्महे ॥ ७ ॥

परे वा । ५ । ४ । ८ ।

कालस्य योऽवधिस्तद्वाचिन्युपपदे कालस्यैव परेभागे ऽनहोरात्रसम्बन्धिनि य एष्यन्नर्थस्तद्वृत्तेर्धातोरनद्यतनविहितः प्रत्ययो वा न स्यात् । आगामिनोवत्सरस्याग्रहायण्याः परस्ताद् द्विः सूत्रमध्येष्यामहे । अध्येतास्महे वा ॥ ८ ॥

सप्तम्यर्थे क्रियातिपत्तौ क्रियातिपत्तिः । ५ । ४ । ९ ।

सप्तम्या अर्थोनिमित्तं हेतुफलकथनादिसामग्री, कुतश्चिद्वैगुण्यात्क्रियायाऽनभिनिवृत्तौ क्रियातिपत्तौसत्यामेष्यदर्थाद्धातोः सप्तम्यर्थे क्रियातिपत्तिः स्यात् । दक्षिणेन चेदयास्यन्न शकटं पर्याभविष्यत् ॥९॥

भूते । ५ । ४ । १० ।

भूतार्थाद्धातोः क्रियातिपत्तौ सत्यां सप्तम्यर्थे क्रियातिपत्तिः स्यात् । दृष्टोमयातवपुत्रोऽन्नार्थी चङ्क्रम्यमाणः । अपरश्चातिथ्यर्थी यदि स तेन दृष्टोऽभविष्यदुताभोक्ष्यत । अप्यभोक्ष्यत ॥ १० ॥

वोतात्प्राक् । ५ । ४ । ११ ।

सप्तम्युताप्योर्बाढइत्यत्र यदुतशब्दसंकीर्त्तनं ततः प्राक् सप्तम्यर्थे क्रियातिपत्तौ भूतार्थाद्धातोर्वा क्रियातिपत्तिः स्यात् । कथं नाम संयतः सन्नऽनागाढे तत्र भवानाधायकृतमसेविष्यत धिग्गर्हामहे । पक्षे । कथं सेवेत । कथं सेवते धिग्गर्हामहे । उतात्प्रागिति किम् । कालोयदभोक्ष्यत भवान् ॥११॥

क्षेपेऽपिजात्वोर्वर्त्तमाना । ५ । ४ । १२ ।

क्षेपेगम्येऽपिजात्वोरुपपदयोर्धातोर्वर्त्तमाना स्यात्। अपितत्रभवान् जन्तून् हिनस्ति, जातु तत्रभवान् भूतानि हिनस्ति, धिग्गर्हामहे ॥१२॥

कथमिसप्तमीच वा ।५।४।१३।

कथं शब्दे उपपदे क्षेपे गम्ये धातोः सप्तमी वर्त्तमाना च वा स्यात्। कथं नाम तत्रभवान् मांसं भक्षयेत्, भक्षयति वा, गर्हामहे अन्याय्यमेतत्। पक्षे। अबभक्षत्। अभक्षयत्। भक्षयांचकार। भक्षयिता। भक्षयिष्यति। अत्र सप्तमी निमित्तमस्तीति भूते क्रियातिपतने वा क्रियातिपत्तिः। कथं नाम तत्र भवान्मांसमभक्षयिष्यत्। पक्षे यथा प्राप्तम्। भविष्यति तु क्रियातिपतने नित्यमेव सा। कथंनाम तत्रभवान्मांसमभक्षयिष्यत् ॥ १३ ॥

किंवृत्ते सप्तमीभविष्यन्त्यौ।५।४।१४।

किंवृत्ते उपपदे क्षेपे गम्ये धातोः सप्तमीभविष्यन्त्यौ स्याताम्। किं तत्रभवाननृतं ब्रूयाद्वक्ष्यति वा। कोनाम कतरोनाम कतमोनाम यस्मै तत्रभवाननृतं ब्रूयात् वक्ष्यति वा ॥ १४ ॥

अश्रद्धामर्षेऽन्यत्रापि ।५।४।१५।

अकिंवृत्ते किंवृत्ते चोपपदे अश्रद्धामर्षयोर्गम्ययोः सप्तमीभविष्यन्त्यौ स्याताम्। नश्रद्दधे न सम्भावयामि तत्र भवान्नामादत्तं गृह्णीयात्। गृह्णीष्यति वा। न श्रद्दधे किं तत्रभवानदत्तमाददीत। आदास्यते वा। न मर्षयामि न क्षमे तत्रभवान्नामादत्तं गृह्णीयात्, ग्रहिष्यति वा ॥ १५॥

किंकिलास्त्यर्थयोर्भविष्यन्ती ।५।४।१६।

किंकिलेऽस्त्यर्थेचोपपदेऽश्रद्धामर्षयोर्गम्ययोर्भविष्यन्ती स्यात्। न श्रद्दधे न मर्षयामि किंकिलनाम तत्रभवान्परदारानुपकरिष्यते। न श्रद्दधे न मर्षयामि अस्तिनाम भवतिनाम तत्रभवान्परदारानुपकरिष्यते ॥

जातुयद्यदायदौ सप्तमी ।५।४।१७।

एषूपपदेष्वश्रद्धामर्षयोः सप्तमी स्यात्। न श्रद्दधे न क्षमे जातु तत्र-भवान् सुरां पिबेत्। एवं यत् यदा यदि सुरां पिबेत्॥ १७॥

क्षेपे च यच्चयत्रे। ५। ४। १८।

यच्चयत्रयोरुपपदयोः क्षेपेऽश्रद्धामर्षयोश्च गम्ययोः सप्तमी स्यात्। धिग्गर्हामहे यच्च यत्र वा तत्र भवानस्मानाक्रोशेत्। न श्रद्दधे न क्षमे यच्च यत्र वा तत्र भवान्परिवादं कथयेत्॥ १८॥

चित्रे। ५। ४। १९।

आश्चर्ये गम्ये यच्चयत्रयोरुपपदयोः सप्तमी स्यात्। चित्रमाश्चर्यं यच्च यत्र वा तत्रभवानकल्प्यं सेवेत॥ १९॥

शेषे भविष्यन्त्ययदौ। ५। ४। २०।

यच्चयत्राभ्यामन्यस्मिन्नुपपदे चित्रे गम्ये भविष्यन्ती स्यात्, नतु यदि-शब्दे। चित्रमाश्चर्यमन्धोनाम गिरिमारोक्ष्यति। शेष इति किम्। यच्चयत्रयोः पूर्वेण सप्तम्येव। अयदाविति किम्। चित्रं यदि स भुञ्जीत॥ २०॥

सप्तम्युताप्योर्बाढे। ५। ४। २१।

बाढार्थयोरुताप्योरुपपदयोः सप्तमी स्यात्। उतापि वा कुर्यात्। बाढे इति किम्। उत दण्डः पतिष्यति अपिधास्यति द्वारम्॥ २१॥

सम्भावनेऽलमर्थे तदर्थानुक्तौ। ५। ४। २२।

अलमोर्थे शक्तौ यत्सम्भावनं तस्मिन्गम्येऽलमर्थार्थस्याऽप्रयोगे सप्त-मी स्यात्। अपिमासमुपवसेत्। अलमर्थ इति किम्। निदेशस्थायी मे चैत्रः प्रायेण यास्यति। तदर्थानुक्ताविति किम्। शक्तश्चैत्रोधर्मं करिष्यति॥

अयदि श्रद्धाधातौ नवा। ५। ४। २३।

संभावनार्थे धातावुपपदेऽलमर्थविषये संभावने गम्ये सप्तमी वा स्यात् नतु यत शब्दे। श्रद्दधे संभावयामि भुञ्जीत भवान्। पक्षे।

भोक्ष्यते अभुङ्क्त अभुक्त वा । अयदीति किम् । सम्भावयामि यद्भुञ्जीत भवान् । श्रद्धाधाताविति किम् । अपि शिरसा पर्वतं भिन्द्यात् ॥ २३ ॥

सतीच्छार्थात् । ५ । ४ । २४ ।

सदर्थादिच्छार्थात्सप्तमी वा स्यात् । इच्छेत् । इच्छति ॥ २४ ॥

वर्त्स्यति हेतुफले । ५ । ४ । २५ ।

हेतुभूते फलभूते च वर्त्स्यत्यर्थे वर्त्तमानात्सप्तमी वा स्यात् । यदि गुरूनुपासीत शास्त्रान्तं गच्छेत् । यदि गुरूनुपासिष्यते शास्त्रान्तं सङ्गमिष्यते । वर्त्स्यतीति किम् । दक्षिणेन चेद्याति न शकटं पर्याभवति ॥

कामोक्तावकच्चिति । ५ । ४ । २६ ।

इच्छाप्रवेदनगम्ये सप्तमी स्यात्, नतुकच्चित्प्रयोगे । कामो मे भुञ्जीत भवान् । अकच्चितीति किम् । कच्चिज्जीवति मे माता ॥ २६ ॥

इच्छार्थे सप्तमीपञ्चम्यौ ।५।४।२७।

इच्छार्थे धातावुपपदे कामोक्तौ गम्यायां सप्तमीपञ्चम्यौ स्याताम् । इच्छामि भुञ्जीत । भुङ्क्तां वा भवान् ॥ २७ ॥

विधिनिमन्त्रणामन्त्रणाऽधीष्टसम्प्रश्न-प्रार्थने ।५।४।२८।

विध्यादिविशिष्टेषु कर्तृकर्मभावेषु प्रत्ययार्थेषु सप्तमीपञ्चम्यौ स्याताम्। विधिः क्रियायां प्रेरणा । कटं कुर्यात् । करोतु भवान् । प्रेरणायामेव यस्यां प्रत्याख्याने प्रत्यवायस्तन्निमन्त्रणम् । द्विसन्ध्यमावश्यकं कुर्यात् । करोतु । यत्र प्रेरणायामेव प्रत्याख्याने कामचारस्तदामन्त्रणम्। इहासीत। आस्ताम् । प्रेरणैव सत्कारपूर्विकाअधिष्टम् । व्रतं रक्षेत् । रक्षतु । संप्रश्नः संप्रधारणा । किं नु खलु भो व्याकरणमधीयीय। अध्ययै। उत सिद्धान्तमधीयीय। अध्ययै। प्रार्थनं याच्ञा । प्रार्थना मे तर्कमधीयीय । अध्ययै ॥ २८ ॥

प्रैषाऽनुज्ञावसरे कृत्यपञ्चम्यौ । ५ । ४ । २९ ।

प्रैषादिविशिष्टे कर्त्रादावर्थे कृत्याः पञ्चमी च स्युः । न्यत्कारपूर्विका प्रेरणा प्रैषः । भवता खलु कटः कार्यः । भवान् कटं करोतु । भवान् हि प्रेषितः अनुज्ञातः, भवतोऽवसरः कटकरणे ॥ २९ ॥

सप्तमी चोर्द्ध्वमौहूर्त्तिके । ५ । ४ । ३० ।

प्रैषादिषु गम्येषु ऊर्द्ध्वमौहूर्त्तिकेऽर्थे वर्त्तमानात्सप्तमी कृत्यपञ्चम्यौ च स्युः । ऊर्द्ध्वं मुहूर्त्तात् कटं कुर्यात् भवान् । भवता कटः कार्यः । कटं करोतु भवान् । भवान् हि प्रेषितोऽनुज्ञातः, भवतोऽवसरः कटकरणे ॥

स्मे पञ्चमी । ५ । ४ । ३१ ।

स्मे उपपदे प्रैषादिषु गम्येषु ऊर्द्ध्वमौहूर्त्तिकार्थाद्धातोः पञ्चमी स्यात् । ऊर्द्ध्वं मुहूर्त्तात् भवान् कटं करोतुस्म । भवान् हि प्रेषितोऽनुज्ञातो भवतोऽवसरः कटकरणे ॥ ३१ ॥

अधीष्टौ । ५ । ४ । ३२ ।

स्मे उपपदेऽध्येषणायां गम्यायां पञ्चमी स्यात् । अङ्गस्म विद्वन्नणुव्रतानि रक्ष ॥ ३२ ॥

कालवेलासमये तुम्वाऽवसरे । ५ । ४ । ३३ ।

एषूपपदेष्ववसरे गम्ये धातोस्तुम्वा स्यात् । कालोभोक्तुम् । वेलाभोक्तुम् । समयोभोक्तुम् । पक्षे । कालोभोक्तव्यस्य । अवसर इति किम् । कालः पचति भूतानि ॥ ३३ ॥

सप्तमी यदि । ५ । ४ । ३४ ।

यच्छब्दप्रयोगे कालादिषूपपदेषु सप्तमी स्यात् । कालो यदधीयीत भवान् । वेला यद्भुञ्जीत । समयो यच्छयीत ॥ ३४ ॥

शक्तार्हे कृत्याश्च । ५ । ४ । ३५ ।

शक्तेऽर्हे च कर्त्तरि गम्ये कृत्याः सप्तमी च स्युः। भवता खलु भारो वाह्यः। उह्येत । भवान् भारं वहेत्। भवान् हि शक्तः। भवता खलु कन्या वोढव्या। उह्येत। भवान् खलु कन्यां वहेत् । भवानेतदर्हति ॥ ३५ ॥

णिन्चाऽवश्यकाधमर्ण्ये । ५ । ४ । ३६ ।

अनयोर्गम्ययोः कर्त्तरि वाच्ये णिन् कृत्याश्च स्युः। अवश्यंकारी। अवश्यंहारी। अवश्यंगेयो गीतस्य । शतंदायी । गेयोगाथानाम् ॥ ३६ ॥

अर्हे तृच् । ५ । ४ । ३७ ।

अर्हे कर्त्तरि वाच्ये तृच् स्यात् । भवान् कन्याया वोढा ॥ ३७ ॥

आशिष्याशीःपञ्चम्यौ । ५ । ४ । ३८ ।

आशीर्विशिष्टार्थादाशीःपञ्चम्यौ स्याताम् । जीयात् । जयतात् । आशिषीति किम् । चिरञ्जीवति मैत्रः ॥ ३८ ॥

माङ्यद्यतनी । ५ । ४ । ३९ ।

माङि उपपदेऽद्यतनी स्यात् । माकार्षीत् ॥ ३९ ॥

सस्मे ह्यस्तनी च । ५ । ४ । ४० ।

स्मयुक्ते माङ्युपपदे ह्यस्तन्यद्यतनी च स्यात्। मास्मकरोत् । मास्मकार्षीत् ॥ ४० ॥

धातोः सम्बन्धे प्रत्ययाः । ५ । ४ । ४१ ।

धात्वर्थानां संबन्धे विशेषणविशेष्यभावे सत्ययथाकालमपि प्रत्ययाः साधवः स्युः । विश्वदृश्वाऽस्य पुत्रो भविता । भावि कृत्यमासीत् । गोमानासीत् ॥ ४१ ॥

भृशाभीक्ष्ण्ये हिस्वौ यथाविधि तध्वमौ च-

तध्वमौ युष्मदि । ५ । ४ । ४२ ।

भृशाभीक्ष्ण्ये सर्वकालेऽर्थे वर्त्तमानाद्धातोः सर्वविभक्तिवचनविषये हि स्वौ स्याताम् । यथाविधि धातोःसंबन्धे यतएव धातोर्यस्मिन्नेव कारके हि स्वौ तस्यैव धातोस्तत्कारकविशिष्टस्यैव सम्बन्धे अनुप्रयोगेसति, तथा पञ्चम्या एव तध्वमौ तयोः सम्बन्धिनि बहुत्वविशिष्टे युष्मदर्थे हि स्वौ च स्यातां यथाविधि धातोः सम्बन्धे । लुनीहि लुनीहीत्येवायं लुनातीत्यादि । अधीष्वाधीष्वेत्येवायमधीते इत्यादि । लुनीतलुनीतेत्येवं यूयं लुनीथ । लुनीहि लुनीहीत्येवं यूयं लुनीथ । अधीध्वमधीध्वमित्येवं यूयमधीध्वे अधीष्वाधीष्वेत्येवं यूयमधीध्वे । यथाविधीति किम् । लुनीहि लुनीहीत्येवायं लुनाति छिनत्ति लूयते वेति धातोः संबन्धेमाभूत्॥

प्रचये नवा सामान्यार्थस्य । ५ । ४ । ४३ ।

धात्वर्थानां समुच्चये गम्ये सामान्यार्थस्य धातोः सम्बन्धे सति धातोः परौ हि स्वौ तध्वमौ च तध्वमौ युष्मदि वा स्याताम् । व्रीहीन् वप लुनीहि पुनीहि इत्येवं यतते यत्यते वा । पक्षे । व्रीहीन् वपति लुनाति पुनाति इत्येवं यतते यत्यते वा । सूत्रमधीष्व निर्युक्तिमधीष्व भाष्यमधीष्वेत्येवमधीते पठ्यते वा । पक्षे । सूत्रमधीते निर्युक्तिमधीते भाष्यमधीते इत्येवमधीते पठ्यते वा । व्रीहीन् वपत लुनीत पुनीतेत्येवं यतध्वे । व्रीहीन् वप लुनीहि पुनीहीत्येवं चेष्टध्वे । पक्षे । व्रीहीन् वपथ लुनीथ पुनीथेत्येवं यतध्वे । सूत्रमधीध्वं निर्युक्तिमधीध्वं भाष्यमधीध्वमित्येवमधीध्वे । सूत्रमधीष्व निर्युक्तिमधीष्व भाष्यमधीष्वेत्येवमधीध्वे । पक्षे । सूत्रमधीध्वे निर्युक्तिमधीध्वे भाष्यमधीध्वे इत्येवमधीध्वे । सामान्यार्थस्येति किम् । व्रीहीन् वप लुनीहि पुनीहि इत्येवं वपति लुनाति पुनातीति माभूत् ॥ ४३ ॥

निषेधेऽलंखल्वोः क्त्वा । ५ । ४ । ४४ ।

निषेधार्थयोरलंखल्वोरुपपदयोर्धातोः क्त्वा वा स्यात् । अलंकृत्वा । खलुकृत्वा । पक्षे । अलं रुदितेन ॥ ४४ ॥

परावरे । ५ । ४ । ४५ ।

परे अवरे च गम्ये क्त्वा वा स्यात् । अतिक्रम्य नदीं गिरिः । अप्राप्य नदीं गिरिः । नद्यतिक्रमणे गिरिः । नद्यप्राप्त्या गिरिः ॥ ४५ ॥

निमील्यादिमेङस्तुल्यकर्तृके । ५ । ४ । ४६ ।

तुल्योधात्वर्थान्तरेण कर्त्ता यस्य तद्वृत्तिभ्योनिमील्यादिभ्यो मेङश्च धातोः सम्बन्धे क्त्वा वा स्यात् । अक्षिणी निमील्य हसति । मुखं व्यादाय स्वपिति । अपमित्य याचते । पक्षे । अपमातुं याचते । तुल्यकर्तृक इति किम् । चैत्रस्याक्षिनिमीलने मैत्रोहसति ॥ ४६ ॥

प्राक्काले । ५ । ४ । ४७ ।

परकालेन धात्वर्थेन तुल्यकर्तृके प्राकालेऽर्थे वर्त्तमानाद्धातोः सम्बन्धे क्त्वा वा स्यात् । आसित्वा भुङ्क्ते । आस्यते भोक्तुम् । प्राकाल इति किम् । भुज्यते पीयते वा ॥ ४७ ॥

ख्णम्, चाभीक्ष्ण्ये । ५ । ४ । ४८ ।

आभीक्ष्ण्ये परकालेन तुल्यकर्तृके प्राक्कालेऽर्थे वर्त्तमानाद्धातोः सम्बन्धे ख्णम्, क्त्वा च स्यात् । भोजंभोजं याति । भुक्त्वाभुक्त्वा याति ॥ ४८॥

पूर्वाग्रे प्रथमे । ५ । ४ । ४९ ।

एषूपपदेषु परकालेन तुल्यकर्तृके प्राक्कालेऽर्थे वर्त्तमानाद्धातोः सम्बन्धे ख्णम्, वा स्यात् । पूर्वं भोजं याति । पूर्वंभुक्त्वा याति । एवमग्रे भोजम् । अग्रे भुक्त्वा । प्रथमंभोजम् । प्रथमं भुक्त्वा । पूर्वं भुज्यते ततो-याति ॥ ४९ ॥

अन्यथैवंकथमित्थमः कृगोऽनर्थकात् । ५ । ४ । ५० ।

एभ्यः परात्तुल्यकर्तृकार्थात् कृगोऽनर्थकाद्धातोः सम्बन्धे रुणम्वा स्यात् । अन्यथाकारम्, एवङ्कारम्, कथङ्कारम्, इत्थङ्कारं भुङ्क्ते । पक्षे । अन्यथाकृत्वा । अनर्थकादिति किम् । अन्यथाकृत्वा शिरोभुङ्क्ते ॥५०॥

यथातथादीर्ष्योत्तरे । ५ । ४ । ५१ ।

आभ्यां तुल्यकर्तृकार्थादनर्थकात् कृगो धातोः सम्बन्धे रुणम्वा स्यात् ईर्ष्यश्चेदुत्तरयति । कथं त्वं भोक्ष्यस इति पृष्टोऽसूयया तं प्रत्याह, यथाकारमहं भोक्ष्ये तथाकारमहंभोक्ष्ये किं तवानेन। ईर्ष्योत्तर इति किम् । यथाकृत्वाऽहं भोक्ष्ये तथा द्रक्ष्यसि ॥ ५१ ॥

शापे व्याप्यात् । ५ । ४ । ५२ ।

कर्मणः परात्तुल्यकर्तृकार्थात् कृगो धातोः सम्बन्धे रुणम्वा स्यात् आक्रोशे गम्ये । चोरङ्कारमाक्रोशति । शाप इति किम् । चोरंकृत्वा हेतुभिः कथयति ॥ ५२ ॥

स्वाद्वर्थाददीर्घात् । ५ । ४ । ५३ ।

स्वाद्वर्थाददीर्घान्ताद्व्याप्यात्परात्तुल्यकर्तृकार्थात् कृगोधातोः सम्बन्धे रुणम्वा स्यात् । स्वादुङ्कारं भुङ्क्ते । मृष्टङ्कारं भुङ्क्ते । पक्षे । स्वादुं कृत्वा । अदीर्घादिति किम् । स्वाद्वीं कृत्वा यवागूं भुङ्क्ते ॥ ५३ ॥

विदृग्भ्यः कार्त्स्न्ये णम् । ५ । ४ । ५४ ।

कार्त्स्न्यवतो व्याप्यात्परेभ्यस्तुल्यकर्तृके प्राक्कालेऽर्थे वर्त्तमानेभ्यो विदिभ्यो दृशेश्च धातोः सम्बन्धे णम्वा स्यात् । अतिथिवेदं भोजयति । कन्यादर्शं वरयति । कार्त्स्न्य इति किम् । अतिथिं विदित्वा भोजयति॥

यावतोविन्दजीवः ।५।४।५५।

कार्त्स्न्यवतो व्याप्याद्यावतः पराभ्यां तुल्यकर्तृकाभ्यां विन्दतिजीविभ्यां धातोः सम्बन्धे णम्वा स्यात् । यावद्वेदं भुङ्क्ते । यावज्जीवमधीते ॥

चर्मोदरात्पूरेः । ५ । ४ । ५६ ।

आभ्यां व्याप्याभ्यां परात्तुल्यकर्तृकार्थात्पूरयतेर्धातोः सम्बन्धे णम्वा स्यात् । चर्मपूरमास्ते । उदरपूरं शेते ॥ ५६ ॥

वृष्टिमाने ऊलुक्चास्य वा । ५ । ४।५७।

व्याप्यात्परात्पूरयतेर्धातोः सम्बन्धे णम्वास्यात पूरयतेरूतेर्लुक्च वा समुदायेन चेद्वृष्टीयत्ता गम्यते । गोष्पदप्रम् । गोष्पदपूरं वृष्टो-मेघः ॥ ५७ ॥

चेलार्थात् क्नोपेः । ५।४।५८ ।

चेलार्थात् व्याप्यात्परात्क्नोपयतेस्तुल्यकर्तृकार्थाद्वृष्टिमाने गम्ये धातोः सम्बन्धे णम्वा स्यात् । चेलक्नोपं वृष्टोमेघः ॥ ५८॥

गात्रपुरुषात्स्नः । ५ । ४ । ५९ ।

आभ्यां व्याप्याभ्यां परात्तुल्यकर्तृकार्थात्स्नातेर्वृष्टिमाने गम्ये धातोः सम्बन्धे णम्वा स्यात । गात्रस्नायं वृष्टः । पुरुषस्नायं वृष्टः ॥५९॥

शुष्कचूर्णरूक्षात्पिषस्तस्यैव ।५।४।६०।

एभ्योव्याप्येभ्यः परात्पिषेर्णम्वा स्यात् तस्यैव धातोः सम्बन्धे । शुष्कपेषं पिनष्टि । एवं चूर्णपेषम् । रूक्षपेषम् ॥ ६० ॥

कृग्ग्रहोऽकृतजीवात् । ५ । ४ । ६१ ।

आभ्यां व्याप्याभ्यां पराद्यथासङ्ख्यं कृगो ग्रहेश्च तस्यैव सम्बन्धे णम्वा स्यात् । अकृतकारं करोति । जीवग्राहं गृह्णाति ॥ ६१ ॥

निमूलात्कषः । ५ । ४ । ६२ ।

निमूलाद्व्याप्यात्परात्कषेस्तस्यैव सम्बन्धे णम्वा स्यात् । निमूलकाषं कषति । निमूलस्य काषं कषति ॥ ६२ ॥

हनश्च समूलात् । ५ । ४ । ६३ ।

समूलाद्व्याप्यात्पराद्धन्तेः कषेश्च तस्यैव सम्बन्धे णम्वा स्यात् । समूलघातं हन्ति । समूलकाषं कषति ॥ ६३ ॥

करणेभ्यः । ५ । ४ । ६४ ।

करणार्थात्पराद्धन्तेस्तस्यैव सम्बन्धे णम्वा स्यात् । पाणिघातं कुड्यमाहन्ति ॥ ६४ ॥

स्वस्नेहनार्थात्पुषपिषः । ५ । ४ । ६५ ।

स्वशब्दार्थात् स्नेहनार्थाच्च करणार्थात्पराद्यथासङ्ख्यं पुषः पिषश्च तस्यैव सम्बन्धे णम्वा स्यात् । स्वपोषं पुष्णाति । एवमात्मपोषम् । उदपेषं पिनष्टि । एवं क्षीरपेषम् ॥ ६५ ॥

हस्तार्थाद्ग्रहवर्त्तिवृतः । ५ । ४ । ६६ ।

हस्तार्थात्करणवाचिनः परेभ्य एभ्यस्तस्यैव सम्बन्धे णम्वा स्यात् । हस्तग्राहं गृह्णाति । एवं करग्राहम् । हस्तवर्त्तं वर्त्तयति । पाणिवर्त्तं वर्त्तते ॥ ६६ ॥

बन्धेर्नाम्नि । ५ । ४ । ६७ ।

बन्धिः प्रकृतिर्नाम विशेषणं च, बन्धेर्बन्धनस्य यन्नाम संज्ञा तद्विषयात्करणार्थात्पराद् बन्धेस्तस्यैव सम्बन्धे णम्वा स्यात् । क्रौञ्चबन्धम्बद्धः ॥ ६७ ॥

आधारात् । ५ । ४ । ६८ ।

आधारार्थात्पराद्बन्धेस्तस्यैव सम्बन्धे णम्वा स्यात् । चारकबन्धम्बद्धः ॥ ६८ ॥

कर्तुर्जीवपुरुषान्नश्वहः । ५ । ४ । ६९ ।

आभ्यां कर्तृभ्यां पराद्यथासङ्ख्यं नशेर्वहेश्च तस्यैव संबन्धे णम्वा स्यात्। जीवनाशं नश्यति। पुरुषवाहं वहति। कर्तुरिति किम्। जीवेन नश्यति ॥ ६९ ॥

ऊर्ध्वात्पूः शुषः । ५ । ४ । ७० ।

कर्तुरूर्ध्वात्परात्पूरः शुषश्च तस्यैव संबन्धे णम्वा स्यात्। ऊर्ध्वपूरं पूर्यते। ऊर्ध्वशोषं शुष्यति ॥ ७० ॥

व्याप्याच्चेवात् । ५ । ४ । ७१ ।

व्याप्यात्कर्तुश्चोपमानात्पराद्धातोस्तस्यैव सम्बन्धे णम्वा स्यात्। सुवर्णनिधायं निहितः। काकनाशं नष्टः ॥ ७१ ॥

उपात्किरोलवने । ५ । ४ । ७२ ।

उपपूर्वात्किरतेर्लवनार्थस्य धातोः सम्बन्धे णम्वा स्यात्। उपस्कारं मद्रका लुनन्ति। लवन इति किम्। उपकीर्य याति ॥७२॥

दंशेस्तृतीयया । ५ । ४ । ७३ ।

तृतीयान्तेन योगे तुल्यकर्तृकार्थादुपपूर्वाद्दंशेर्धातोः सम्बन्धे णम्वा स्यात्। मूलकेनोपदंशं, मूलकोपदंशम्। मूलकेनोपदंश्य भुङ्क्ते ॥७३॥

हिंसार्थादेकाप्यात् । ५ । ४ । ७४ ।

हिंसार्थाद्धातोर्धात्वन्तरेणैकाप्यात्तुल्यकर्तृकार्थात्तृतीयान्तेन योगे णम्वा स्यात्। दण्डेनोपघातं, दण्डोपघातम्। दण्डेनोपहत्य च गाः सादयति। एकाप्यादिति किम्। दण्डेनोपहत्य चौरं गोपालको गाः सेटयति ॥ ७४ ॥

उपपीडरुधकर्षस्तत्सप्तम्या। ५ । ४।७५।

तया तृतीयया युक्ता सप्तमी तत्सप्तमी, तदन्तेन योगे उपपूर्वेभ्य एभ्य-स्तुल्यकर्तृकार्थेभ्योधातोः संबन्धे णम्वा स्यात् । पार्श्वाभ्यामुपपीडं पार्श्वोप-पीडं शेते । पार्श्वयोरुपपीडं पार्श्वोपपीडं शेते । व्रजेनोपरोधं व्रजोपरोधम् । व्रजे उपरोधं व्रजोपरोधं गाः स्थापयति । पाणिनोपकर्षं पाण्युपकर्षम् । पाणावुपकर्षं पाण्युपकर्षं गृह्णाति ॥ ७५ ॥

प्रमाणसमासत्त्योः । ५ । ४ । ७६ ।

आयाममानं प्रमाणं, समासत्तिः संरम्भपूर्वकः सन्निकर्षः,तयोर्गम्ययो-स्तृतीयान्तेन सप्तम्यन्तेन च योगे तुल्यकर्तृकार्थाद्धातोः संबन्धे णम्वा स्यात । द्व्यङ्गुलेनोत्कर्षं द्व्यङ्गुलोत्कर्षम् । द्व्यङ्गुले उत्कर्षं द्व्यङ्गुलोत्कर्षं गण्डिकाश्छिनत्ति । केशैर्ग्राहं केशग्राहं । केशेषु ग्राहं केशग्राहं युध्य-न्ते । पक्षे । द्व्यङ्गुलेनोत्कृष्य गण्डिकाश्छिनत्ति ॥ ७६ ॥

पञ्चम्या त्वरायाम् । ५ । ४ । ७७ ।

त्वरायां गम्यायां पञ्चम्यन्तेन योगे तुल्यकर्तृकार्थाद्धातोः सम्बन्धे णम्वा स्यात् । शय्याया उत्थायं शय्योत्थायं धावति । पक्षे । शय्याया उत्थाय धावति । त्वरायामिति किम् । आशनादुत्थाय याति ॥ ७७ ॥

द्वितीयया । ५ । ४ । ७८ ।

द्वितीयान्तेन योगे त्वरायां गम्यायां तुल्यकर्तृकार्थाद्धातोः सम्बन्धे णम्वा स्यात् । लोष्टान्ग्राहं लोष्टग्राहम् । लोष्टान् गृहीत्वा युध्यन्ते ॥ ७८ ॥

स्वाङ्गेनाऽध्रुवेण । ५ । ४ । ७९ ।

यस्मिन्नङ्गे छिन्ने भिन्ने वा प्राणी न म्रियते तदध्रुवं, तेन स्वाङ्गेन द्वितीयान्तेन योगे तुल्यकर्तृकार्थाद्धातोः सम्बन्धे णम्वा स्यात् । भ्रुवौ विक्षेपं भ्रूविक्षेपम् । भ्रुवौ विक्षिप्य वा जल्पति । स्वाङ्गेनेति किम् । कफमु-न्मूल्य जल्पति । अध्रुवेणेति किम् । शिर उत्क्षिप्य वक्ति ॥ ७९ ॥

परिक्लेश्येन । ५ । ४ । ८० ।

परिक्लेश्येन स्वाङ्गेन द्वितीयान्तेन योगे तुल्य कर्तृकार्थाद्धातोः सम्बन्धे णम्वा स्यात् । उरांसि प्रतिपेषं उरःप्रतिपेषम् । उरांसि प्रतिपेष्य वा युध्यन्ते ॥ ८१ ॥

विशपतपदस्कन्दोवीप्साभीक्ष्ण्ये ।५।४।८१।

द्वितीयान्तेन योगे तुल्यकर्तृकार्थाद्विशादेर्वीप्साभीक्ष्ण्ययोर्गम्ययोर्धातोः सम्बन्धे णम्वा स्यात्। गेहं गेहमनुप्रवेशं गेहानुप्रवेशमास्ते। गेहमनुप्रवेशमनुप्रवेशं गेहानुप्रवेशमास्ते। गेहं गेहमनुप्रपातं गेहानुप्रपातमास्ते । गेहमनुप्रपातमनुप्रपातं गेहानुप्रपातमास्ते। गेहं गेहमनुप्रपादं गेहानुप्रपादमास्ते । गेहमनुप्रपादमनुप्रपादं गेहानुप्रपादमास्ते । गेहं गेहमवस्कन्दं गेहावस्कन्दमास्ते । गेहमवस्कन्दमवस्कन्दं गेहावस्कन्दमास्ते । पक्षे । गेहं गेहमनुप्रविश्यास्ते । गेहमनुप्रविश्यानुप्रविश्यास्ते इत्यादि ॥ ८१ ॥

कालेन तृष्यस्वः क्रियान्तरे ।५।४।८२।

क्रियाऽव्यवधायकार्थाभ्यां तृष्यसूभ्यां द्वितीयान्तेन कालार्थेन योगे धातोःसम्बन्धे णम्वा स्यात्। द्व्यहंतर्षं द्व्यहतर्षं गावः पिबन्ति । द्व्यहमत्यासं द्व्यहात्यासं गावः पिबन्ति। क्रियान्तर इति किम्। अहरत्यस्येषून् गतः ॥ ८२ ॥

नाम्ना ग्रहादिशः । ५ । ४ । ८३ ।

नामशब्देन द्वितीयान्तेन योगे तुल्यकर्तृकार्थात् ग्रहेरादिशेश्च धातोः सम्बन्धे णम्वा स्यात् । नामानि ग्राहं नामग्राहमाह्वयति । नामान्यादेशं नामादेशं दत्ते । पक्षे । नाम गृहीत्वा दत्ते ॥ ८३ ॥

कृगोऽव्ययेनाऽनिष्टोक्तौ क्त्वाणमौ।५।४।८४।

अव्ययेन योगे तुल्यकर्तृकार्थात्कृगोऽनिष्टोक्तौ गम्यायां धातोः

सम्बन्धे क्त्वाणमौ स्याताम् । ब्राह्मण पुत्रस्ते जातः किं तर्हिं वृषल नीचैः कृत्वा, नीचैःकृत्य, नीचैःकारं कथयसि, उच्चैर्नाम प्रियमाख्येयम् । अनिष्टोक्ताविति किम् । उच्चैःकृत्वाऽऽचष्टे ब्राह्मण पुत्रस्ते जात इति । अव्ययेनेति किम् । ब्राह्मण पुत्रस्तेजातः किं तर्हिं वृषल मन्दं कृत्वा कथयसि ॥८४॥

तिर्यचाऽपवर्गे । ५ । ४ । ८५ ।

क्रियासमाप्तौ गम्यायां तिर्यचाऽव्ययेन योगे तुल्यकर्तृकार्थात् कृगो-धातोः संबन्धे क्त्वाणमौ स्याताम् । तिर्यक्कृत्वा, तिर्यक्कृत्य, तिर्यक्कार-मास्ते । अपवर्ग इति किम् । तिर्यक्कृत्वा काष्ठं गतः ॥ ८५ ॥

स्वाङ्गतस्च्व्यर्थनानाविनाधार्थेन भुवश्च । ५ । ४ । ८६ ।

तसन्तेन स्वाङ्गेन च्व्यर्थवृत्तिभिर्नानाविनाभ्यां धार्थप्रत्ययान्तैश्च योगे तुल्यकर्तृकार्थात् भुवः कृगश्च धातोः संबन्धे क्त्वाणमौ स्याताम् । मुख-तोभूत्वा । मुखतोभूय । मुखतोभावमास्ते । नाना भूत्वा, नानाभूय, नाना-भावं गतः । विनाभूत्वा, विनाभूय, विनाभावं गतः । द्विधा भूत्वा, द्विधा-भूय, द्विधाभावमास्ते । एवं पार्श्वतः कृत्वा, पार्श्वतःकृत्य, पार्श्वतः कारं शेते इत्यादि । च्व्यर्थ इति किम् । नाना कृत्वा भक्ष्याणि भुङ्क्ते ॥८६॥

तूष्णीमा । ५ । ४ । ८७ ।

तूष्णीं योगे तुल्यकर्तृकार्थात् भुवो धातोःसम्बन्धे क्त्वाणमौ स्या-ताम् । तूष्णीं भूत्वा । तूष्णींभूय । तूष्णींभावमास्ते ॥ ८७ ॥

आनुलोम्येऽन्वचा । ५ । ४ । ८८ ।

अन्वचाऽव्ययेन योगे तुल्यकर्तृकार्थात् भुव आनुलोम्ये गम्ये धातोः सम्बन्धे क्त्वाणमौ स्याताम् । अन्वग्भूत्वा, अन्वग्भूय, अन्वग्भावमास्ते । आनुलोम्य इति किम् । अन्वग्भूत्वा तिष्ठति । पश्चाद्भूत्वेत्यर्थः ॥८८॥

इच्छार्थे कर्मणः सप्तमी । ५ । ४ । ८९ ।

इच्छार्थे धातावुपपदे तुल्यकर्तृकार्थात्कर्मभूताद्धातोः सप्तमी स्यात् । भुञ्जीयेति इच्छति । इच्छार्थ इति किम् । भोजकोयाति । कर्मण इति किम् । इच्छन् करोति ॥ ८९ ॥

शकधृषज्ञारभलभसहार्हग्लाघटास्तिसमर्थार्थे च तुम् । ५ । ४ । ९० ।

शक्याद्यर्थेषु इच्छार्थेषु च धातुषु समर्थार्थेषु नामसूपपदेषु कर्मभूताद्धातोस्तुम् स्यात् । शक्नोति पारयति वा भोक्तुम् । एवं धृष्णोति जानाति आरभते लभते सहते अर्हति ग्लायति घटते अस्ति समर्थ इच्छति वा भोक्तुम् ॥ ९० ॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनलघुवृत्तौ पञ्चमाध्यायः समाप्तः ॥

अर्हम्

तद्धितोऽणादिः । ६ । १ । १ ।

वक्ष्यमाणोऽणादिस्तद्धितः स्यात् । औपगवः ॥ १ ॥

पौत्रादि वृद्धम् । ६ । १ । २ ।

परमप्रकृते यत्पौत्राद्यऽपत्यं तद्वृद्धं स्यात । गार्ग्यः । पुत्रस्तु गार्गिः ॥२॥

वंश्यज्यायोभ्रात्रोर्जीवति प्रपौत्राद्यऽस्त्री-युवा । ६ । १ । ३ ।

वंश्यपित्रादेः स्वस्य हेतुः वंश्ये ज्येष्ठभ्रातरि च जीवति प्रपौत्राद्यऽपत्यं स्त्रीवर्जं युवा स्यात् । गार्ग्यायणः ॥ ३॥

सपिण्डे वयःस्थानाधिके जीवद्वा ।६।१।४।

समानः पिण्डः सप्तमः पुरुषोयस्य तस्मिन् वयःस्थानाभ्यामधिके जीवति प्रपौत्राद्यस्त्रीजीवद्युवा वा स्यात् । गार्ग्यायणः । गार्ग्यो वा ॥४ ॥

युववृद्धं कुत्सार्चे वा । ६ । १ । ५ ।

युवा वृद्धं चापत्यं यथासङ्ख्यं कुत्सार्चयोर्विषये युवा वा स्यात् । गार्ग्यः, गार्ग्यायणो वा जाल्मः । वृद्धमर्चितम् । गार्ग्यायणः, गार्ग्यो वा॥

संज्ञादुर्वा । ६ । १ । ६ ।

वृद्धात्संज्ञादुर्वा स्यात् । देवदत्तीयाः । दैवदत्ताः ॥ ६ ॥

त्यदादिः । ६ । १ । ७ ।

असौ दुःस्यात् । त्यदीयम् । तदीयम् ॥ ७ ॥

वृद्धिर्यस्य स्वरेष्वादिः । ६ । १ । ८ ।

यस्य स्वराणामादिः स्वरोवृद्धिः स दुःस्यात । आम्रगुप्तायनिः ॥८॥

एदोद्देशएवेयादौ । ६ । १ । ९ ।

देशार्थस्यैव यस्य स्वराणामादिरेदोच्च स ईयादौ विधेये दुः स्यात् । सैपुरिका । सैपुरिकी । स्कौनगरिका । स्कौनगरिकी ॥ ९ ॥

प्राग्देशे । ६ । १ । १० ।

प्राग्देशार्थस्य स्वरेष्वादिरेदोच्च स ईयादौ कार्ये दुःस्यात् । एणीपचनीयः । गोनर्दीयः ॥ १० ॥

वाऽऽद्यात् । ६ । १ । ११ ।

वेत्याद्यादिति च द्वयमधिकृतं स्यात । तेन तद्धितप्रसङ्गे पक्षे वाक्यसमासावपि । सूत्रादौ च निर्दिष्टात्प्रत्ययः ॥ ११ ॥

गोत्रोत्तरपदाद्गोत्रादिवाऽजिह्वाकात्यहरितकात्यात् । ६ । १ । १२ ।

गोत्रमपत्यं जिह्वाकात्यहरितकात्य वर्जाद् गोत्रप्रत्ययान्तोत्तरपदात् गोत्रप्रत्ययान्तादिव तद्धितः स्यात् । यथा चारायणीयास्तथाकम्बलचारायणीयाः । अजिह्वेत्यादीति किम् । यथेहेयः कातीयाः न तथा जैह्वाकाताः, हारितकाताः ॥१२ ॥

प्राग्जितादण् । ६ । १ । १३ ।

प्राग्जितोक्तेः पादत्रयं यावद्येऽर्थास्तेष्वण् वा स्यात् । औपगवः माञ्जिष्ठम् ॥ १३ ॥

धनादेः पत्युः । ६ । १ । १४ ।

धनादेः परोयः पतिस्तदन्तात्प्राग्जितीयेऽर्थेऽण् स्यात । धानपतः आश्वपतः ॥ १४ ॥

अनिदम्यणपवादे च दित्यदित्यादित्ययमपत्युत्तरपदाञ्ञ्यः । ६ । १ । १५ ।

एभ्यः प्राग्जितीयेऽर्थे इदं वर्जेऽपत्याद्यर्थे योऽणोऽपवादस्तद्विषये च ञ्यः स्यात । दैत्यः । आदित्यः । आदित्य्यः । याम्यः । बार्हस्पत्यः । अनिदमीति किम् । आदित्यस्येदं आदितीयं मण्डलम् ॥ १५ ॥

बहिषष्टीकण्च । ६ । १ । १६ ।

बहिषः प्राग्जितीयेऽर्थे टीकण् ञ्यश्च स्यात् । बाहीकः । बाह्यः ॥ १६ ॥

कल्यग्नेरेयण् । ६ । १ । १७ ।

आभ्यां प्राग्जितीयेऽर्थेऽनिदम्यणपवादे चैयण् स्यात् । कालेयम् । आग्नेयम् ॥ १७ ॥

पृथिव्या ञाञ् । ६ । १ । १८ ।

पृथिव्याः प्राग्जितीयेऽर्थे ऽनिदम्यणपवादे च ञा ञौ स्याताम् । पार्थिवा । पार्थिवी ॥ १८ ॥

उत्सादेरञ् । ६ । १ । १९ ।

अस्मात्प्राग्जितीयेऽर्थेऽनिदम्यणपवादे चाऽञ् स्यात् । औत्सः । औदपानम् ॥ १९ ॥

बष्कयादसमासे । ६ । १ । २० ।

असमासवृत्तेर्बष्कयात् प्राग्जितीयेऽर्थेऽनिदम्यणपवादे चाऽञ् स्यात् । बाष्कयः । असमास इति किम् । सौबष्कयिः ॥ २० ॥

देवाद्यञ् च । ६ । १ । २१ ।

देवात् प्राग्जितीयेऽर्थे ऽनिदम्यणपवादे च यञञौ स्याताम्। दैव्यम्। दैवम् ॥ २१ ॥

अः स्थाम्नः । ६ । १ । २२ ।

स्थाम्नः प्राग्जितीयेऽर्थे अः स्यात् । अश्वत्थामः ॥ २२ ॥

लोम्नोऽपत्येषु । ६ । १ । २३ ।

लोम्नः प्राग्जितीयेऽर्थे बह्वपत्याऽर्थे अः स्यात्। उडुलोमाः। बहुवचनं किम् । औडुलोमिः ॥ २३ ॥

द्विगोरनपत्ये यस्वरादेर्लुबद्विः । ६ । १ । २४ ।

अपत्यादन्यस्मिन् प्राग्जितीयेऽर्थे भूतस्य द्विगोः परस्य यादेः स्वरादेश्च प्रत्ययस्य लुप् स्यात् न तु द्विः। द्विरथः। पञ्चकपालः। अनपत्य इति किम् ॥ द्वैमातुरः। अद्विरिति किम्। पाञ्चकपालम् ॥ २४ ॥

प्राग्वतः स्त्रीपुंसान्नञ्स्नञ् । ६ । १ । २५ ।

वतोऽर्वागर्थेष्वऽनिदम्यणपवादे चाभ्यां यथासङ्ख्यं नञ् स्नञ् च स्यात् । स्त्रैणः। पौस्नः। प्राग्वत इति किम्। स्त्रीवत् ॥ २५ ॥

त्वे वा । ६ । १ । २६ ।

स्त्रीपुंसाभ्यां त्वविषये यथासङ्ख्यं नञ्स्नञौ वा स्याताम्। स्त्रैणम्। स्त्रीत्वम् । पौस्नम् । पुंस्त्वम् ॥ २६ ॥

गोः स्वरे यः । ६ । १ । २७ ।

गोः स्वरादितद्धितप्राप्तौ यः स्यात् । गव्यम् । स्वर इति किम् । गोमयम् ॥ २७ ॥

ङसोऽपत्ये । ६ । १ । २८ ।

षष्ठ्यन्तादपत्येऽर्थे यथाविहितमणादयः स्युः। औपगवः। दैत्यः॥२८॥

आद्यात् । ६ । १ । २९ ।

अपत्ये यस्ताद्धितः स परमप्रकृतेरेव स्यात् । उपगोरपत्यमौपगवः । तस्याप्यौपगविः । औपगवेरप्यौपगवः ॥ २९ ॥

वृद्धाद्यूनि । ६ । १ । ३० ।

यून्यपत्ये यः प्रत्ययः स आद्याद् वृद्धाद्योवृद्धप्रत्ययस्तदन्तात् स्यात् । गार्ग्यस्यापत्यं युवा गार्ग्यायणः ॥ ३० ॥

अत इञ् । ६ । १ । ३१ ।

अदन्तात्षष्ठ्यन्तादपत्ये इञ्स्यात् । दाक्षिः ॥ ३१ ॥

बाह्वादिभ्यो गोत्रे । ६ । १ । ३२ ।

स्वापत्यसन्तानस्य स्वव्यपदेशहेतुर्य आद्यपुरुषस्तदपत्यं गोत्रम्, एभ्यः षष्ठ्यन्तेभ्योगोत्रेऽर्थे इञ् स्यात् । बाहविः । औपबाहविः ॥ ३२ ॥

वर्मणोऽचक्रात् । ६ । १ । ३३ ।

चक्रवर्जात्परोयो वर्मा तदन्तादपत्येऽर्थे इञ् स्यात् । ऐन्द्रवर्मिः। अचक्रादिति किम् । चाक्रवर्म्मणः ॥ ३३ ॥

अजादिभ्यो धेनोः । ६ । १ । ३४ ।

एभ्यः परोयोधेनुस्तदन्तादपत्यार्थे इञ् स्यात् । आजधेनविः । बाष्कधेनविः ॥ ३४ ॥

ब्राह्मणाद्वा । ६ । १ । ३५ ।

ब्राह्मणाद्योधेनुस्तदन्तादपत्येऽर्थे इञ् वा स्यात् । ब्राह्मणधेनविः । ब्राह्मणधेनवः ॥ ३५ ॥

भूयःसम्भूयोऽम्भोऽमितौजसः

ल्लुक्च । ६ । १ । ३६ ।

एभ्योऽपत्ये इञ् स्यात् सोलुक् च । मौयिः । साम्भूयिः । आम्भिः । आमितौजिः ॥ ३६ ॥

शालङ्क्यौदिषाडिवाड्वलि ।६।१।३७।

एतेऽपत्येऽञन्ता निपात्यन्ते । शालङ्किः । औदिः । षाडिः । वाड्वलिः ॥ ३७ ॥

व्यासवरुटसुधातृनिषादबिम्बचण्डालाद-न्तस्य चाक् ।६ । १ । ३८ ।

एभ्योऽपत्ये इञ् स्यात्तद्योगे चैषामन्तस्याक् । वैयासकिः । वारुटकिः । सौधातकिः । नैषादकिः । बैम्बकिः । चाण्डालकिः ॥ ३८ ॥

पुनर्भूपुत्रदुहितृननान्दुरनन्तरेऽञ् ।६।१।३९।

एभ्यः षष्ठ्यन्तेभ्यो ऽनन्तरे ऽपत्येऽञ् स्यात् । पौनर्भवः । पौत्रः । दौहित्रः । नानान्द्रः ॥ ३९ ॥

परस्त्रियाः परशुश्चाऽसावर्ण्ये ।६।१।४०।

परस्त्रिया अनन्तरेऽपत्येऽञ् स्यात्तद्योगेऽस्य परशुश्च नचेदसौ पुंसा सजातीया । पारशवः । असावर्ण्य इति किम् । पारस्त्रैणेयः ॥४०॥

विदादेर्वृद्धे । ६ । १ । ४१ ।

एभ्योवृद्धेऽपत्येऽञ् स्यात् । वैदः । और्वः ॥ ४१ ॥

गर्गादेर्यञ् । ६ । १ । ४२ ।

एभ्यः षष्ठ्यन्तेभ्यो वृद्धे ऽपत्ये यञ् स्यात् । गार्ग्यः । वात्स्यः॥४२॥

मधुबभ्रोर्ब्राह्मणकौशिके । ६ । १ । ४३ ।

आभ्यां यथासङ्ख्यं ब्राह्मणकौशिके च वृद्धेऽपत्ये यञ् स्यात्। माधव्योब्राह्मणः। बाभ्रव्यः कौशिकः॥ ४३॥

कपिबोधादाङ्गिरसे। ६। १। ४४।

आभ्यामाङ्गिरसे वृद्धेऽपत्ये यञ् स्यात्। काप्यः। बौध्यः, आङ्गिरसः॥

वतण्डात्। ६। १। ४५।

अस्मादाङ्गिरसे वृद्धे यञेव स्यात्। वातण्ड्यः आङ्गिरसः॥४५॥

स्त्रियां लुप्। ६। १। ४६।

वतण्डादाङ्गिरसे वृद्धे स्त्रियां यञो लुप् स्यात्। वतण्डी आङ्गिरसी॥ ४६॥

कुञ्जादेर्ञायन्यः।६।१।४७।

कुञ्जादेः षष्ठ्यन्ताद्वृद्धे ञायन्यः स्यात्। कौञ्जायन्यः। ब्राध्नायन्यः॥

स्त्रिबहुष्वायनञ्।६।१।४८।

कुञ्जादेः षष्ठ्यन्ताद् बहुत्वविशिष्टे वृद्धे स्त्रियां वा बहुत्वेप्यायनञ् स्यात्। कौञ्जायनी। कौञ्जायनाः॥ ४८॥

अश्वादेः। ६। १। ४९।

अश्वादेर्वृद्धे आयनञ् स्यात्। आश्वायनः। शाङ्खायनः॥ ४९॥

शपभरद्वाजादात्रेये। ६। १। ५०।

आभ्यामात्रेये वृद्धे आयनञ् स्यात्। शापायनः, भारद्वाजायनः, आत्रेयः॥ ५०॥

भर्गात्त्रैगर्त्ते। ६। १। ५१।

भर्गात्त्रैगर्त्ते वृद्धे आयनञ् स्यात्। भार्गायणः त्रैगर्त्तः॥ ५१॥

आत्रेयाद्भारद्वाजे । ६ । १ । ५२ ।

अस्माद्भारद्वाजे यून्यायनञ् स्यात् । आत्रेयायणो भारद्वाजः॥५२॥

नडादिभ्यो आयनण् । ६ । १। ५३ ।

एभ्योवृद्धे आयनण् स्यात् । नाडायनः । चारायणः ॥ ५३ ॥

यञिञः । ६ । १ । ५४ ।

वृद्धे यौ यञिञौ तदन्ताद्यून्यायनण् स्यात् । गार्ग्यायणः । दाक्षायणः ॥ ५४ ॥

हरितादेरञः । ६ । १ । ५५ ।

वृद्धोयोऽञ् तदन्ताद्धरितादेर्यून्यायनण् स्यात् । हारितायनः । कैन्दासायनः ॥ ५५ ॥

क्रोष्टृशलङ्कोर्लुक्च । ६ । १ । ५६ ।

आभ्यां वृद्धे आयनण् स्यात् लुक्चान्तादेशः । क्रौष्टायनः । शालङ्कायनः ॥ ५६ ॥

दर्भकृष्णाग्निशर्मरणशरद्वच्छुनकादाग्रायणब्राह्मणवार्षगण्यवाशिष्ठभार्गववात्स्ये । ६ । १ । ५७ ।

एभ्यो यथासङ्ख्यमेषु वृद्धेष्वायनण् स्यात् । दार्भायण आग्रायणश्चेत । कार्ष्णायनो ब्राह्मणः । आग्निशर्मायणो वार्षगण्यः । राणायनो वाशिष्ठः । शारद्वतायनोभार्गवः । शौनकायनोवात्स्यः ॥ ५७ ॥

जीवन्तपर्वताद्वा । ६ । १ । ५८ ।

आभ्यां वृद्धे आयनण् वा स्यात् । जैवन्तायनः। जैवन्तिः । पार्वतायनः । पार्वतिः ॥ ५८ ॥

द्रोणाद्वा । ६ । १ । ५९ ।

द्रोणादपत्यमात्रे आयनण् वा स्यात् । द्रौणायनः । द्रौणिः ॥ ५९ ॥

शिवादेरण् । ६ । १ । ६० ।

शिवादेरपत्येऽण् स्यात् । शैवः । प्रौष्ठः ॥ ६० ॥

ऋषिवृष्ण्यन्धककुरुभ्यः । ६ । १ । ६१ ।

ऋष्यादिवाचिभ्यो ऽपत्येऽण् स्यात् । वाशिष्ठः । वासुदेवः । श्वाफल्कः । नाकुलः ॥ ६१ ॥

कन्यात्रिवेण्याः कनीनत्रिवणं च । ६ । १ । ६२ ।

आभ्यामपत्येऽण् स्याद्यथासङ्ख्यं कनीनत्रिवणौ चादेशौ । कानीनः । त्रैवणः ॥ ६२ ॥

शुङ्गाभ्याम्भारद्वाजे । ६ । १ । ६३ ।

शुङ्गशुङ्गाभ्यां पुंस्त्रीशब्दाभ्यां भारद्वाजेऽपत्येऽण् स्यात् । शौङ्गो भारद्वाजः ॥ ६३ ॥

विकर्णच्छगलाद्वात्स्यात्रेये । ६ । १ । ६४ ।

आभ्यां यथासङ्ख्यं वात्स्ये आत्रेये चापत्येऽण् स्यात् । वैकर्णो वात्स्यः । छागल आत्रेयः ॥ ६४ ॥

णश्च विश्रवसोविश्लुक्च वा । ६ । १ । ६५ ।

विश्रवसोऽपत्येऽण् स्यात् तद्योगे च णः णयोगे च विशोलुक्च वा । वैश्रवणः रावणः ॥ ६५ ॥

सङ्ख्यासंभद्रान्मातुर्मातुर्च । ६ । १ । ६६ ।

संख्यार्थात्सम्भद्राभ्यां च परो यो माता तदन्तादपत्येऽण् स्यात् मातुश्च मातुर् । द्वैमातुरः । सांमातुरः । भाद्रमातुरः ॥ ६६ ॥

अदोर्नदीमानुषीनाम्नः । ६ । १ । ६७ ।

अदुसंज्ञान्नदीनाम्नो मानुषीनाम्नश्चापत्येऽण् स्यात् । यामुनः प्रणेता । दैवदत्तः । अदोरिति किम् । चान्द्रभागेयः ॥ ६७ ॥

पीलासाल्वामण्डूकाद्वा । ६ । १ । ६८ ।

एभ्योऽपत्येऽण् वा स्यात् । पैलः । पैलेयः । साल्वः । साल्वेयः । माण्डूकः । माण्डूकिः ॥ ६८ ॥

दितेश्चैयण् वा । ६ । १ । ६९ ।

दितेर्मण्डूकाच्चाऽपत्ये एयण् वा स्यात् । दैतेयः । दैत्यः । माण्डूकेयः । माण्डूकिः ॥ ६९ ॥

ङ्याप्त्यूङः । ६ । १ । ७० ।

ङ्यन्तादाबन्तात्त्यन्तादूङन्ताच्चापत्ये एयण् स्यात् । सौपर्णेयः । वैनतेयः । यौवतेयः । कामण्डलेयः ॥ ७० ॥

द्विस्वरादनद्याः । ६ । १ । ७१ ।

द्विस्वराद् ङ्याप्त्यूङन्तादनद्यर्थादपत्ये एयण् स्यात् दात्तेयः । अनद्या इति किम् । सैप्रः ॥ ७१ ॥

इतोऽनिञः । ६ । १ । ७२ ।

इञ्वर्जेदन्ताद् द्विस्वरादपत्ये एयण् स्यात् । नाभेयः । अनिञ इति किम् । दाक्षायणः । द्विस्वरादित्येव । मारीचः ॥ ७२ ।

शुभ्रादिभ्यः । ६ । १ । ७३ ।

एभ्योऽपत्ये एयण् स्यात् । शौभ्रेयः । वैष्टपुरेयः ॥ ७३ ॥

श्यामलक्षणाद्वाशिष्ठे । ६ । १ । ७४ ।

आभ्यां वाशिष्ठेऽपत्ये एयण् स्यात् । श्यामेयो लाक्षणेयो वाशिष्ठः॥

विकर्णकुषीतकात्काश्यपे । ६ । १ । ७५ ।

आभ्यां काश्यपेऽपत्ये एयण् स्यात् । वैकर्णेयः । कौषीतकेयः काश्यपः ॥ ७५ ॥

भ्रुवोभ्रुवूच । ६ । १ । ७६ ।

भ्रुवोऽपत्ये एयण् स्यात् भ्रुवश्च भ्रुवू । भ्रौवेयः ॥ ७६ ॥

कल्याणादेरिन्चान्तस्य । ६ । १ । ७७ ।

एभ्योऽपत्ये एयण् स्यादन्तस्यचेन् । काल्याणिनेयः । सौभागिनेयः ॥ ७७ ॥

कुलटाया वा । ६ । १ । ७८ ।

अस्मादपत्ये एयण् स्यात्तद्योगे चान्तस्येन्वा । कौलटिनेयः । कौलटेयः ॥ ७८ ॥

चटकाण्णैरः स्त्रियां तु लुप् । ६ । १ । ७९ ।

अस्मादपत्ये णैरः स्यात् स्त्र्यर्थस्य च णैरस्य लुप् । चाटकैरः। चटका॥

क्षुद्राभ्य एरण् वा । ६ । १ । ८० ।

अङ्गहीना अनियतपुंस्कावा स्त्रियः क्षुद्राः, क्षुद्रार्थेभ्यः स्त्रीभ्य एरण्वा स्यात् । काणेरः । काणेयः । दासेरः । दासेयः ॥ ८० ॥

गोधाया दुष्टे णारश्च । ६ । १ । ८१ ।

गोधाया दुष्टेऽपत्ये णार एरण् च स्यात् । गौधारः । गौधेरः, गोधायामहिजातः ॥ ८१ ॥

जण्टपण्टात् । ६ । १ । ८२ ।

आभ्यामपत्ये णारः स्यात् । जाण्टारः । पाण्टारः ॥ ८२ ॥

चतुष्पाद्भ्य एयञ् । ६ । १ । ८३ ।

चतुष्पात् वाचिभ्योऽपत्ये एयञ् स्यात् । कामण्डलेयः ॥ ८३ ॥

गृष्ट्यादेः । ६ । १ । ८४ ।

एभ्योऽपत्ये एयञ् स्यात् । गार्ष्टेयः । हार्ष्टेयः ॥ ८४ ॥

वाडवेयोवृषे । ६ । १ । ८५ ।

वडवाया वृषेऽर्थे एयञ् एयण् वा निपात्यते । वाडवेयः ॥ ८५ ॥

रेवत्यादेरिकण् । ६ । १ । ८६ ।

एभ्योऽपत्ये इकण् स्यात् । रैवतिकः । आश्वपालिकः ॥ ८६ ॥

वृद्धस्त्रियाः क्षेपे णश्च । ६ । १ । ८७ ।

वृद्धप्रत्ययान्तात् स्त्रियामपत्ये णेकणौ स्यातां क्षेपे गम्ये । गार्ग्यो-युवा गार्गः गार्गिको वा जाल्मः ॥ ८७ ॥

भ्रातुर्व्यः । ६ । १ । ८८ ।

भ्रातुरपत्ये व्यः स्यात् । भ्रातृव्यः ॥ ८८ ॥

ईयः स्वसुश्च । ६ । १ । ८९ ।

भ्रातुः स्वसुश्चापत्ये ईयः स्यात् । भ्रात्रीयः । स्वस्रीयः ॥ ८९ ॥

मातृपित्रादेर्डेयणीयणौ । ६ । १ । ९० ।

मातृपितृशब्दावादीयस्य स्वसन्तस्य तस्मादपत्ये डेयणीयणौ स्याताम् । मातृष्वस्रेयः । मातृष्वस्रीयः । पैतृष्वस्रेयः । पैतृष्वस्रीयः ॥ ९० ॥

श्वशुराद्यः । ६ । १ । ९१ ।

अस्मादपत्ये यः स्यात् । श्वशुर्यः ॥ ९१ ॥

जातौ राज्ञः । ६ । १ । ९२ ।

राज्ञोऽपत्ये जातौ गम्यायां यः स्यात् । राजन्यः, क्षत्रीया जातिश्चेत् ॥ ९२ ॥

क्षत्रादियः । ६ । १ । ९३ ।

क्षत्रादपत्ये जाताविय: स्यात् । क्षत्रियो जातिश्चेत् ॥ ९३ ॥

मनोर्याणौ षश्चान्तः । ६ । १ । ९४ ।

मनोरपत्ये याणौ स्यातां तद्योगे षश्चान्तः जातौ गम्यायाम् । मनुष्याः । मानुषाः ॥ ९४ ॥

माणवः कुत्सायाम् । ६ । १ । ९५ ।

मनोरपत्येऽणि कुत्सायां नो णः स्यात । मनोरपत्यं मूढं माणवः ।

कुलादीनः । ६ । १ । ९६ ।

कुलान्तात्केवलकुलाच्चाऽपत्ये ईनः स्यात् । बहुकुलीनः । कुलीनः ॥ ९६ ॥

यैयकञावसमासे वा । ६ । १ । ९७ ।

कुलान्तात्कुलाच्चाऽपत्ये यएयकञ् वा स्यात् न चेदसौ समासे । कुल्यः । कौलेयकः । कुलीनः । बहुकुल्यः । बाहुकुलेयकः । बहुकुलीनः । असमास इति किम् । आढ्यकुलीनः ॥ ९७ ॥

दुष्कुलादेयण्वा । ६ । १ । ९८ ।

अस्मादपत्ये एयण् वा स्यात् । दौष्कुलेयः । दुष्कुलीनः ॥ ९८ ॥

महाकुलाद्वाऽञीनञौ । ६ । १ । ९९ ।

अस्मादपत्ये ऽञ् ईनञ् च वा स्याताम् । माहाकुलः। माहाकुलीनः। महाकुलीनः ॥ ९९ ॥

कुर्वादेर्ञ्यः । ६ । १ । १०० ।

एभ्योऽपत्ये ञ्यः स्यात् । कौरव्याः । शाङ्कव्याः ॥ १०० ॥

सम्राजः क्षत्रिये । ६ । १ । १०१ ।

अस्मात् क्षत्रियेऽपत्ये ञ्यः स्यात् । साम्राज्यः क्षत्रियः ॥१०१॥

सेनान्तकारुलक्ष्मणादिञ्च । ६ । १ । १०२।

सेनान्तात्कार्वर्थाल्लक्ष्मणाच्चाऽपत्ये इञ् ञ्यश्च स्यात् । हारिषेणिः । हारिषेण्यः । तान्तुवायिः । तान्तुवाय्यः । लाक्ष्मणिः । लाक्ष्मण्यः ॥१०२॥

सुयाम्नः सौवीरेष्वायनिञ् । ६ । १ । १०३।

सुयाम्नः सौवीरेषु योऽर्थस्तद्वृत्तेरपत्ये आयनिञ् स्यात् । सौयामायनिः ॥ १०३ ॥

पाण्टाहृतिमिमताण्णश्च । ६ । १ ।१०४।

आभ्यां सौवीरेषु योऽर्थस्तद्वृत्तिभ्यामपत्येऽण आयनिञ्च स्यात् । पाण्टाहृतः । पाण्टाहृतायनिः, सौवीरगोत्रः। एवं मैमतः । मैमतायनिर्वा ॥

भागवित्तितार्णविन्दवाऽकशापेयान्निन्दायामिकण्वा । ६ । १ । १०५ ।

एभ्यः सौवीरेषु योवृद्धस्तद्वृत्तिभ्यो यूनीकण् वा स्यात् निन्दायां गम्यायाम् । भागवित्तिकः । भागवित्तायनो वा जाल्मः। तार्णविन्दविकः। तार्णविन्दविर्वा । आकशापेयिकः । आकशापेयिर्वा ॥ १०५ ॥

सौयामायनियामुन्दायनिवार्ष्यायणेरी-

यश्च वा । ६ । १ । १०६ ।

एभ्यः सौवीरवृद्धवृत्तिभ्यो यूनीयेकणौ वा स्यातां निन्दायाम् । सौयामायनीयः । सौयामायनिकः । सौयामायनिर्वा, निन्द्यो युवा । एवं यामुन्दायनीयः । यामुन्दायनिकः । यामुन्दायनिर्वा । वार्ष्यायणीयः । वार्ष्यायणिकः । वार्ष्यायणिर्वा ॥ १०६ ॥

तिकादेरायनिञ् । ६ । १ । १०७ ।

एभ्योऽपत्ये आयनिञ् स्यात् । तैकायनिः । कैतवायनिः ॥१०७॥

दगुकोशलकर्मारच्छागवृषाद्यादिः।६।१।१०८।

एभ्योऽपत्ये यादिरायनिञ् स्यात् । दागव्यायनिः । कौशल्यायनिः। कार्मार्य्यायणिः । छाग्यायनिः । वार्ष्यायणिः ॥१०८॥

द्विस्वरादणः । ६ । १ । १०९ ।

द्विस्वरादणन्तादपत्ये आयनिञ् स्यात् । कार्त्तायणिः ॥ १०९॥

अवृद्धाद्दोर्नवा । ६ । १ । ११० ।

अवृद्धाद्दोरपत्ये आयनिञ्वा स्यात् । आम्रगुप्तायनिः । आम्रगुप्तिः ॥ ११० ॥

पुत्रान्तात् । ६ । १ । १११ ।

पुत्रान्ताद्दोरपत्ये आयनिञ्वा स्यात्। गार्गीपुत्रायणिः। गार्गीपुत्रिः॥

चर्मिवर्मिगारेटकार्कट्यकाकलङ्कावाकिनाच्च कश्चान्तोऽन्त्यस्वरात् । ६ । १ । ११२।

एभ्यः पुत्रान्ताच्च दोरपत्ये आयनिञ् वा स्यात्, तद्योगे कश्चान्तोऽन्त्यस्वरात् । चार्मिकायणिः । चार्मिणः । वार्मिकायणिः । वार्मिणः ।

गारेटकायनिः । गारेटिः । कार्कघकायनिः। कार्कघायनः । काककायनिः। काकिः । लाङ्काकायनिः । लाङ्कयः । वाकिनकायनिः । वाकिनिः । गार्गीपुत्रकायणिः । गार्गीपुत्रिः ॥ ११२ ॥

अदोरायनिः प्रायः । ६ । १ । ११३ ।

अदोरपत्ये आयनिर्वा स्यात् प्रायः । ग्लुचुकायनिः । ग्लौचुकिः । प्रायःकिम् । दाक्षिः ॥ ११३ ॥

राष्ट्रक्षत्रियात्सरूपाद्राजापत्ये द्रिरञ् । ६ । १ । ११४ ।

राष्ट्रक्षत्रियाभ्यां सरूपाभ्यां यथासङ्ख्यं राजापत्ययोरञ् स्यात्, सचद्रिः । विदेहा, राजानः अपत्यानि वा । सरूपादिति किम् । सौराष्ट्रको राजा ॥ ११४ ॥

गान्धारिसाल्वेयाभ्याम् । ६ । १ । ११५ ।

आभ्यां राष्ट्रक्षत्रियार्थाभ्यां सरूपाभ्यां यथासङ्ख्यं राजापत्येच द्रिरञ् स्यात् । गान्धारयः । साल्वेयाः, राजानोऽपत्यानि वा ॥ ११५ ॥

पुरुमगधकलिङ्गसूरमसद्विस्वरादण् । ६ । १ । ११६ ।

एभ्योद्विस्वरेभ्यश्च राष्ट्रक्षत्रियार्थेभ्यः सरूपेभ्यो यथासङ्ख्यं राजापत्ये च द्रिरण् स्यात्। पुरोरपत्यं पौरवः । मागधो राजा ऽपत्यं वा । एवं कालिङ्गः। सौरमसः । आङ्गः॥११६॥

साल्वांशप्रत्यग्रथकलकूटाऽश्मकादिञ् । ६ । १ । ११७ ।

साल्वाजनपदस्तदंशेभ्यःप्रत्यग्रथादेश्च सरूपराष्ट्रक्षत्रियार्थेभ्यो यथा सङ्ख्यं राजापत्येच द्रिरिञ् स्यात्। औदुम्बरिः राजाऽपत्यं वा। एवं प्रात्यग्रथिः। कालकूटिः। आश्मकिः॥ ११७॥

दुनादिकुर्वित्कोशलाजादाञ्ञ्यः।६।१।११८।

दुभ्योनादेः कुरोरिदन्तेभ्यः कोशलाजादाभ्यां च सरूपराष्ट्रक्षत्रियेभ्यो यथासङ्ख्यं राजापत्येच द्रिञ्यः स्यात्। आम्बष्ठ्यो राजाऽपत्यं वा। एवं नैषध्यः। कौरव्यः। आवन्त्यः। कौशल्यः। आजाद्यः॥ ११८॥

पाण्डोर्ड्यण्।६।१।११९।

पाण्डोराष्ट्रक्षत्रियार्थात्सरूपाद्यथासङ्ख्यं राजाऽपत्येच द्रिर्ड्यण् स्यात्॥ पाण्ड्यो राजाऽपत्यं वा॥११९॥

शकादिभ्यो द्रेर्लुप्।६।१।१२०।

एभ्यः परस्य द्रिसंज्ञकस्य लुप् स्यात्। शको राजाऽपत्यं वा। एवं यवनः॥ १२०॥

कुन्त्यवन्तेः स्त्रियाम्।६।१।१२१।

आभ्यां परस्य द्रेर्ञ्यस्य लुप् स्यात् स्त्रियामर्थे। कुन्ती अपत्यम्। एवमवन्ती। स्त्रियामिति किम्। कौन्त्यः॥ १२१॥

कुरोर्वा।६।१।१२२।

कुरोर्द्रेर्ञ्यस्य स्त्रियां लुप् वा स्यात्। कुरुः अपत्यम्। कौरव्यायणी राजाऽपत्यं वा॥ १२२॥

द्रेरञणोऽप्राच्यभर्गादेः।६।१।१२३।

प्राच्यान् भर्गादींश्च मुक्त्वाऽन्यस्मादञोऽणश्च द्रेः स्त्रियां लुप् स्यात्। शूरसेनी अपत्यम्। एवं मद्री। प्राच्यादिवर्जनं किम्। पाञ्चाली। भार्गी॥

बहुष्वऽस्त्रियाम् । ६ । १ । १२४ ।

द्र्यन्तस्य बह्वर्थस्य योऽद्रिस्तस्याऽस्त्रियां लुप् स्यात् । पञ्चालाराजानोऽपत्यानि वा । अस्त्रियामिति किम् । पाञ्चाल्यः ॥१२४॥

यस्कादेर्गोत्रे । ६ । १ । १२५ ।

एभ्यो यः प्रत्ययस्तदन्तस्य बहुगोत्रार्थस्य यस्कादेर्यः प्रत्ययस्तस्याऽस्त्रियां लुप् स्यात् । यस्काः । लह्याः । गोत्रइति किम् । यास्काश्छात्राः ॥

यञञोऽश्यापर्णान्तगोपवनादेः । ६ । १ । १२६ ।

यञञन्तस्य बहुगोत्रार्थस्य यः प्रत्ययस्तस्याऽस्त्रियां लुप् स्यात्, नतु श्यापर्णान्तेभ्यो गोपवनादिभ्यः । गर्गाः । विदाः । अश्यापर्णेत्यादीति किम् । गौपवनाः ॥ १२६॥

कौण्डिन्यागस्त्ययोः कुण्डिनागस्ती च । ६ । १ । १२७ ।

अनयोर्बहुगोत्रार्थयोर्यञोऽणश्चास्त्रियां लुप् स्यात्, कुण्डिन्यागस्त्ययोः कुण्डिनागस्तीचादेशौ । कुण्डिनाः । अगस्तयः ॥१२७॥

भृग्वङ्गिरस्कुत्सवशिष्ठगोतमाऽत्रेः । ६ । १ । १२८ ।

एभ्यो यः प्रत्ययस्तदन्तस्य बहुगोत्रार्थस्य यः प्रत्ययस्तस्याऽस्त्रियां लुप् स्यात् । भृगवः । अङ्गिरसः । कुत्साः । वशिष्ठाः । गोतमाः । अत्रयः ॥

प्राग्भरते बहुस्वरादिञः । ६ । १ । १२९ ।

बहुस्वराद्य इञ् तदन्तस्य बहुप्राग्भरतगोत्रार्थस्य यः प्रत्ययस्तस्याऽस्त्रियां लुप् स्यात् । क्षीरकलम्भाः । उद्दालकाः । प्राग्भरत इति किम् । बालाकयः । बहुस्वरादिति किम् । चैकयः ॥१२९॥

वोपकादेः । ६ । १ । १३० ।

एभ्योयः प्रत्ययस्तदन्तस्य बहुगोत्रार्थस्य यः प्रत्ययस्तस्याऽस्त्रियां लुप् स्यात् वा । उपकाः । औपकायनाः । लमकाः । लामकायनाः ॥ १३० ॥

तिककितवादौ द्वन्द्वे । ६ । १ । १३१ ।

एषु द्वन्द्वेषु बहुगोत्रार्थेषु यः सप्रत्ययस्तस्याऽस्त्रियां लुप् स्यात् । तिककितवाः । उब्जककुभाः ॥ ३१ ॥

द्र्यादेस्तथा । ६ । १ । १३२ ।

द्र्यादिप्रत्ययान्तानां द्वन्द्वे बह्वर्थे यः सद्र्यादिस्तस्य लुप् स्यात्, तथा यथापूर्वम् । बृकलोहध्वजकुण्डीविसाः । तथेति किम् । गार्गीवत्स-वाजाः । तत्राऽस्त्रियामित्युक्ते गार्गीत्यत्र न स्यात् ॥ १३२ ॥

वाऽन्येन । ६ । १ । १३३ ।

द्र्यादेरन्येन सह द्र्यादीनां द्वन्द्वे बह्वर्थे यः सद्र्यादिस्तस्य तथा वा लुप् स्यात् यथापूर्वम् । अङ्गवङ्गदाक्षयः । आङ्गवाङ्गदाक्षयः ॥ १३३ ॥

द्वयेकेषु षष्ठ्यास्तत्पुरुषे यञादेर्वा । ६ । १ । १३४ ।

षष्ठीतत्पुरुषे यत्पदं षष्ठ्याविषये द्वयोरेकस्मिंश्च स्यात्तस्य यः सयञादि-स्तस्य तथा वा लुप् स्यात् । गर्गकुलम् । गार्ग्यकुलम् । विदकुलम् । वैदकुलम् । द्वयेकेष्विति किम् । गर्गाणां कुलं गर्गकुलम् ॥ १३४ ॥

न प्राग्जितीये स्वरे । ६ । १ । १३५ ।

गोत्रे उत्पन्नस्य बहुष्वित्यादिना या लुबुक्ता सा प्राग्जितीयेऽर्थे यः स्वरादिस्तद्धितस्तद्विषये न स्यात् । गार्गीयाः । आत्रेयीयाः । प्राग्जितीय इति किम् । अत्रीयः । स्वर इति किम् । गर्गमयम् ॥ १३५ ॥

गर्गभार्गविका । ६ । १ । १३६ ।

इयं द्वन्द्वात्प्राग्जितीये विवाहे योऽकल्तस्मिन्नणो लुबऽभावः स्यात् । गर्गभार्गविका ॥ १३६ ॥

यूनि लुप् । ६ । १ । १३७ ।

यून्युत्पन्नस्य प्रत्ययस्य प्राग्जितीयेऽर्थे स्वरादौ प्रत्यये विषयभूते लुप् स्यात्, लुपि सत्यां यः प्राप्नोति स स्यात् । पाण्टाहृतस्यापत्यं पाण्टाहृतिस्तस्यापत्यं युवा पाण्टाहृतः, तस्यच्छात्रा इति प्राग्जितीये ऽर्थे स्वरादौ चिकीर्षिते णस्य लुप्, ततो वृद्धेञ इत्यञ् । पाण्टाहृताः ॥ १३७ ॥

वायनणायनिञोः । ६ । १ । १३८ ।

अनयोर्युवार्थयोः प्राग्जितीये स्वरादौ विषये लुब् वा स्यात् । गार्गीयाः । गार्गायणीया वा । हौत्रीयाः । हौत्रायणीया वा ॥ १३८ ॥

द्रीञो वा । ६ । १ । १३९ ।

द्रीञन्तात्परस्य युवार्थस्य लुब् वा स्यात् । औदुम्बरिः । औदुम्बरायणो वा ॥ १३९ ॥

ञिदार्षादणिञोः । ६ । १ । १४० ।

ञिदार्षश्च योऽपत्यप्रत्ययस्तदन्तात्परस्य यून्यऽण इञश्च लुप् स्यात् । तैकायनिः पिता । तैकायनिः पुत्रः । वाशिष्ठः पिता । वाशिष्ठः पुत्रः १४० ॥

अब्राह्मणात् । ६ । १ । १४१ ।

अब्राह्मणाद्वृद्धप्रत्ययान्ताद् युवार्थस्य लुप् स्यात् । आङ्गः पिता । आङ्गः पुत्रः । अब्राह्मणादिति किम् । गार्ग्यः पिता । गार्ग्यायणः पुत्रः ॥

पैलादेः । ६ । १ । १४२ ।

एभ्यो यूनि प्रत्ययस्य लुप् स्यात् । पैलः पिता । पैलः पुत्रः । शालङ्किः पिता । शालङ्किः पुत्रः ॥ १४२ ॥

प्राच्येऽञोऽतौल्वल्यादेः । ६ । १ । १४३ ।

प्राच्यगोत्रेऽञन्तात्तौल्वल्यादिवर्जाद् यूनि प्रत्ययस्य लुप् स्यात्। पान्नागारिः पिता। पान्नागारिः पुत्रः। मान्थरेषणिः पिता। मान्थरेषणिः पुत्रः। प्राच्य इति किम् । दाक्षिः पिता। दाक्षायणः पुत्रः। तौल्वल्यादिवर्जनं किम् । तौल्वलिः पिता । तौल्वलायनः पुत्रः ॥ १४३ ॥

इत्याचार्यहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनलघुवृत्तौ षष्ठस्याध्यायस्य प्रथमः पादः समाप्तः ॥

अर्हम्

रागाट्टो रक्ते । ६ । २ । १ ।

रज्यते येन कुसुम्भादिना तदर्थात्तृतीयान्ताद्रक्तमित्यर्थे यथाविहितं प्रत्ययः स्यात् । कौसुम्भं वासः ॥ १ ॥

लाक्षारोचनादिकण् । ६ । २ । २ ।

आभ्यां टान्ताभ्यां रक्तमित्यर्थे इकण् स्यात् । लाक्षिकम् । रौचनिकम् ॥ २ ॥

शकलकर्दमाद्वा । ६ । २ । ३ ।

आभ्यां टान्ताभ्यां रक्तमित्यर्थे इकण् वा स्यात् । शाकलिकम् । शाकलम् । कार्दमिकम्। कार्दमम् ॥ ३ ॥

नीलपीतादकम् । ६ । २ । ४ ।

आभ्यां टान्ताभ्यां रक्तमित्यर्थे यथासङ्ख्यमकौ स्याताम् । नीलम्। पीतकम् ॥ ४ ॥

उदितगुरोर्भाद्युक्तेऽब्दे । ६ । २ । ५ ।

उदितबृहस्पतिर्यत्र नक्षत्रे तदर्थाट्टान्ताद्युक्तेऽब्दे यथाविहितं प्रत्ययः स्यात् । पौषं वर्षम् ॥ ५ ॥

चन्द्रयुक्तात्काले लुप्त्वप्रयुक्ते ।६। २ ।६।

चन्द्रेण युक्तं यन्नक्षत्रं तदर्थाट्टान्ताद्युक्ते कालेऽर्थे यथाविहितं प्रत्ययः स्यात्, अप्रयुक्ते तु कालार्थे लुप् स्यात् । पौषमहः । अद्य पुष्यः ॥ ६॥

द्वन्द्वादीयः । ६ । २ । ७ ।

चन्द्रयुक्तं यन्नक्षत्रं तदर्थाद् द्वन्द्वाट्टान्ताद्युक्ते कालेऽर्थे ईयः स्यात् । राधानुराधीयमहः ॥ ७ ॥

श्रवणाऽश्वत्थान्नाम्न्यः । ६ । २ । ८ ।

चन्द्रयुक्तार्थाच्छ्रवणादश्वत्थाच्च टान्ताद्युक्ते कालेऽर्थे संज्ञायामः स्यात् । श्रवणा रात्रिः । अश्वत्था पौर्णमासी । नाम्नीति किम् श्रावणमहः । आश्वत्थमहः ॥ ८ ॥

षष्ठ्याः समूहे । ६ । २ । ९ ।

षष्ठ्यन्तात्समूहेऽर्थे यथाविहितं प्रत्ययाः स्युः । चाषम् । स्त्रैणम् ॥९॥

भिक्षादेः । ६ । २ । १० ।

एभ्यः षष्ठ्यन्तेभ्यः समूहे यथाविहितं प्रत्ययः स्यात् । भैक्षम् । गार्भिणम् ॥ १० ॥

क्षुद्रकमालवात्सेनानाम्नि ।६।२।११।

अस्मात्षष्ठ्यन्तात्समूहेऽण् स्यात् सेनासंज्ञायाम् । क्षौद्रकमालवी सेना ॥ ११ ॥

गोत्रोक्षवत्सोष्ट्रवृद्धाऽजोरभ्रमनुष्यराज-

राजन्यराजपुत्रादकञ् ।६।२।१२।

गोत्रप्रत्ययान्तादुक्षादेश्च समूहेऽकञ् स्यात् । गार्गकम् । औक्षकम् । वात्सकम् । औष्ट्रकम् । वार्द्धकम् । आजकम् । औरभ्रकम् । मानुष्यकम् । राजकम् । राजन्यकम् । राजपुत्रकम् ॥ १२ ॥

केदाराण्ण्यश्च ।६।२।१३।

केदारात्समूहे ण्योऽकञ् च स्यात् । कैदार्यम् । कैदारकम् ॥ १३ ॥

कवचिहस्त्यऽचित्ताच्चेकण् ।६।२।१४।

कवचिहस्तिभ्यामचित्तार्थात्केदाराच्च समूहे इकण् स्यात् । कावचिकम् । हास्तिकम् । आपूपिकम् । कैदारिकम् ॥ १४ ॥

धेनोरनञः । ६ । २ । १५ ।

धेनोरनञ्पूर्वात्समूहे इकण् स्यात् । धैनुकम् । अनञ इति किम् । आधैनवम् ॥ १५ ॥

ब्राह्मणमाणववाडवाद्यः ।६।२।१६।

एभ्यः समूहे यः स्यात् । ब्राह्मण्यम् । माणव्यम् । वाडव्यम् ॥ १६ ॥

गणिकाया ण्यः । ६ । २ । १७ ।

अस्मात्समूहे ण्यः स्यात् । गाणिक्यम् ॥ १७ ॥

केशाद्वा । ६ । २ । १८ ।

केशात्समूहे ण्यो वा स्यात् । कैश्यम् । कैशिकम् ॥ १८ ॥

वाऽश्वादीयः । ६ । २ । १९ ।

अश्वात्समूहे ईयो वा स्यात् । अश्वीयम् । आश्वम् ॥ १९ ॥

पर्श्वा ड्वण् । ६ । २ । २० ।

पर्श्वाः समूहे ङ्वण् स्यात् । पार्श्वम् ॥ २० ॥

ईनोऽन्हः क्रतौ । ६ । २ । २१ ।

अह्नः समूहे क्रतावीनः स्यात् । अहीनः क्रतुः । आह्नमन्यत् ॥

पृष्ठाद्यः । ६ । २ । २२ ।

पृष्ठात्समूहे क्रतौ यः स्यात् । पृष्ठ्यः क्रतुः ॥ २२ ॥

चरणाद्धर्म्मवत् । ६ । २ । २३ ।

कठादेर्द्धर्मे इव समूहे प्रत्ययाः स्युः । यथा कठानां धर्म्मः काठकं, तथा समूहेऽपि ॥ २३ ॥

गोरथवातात्त्रल्कटचलूलम् । ६ । २ । २४ ।

एभ्यः समूहे यथासङ्ख्यमेते स्युः । गोत्रा । रथकट्या । वातूलः ॥

पाशादेश्च ल्यः । ६ । २ । २५ ।

अस्माद् गवादेश्च समूहे ल्यः स्यात् । पाश्य । तृण्या । गव्या । रथ्या । वात्या ॥ २५ ॥

श्वादिभ्योऽञ् । ६ । २ । २६ ।

एभ्यः समूहेऽञ् स्यात् । शौवम् । आह्नम् ॥ २६ ॥

खलादिभ्यो लिन् । ६ । २ । २७ ।

एभ्यः समूहे लिन् स्यात् । खलिनी । ऊकिनी ॥ २७ ॥

ग्रामजनबन्धुगजसहायात्तल् । ६ । २ । २८ ।

एभ्यः समूहे तल् स्यात् । ग्रामता । जनता । बन्धुता । गजता । सहायता ॥ २८ ॥

पुरुषात्कृतहितवधविकारे चैयञ् । ६ । २ । २९ ।

एषु समूहे च पुरुषादेयञ् स्यात्। पौरुषेयो ग्रन्थः। पौरुषेयं पथ्यम्। पौरुषेयो वधो विकारो वा । पौरुषेयः समूहः ॥ २९ ॥

विकारे । ६ । २ । ३० ।

षष्ठ्यन्ताद्विकारे यथाविहितं प्रत्ययाः स्युः । आश्मनः । आश्मः ॥

प्राण्यौषधिवृक्षेभ्योऽवयवे च । ६ । २ । ३१ ।

एभ्यः षष्ठ्यन्तेभ्यो विकारेऽवयवे च यथाविहितं प्रत्ययाः स्युः । कापोतं सक्थि मांसं वा । दौर्वं काण्डं भस्म वा । एवं बैल्वम् ॥३१॥

तालाद्धनुषि । ६ । २ । ३२ ।

तालाद्धनुषि विकारेऽण् स्यात् । तालं धनुः । धनुषीति किम् । तालमयं काण्डम् ॥ ३२ ॥

त्रपुजतोः षोऽन्तश्च । ६ । २ । ३३ ।

आभ्यां विकारेऽण् स्यात् षान्तः । त्रापुषम् । जातुषम् ॥ ३३ ॥

शम्या लः । ६ । २ । ३४ ।

शम्या विकारेऽवयवे चाऽण् स्यात् तद्योगे लान्तः। शामीलं भस्म। शामीली शाखा ॥ ३४ ॥

पयोद्रोर्यः । ६ । २ । ३५ ।

आभ्यां विकारे यः स्यात् । पयस्यम् द्रव्यम् ॥ ३५ ॥

उष्ट्रादकञ् । ६ । २ । ३६ ।

उष्ट्राद्विकारेऽवयवे चाऽकञ् स्यात्। औष्ट्रकं मांसमङ्गं वा॥३६॥

उमोर्णाद्वा । ६ । २ । ३७ ।

आभ्यां विकारेऽवयवे चाऽकञ् वा स्यात् । औमकम् । औमम् । और्णकम् । और्णः कम्बलः ॥ ३७ ॥

एण्या एयञ् । ६ । २ । ३८ ।

एण्या विकारे ऽवयवे चैयञ् स्यात् । ऐणेयं मांसमङ्गं वा ॥३८॥

कौशेयम् । ६ । २ । ३९ ।

कोशाद्विकारे एयञ् स्यात् । कौशेयं वस्त्रं सूत्रं वा ॥ ३९ ॥

परशव्याद्यलुक् च । ६ । २ । ४० ।

अस्माद्विकारे ऽण् स्यात् यस्य लुक् च । पारशवम् ॥ ४० ॥

कंसीयाञ्ञ्यः । ६ । २ । ४१ ।

अस्माद्विकारे ञ्यः स्यात् तद्योगे यलुक् च । कांस्यम् ॥ ४१ ॥

हेमार्थान्माने । ६ । २ । ४२ ।

अस्मान्माने विकारेऽण् स्यात् । हाटको निष्कः। मान इति किम्। हाटकमयी यष्टिः ॥ ४२ ॥

द्रोर्वयः । ६ । २ । ४३ ।

द्रोर्माने विकारे वयः स्यात् । द्रुवयं मानम् ॥ ४३ ॥

मानात्क्रीतवत् । ६ । २ । ४४ ।

मानं सङ्ख्यादि, तदर्थाद्विकारे क्रीते इव प्रत्ययाः स्युः। यथा शतेन क्रीतः शत्यः शतिको वा तथा तद्विकारेऽपि ॥४४॥

हेमादिभ्योऽञ् । ६ । २ । ४५ ।

एभ्यो यथायोगं विकारेऽवयवे चाऽञ् स्यात् । हैमी यष्टिः। राजतः॥४५॥

अभक्ष्याच्छादने वा मयट् । ६ । २ । ४६ ।

षष्ठ्यन्ताद्भक्ष्याच्छादनवर्जे यथायोगं विकारेऽवयवे च मयट् वा स्यात्।

भस्ममयम् । भास्मनम् । अभक्ष्याच्छादन इति किम् । मौद्गः सूपः । कार्पासः पटः ॥ ४६ ॥

शरदर्भकूदीतृणसोमवल्वजात् । ६ । २ । ४७ ।

एभ्योऽभक्ष्याच्छादने विकारेऽवयवे च नित्यं मयट् स्यात् । शरमयम् । दर्भमयम् । कूदीमयम् । तृणमयम् । सोममयम् । वल्वजमयम् ॥ ४७ ॥

एकस्वरात् । ६ । २ । ४८ ।

अस्माद्भक्ष्याच्छादनवर्जे विकारेऽवयवे च नित्यं मयट् स्यात् । वाङ्मयम् ॥ ४८ ॥

दोरप्राणिनः । ६ । २ । ४९ ।

अप्राण्यर्थाद्दोरभक्ष्याच्छादने विकारेऽवयवे च मयट् स्यात् । आम्रमयम् । अप्राणिन इति किम् । चाषम् । चाषमयम् ॥ ४९ ॥

गोः पुरीषे । ६ । २ । ५० ।

गोः पुरीषेऽर्थे मयट् स्यात् । गोमयम् । पयस्तु गव्यम् ॥ ५० ॥

व्रीहेः पुरोडाशे । ६ । २ । ५१ ।

व्रीहेः पुरोडाशे विकारे नित्यं मयट् स्यात् । व्रीहिमयः पुरोडाशः । पुरोडाश इति किम् । व्रैह ओदनः । व्रैहं भस्म ॥ ५१ ॥

तिलयवादनाम्नि । ६ । २ । ५२ ।

आभ्यां विकारेऽवयवे चानाम्नि मयट् स्यात् । तिलमयम् । यवमयम् । अनाम्नीति किम् । तैलम् । यावः ॥ ५२ ॥

पिष्टात् । ६ । २ । ५३ ।

पिष्टाद्विकारेऽनाम्नि मयट् स्यात् । पिष्टमयम् ॥ ५३ ॥

नाम्नि कः । ६ । २ । ५४ ।

पिष्टाद्विकारे नाम्नि कः स्यात् । पिष्टिका ॥ ५४ ॥

ह्योगोदोहादीनञ् हियङ्गुश्चास्य ।६।२।५५।

अस्माद्विकारे नाम्नीनञ् स्यात् तद्योगे च प्रकृते र्हियङ्गुः । हैयङ्गवीनं नवनीतं घृतं वा । नाम्नीत्येव । ह्योगोदोहं तक्रम् ॥ ५५ ॥

अपोयञ्वा ।६ । २।५६ ।

अपोविकारे यञ्वा स्यात् । आप्यम् । अम्मयम् ॥ ५६ ॥

लुब्बहुलं पुष्पमूले । ६ । २ । ५७ ।

विकारेऽवयवार्थस्य पुष्पे मूले चार्थे प्रत्ययस्य बहुलं लुप् स्यात् । मल्लिका पुष्पम् । विदारी मूलम् । बहुलमिति किम् । वारणं पुष्पम् । ऐरण्डं मूलम् ॥ ५७ ॥

फले । ६ । २ । ५८ ।

विकारेऽवयवे चार्थे प्रत्ययस्य लुप् स्यात् । आमलकम् ॥ ५८ ॥

प्लक्षादेरण् । ६ । २।५९ ।

एभ्यो विकारेऽवयवे वा फले ऽण् स्यात् । प्लाक्षम् । आश्वत्थम् ॥

जम्ब्वा वा । ६ । २ । ६० ।

जम्ब्वा विकारे ऽवयवे वा फले ऽण् वा स्यात् । जाम्बवम् । जम्बु । जम्बूः ॥ ६० ॥

नद्विरद्रुवयगोमयफलात् । ६ । २ । ६१ ।

द्रुवयगोमयौ फलार्थं च मुक्त्वा ऽन्यस्माद्विकारावयवयोर्द्विः प्रत्ययो न स्यात् । कापोतस्य विकारोऽवयवोवेति मयट् न स्यात् । अद्रुवयेत्यादीति किम् । द्रौवयं खण्डम् । गौमयं भस्म । कापित्थो रसः ॥ ६१ ॥

पितृमातुर्व्यडुलं भ्रातरि ।६।२।६२।

आभ्यां भ्रातर्यर्थे यथासङ्ख्यं व्यडुलौ स्याताम् । पितृव्यः। मातुलः॥

पित्रोर्डामहट् ।६।२।६३।

पितृमातृभ्यां मातापित्रोर्डामहट् स्यात् । पितामहः । पितामही । मातामहः । मातामही ॥ ६३ ॥

अवेर्दुग्धे सोढदूसमरीसम् ।६।२।६४।

अवेर्दुग्धे ऽर्थे एते स्युः । अविसोढम् । अविदूसम् । अविमरीसम् ॥ ६४ ॥

राष्ट्रेऽनङ्गादिभ्यः ।६।२।६५।

अङ्गादिवर्जात्षष्ठ्यन्ताद्राष्ट्रेऽर्थे ऽण् स्यात् । शैवम् । अङ्गादिवर्जनं किम् । अङ्गानां वङ्गानां वा राष्ट्रमिति वाक्यमेव ॥ ६५ ॥

राजन्यादिभ्योऽकञ् ।६।२।६६।

एभ्यो राष्ट्रेऽकञ् स्यात् । राजन्यकम् । दैवयातवकम् ॥ ६६ ॥

वसातेर्वा ।६।२।६७।

अस्माद्राष्ट्रेऽकञ्वा स्यात् । वासातकम् । वासातं राष्ट्रम् ॥ ६७ ॥

भौरिक्यैषुकार्यादेर्विधभक्तम् ।६।२।६८।

भौरिक्यादेराष्ट्रे विध ऐषुकार्यादेश्च भक्तः स्यात् । भौरिकिविधम् । भौलिकिविधम् । ऐषुकारिभक्तम् । सारस्यायनभक्तम् ॥ ६८ ॥

निवासाऽदूरभवे इति देशे नाम्नि ।६।२।६९।

षष्ठ्यन्तान्निवासाऽदूरभवयोर्यथाविहितं प्रत्ययः स्यात् । तदन्तं चेद्रूढम् । देशनाम शैवम् । वैदिशं पुरम् ॥ ६९ ॥

तदत्राऽस्ति । ६ । २ । ७० ।

तदिति प्रथमान्तादत्रेति सप्तम्यर्थे यथाविहितं प्रत्ययः स्यात् प्रथमान्तञ्चेदस्तीति प्रत्ययान्तं चेद्देशनाम। औदुम्बरं पुरम् ॥ ७० ॥

तेन निर्वृत्ते च । ६ । २ । ७१ ।

तेनेति तृतीयान्तान्निर्वृत्तेऽर्थे यथाविहितं प्रत्ययः स्यात् । देशनाम्नि । कौशाम्बी ॥ ७१॥

नद्यां मतुः । ६ । २ । ७२ ।

निवासाद्यर्थचतुष्के यथायोगं मतुः स्यात् । नद्यान्देशनाम्नि । उदुम्बरावती ॥ ७२ ॥

मध्वादेः । ६ । २ । ७३ ।

एभ्यश्चातुर्थिको देशनाम्नि मतुः स्यात् । मधुमान् । विसवान् ॥

नडकुमुदवेतसमहिषाड्डित् । ६ । २ । ७४ ।

एभ्यो डित् मतुश्चातुरर्थिको देशनाम्नि स्यात् । नड्वान् । कुमुद्वान् । वेतस्वान् । महिष्मान् ॥ ७४ ॥

नडशादाड्वलः । ६ । २ । ७५ ।

आभ्यां चातुरर्थिको डिद्वलो देशनाम्नि स्यात् । नड्वलम् । शाड्वलम् ॥ ७५ ॥

शिखायाः । ६ । २ । ७६ ।

अस्माच्चातुरर्थिको देशनाम्नि वलः स्यात । शिखावलं पुरम् ॥७६॥

शिरीषादिककणौ । ६ । २ । ७७ ।

अस्माद्देशनाम्नि चातुरर्थिकाविककणौ स्याताम् । शिरीषिकः । शैरीषकः ॥ ७७ ॥

शर्कराया इकणीयाऽण् च । ६ । २ । ७८ ।

अस्माच्चातुरर्थिकादेशनाम्नि इकणीयाण् चकारात् इककण् इत्येते स्युः । शार्करिकः । शर्करीयः । शार्करः । शर्करिकः । शार्करकः ॥ ७८ ॥

रोऽश्मादेः । ६ । २ । ७९ ।

चातुरर्थिकोदेशनाम्नि रः स्यात् । अश्मरः । यूषरः ॥ ७९ ॥

प्रेक्षादेरिन् । ६ । २ । ८० ।

चातुरर्थिकोदेशनाम्नि इन् स्यात् । प्रेक्षी । फलकी ॥ ८० ॥

तृणादेः सल् । ६ । २ । ८१ ।

चातुरर्थिकोदेशनाम्नि सल् स्यात् । तृणसा । नदसा ॥ ८१ ॥

काशादेरिलः । ६ । २ । ८२ ।

अस्माच्चातुरऽर्थिकोदेशनाम्नि इलः स्यात् । काशिलम् । वाशिलम्॥

अरीहणादेरकण् । ६ । २ । ८३ ।

चातुरर्थिकोदेशनाम्न्यऽकण् स्यात् । आरीहणकम् । खाण्डवकम्॥

सुपन्थ्यादेर्ञ्यः । ६ । २ । ८४ ।

चातुरर्थिकोदेशनाम्निञ्यः स्यात् । सौपन्थ्यम् । सौवन्ध्यम् ॥८४॥

सुतङ्गमादेरिञ् । ६ । २ । ८५ ।

चातुरर्थिकोदेशनाम्नि इञ् स्यात् ।सौतङ्गमिः । मौनचित्तिः॥८५॥

बलादेर्यः । ६ । २ । ८६ ।

चातुरर्थिकोदेशनाम्नि यः स्यात् । बल्यम् । चुल्यम् ॥ ८६ ॥

अहरादिभ्योऽञ् । ६ । २ । ८७ ।

चातुरर्थिकोदेशनाम्निअञ् स्यात् । आह्नम् । लौमम् ॥ ८७ ॥

सख्यादेरेयण् । ६ । २ । ८८ ।

चातुरर्थिकोदेशनाम्नि एयण स्यात् । साखेयः । साखिदत्तेयः॥८८॥

पन्थ्यादेरायनण् । ६ । २ । ८९ ।

चातुरर्थिकोदेशनाम्नि आयनण् स्यात् । पान्थायनः । पाक्षायणः ॥

कर्णादेरायनिञ् । ६ । २ । ९० ।

चातुरर्थिकोदेशनाम्नि आयनिञ् स्यात् । कार्णायनिः । वासिष्ठायनिः ॥ ९० ॥

उत्करादेरीयः । ६ । २ । ९१ ।

चातुरर्थिकोदेशनाम्नि ईयः स्यात् । उत्करीयः । सङ्करीयः ॥९१॥

नडादेः कीयः । ६ । २ । ९२ ।

चातुरर्थिकोदेशनाम्नि कीयः स्यात् । नडकीयः । प्लक्षकीयः ॥

कृशाश्वादेरीयण् । ६ । २ । ९३ ।

चातुरर्थिकोदेशनाम्नि ईयण् स्यात् । कार्शाश्वीयः । आरिष्टीयः ॥

ऋश्यादेः कः । ६ । ९४ ।

चातुरर्थिकोदेशनाम्नि कः स्यात् । ऋश्यकः । न्यग्रोधकः ॥ ९४ ॥

वराहादेः कण् । ६ । २ । ९५ ।

चातुरर्थिकोदेशनाम्नि कण् स्यात । वाराहकम् । पालाशकम् ॥

कुमुदादेरिकः । ६ । २ । ९६ ।

चातुरर्थिकोदेशनाम्नि इकः स्यात्। कुमुदिकम्। इकटिकम् ॥९६॥

अश्वत्थादेरिकण् । ६ । २ । ९७ ।

चातुरर्थिकोदेशनाम्नि इकण् स्यात् । आश्वत्थिकम् । कौमुदिकम् ॥ ९७ ॥

सास्य पौर्णमासी । ६ । २ । ९८ ।

सेति प्रथमान्तादस्येति षष्ठ्यर्थे यथाविहितं नाम्नि प्रत्ययः स्यात्। प्रथमान्तं चेत् पौर्णमासी। पौषोमासो ऽर्द्धमासो वा ॥ ९८ ॥

आग्रहायण्यश्वत्थादिकण् । ६ । २ । ९९ ।

आभ्यां प्रथमान्ताभ्यां षष्ठ्यर्थे इकण् स्यात् । तच्चेत्पौर्णमासी नाम्नि । आग्रहायणिकोमासोऽर्द्धमासो वा । एवमाश्वत्थिकः ॥९९॥

चैत्रीकार्त्तिकीफाल्गुनीश्रवणाद्वा ।६।२।१००।

एभ्यः सास्यपौर्णमासीति विषये नाम्नि इकण् वा स्यात्। चैत्रिकः चैत्रोमासोऽर्द्धमासो वा । एवं कार्त्तिकिकः । कार्त्तिकः फाल्गुनिकः । फाल्गुनः । श्रावणिकः । श्रावणः ॥ १०० ॥

देवता । ६ । २ । १०१ ।

देवतार्थात्प्रथमान्तात् षष्ठ्यर्थे यथाविहितं प्रत्ययः स्यात । जैनः । आग्नेयः । आदित्यः ॥ १०१ ॥

पैगाङ्क्षीपुत्रादेरीयः । ६ । २ । १०२ ।

एभ्यः सास्य देवतेति विषये ईयः स्यात् । पैङ्गाक्षीपुत्रीयम् । तार्णविन्दवीयं हविः ॥ १०२ ॥

शुक्रादियः । ६ । २ । १०३ ।

शुक्रात्सास्य देवतेति विषये इयः स्यात् । शुक्रियं हविः ॥ १०३ ॥

शतरुद्रात्तौ । ६ । २ । १०४ ।

अस्मात्सास्य देवतेति विषये ईयः इयश्च स्यात् । शतरुद्रीयम् । शतरुद्रियम् ॥ १०४ ॥

अपोनपादपान्नपातस्तृचातः । ६ । २ । १०५ ।

आभ्यां सास्य देवतेति विषये तौ स्याताम् । तद्योगे चातस्तृच् । अपोनप्त्रीयम् । अपोनप्त्रियम् । अपान्नप्त्रीयम् । अपान्नप्त्रियम् ॥ १०५ ॥

महेन्द्राद्वा । ६ । २ । १०६ ।

अस्मात्सास्य देवतेति विषये तौ वा स्याताम् । महेन्द्रीयम् । महेन्द्रियम् । माहेन्द्रं वा हविः ॥ १०६ ॥

कसोमाट्ट्यण् । ६ । २ । १०७ ।

आभ्यां सास्य देवतेति विषये ट्यण् स्यात् । कार्यम् । सौम्यं हविः ॥

द्यावापृथिवीशुनासीराऽग्नीषोममरुत्वद्वास्तोष्पतिगृहमेधादीययौ । ६ । २ । १०८ ।

एभ्यः सास्य देवतेति विषये ईययौ स्याताम् । द्यावापृथिवीयम् । द्यावापृथिव्यम् । शुनासीरीयम् । शुनासीर्यम् । अग्नीषोमीयम् । अग्नीषोम्यम् । मरुत्वतीयम् । मरुत्वत्यम् । वास्तोष्पतीयम् । वास्तोष्पत्यम् । गृहमेधीयम् । गृहमेध्यम् ॥ १०८ ॥

वाय्वृतुपित्रुषसो यः । ६ । २ । १०९ ।

एभ्यः सास्य देवतेति विषये यः स्यात् । वायव्यम् । ऋतव्यम् । पित्र्यम् । उषस्यम् ॥ १०९ ॥

महाराजप्रोष्ठपदादिकण् । ६ । २ । ११० ।

आभ्यां सास्य देवतेति विषये इकण् स्यात् । माहाराजिकः । प्रौष्ठपदिकः ॥ ११० ॥

कालाद्भववत् । ६ । २ । १११ ।

कालविशेषार्थेभ्यो यथाभवे प्रत्यया वक्ष्यन्ते । तथा सास्य देवतेति विषयेऽपि स्युः । यथा मासेभवं मासिकम् । प्रावृषि प्रावृषेण्यम् । तथा मासप्रावृड्देवताकमपि ॥ १११ ॥

आदेश्छन्दसः प्रगाथे । ६ । २ । ११२ ।

प्रथमान्तादादेश्छन्दसोऽस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययः स्यात् प्रगाथे वाच्ये । पांक्तः प्रगाथः । आदेरिति किम् । अनुष्टुब्मध्यमस्य प्रगाथस्य ॥ ११२ ॥

योद्धृप्रयोजनाद्युद्धे । ६ । २ । ११३ ।

प्रथमान्ताद्योद्धृऽर्थात्प्रयोजनार्थाच्च षष्ठ्यर्थे युद्धे यथाविहितं । प्रत्ययः स्यात । वैद्याधरं युद्धम् । सौभद्रं युद्धम् ॥ ११३ ॥

भावघञोऽस्यां णः । ६ । २ । ११४ ।

भावेघञन्तात्प्रथमान्तादस्यामित्यर्थे णः स्यात् । प्रापाता तिथिः । भावेति किम् । प्राकारोऽस्याम् ॥ ११४ ॥

श्यैनम्पातातैलम्पाता । ६ । २ । ११५

श्येनतिलयोर्भावे घञन्ते पातेपरे मोन्तः स्यात् । श्यैनम्पाता । तैलंपाता तिथिः क्रियाभूमिः क्रीडा वा ॥ ११५ ॥

प्रहरणात्क्रीडायां णः । ६ । २ । ११६ ।

प्रहरणार्थात्प्रथमान्तादस्यामिति क्रीडायां णः स्यात् । दाण्डा क्रीडा । क्रीडायामिति किम् । खड्गः प्रहरणमस्यां सेनायाम् ॥ ११६ ॥

तद्वेत्त्यऽधीते । ६ । २ । ११७ ।

तादिति द्वितीयान्ताद्वेत्त्यधीते वेत्यर्थयोर्यथाविहितं प्रत्ययः स्यात् । मौहूर्त्तः । छान्दसः ॥ ११७ ॥

न्यायादेरिकण् । ६ । २ । ११८ ।

एभ्यो वेत्त्यधीते वेत्यर्थे इकण् स्यात् । नैयायिकः । नैयासिकः ॥११८॥

पदकल्पलक्षणान्तक्रत्वाख्यानाख्यायिकात । ६ । २ । ११९ ।

पदकल्पलक्षणान्तेभ्यः क्रत्वादेश्च वेत्त्यऽधीते वेत्यर्थ इकण् स्यात् । पौर्वपदिकः । मातृकल्पिकः । गौलक्षणिकः । आग्निष्टोमिकः । यावक्रीतिकः । वासवदत्तिकः ॥ ११९ ॥

अकल्पात्सूत्रात् । ६ । २ । १२० ।

कल्पवर्जात्परो यः सूत्रस्तदन्ताद्वेत्त्यधीते वेत्यर्थ इकण् स्यात् । वार्त्तिसूत्रिकः । अकल्पादिति किम् । सौत्रः । काल्पसौत्रः ॥ १२० ॥

अधर्मक्षत्रत्रिसंसर्गाङ्गाद्विद्यायाः।६।२।१२१।

धर्मादिवर्जात्परो यो विद्याशब्दस्तदन्ताद्वेत्त्यधीते वेत्यर्थे इकण् स्यात् । वायसविद्यिकः । अधर्मादेरिति किम् । वैद्यः । धार्म्मविद्यः । क्षात्रविद्यः । त्रैविद्यः । सांसर्गविद्यः । आङ्गविद्यः ॥ १२१ ॥

याज्ञिकौक्थिकलौकायितिकम्।६।२।१२२।

एते वेत्त्यधीते वेत्यर्थे इकणन्ता निपात्यन्ते । याज्ञिकः । औक्थिकः । लौकायितिकः ॥ १२२ ॥

अनुब्राह्मणादिन् । ६ । २ । १२३ ।

अस्माद्वेत्त्यधीते वेत्यर्थे इन् स्यात् । अनुब्राह्मणी ॥ १२३ ॥

शतषष्टेः पथ इकट् । ६ । २ । १२४ ।

आभ्यां परो यः पन्थास्तदन्ताद्वेत्त्यधीते वेत्यर्थे इकट् स्यात् । शतपथिकी । षाष्टिपथिकः ॥ १२४ ॥

पदोत्तरपदेभ्य इकः । ६ । २ । १२५ ।

पदशब्द उत्तरपदं यस्य तस्मात्पदात् पदोत्तरपदाच्च वेत्त्यधीते वेत्यर्थे इकः स्यात् । पूर्वपादिकः । पादिकः । पदोत्तरपादिकः ॥ १२५ ॥

पदक्रमशिक्षामीमांसासाम्नोऽकः।६।२।१२६।

एभ्यो वेत्त्यधीते वेत्यर्थेऽकः स्यात् । पदकः । क्रमकः । शिक्षकः । मीमांसकः । सामकः ॥ १२६ ॥

ससर्वपूर्वाल्लुप् । ६ । २ । १२७ ।

सपूर्वात्सर्वपूर्वाच्च वेत्त्यधीते वेत्यर्थे प्रत्ययस्य लुप् स्यात् । सवार्त्तिकः । सर्ववेदः ॥ १२७ ॥

सङ्ख्याकात्सूत्रे । ६ । २ । १२८ ।

सङ्ख्याया: परो यः कस्तदन्तात्सूत्रार्थाद्वेत्त्यधीते वेत्यर्थे प्रत्ययस्य लुप् स्यात् । अष्टकाः । पाणिनीयाः ॥ १२८ ॥

प्रोक्तात् । ६ । २ । १२९ ।

प्रोक्तार्थप्रत्ययान्ताद्वेत्त्यधीते वेत्यर्थे प्रत्ययस्य लुप् स्यात् । गोतमेन प्रोक्तं गौतमम् । तद्वेत्त्यऽधीते वा गौतमः ॥ १२९ ॥

वेदेन्ब्राह्मणमत्रैव । ६ । २ । १३० ।

प्रोक्तप्रत्ययान्तं वेदवाचिइन्नन्तं ब्राह्मणवाचि चाऽत्रैव वेत्त्यधीते वेति

विषये एव प्रयुज्यते। कठेन प्रोक्तं वेदं विदन्त्यऽधीयते वा कठाः। ताण्ड्येन प्रोक्तं ब्राह्मणं विदन्त्यधीयते वा ताण्डिनः ॥ १३० ॥

तेन च्छन्ने रथे । ६ । २ । १३१ ।

तेनेति तृतीयान्ताच्छन्नेऽर्थे यथाविहितं प्रत्ययः स्यात्। वास्त्रो-रथः ॥ १३१ ॥

पाण्डुकम्बलादिन् । ६ । २ । १३२ ।

अस्माट्टान्ताच्छन्ने रथे इन् स्यात्। पाण्डुकम्बली रथः ॥ १३२ ॥

दृष्टे साम्नि नाम्नि । ६ । २ । १३३ ।

तेनेति टान्ताद्दृष्टं सामेत्यर्थे यथाविहितं प्रत्ययः स्यात् संज्ञायाम्। क्रौञ्चं साम। कालेयम् ॥ १३३ ॥

गोत्रादङ्कवत् । ६ । २ । १३४ ।

गोत्रवाचिनष्टान्ताद्दृष्टं सामेत्यर्थेऽङ्क इव प्रत्ययः स्यात् औपगवकं साम ॥ १३४ ॥

वामदेवाद्यः । ६ । २ । १३५ ।

अस्माट्टान्ताद्दृष्टे साम्नि यः स्यात्। वामदेव्यं साम ॥ १३५ ॥

डिद्वाऽण् । ६ । २ । १३६ ।

दृष्टं सामेत्यर्थे ऽण् डिद्वा स्यात्। औशनम्। औशनसम् ॥ १३६ ॥

वा जाते द्विः । ६ । २ । १३७ ।

जातेऽर्थे योऽण् द्विर्विहितः सडिद्वा स्यात्। शातभिषः। शातभिषजः। द्विरिति किम्। हैमवतः ॥ १३७ ॥

तत्रोद्धृतेपात्रेभ्यः । ६ । २ । १३८ ।

तत्रेति सप्तम्यन्तात्पात्रार्थादुद्धृते ऽर्थे यथाविहितं प्रत्ययः स्यात् । शारावः ओदनः ॥ १३८ ॥

स्थण्डिलाच्छेते व्रती । ६ । २ । १३९ ।

स्थण्डिलात्सप्तम्यन्ताच्छेते व्रतीत्यर्थे यथाविहितं प्रत्ययः स्यात् । स्थाण्डिलो भिक्षुः ॥ १३९ ॥

संस्कृते भक्ष्ये । ६ । २ । १४० ।

सप्तम्यन्तात्संस्कृते भक्ष्ये यथाविहितं प्रत्ययः स्यात् । भ्राष्ट्राः अपूपाः ।

शूलोखाद्यः । ६ । २ । १४१ ।

आभ्यां सप्तम्यन्ताभ्यां संस्कृते भक्ष्ये यः स्यात् । शूल्यम् । उख्यं मांसम् ॥ १४१ ॥

क्षीरादेयण् । ६ । २ । १४२ ।

क्षीरात्सप्तम्यन्तात्संस्कृते भक्ष्ये एयण् स्यात् । क्षैरेयी यवागूः ॥१४२॥

दध्न इकण् । ६ । २ । १४३ ।

दध्नः सप्तम्यन्तात्संस्कृते भक्ष्ये इकण् स्यात् । दाधिकम् ॥ १४३ ॥

वोदश्वितः । ६ । २ । १४४ ।

अस्मात्सप्तम्यन्तात्संस्कृते भक्ष्येऽर्थे इकण् वा स्यात् । औदश्वित्कम् । औदश्वितम् ॥ १४४ ॥

क्वचित् । ६ । २ । १४५ ।

अपत्यादिभ्योऽन्यत्रार्थे क्वचिद्यथाविहितं प्रत्ययः स्यात् । चाक्षुषं रूपम् । आश्वो रथः ॥ १४५ ॥

इत्याचार्यहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनलघुवृत्तौ षष्ठस्याध्यायस्य द्वितीयः पादः समाप्तः ॥

अर्हम्

शेषे । ६ । ३ । १ ।

अपत्यादिभ्योऽन्यस्मिन् प्राग्जितीयेऽर्थे इतोऽनुक्रम्यमाणं वेदितव्यम् ॥ १ ॥

नद्यादेरेयण् । ६ । ३ । २ ।

एभ्यः प्राग्जितीये शेषेऽर्थे एयण् स्यात् । नादेयः । वानेयः । शेष इत्येव । समूहे नादिकम् ॥ २ ॥

राष्ट्रादियः । ६ । ३ । ३ ।

राष्ट्रशब्दाच्छेषप्राग्जातीयेऽर्थे इयः स्यात् । राष्ट्रियः ॥ ३ ॥

दूरादेत्यः । ६ । ३ । ४ ।

दूराच्छेषेऽर्थे एत्यः स्यात् । दूरेत्यः ॥ ४ ॥

उत्तरादाहञ् । ६ । ३ । ५ ।

उत्तरशब्दाच्छेषेऽर्थे आहञ् स्यात् । औत्तराहः ॥ ५॥

पारावारादीनः । ६ । ३ । ६ ।

पारावारशब्दाच्छेषेऽर्थे ईनः स्यात् । पारावारीणः ॥ ६ ॥

व्यस्तव्यत्यस्तात् । ६ । ३ । ७ ।

पारावाराच्छेषे ईनः स्यात् । पारीणः। अवारीणः । अवारपारीणः॥

द्युप्रागपागुदक्प्रतीचो यः । ६ । ३ । ८ ।

दिवशब्दात्प्राच् अपाच् उदच् प्रत्यच् इत्येतेभ्यश्चाव्ययानव्ययेभ्यः शेषेऽर्थे यः स्यात् । दिव्यम् । प्राच्यम् । अपाच्यम् । उदीच्यम् । प्रतीच्यम् ॥ ८ ॥

ग्रामादीनञ्ञ । ६ । ३ । ९ ।

ग्रामाच्छेषेऽर्थे ईनञ् यञ्च स्यात् । ग्रामीणः । ग्राम्यः ॥ ९ ॥

कत्र्यादेश्चैयकञ् । ६ । ३ । १० ।

कत्र्यादिभ्यो ग्रामाच्च शेषेएयकञ् स्यात् । कात्रेयकः । पौष्करेयकः । ग्रामेयकः ॥ १० ॥

कुण्ड्यादिभ्यो यलुक्च । ६ । ३ । ११ ।

कुण्ड्यादिभ्यः शेषेऽर्थे एयकञ् स्यात् । तद्योगे च यो लुक् । कौण्डेयकः । कौणेयकः ॥ ११ ॥

कुलकुक्षिग्रीवाच्छ्वाऽस्यलङ्कारे ।६।३।१२।

एभ्यः शेषेऽर्थे यथासङ्ख्यमेयकञ् स्यात् । कौलेयकः श्वा । कौक्षेयकोऽसिः । ग्रैवेयकोऽलङ्कारः ॥ १२ ॥

दक्षिणापश्चात्पुरसस्त्यण् । ६ । ३ ।१३।

एभ्यः शेषेऽर्थे त्यण् स्यात् । दाक्षिणात्यः । पाश्चात्यः । पौरस्त्यः ॥ १३ ॥

वल्ह्युर्दिपर्दिकापिश्याष्टायनण्।६।३।१४।

एभ्यः शेषेऽर्थे टायनण् स्यात् । वाल्हायनः। और्दायनः । पार्दायनः। कापिशायनी द्राक्षा ॥ १४ ॥

रंकोः प्राणिनि वा । ६ । ३ । १५ ।

रंकुशब्दात्प्राणिनिविशिष्टे शेषेऽर्थे टायनण् स्यात् । राङ्कवायणः । राङ्कवो गौः । कम्बलस्तु राङ्कवः ॥ १५ ॥

क्वेहामात्रतसस्त्यच् । ६ । ३ । १६ ।

क्वइहअमाइत्येतेभ्य स्त्रतसूप्रत्ययान्तेभ्यश्च शेषेऽर्थे त्यच् स्यात् । क्वत्यः । इहत्यः । अमात्यः । तत्रत्यः । कुतस्त्यः ॥ १६ ॥

नेर्ध्रुवे । ६ । ३ । १७ ।

निशब्दाद्ध्रुवेऽर्थे त्यच् स्यात् । नित्यं ध्रुवम् ॥१७ ॥

निसो गते । ६ । ३ । १८ ।

निस्सब्दाद्गतेऽर्थे त्यच् स्यात् । निष्ट्यश्चण्डालः ॥ १८ ॥

ऐषमोह्यःश्वसो वा । ६ । ३ । १९ ।

एभ्यः शेषेऽर्थे त्यच् वा स्यात् । ऐषमस्त्यम् । ऐषमस्तनम् । ह्यस्त्यम् । ह्यस्तनम् । श्वस्त्यम् । श्वस्तनम् ॥ १९ ॥

कन्थाया इकण् । ६ । ३ । २० ।

कन्थाग्रामविशेषः कन्थाशब्दाच्छेषेऽर्थे इकण् स्यात् । कान्थिकः॥२०॥

वर्णावकञ् । ६ । ३ । २१ ।

वर्णुदेशे या कन्था ततः शेषेऽर्थेऽकञ् स्यात् । कान्थकः । २१॥

रूप्योत्तरपदारण्याण्णः । ६ । ३ । २२ ।

रूप्योत्तरपदादरण्याच्च शेषेऽर्थेऽणः स्यात् । वार्करूप्यः । आरण्याः सुमनसः ॥ २२ ॥

दिक्पूर्वादनाम्नः । ६ । ३ । २३ ।

दिक्पूर्वपदादनाम्नोऽसंज्ञाविषयात् शेषेऽर्थेऽणः स्यात् । पौर्वशालः । अनाम्नः इति किम् । पूर्वकार्णमृत्तिकी ॥ २३ ॥

मद्रादञ् । ६ । ३ । २४ ।

मन्द्रान्ताद्दिक्पूर्वपदाच्छेषेऽर्थेऽञ् स्यात् । पौर्वमद्री ॥ २४ ॥

उदग्ग्रामाद्यकृल्लोम्नः । ६ । ३ । २५ ।

उदग्ग्रामवाचिनो यकृल्लोमन्शब्दाच्छेषेऽर्थे ऽञ् स्यात्। याकृल्लोमः। उदग्ग्रामादिति किम् । अन्यस्मादण् याकृलोमनः ॥ २५ ॥

गोष्ठीतैकीनैकेतीगोमतीशूरसेनवाहीकरोमकपटच्चरात् । ६ । ३ । २६ ।

एभ्यः शेषेऽर्थेऽञ् स्यात् । गौष्ठः। तैकः। नैकेतः । गौमतः।शौरसेनः । वाहीकः । रौमकः । पाटच्चरः ॥ २६ ॥

शकलादेर्यञः । ६ । ३ । २७ ।

अस्माद्यञन्ताच्छेषेऽर्थे ऽञ् स्यात् । शाकलाः । काण्वाः ॥ २७ ॥

वृद्धेञः । ६ । ३ । २८ ।

वृद्धेञन्ताच्छेषेऽर्थेऽञ् स्यात । दाक्षाः । वृद्धेति किम् । सौतङ्गमीयः ॥

न द्विस्वरात्प्राग्भरतात् । ६ । ३ । २९ ।

प्राग्गोत्रार्थाद्भरतगोत्रार्थाच्च द्विस्वराद्वृद्धेञन्तादञ् न स्यात् । चैकीयाः । काशीयाः । द्विस्वरादिति किम् । पान्नागाराः ॥ २९ ॥

भवतोरिकणीयसौ । ६ । ३ । ३० ।

भवच्छब्दाच्छेषेऽर्थे इकण्ईयसौ स्याताम् । भावत्कम् । भवदीयम् ॥ ३० ॥

परजनराज्ञोऽकीयः । ६ । ३ । ३१ ।

एभ्यः शेषेऽर्थेऽकीयः स्यात् । परकीयः । जनकीयः । राजकीयः ॥

दोरीयः । ६ । ३ । ३२ ।

दुसंज्ञकाच्छेषेऽर्थे ईयः स्यात् । देवदत्तीयः । तदीयः ॥ ३२॥

उष्णादिभ्यः कालात् । ६ । ३ । ३३ ।

उष्णादिपूर्वपदात्कालान्ताच्छेषेऽर्थे ईयः स्यात् । उष्णकालीयम् ॥

व्यादिभ्यो णिकेकणौ । ६ । ३ । ३४ ।

एभ्यो यः कालस्तदन्ताच्छेषेऽर्थे णिक इकण् च स्यात् । वैकालिका । वैकालिकी । आनुकालिका । आनुकालिकी ॥ ३४ ॥

काश्यादेः । ६ । ३ । ३५ ।

एभ्यो डुभ्यः शेषेऽर्थे णिकेकणौ स्याताम् । काशिका । काशिकी । वैदिका । वैदिकी ॥ ३५ ॥

वाहीकेषु ग्रामात् । ६ । ३ । ३६ ।

एषु ग्रामाद्दोः शेषेऽर्थे णिकेकणौ स्याताम् । कारन्तापिका । कारन्तपिकी ॥ ३६ ॥

वोशीनरेषु । ६ । ३ । ३७ ।

एषु ग्रामार्थाद्दोः शेषेऽर्थे णिकेकणौ वा स्याताम् । आह्वजालिका । आह्वजालिकी । आह्वजालीयः ॥ ३७ ॥

वृजिमद्राद्देशात्कः । ६ । ३ । ३८ ।

वृजिमद्रशब्दाभ्यां देशवाचिभ्यां शेषेऽर्थे कः स्यात् । वृजिकः । मद्रकः ॥

उवर्णादिकण् । ६ । ३ । ३९ ।

उवर्णान्ताद्देशार्थाच्छेषेऽर्थे इकण् स्यात् । शाबरजम्बुकः ॥ ३९ ॥

दोरेव प्राचः । ६ । ३ । ४० ।

प्राग्देशार्थादुवर्णान्ताद्दोरेवेकण् स्यात् । आषाढजम्बुकः ॥ ४० ॥

इतोऽकञ् । ६ । ३ । ४१ ।

इदन्तात्प्राग्देशार्थाद्दोः शेषेऽकञ् स्यात् । काकन्दकः ॥ ४१ ॥

रोपान्त्यात् । ६ । ३ । ४२ ।

रोपान्त्यात्प्राचो दोः शेषेऽकञ् स्यात् । पाटलिपुत्रकः ॥ ४२ ॥

प्रस्थपुरवहान्तयोपान्त्यधन्वार्थात् । ६ । ३ । ४३ ।

प्रस्थपुरवहान्तेभ्यः योपान्त्याद्धन्वर्थाच्च देशवृत्तेर्दोः शेषेऽकञ् स्यात् । मालाप्रस्थकः । नान्दीपुरकः । पैलुवहकः । साङ्काश्यकः । पारेधन्वकः ।

राष्ट्रेभ्यः । ६ । ३ । ४४ ।

राष्ट्रार्थेभ्यो दुभ्यः शेषेऽकञ् स्यात् । आभिसारकः ॥ ४४ ॥

बहुविषयेभ्यः । ६ । ३ । ४५ ।

राष्ट्रेभ्यो बहुविषयेभ्यः शेषेऽकञ् स्यात् । आङ्गकः ॥ ४५ ॥

धुमादेः । ६ । ३ । ४६ ।

अस्माद्देशवृत्तेः शेषेऽकञ् स्यात् । धौमकः । षाडण्डकः ॥ ४६ ॥

सौवीरेषु कूलात् । ६ । ३ । ४७ ।

सौवीरदेशार्थात्कूलाच्छेषेऽकञ् स्यात् । कौलकः ॥ ४७ ॥

समुद्रान्नृनावोः । ६ । ३ । ४८ ।

समुद्राद्देशार्थाच्छेषेऽकञ् स्यात् । नरि नावि चार्थे । सामुद्रको ना । सामुद्रिको नौः । सामुद्रमन्यत् ॥ ४८ ॥

नगरात्कुत्सादाक्ष्ये । ६ । ३ । ४९ ।

नगराद्देशार्थाच्छेषेऽकञ् स्यात् । कुत्सायां दाक्ष्ये च गम्ये । चौरा हि नागरकाः । दक्षा हि नागरकाः ॥ ४९ ॥

कच्छाग्निवक्त्रवर्त्तोत्तरपदात् । ६ । ३ । ५० ।

कच्छाद्युत्तरपदाद्देशार्थाच्छेषेऽकञ् स्यात् । मारुकच्छकः । काण्डाग्नकः । ऐन्दुवक्रकः । बाहुवर्त्तकः ॥ ५० ॥

अरण्यात्पथि न्यायाध्यायेभनरविहारे । ६ । ३ । ५१ ।

अरण्याद्देशार्थात्पथ्यादौ शेषेऽकञ् स्यात् । आरण्यकः पन्थाः न्यायोऽध्यायः इभो नरो विहारो वा ॥ ५१ ॥

गोमये वा । ६ । ३ । ५२ ।

अरण्याद्देशाच्छेषे गोमयेऽर्थेऽकञ् वा स्यात् । आरण्यका गोमयाः आरण्या वा ॥ ५२ ॥

कुरुयुगन्धराद्वा । ६ । ३ । ५३ ।

आभ्यां देशार्थाभ्यां शेषेऽकञ् वा स्यात् । कौरवकः । कौरवः । यौगन्धरकः । यौगन्धरः ॥ ५३ ॥

साल्वाद्गोयवाग्वपत्तौ । ६ । ३ । ५४ ।

साल्वाद्देशार्थाद्गवियवाग्वां पत्तिवर्जे च मनुष्ये शेषेऽर्थेऽकञ् स्यात् । साल्वको गौः । साल्विका यवागूः । साल्वको ना ॥ ५४ ॥

कच्छादेर्नृनृस्थे । ६ । ३ । ५५ ।

देशार्थान्नरिनृस्थे च शेषेऽर्थेऽकञ् स्यात् । काच्छको ना । काच्छकमस्य स्मितम् ॥ ५५ ॥

कोपान्त्याच्चाऽण् । ६ । ३ । ५६ ।

कोपान्त्यात्कच्छादेश्च देशार्थाच्छेषेऽण् स्यात् । आर्षिकः । काच्छः । सैन्धवः ॥ ५६ ॥

गर्तोत्तरपदादीयः । ६ । ३ । ५७ ।

अस्माद्देशार्थाच्छेषे ईयः स्यात् । श्वाविद्गर्तीयः ॥ ५७ ॥

कटपूर्वात्प्राचः । ६ । ३ । ५८ ।

कटपूर्वपदात्प्राग्देशार्थाच्छेषे ईयः स्यात् । कटग्रामीयः ॥ ५८ ॥

कखोपान्त्यकन्थापलदनगरग्रामह्रदोत्तर-पदाद्दोः । ६ । ३ । ५९ ।

कुपान्त्यात् खुपान्त्यात्कन्थाद्युत्तरपदाच्च देशार्थाद्दोः शेषेऽर्थे ईयः स्यात् । आरीहणकीयः । कौटशिखीयः । दाक्षिकन्थीयः । दाक्षिपलदीयः । दाक्षिनगरीयः । माहकिग्रामीयः । दाक्षिह्रदीयः ॥ ५९ ॥

पर्वतात् । ६ । ३ । ६० ।

अस्माद्देशार्थाच्छेषे ईयः स्यात् । पर्वतीयो राजा ॥ ६० ॥

अनरे वा । ६ । ३ । ६१ ।

पर्वताद्देशार्थान्नृवर्जे ईयो वा स्यात् । पर्वतीयानि । पार्वतानि फलानि ॥ ६१ ॥

पर्णकृकणाद्भारद्वाजात् । ६ । ३ । ६२ ।

आभ्यां भारद्वाजदेशार्थाभ्यां शेषे ईयः स्यात् । पर्णीयः । कृकणीयः ॥

गहादिभ्यः । ६ । ३ । ६३ ।

एभ्यो यथासम्भवं देशार्थेभ्यः शेषे ईयः स्यात् । गहीयः । अन्तस्थीयः ॥ ६३ ॥

पृथिवीमध्यान्मध्यमश्चास्य । ६ । ३ । ६४ ।

अस्माद्देशार्थाच्छेषे ईयः स्यात् । प्रकृतेश्च मध्यमादेशः । मध्यमीयः ॥

निवासाच्चरणेऽण् । ६ । ३ । ६५ ।

पृथिवीमध्यान्निवासदेशार्थाच्चरणे निवस्तरि शेषेऽर्थेऽण् स्यात् । मध्यमाश्नास्य । माध्यमाश्नरणाः ॥ ६५ ॥

वेणुकादिभ्य ईयण् । ६ । ३ । ६६ ।

एभ्यो यथायोगं देशार्थेभ्यः शेषेऽर्थे ईयण् स्यात् । वैणुकीयः । वैत्रकीयः ॥ ६६ ॥

वा युष्मदस्मदोऽञीनञौ युष्माकास्माकं चास्यैकत्वे तु तवकममकम् । ६ । ३ । ६७ ।

आभ्यां शेषेऽर्थेऽञीनञौ वा स्याताम् । तद्योगे च यथासङ्ख्यं युष्माकास्माकौ एकार्थयोस्तु तवकममकौ । यौष्माकी । यौष्माकीणः । आस्माकी । आस्माकीनः । युष्मदीयः । अस्मदीयः । तावकः । तावकीनः । मामकः । मामकीनः । त्वदीयः । मदीयः ॥ ६७ ॥

द्वीपादनुसमुद्रं ण्यः । ६ । ३ । ६८ ।

समुद्रसमीपे यो द्वीपस्तदर्थाच्छेषेऽर्थे ण्यः स्यात् । द्वैप्या ना । तद्वासो वा ॥ ६८ ॥

अर्द्धाद्यः । ६ । ३ । ६९ ।

अर्द्धशब्दाच्छेषेऽर्थे यः स्यात् । अर्द्ध्यम् ॥ ६९ ॥

सपूर्वादिकण् । ६ । ३ । ७० ।

सपूर्वपदादर्द्धाच्छेषेऽर्थे इकण् स्यात् । पौष्करार्द्धिकः ॥ ७० ॥

दिक्पूर्वात्तौ । ६ । ३ । ७१ ।

दिक्पूर्वपदादर्द्धाच्छेषेऽर्थे यकणौ स्याताम् । पूर्वार्द्ध्यम् । पौर्वार्द्धिकम् ॥ ७१ ॥

ग्रामराष्ट्रांऽशादणिकणौ । ६ । ३ । ७२ ।

ग्रामराष्ट्रयोर्भागार्थादर्द्धाद्दिक्पूर्वाच्छेषेऽणिकणौ स्याताम् । ग्रामस्य राष्ट्रस्य वा । पौर्वार्द्धः । पौर्वार्द्धिकः ॥ ७२ ॥

पराऽवराऽधमोत्तमादेर्यः । ६ । ३ । ७३ ।

परादिपूर्वादर्द्धाच्छेषेऽर्थे यः स्यात् । परार्द्ध्यम् । अवरार्द्ध्यम् । अधमार्द्ध्यम् । उत्तमार्द्ध्यम् ॥ ७३ ॥

अमोऽन्ताऽवोऽधसः । ६ । ३ । ७४ ।

अन्तादेः शेषेऽर्थेऽमः स्यात् । अन्तमः । अवमः । अधमः ॥ ७४ ॥

पश्चादाद्यन्ताग्रादिमः । ६ । ३ । ७५ ।

एभ्यः शेषेऽर्थे इमः स्यात् । पश्चिमः । आदिमः । अन्तिमः । अग्रिमः ॥

मध्यान्मः । ६ । ३ । ७६ ।

मध्यशब्दाच्छेषेऽर्थे मः स्यात् । मध्ये जातो मध्यमः ॥ ७६ ॥

मध्ये उत्कर्षाऽपकर्षयोरः । ६ । ३ । ७७ ।

अनयोर्मध्यार्थयोर्मध्याच्छेषेऽर्थे अः स्यात् । नात्युत्कृष्टो नात्यपकृष्टो मध्यपरिणामो मध्यो विद्वान् ॥ ७७ ॥

अध्यात्मादिभ्य इकण् । ६ । ३ । ७८ ।

एभ्यः शेषेऽर्थे इकण् स्यात् । आध्यात्मिकम् । आधिदैविकम् ॥ ७८ ॥

समानपूर्वलोकोत्तरपदात् । ६ । ३ । ७९ ।

समानशब्दपूर्वपदेभ्यो लोकशब्दोत्तरपदेभ्यश्च शेषेऽर्थे इकण् स्यात् । सामानग्रामिकः । ऐहलौकिकः ॥ ७९ ॥

वर्षाकालेभ्यः । ६ । ३ । ८० ।

वर्षाया: कालविशेषार्थाच्च शेषेऽर्थे इकण् स्यात् । वार्षिकः। मासिकः॥

शरदः श्राद्धे कर्म्मणि । ६ । ३ । ८१ ।

अस्मात्पितृकार्ये शेषेऽर्थे इकण् स्यात् । शारदिकं श्राद्धम् ॥८१ ॥

नवा रोगातपे । ६ । ३ । ८२ ।

शरदो रोगे आतपे च शेषेऽर्थे इकण् वा स्यात् ।शारदिकः। शारदो रोगः आतपो वा ॥ ८२ ॥

निशाप्रदोषात् । ६ । ३ । ८३ ।

आभ्यां शेषेऽर्थे इकण्वा स्यात् । नैशिकः। नैशः। प्रादोषिकः। प्रादोषः॥

श्वसस्तादिः । ६ । ३ । ८४ ।

श्वसः कालार्थात् शेषेऽर्थे तादिरिकण् वा स्यात् । शौवस्तिकः । श्वस्त्यः ॥ ८४ ॥

चिरपरुत्परारे त्नः । ६ । ३ । ८५ ।

एभ्यः शेषेऽर्थे त्नो वा स्यात् । चिरत्नम् । परुत्नम् । परारित्नम् । चिरंतनम् । परुत्तनम् । परारितनम् ॥ ८५ ॥

पुरो नः । ६ । ३ । ८६ ।

पुराशब्दात्कालार्थाच्छेषेऽर्थे नो वा स्यात् । पुराणम् । पुरातनम् ॥

पूर्वाह्णाऽपराह्णात्तनट् । ६ । ३ । ८७ ।

आभ्यां शेषेऽर्थे तनड् वा स्यात् । पूर्वाह्णेतनः । अपराह्णेतनः । पौर्वाह्णिकः । आपराह्णिकः ॥ ८७ ॥

सायञ्चिरंप्राह्णेप्रगेऽव्ययात् । ६ । ३ । ८८ ।

एभ्योऽव्ययाच्च कालार्थाच्छेषेऽर्थे तनड्नित्य स्यात् । सायंतनम् । चिरन्तनम् । प्राह्णेतनम् । प्रगेतनम् दिवातनम् ॥ ८८ ॥

भर्त्तुसन्ध्यादेरण् । ६ । ३ । ८९ ।

भं नक्षत्रम् । तदर्थादृत्वर्थात्सन्ध्यादेश्च कालार्थाच्छेषेऽर्थेऽण् स्यात् । पौषः । ग्रैष्मः । सान्ध्यः । आमावास्यः ॥८९॥

संवत्सरात्फलपर्वणोः । ६ । ३ । ९० ।

अस्मात्फले पर्वणि च शेषेऽर्थेऽण् स्यात् । सांवत्सरं फलं पर्व वा ॥

हेमन्ताद्वा तलुक्च । ६ । ३ । ९१ ।

अस्माच्छेषेऽर्थेऽण् वा स्यात । तद्योगे च तो वा लुक् । हैमनम् । हैमन्तम् । हैमन्तिकम् ॥ ९१ ॥

प्रावृष एण्यः । ६ । ३ । ९२ ।

अस्माच्छेषेऽर्थे एण्यः स्यात् । प्रावृषेण्यः ॥ ९२ ॥

स्थामाजिनान्ताल्लुप् । ६ । ३ । ९३ ।

स्थामान्तादजिना न्ताच्च परस्य शैषिकस्य लुप् स्यात् । अश्वत्थामा । सिंहाजिनः ॥ ९३ ॥

तत्र कृतलब्धक्रीतसम्भूते । ६ । ३ । ९४ ।

तत्रेति सप्तम्यान्तादेष्वर्थेषु यथायोगमणादय एयणादयश्च स्युः । स्रौघ्नः । औत्सः । बाह्यः । नादेयः राष्ट्रियः ॥ ९४ ॥

कुशले । ६ । ३ । ९५ ।

सप्तम्यन्तात् कुशलेऽर्थे यथाविहितमणेयणादयः स्युः। माथुरः। नादेयः।

पथोऽकः । ६ । ३ । ९६ ।

सप्तम्यन्तात्पथः कुशलेऽकः स्यात् । पथकः ॥ ९६ ॥

कोऽश्मादेः । ६ । ३ । ९७ ।

अस्मात्सप्तम्यन्तात् कुशले ऽकः स्यात्। अश्मकः। अशनिकः॥९७॥

जाते । ६ । ३ । ९८ ।

सप्तम्यन्ताज्जातेऽर्थे यथाविहितमणेयणादयः स्युः। माथुरः। औत्सः। बाह्यः। नादेयः। राष्ट्रियः॥ ९८॥

प्रावृष इकः । ६ । ३ । ९९ ।

अस्मात्सप्तम्यन्ताज्जाते इकः स्यात्। प्रावृषिकः॥ ९९॥

नाम्नि शरदोऽकञ् । ६ । ३ । १०० ।

शरदः सप्तम्यन्ताज्जातेऽकञ् स्यात् नाम्नि। शारदका दर्भाः। नाम्नीति किम्। शारदं सस्यम्॥ १००॥

सिन्ध्वऽपकरात्काऽणौ । ६ । ३ । १०१ ।

आभ्यां सप्तम्यन्ताभ्याञ्जाते कोऽण्च स्यात् नाम्नि। सिन्धुकः। सैन्धवः। अपकरकः। आपकरः॥ १०१॥

पूर्वाह्णाऽपराह्णार्द्रामूलप्रदोषावस्करा-दकः । ६ । ३ । १०२ ।

एभ्यः सप्तम्यन्तेभ्यो जातेऽको नाम्नि स्यात्। पूर्वाह्णकः। अपराह्णकः। आर्द्रकः। मूलकः। प्रदोषकः। अवस्करकः॥ १०२॥

पथः पन्थ च । ६ । ३ । १०३ ।

पथः सप्तम्यन्ताज्जातेऽको नाम्नि स्यात्। तद्योगे पन्थः। पन्थकः॥ १०३॥

अश्च वाऽमावास्यायाः । ६ । ३ । १०४ ।

अस्मात्सप्तम्यन्ताज्जाते अः अकश्च नाम्नि वा स्यात्। अमावास्यः। अमावास्यकः। आमावास्यः॥ १०४॥

श्रविष्ठाषाढादीयण् च । ६ । ३ । १०५ ।

आभ्यां सप्तम्यन्ताभ्यां जाते ईयण ञ्च नाम्नि स्यात् । श्राविष्ठीयः। श्रविष्ठः । आषाढीयः । आषाढः ॥ १०५ ॥

फल्गुन्याष्टः । ६ । ३ । १०६ ।

अस्मात्सप्तम्यन्ताज्जाते टो नाम्नि स्यात् । फल्गुनः ॥ १०६ ॥

बहुलाऽनुराधापुष्यार्थपुनर्वसुहस्तविशाखा-स्वातेर्लुप् । ६ । ३ । १०७ ।

एभ्यः सप्तम्यन्तेभ्यः परस्य भाऽणो जातेऽर्थे लुब् स्यात् । नाम्नि । बहुलः । अनुराधः । पुष्यः । पुनर्वसुः । हस्तः । विशाखः । स्वातिः शिशुः ॥ १०७ ।

चित्रारेवतीरोहिण्याः स्त्रियाम् ।६।३।१०८।

एभ्यः सप्तम्यन्तेभ्यो भाऽणो जाते स्त्रियां नाम्नि लुब् स्यात् । चित्रा स्त्री । रेवती । रोहिणी ॥ १०८ ॥

बहुलमन्येभ्यः । ६ । ३ । १०९ ।

श्रविष्ठादिभ्योऽन्येभ्यो भाऽर्थेभ्यः सप्तम्यन्तेभ्यो भाऽणो जातेऽर्थे लुब् बहुलं नाम्नि स्यात् । अभिजित् । आभिजितः। अश्वयुक् । आश्वयुजः। क्वचिन्नित्यम् । अश्विनः । क्वचिन्न स्यात् । माघः ॥ १०९ ॥

स्थानान्तगोशालखरशालात् ।६।३।११०।

एभ्यः सप्तम्यन्तेभ्यः परस्य जाते प्रत्ययस्य नाम्नि लुब् स्यात् । गोस्थानः । गोशालः । खरशालः शिशुः ॥ ११० ॥

वत्सशालाद्वा । ६ । ३ । १११ ।

अस्मात्सप्तम्यन्ताज्जाते प्रत्ययस्य नाम्नि लुब् वा स्यात्। वत्सशालः। वात्सशालः ॥ १११ ॥

सोदर्यसमानोदर्यौ । ६ । ३ । ११२ ।

एतौ जातेऽर्थे यान्तौ निपात्यंते। सोदर्यः। समानोदर्यो भ्राता ११२॥

कालाद्देये ऋणे । ६ । ३ । ११३ ।

सप्तम्यन्तात्कालार्थाद्देये ऋणेऽर्थे यथाविहितं प्रत्ययः स्यात्। मासिकमृणम् ॥ ११३ ॥

कलाप्यश्वत्थयवबुसोमाव्यासैषमसोऽकः । ६ । ३ । ११४ ।

एभ्यः सप्तम्यन्तेभ्यो देये ऋणेऽकः स्यात्। कलापकम्। अश्वत्थकम्। यवबुसकम्। उमाव्यासकम्। ऐषमकमृणम् ॥११४॥

ग्रीष्मावरसमादकञ् । ६ । ३ ।११५।

आभ्यां कालार्थाभ्यां सप्तम्यन्ताभ्यां देये ऋणेऽकञ् स्यात्। ग्रैष्मकम्। आवरसमकमृणम् ॥११५॥

संवत्सराग्रहायण्या इकण् च ।६।३।११६।

आभ्यां सप्तम्यन्ताभ्यां देये ऋणे इकण् अकञ् च स्यात्। सांवत्सरिकम्। सांवत्सरकं फलं पर्व वा। आग्रहायणिकम्। आग्रहायणकम् ॥ ११६ ॥

साधुपुष्पत्पच्यमाने । ६ । ३ ।११७।

सप्तम्यन्तात्कालविशेषार्थादेषु यथाविहितं प्रत्ययाः स्युः। हैमनं हैमन्तमनुलेपनम्। वासन्त्यः कुन्दलताः। शारदाः शालयः ॥११७॥

उप्ते । ६ । ३ । ११८ ।

सप्तम्यन्तात्कालार्थादुप्तेऽर्थे यथाविहितं प्रत्ययाः स्युः। शारदा यवाः। हैमनाः ॥ ११८ ॥

आश्वयुज्या अकञ् । ६ । ३ । ११९ ।

अस्मात्सप्तम्यन्तादुप्तेऽर्थेऽकञ् स्यात्। आश्वयुजका माषाः ॥११९॥

ग्रीष्मवसन्ताद्वा । ६ । ३ । १२० ।

आभ्यां सप्तम्यन्ताभ्यामुप्तेऽर्थेऽकञ् वा स्यात् । ग्रैष्मकम् । ग्रैष्मं सस्यम्। वासन्तकम् । वासन्तम् ॥ १२० ॥

व्याहरति मृगे । ६ । ३ । १२१ ।

सप्तम्यन्तात्कालार्थाद्व्याहरति मृगेऽर्थे यथाविहितं प्रत्ययः स्यात्। नैशिको नैशो वा शृगालः । प्रादोषिकः प्रादोषो वा । मृगइति किम्। वसन्ते व्याहरति कोकिलः ॥१२१॥

जयिनि च । ६ । ३ । १२२ ।

सप्तम्यन्तात्कालार्थाज्जयिन्यर्थे यथाविहितं प्रत्ययः स्यात् । निशा-भवमध्ययनं निशा। तत्रजयी नैशिकः । नैशः । प्रादोषिकः । प्रादोषः । वार्षिकः ॥ १२२ ॥

भवे । ६ । ३ । १२३ ।

सप्तम्यन्ताद्भवेऽर्थे यथाविहितमणेयणादयः स्युः। स्रौघ्नः। औत्सः। नादेयः । ग्राम्यः ॥ १२३ ॥

दिगादिदेहांशाद्यः ।६।३।१२४।

दिगादेर्देहावयवार्थाच्च सप्तम्यन्ताद्भवे यः स्यात्। दिश्यः। अप्सव्यः। मूर्द्धन्यः ॥ १२४ ॥

नाम्न्युदकात् । ६ । ३ । १२५ ।

उदकात्सप्तम्यन्ताद्भवेऽर्थे यो नाम्नि स्यात् । उदक्या रजस्वला ॥

मध्यादिनण्णेयामोऽन्तश्च । ६।३।१२६।

मध्यात्सप्तम्यन्ताद्भवे एते स्युः तद्योगे च मोन्तः । माध्यन्दिनाः । माध्यमः । मध्यमीयः ॥ १२६ ॥

जिह्वामूलाङ्गुलेश्चेयः । ६ । ३ । १२७ ।

आभ्यां सप्तम्यन्ताभ्यां मध्याच्च भवे ईयः स्यात् । जिह्वामूलीयः । अङ्गुलीयः । मध्यीयः ॥ १२७ ॥

वर्गान्तात । ६ । ३ । १२८ ।

आस्मात्सप्तम्यन्ताद्भवे ईयः स्यात् । कवर्गीयो वर्णः ॥१२८ ॥

ईनयौ चाऽशब्दे । ६ । ३ । १२९ ।

वर्गान्तात्सप्तम्यन्ताद्भवे एतावीयश्च स्युः । नतु शब्दे । भरतवर्गीणः । भरतवर्ग्यः । भरतवर्गीयः । शब्देतु कवर्गीयः ॥ १२९ ॥

दृतिकुक्षिकलशिवस्त्यहेरेयण् ।६।३।१३०।

एभ्यः सप्तम्यन्तेभ्यो भवे एयण् स्यात् । दार्त्तेयं जलम् । कौक्षेयो व्याधिः । कालशेयं तक्रम् । वास्तेयं पुरीषम् । आहेयं विषम् ॥ १३० ॥

आस्तेयम् । ६ । ३ । १३१ ।

अस्तेर्धनविद्यमानार्थात्तत्रभवे एयण् स्यात् । असृजो वा अस्त्यादेशश्च । आस्तेयम् ॥ १३१ ॥

ग्रीवातोऽण् च । ६ । ३ । १३२ ।

अतो भवेऽणेयणौ स्याताम् । ग्रैवम् । ग्रैवेयम् ॥१३२॥

चतुर्मासान्नाम्नि ।६।३।१३३।

अस्मात्तत्रभवेऽण् स्यात् । नाम्नि । चातुर्मासी आषाढ्यादिपौर्णमासी ॥१३३॥

यज्ञे ञ्यः । ६ । ३ । १३४ ।

चतुर्मासात्तत्रभवे यज्ञे ञ्यः स्यात । चातुर्मास्य यज्ञाः ॥ १३४ ॥

गम्भीरपञ्चजनबहिर्देवात् ।६।३।१३५।

एभ्यस्तत्रभवे ञ्यः स्यात् । गाम्भीर्यः । पाञ्चजन्यः । बाह्यः । दैव्यः ॥ १३५ ॥

परिमुखादेरव्ययीभावात् । ६ । ३ ।१३६।

अस्मात्तत्रभवे ञ्यः स्यात् । पारिमुख्यः । पारिहनव्यः ॥१३६॥

अन्तः पूर्वादिकण् । ६ । ३। १३७।

अन्तः पूर्वपदादव्ययीभावात्तत्रभवे इकण् स्यात् । आन्तरगारिकः॥

पर्यनोर्ग्रामात् । ६ । ३ । १३८ ।

आभ्यां परो यो ग्रामस्तदन्तादव्ययीभावात्तत्रभवे इकण् स्यात् । पारिग्रामिकः । आनुग्रामिकः ॥१३८॥

उपाज्जानुनीविकर्णात्प्रायेण ।६।३।१३९।

उपाद्येजान्वादयस्तदन्तादव्ययीभावादिकण् स्यात् । प्रायेण तत्रभवे । औपजानुकः सेवकः । औपनीविकं ग्रीवादाम । औपकर्णिकः सूचकः ॥१३९॥

रूढावन्तःपुरादिकः । ६ । ३।१४०।

अस्मात्तत्रभवे इकः स्यात्। रूढौ गम्यायाम्। अन्तःपुरिका। रूढा-विति किम्। आन्तःपुरः ॥ १४० ॥

कर्णललाटात्कल् । ६ । ३ । १४१ ।

आभ्यां तत्रभवे कल् स्यात्। तदन्तस्य रूढौ। कर्णिका कर्णाभरणम्। ललाटिका ललाटमण्डनम् ॥ १४१ ॥

तस्य व्याख्याने च ग्रन्थात् ।६।३।१४२।

तस्येति षष्ठ्यन्ताद्व्याख्यानेऽर्थे सप्तम्यन्ताच्च भवे ग्रन्थार्थाद्यथाविहितं प्रत्ययः स्यात्। कार्त्तम्। प्रातिपदिकीयं व्याख्यानं भवं वा ॥ १४२ ॥

प्रायोबहुस्वरादिकण् । ६ । ३ ।१४३।

बहुस्वराद्ग्रन्थार्थात्तस्य व्याख्याने तत्रभवे च प्राय इकण् स्यात्। षात्वणत्विकम्। प्रायो ग्रहणात्सांहितम् ॥१४३॥

ऋगृद्द्विस्वरयागेभ्यः । ६ । ३ । १४४ ।

ऋचन्तात् ऋदन्ताद्द्विस्वराद्यागाऽर्थेभ्यश्च ग्रन्थवृत्तिभ्यस्तस्य व्याख्याने तत्रभवे चेकण् स्यात्। आर्चिकम्। चातुर्होतृकम्। आह्निकम्। राजसूयिकम् ॥१४४॥

ऋषेरध्याये । ६ । ३ । १४५ ।

ऋष्यर्थाद्ग्रन्थवृत्तेस्तस्य व्याख्याने तत्रभवे चाऽध्याये इकण् स्यात्। वाशिष्ठिको ऽध्यायः। अध्यायइति। किम्। वाशिष्ठी ऋक् ॥ १४५ ॥

पुरोडाशपौरोडाशादिकेकटौ ।६।३।१४६।

आभ्यां ग्रन्थार्थाभ्यां तस्य व्याख्याने तत्रभवे इक इकट् च स्यात्। पुरोडाशिका। पुरोडाशिकी। पौरोडाशिका। पौरोडाशिकी ॥ १४६ ॥

छन्दसो यः । ६ । ३ । १४७ ।

अस्माद्ग्रन्थार्थात्तस्य व्याख्याने तत्रभवे च यः स्यात् । छन्दस्यः ॥

शिक्षादेश्चाण् । ६ । ३ । १४८ ।

एभ्यो ग्रन्थार्थेभ्यश्छन्दसश्च तस्य व्याख्याने तत्रभवे चाऽण् स्यात् । शैक्षः । आर्गयनः । छान्दसः ॥ १४८॥

तत आगते । ६। ३। १४९ ।

ततइति पञ्चम्यन्तादागतेऽर्थे यथाविहितमणेयणादयः स्युः । स्रौघ्नः। गव्यः । नादेयः । ग्राम्यः ॥ १४९ ॥

विद्यायोनिसम्बन्धादकञ् । ६ । ३ । १५० ।

विद्यायोनिकृतश्च सम्बन्धो येषां तदर्थात्पञ्चम्यन्तादागतेऽर्थेऽकञ् स्यात् । आचार्यकम् । पैतामहकम् ॥ १५० ॥

पितुर्यो वा ।६। ३। १५१ ।

पितुर्योनिसम्बन्धाऽर्थात्पञ्चम्यन्तादागते यो वा स्यात् । पित्र्यम् । पैतृकम् ॥१५१॥

ऋत इकण् । ६ । ३ । १५२ ।

ऋदन्ताद्विद्यायोनिसम्बन्धार्थात्तत आगते इकण् स्यात् । हौतृकम् । मातृकम् ॥ १५२ ॥

आयस्थानात् ।६। ३। १५३ ।

स्वामिग्राह्यो भागो यत्रोत्पद्यते तदर्थात्ततआगते इकण् स्यात् । आतरिकम् ॥१५३ ॥

शुण्डिकादेरण् । ६ । ३ । १५४ ।

एभ्यस्ततआगतेऽण् स्यात् । शौण्डिकम् । औदपानम् ॥ १५४ ॥

गोत्रादङ्कवत् । ६ । ३ । १५५ ।

गोत्रार्थात्तत आगतेऽङ्क इव प्रत्ययः स्यात् । वैदम् । औपगवकम् ॥

नृहेतुभ्यो रूप्यमयटौ वा ।६।३।१५६।

पुमर्थाद्धेत्वर्थाच्च तत आगते एतौ वा स्याताम् । चैत्ररूप्यम् । चैत्रमयम् । चैत्रीयम् । समरूप्यम् । सममयम् । समीयम् ॥ १५६ ॥

प्रभवति । ६ । ३ । १५७ ।

पञ्चम्यन्तात्प्रागुपलम्भे यथाविहितं प्रत्ययाः स्युः । हैमवती गङ्गा ॥

वैडुर्यः । ६ । ३ । १५८ ।

विडूरात्ततः प्रभवति ञ्यः स्यात् । वैडूर्यो मणिः ॥ १५८ ॥ त् ।

त्यदादेर्मयट् । ६ । ३ । १५९ ।

एभ्यस्ततः प्रभवति मयट् स्यात् । तन्मयम् । भवन्मयी ॥ ।

तस्येदम् । ६ । ३ । १६० ।

याने ।

तस्येति षष्ठ्यन्तादिदमित्यर्थे यथाविहितं प्रत्ययाः स्युः । मा
दैत्यम् । कालेयम् । नादेयम् । पारीणः । मानवीयः ॥ १६० ॥

हलसीरादिकण् । ६ । ३ । १६१ ।

आभ्यां तस्येदमर्थे इकण् स्यात् । हालिकम् । सैरिकम् ॥ १६१ ॥

समिधआधाने टेन्यण् ।६। ३ । १६२ ।

समिधस्तस्येदमाधानमित्यर्थे टेन्यण् स्यात् । सामिधेन्यो मन्त्रः ॥

विवाहे द्वन्द्वादकल् । ६ । ३ । १६३ ।

द्वन्द्वात्तस्येदमर्थे विवाहेऽकल् स्यात् । अत्रिभरद्वाजिका ॥ १६३ ॥

अदेवासुरादिभ्यो वैरे । ६ । ३ । १६४ ।

देवासुरादिवर्ज्जाद्द्वन्द्वात्तस्येदमर्थे वैरे अकल् स्यात् । बाभ्रवशालङ्कायनिका । अदेवादीति किम् । दैवासुरम् । राक्षोसुरम् ॥ १६४ ॥

नटान्नृत्ते ञ्यः । ६ । ३ । १६५ ।

नटात्तस्येदमर्थे नृत्ते ञ्यः स्यात् । नाट्यम् ॥ १६५ ॥

छन्दोगौक्थिकयाज्ञिकबह्वृचाच्च धर्माम्नायसंघे । ६ । ३ । १६६ ।

एभ्यो नटाच्च तस्येदमर्थे धर्मादौ ञ्यः स्यात् । छान्दोग्यम् धर्मादि । औक्थिक्यम् । याज्ञिक्यम् । बाह्वृच्यम् । नाट्यम् ॥ १६६ ॥

आथर्वणिकादणिकलुक्च । ६ । ३ । १६७ ।

अस्मात्तस्येदमर्थे धर्मादौ अण् स्यादिकलुक्च । आथर्वणः ॥१६७॥

चरणादकञ् । ६ । ३ । १६८ ।

चरणः कठादिः । तदर्थात्तस्येदमर्थे धर्मादावकञ् स्यात । काठको धर्मादिः । चारककः ॥ १६८ ॥

गोत्राददण्डमाणवशिष्ये । ६ । ३ । १६९ ।

गोत्रार्थात्तस्येदमर्थे दण्डमाणवशिष्यवर्जे ऽकञ् स्यात् । औपगवकम् । अदण्डेत्यादिति किम् । काण्वा दण्डमाणवाः शिष्या वा ॥१६९॥

रैवतिकादेरीयः । ६ । ३ । १७० ।

एभ्यो गोत्राऽर्थेभ्यस्तस्येदमर्थे ईयः स्यात् । रैवतिकीयाः शिष्याः । गौरग्रीवीयं शकटम् ॥ १७० ॥

कौपिञ्जलहास्तिपदादण् । ६ । ३ । १७१ ।

आभ्यां गोत्रार्थाभ्यां तस्येदमित्यर्थेऽण् स्यात्। कौपिञ्जलाः शिष्याः। हास्तिपदाः ॥ १७१ ॥

सङ्घघोषाङ्कलक्षणेऽञ्यञिञः।६।३।१७२।

एतदन्ताद्गोत्रार्थात्तस्येदमर्थे सङ्घादावण् स्यात्। वैदः सङ्घादिः। वैदं लक्षणम्। एवं गार्गः। गार्गम्। दाक्षः। दाक्षम् ॥ १७२ ॥

शाकलादकञ्च। ६। ३। १७३।

आस्मात्तस्येदमर्थे सङ्घादावऽकञ् अण् च स्यात्। शाकलकः। शाकलः सङ्घादिः। शाकलकम्। शाकलं लक्षणम् ॥ १७३ ॥

गृहेऽग्नीधोरण् धश्च। ६। ३। १७४।

अग्नीधस्तस्येदमर्थे गृहेरण् स्यात्। धश्च। आग्नीध्रम् ॥१७४॥

रथात्सादेश्च वोढ्रङ्गे। ६। ३। १७५।

रथात्केवलात्सपूर्वाच्च तस्येदमर्थे रथस्य वोढर्यङ्ग एव च प्रत्ययः स्यात्। रथ्योऽश्वः। रथ्यं चक्रम्। द्विरथोऽश्वः। आश्वरथं चक्रम् ॥

यः। ६। ३। १७६।

रथात्केवलात्सादेश्च तस्येदमर्थे यः स्यात्। रथ्यः। द्विरथ्यः ॥१७६॥

पत्रपूर्वादञ्। ६। ३। १७७।

वाहनपूर्वाद्रथात्तस्येदमर्थे ऽञ् स्यात्। आश्वरथं चक्रम् ॥१७७॥

वाहनात्। ६। ३। १७८।

वाहनार्थात्तस्येदमर्थेऽञ् स्यात्। औष्ट्रो रथः। हास्तः ॥१७८॥

वाह्यपथ्युपकरणे। ६। ३। १७९।

वाहनादुक्तः प्रत्ययो वाह्यादावेव स्यात् । आश्वो रथः पन्था वा । आश्वं पल्ययनम् । आश्वी कसा । अन्यत्र तु वाक्यमेव । अश्वानां घासः ॥१७९॥

वहेस्तुरिश्चादिः । ६ । ३ । १८० ।

वहेर्यस्तृशब्दस्तदन्तात्तस्येदमर्थेऽञ् स्यात् तुरादिरिश्च । सांवहित्रम् ॥

तेन प्रोक्ते । ६ । ३ । १८१ ।

तेनेति टान्तात्प्रोक्ते यथाविहितं प्रत्ययाः स्युः । भाद्रबाहवं शास्त्रम् । पाणीनियम् । बार्हस्पत्यम् ॥१८१॥

मौदादिभ्यः । ६ । ३ । १८२ ।

एभ्यस्तेन प्रोक्ते यथाविहितमण् स्यात् । मौदेन प्रोक्तं वेदं विदन्त्यधीयते वा मौदाः । पैप्पलादाः ॥१८२॥

कठादिभ्यो वेदे लुप् । ६ । ३ । १८३ ।

एभ्यः प्रोक्ते वेदे प्रत्ययस्य लुप् स्यात् । कठाः । चरकाः ॥१८३॥

तित्तिरिवरतन्तुखण्डिकोखादीयण् । ६ । ३ । १८४ ।

एभ्यस्तेन प्रोक्ते वेदे ईयण् स्यात् । तैत्तिरीयाः । वारतन्तवीयाः । खाण्डिकीयाः । औखीयाः ॥१८४॥

छगलिनो णेयिन् । ६ । ३ । १८५ ।

तेन प्रोक्ते वेदे णेयिन स्यात् । छागलेयिनः ॥ १८५॥

शौनकादिभ्यो णिन् । ६ । ३ । १८६ ।

तेनप्रोक्ते वेदे णिन् स्यात् । शौनकिनः । शाङ्गरविणः ॥ १८६ ॥

पुराणे कल्पे । ६ । ३ । १८७ ।

टान्तात्प्रोक्ते पुराणे कल्पे णिन् स्यात् । पैङ्गीकल्पः ॥१८७॥

काश्यपकौशिकाद्वेदवच्च ।६।३।१८८।

आभ्यां तेन प्रोक्ते पुराणे कल्पे णिन् स्यात्। वेदवच्चकार्यमस्मिन् । काश्यपिनः । कौशिकिनः । काश्यपको धर्मः ॥१८८॥

शिलालिपाराशर्यान्नटभिक्षुसूत्रे ।६।३।१८९।

आभ्यां तेन प्रोक्ते यथासङ्ख्यं नटसूत्रे भिक्षुसूत्रे च णिन् स्यात् । वेदवच्चकार्यमस्मिन् । शैलालिनो नटाः । पाराशरिणो भिक्षवः॥१८९॥

कृशाश्वकर्मन्दादिन् । ६ । ३ । १९० ।

आभ्यां तेन प्रोक्ते यथासङ्ख्यं नटसूत्रे भिक्षुसूत्रे चेन स्यात् । वेदवच्च कार्यमस्मिन् । कृशाश्विनो नटाः । कर्मन्दिनो भिक्षवः ॥ १९० ॥

उपज्ञाते । ६ । ३ । १९१ ।

प्रागुपदेशाद्विनाज्ञाते टान्ताद्यथाविहितं प्रत्ययः स्यात् । पाणिनीयं शास्त्रम् ॥१९१॥

कृते । ६ । ३ । १९२ ।

टान्तात् कृतेऽर्थे यथाविहितं प्रत्ययाः स्युः । शैवो ग्रन्थः । सिद्धसेनीयः स्तवः ॥ १९२ ॥

नाम्नि मक्षिकादिभ्यः ।६। ३ । १९३ ।

एभ्यष्टान्तेभ्यो यथाविहितं कृते प्रत्ययः स्यात् । माक्षिकं मधु । सारघम् ॥१९३॥

कुलालादेरकञ् ।६।३।१९४।

एभ्यस्तेन कृतेऽकञ् स्यात् । नाम्नि । कौलालकं घटादिभाण्डम् । वारुटकम् सूर्प्पपिटकादि ॥ १९४ ॥

सर्वचर्म्मण ईनेनञौ । ६ । ३ । १९५ ।

तेन कृते नाम्नि स्याताम् । सर्वचर्मीणः । सार्वचर्म्मीणः ॥ १९५ ॥

उरसोयाऽणौ । ६ । ३ । १९६ ।

तेन कृते स्याताम् । नाम्नि । उरस्यः । औरसः ॥ १९६ ॥

छन्दस्यः । ६ । ३ । १९७ ।

छन्दसस्तेन कृते यो नाम्नि निपात्यः ॥ १९७ ॥

अमोऽधिकृत्यग्रन्थे । ६ । ३ । १९८ ।

द्वितीयान्तादधिकृत्य कृते ग्रन्थे यथाविहितं प्रत्ययः स्यात् । माद्रः ।

ज्योतिषम् । ६ । ३ । १९९ ।

ज्योतिषोऽमोऽधिकृत्य कृते ग्रन्थेऽण् । वृध्यभावश्च निपात्यः ॥ १९९ ॥

शिशुक्रन्दादिभ्य ईयः । ६ । ३ । २०० ।

एभ्यो ऽमोऽधिकृत्य कृते ग्रन्थे ईयः स्यात् । शिशुक्रन्दीयः । यमसभीयो ग्रन्थः ॥ २०० ॥

द्वन्द्वात्प्रायः । ६ । ३ । २०१ ।

द्वन्द्वादमोऽधिकृत्य कृते ग्रन्थे प्राय ईयः स्यात् । वाक्यपदीयम् । प्रायइति किम् । दैवासुरम् ॥ २०१ ॥

अभिनिष्क्रामतिद्वारे । ६ । ३ । २०२ ।

अमन्तादुद्वारेनिर्गच्छत्यर्थे यथोक्तं प्रत्ययः स्यात् । माथुरम् । नादेयम् । राष्ट्रियं द्वारम् ॥ २०२ ॥

गच्छतिपथिदूते । ६ । ३ । २०३ ।

अमन्तात्पथिदूते च गच्छत्यर्थे यथोक्तं प्रत्ययः स्यात् । स्रौघ्नः पन्था दूतो वा ग्राम्यः ॥ २०३ ॥

भजति । ६ । ३ । २०४ ।

अमो भजत्यर्थे यथोक्तं प्रत्ययः स्यात् । स्रौघ्नः । राष्ट्रियः ॥२०४॥

महाराजादिकण् । ६ । ३ । २०५ ।

अतोऽमोभजतीकण् स्यात् । माहाराजिकः ॥ २०५ ॥

अचित्तादद्देशकालात । ६ । ३ । २०६ ।

देशकालवर्जं यदऽचेतनं तदर्थादमोभजतीकण् स्यात् । आपूपिकः । अचित्तादिति किम् । दैवदत्तः । अदेशेत्यादि किम् । स्रौघ्नः । हैमनः ॥२०६॥

वासुदेवाऽर्जुनादकः । ६ । ३ । २०७ ।

आभ्याममन्ताभ्यां भजत्यर्थे ऽकः स्यात् । वासुदेवकः । अर्जुनकः॥

गोत्रक्षत्रियेभ्योऽकञ् प्रायः । ६ । ३ । २०८ ।

गोत्रार्थात्क्षत्रियार्थाच्चाऽमन्ताद्भजत्यऽकञ् प्रायःस्यात् । औपगवकः । नाकुलकः । प्रायः किम् । पाणिनीयः ॥ २०८ ॥

सरूपाद्द्रेः सर्वं राष्ट्रवत् । ६ । ३ । २०९ ।

राष्ट्रक्षत्रियार्थात् सरूपाद्योऽद्रिरुक्तस्तदन्तस्याऽमभजत्यर्थे सर्वं प्रकृतिः प्रत्ययश्च राष्ट्रस्येव स्यात् । वार्ज्यं माद्रं पाण्ड्यं वा भजति वृजिकः मद्रकः पाण्डवकः । सरूपादिति किम् । पौरवीयम् ॥२०९ ॥

टस्तुल्यदिशि । ६ । ३ । २१० ।

टइति तृतीयान्तात्तुल्यदिश्येऽर्थे यथोक्तं प्रत्ययः स्यात्। सौदामनी विद्युत् ॥ २१० ॥

तसिः। ६। ३। २११।

टान्तात्तुल्यदिके तासिः स्यात। सुदामतो विद्युत् ॥ २११ ॥

यश्चोरसः। ६। ३। २१२।

अतष्टान्तात्तुल्यदिके यतसी स्याताम्। उरस्यः। उरस्तः ॥२१२॥

सेर्निवासादस्य। ६। ३। २१३।

सेरिति प्रथमान्तान्निवासार्थादस्येति षष्ठ्यर्थे यथोक्तं प्रत्ययः स्यात्। स्रौघ्नः। नादेयः ॥ २१३ ॥

आभिजनात्। ६। ३। २१४।

आभिजनाः पूर्वबान्धवाः तन्निवासार्थात् स्यन्तात् षष्ठ्यर्थे यथोक्तं प्रत्ययः स्यात्। स्रौघ्नः। राष्ट्रियः ॥२१४॥

शण्डिकादेर्ण्यः। ६। ३। २१५।

अस्मात्स्यन्तादाभिजननिवासार्थादस्यत्यर्थे ण्यः स्यात्। शाण्डिक्यः। कौचवार्यः ॥ २१५ ॥

सिन्ध्वादेरञ्। ६। ३। २१६।

अस्मात्स्यन्तादाभिजननिवासार्थात् षष्ठ्यर्थेऽञ् स्यात्। सैन्धवः। वार्णवः ॥ २१६ ॥

सलातुरादीयण्। ६। ३। २१७।

अस्मात् स्यन्तादाभिजननिवासार्थात् षष्ठ्यर्थे ईयण् स्यात्। सालातुरीयः पाणिनिः ॥२१७॥

तूदीवर्मत्या एयण्। ६। ३। २१८।

आभ्यां स्यन्ताभ्यामाभिजननिवासार्थाभ्यां षष्ठ्यर्थे एयण् स्यात्। तौदेयः। वार्मतेयः ॥ २१८ ॥

गिरेरीयोऽस्त्राजीवे। ६। ३। २१९।

गिरिर्य आभिजनोनिवासस्तदर्थात् स्यन्तात् षष्ठ्यर्थेऽस्त्राजीवे ईयः स्यात्। हृङ्गोलीयः ॥ २१९ ॥

इत्याचार्यहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनलघुवृत्तौ षष्ठस्याध्यायस्य तृतीयः पादः समाप्तः ॥

अर्हम्

इकण्। ६। ४। १।

आपादान्ताद्यदनुक्तं स्यात्। तत्रायमधिकृतो ज्ञेयः ॥ १ ॥

तेन जितजयद्दीव्यत्खनत्सु। ६। ४। २।

तेनेति टान्तादेष्वर्थेष्विकण् स्यात्। आक्षिकम्। आक्षिकः। आभ्रिकः॥

संस्कृते। ६। ४। ३।

टान्तात्संस्कृते इकण् स्यात्। दाधिकम्। वैधिकम् ॥ ३ ॥

कुलत्थकोपान्त्यादण्। ६। ४। ४।

कुलत्थात्कोपान्त्याच्च तेन संस्कृते ऽण् स्यात्। कौलत्थम्। तैतिडीकम् ॥ ४ ॥

संसृष्टे। ६। ४। ५।

टान्तात्संसृष्टेऽर्थे इकण् स्यात्। दाधिकम् ॥ ५ ॥

लवणादः । ६ । ४ । ६ ।

अस्मात्तेन संसृष्टेऽर्थे अः स्यात् । लवणः सूपः ॥ ६ ॥

चूर्णमुद्गाभ्यामिनणौ । ६ । ४ । ७ ।

आभ्यां तेन संसृष्टे यथासङ्ख्यमिनणौ स्याताम् । चूर्णिनोऽपूपाः । मौद्गी यवागूः ॥ ७ ॥

व्यञ्जनेभ्य उपसिक्ते । ६ । ४ । ८ ।

व्यञ्जनं सूपादि । तदर्थाट्टान्तादुपसिक्ते इकण् स्यात् । तैलिकं शाकम् ॥ ८ ॥

तरति । ६ । ४ । ९ ।

टान्तात्तरत्यर्थे इकण् स्यात् । औडुपिकः ॥ ९ ॥

नौद्विस्वरादिकः । ६ । ४ । १० ।

नावो द्विस्वराच्च टान्तात्तरत्यर्थे इकः स्यात् । नाविका । बाहुका ॥

चरति । ६ । ४ । ११ ।

टान्ताच्चरतीकण् स्यात् । हास्तिकः । दाधिकः ॥ ११ ॥

पर्पादेरिकट् । ६ । ४ । १२ ।

अस्माट्टान्ताच्चरतीकट् स्यात् । पर्पिकी । अश्विकी ॥ १२ ॥

पदिकः । ६ । ४ । १३ ।

पादाच्चरतीकट् स्यात् पच्चाऽस्य । पदिकः ॥ १३ ॥

श्वगणाद्वा । ६ । ४ । १४ ।

अस्माच्चरतीकट् वा स्यात् । श्वगणिकी । श्वागणिकः ॥ १४ ॥

वेतनादेर्जीवति । ६ । ४ । १५ ।

अस्माद्दान्ताज्जीवतीकण् स्यात् । वैतनिकः । वाहिकः ॥ १५ ॥

व्यस्ताच्च क्रयविक्रयादिकः । ६ । ४ । १६ ।

अस्मात्समस्ताद्व्यस्ताच्च तेन जीवतीकः स्यात् । क्रयविक्रयिकः । क्रयिकः । विक्रयिकः ॥ १६ ॥

वस्नात् । ६ । ४ । १७ ।

वस्नात्तेन जीवतीकः स्यात । वस्निकः ॥ १७ ॥

आयुधादीयश्च । ६ । ४ । १८ ।

अस्मात्तेन जीवतीय इकश्च स्यात् । आयुधीयः । आयुधिकः ॥ १८ ॥

व्रातादीनञ् । ६ । ४ । १९ ।

व्रातात्तेन जीवतीनञ् स्यात् । व्रातीनाभार्यः ॥ १९ ॥

निर्वृत्तेऽक्षद्यूतादेः । ६ । ४ । २० ।

अस्माद्दान्तान्निर्वृत्ते इकण् स्यात् । आक्षद्यूतिकम् । जाङ्घाप्रहतिकं वैरम् ॥ २० ॥

भावादिमः । ६ । ४ । २१ ।

भावार्थात्तेन निर्वृत्ते इमः स्यात् । पाकिमम् ॥ २१ ॥

याचिताऽपमित्यात्कण् । ६ । ४ । २२ ।

आभ्यां तेन निर्वृत्ते कण् स्यात् । याचितकम् । आपमित्यकम् ॥

हरत्युत्सङ्गादेः । ६ । ४ । २३ ।

आस्माद्दान्ताद्धरतीकण् स्यात् । औत्सङ्गिकः । औडुपिकः ॥ २३ ॥

भस्त्रादेरिकट् । ६ । ४ । २४ ।

अस्माद्दान्ताद्धरतीकट् स्यात् । भस्त्रिकी । भरटिकी ॥ २४ ॥

विवधवीवधाद्वा । ६ । ४ । २५ ।

आभ्यां तेन हरतीकट् वा स्यात् । विवधिकी । वीवधिकी । वैवधिकः ॥ २५ ।

कुटिलिकाया अण् । ६ । ४ । २६ ।

अस्माट्टान्ताद्धरत्यण् स्यात् । कौटिलिकः कर्मारादिः ॥ २६ ॥

ओजःसहोम्भसो वर्त्तते । ६ । ४ । २७ ।

एभ्यष्टान्तेभ्यो वर्त्तते इत्यर्थे इकण् स्यात् । औजसिकः । साहसिकः । आम्भसिकः ॥ २७ ॥

तं प्रत्यनोर्लोमेपकूलात् । ६ । ४ । २८ ।

तमिति द्वितीयान्तात् प्रत्यनुपूर्वलोमेपकूलान्ताद्वर्त्तते इत्यर्थे इकण् स्यात् । प्रातिलोमिकः । आनुलोमिकः । प्रातीपिकः । आन्वीपिकः । प्रातिकूलिकः । आनुकूलिकः ॥ २८ ॥

परेर्मुखपार्श्वात् । ६ । ४ । २९ ।

परिपूर्वमुखपार्श्वान्ताद्द्वितीयान्ताद्वर्त्तते इत्यर्थे इकण् स्यात् । पारिमुखिकः । पारिपार्श्विकः ॥ २९ ॥

रक्षदुञ्छतोः । ६ । ४ । ३० ।

द्वितीयान्तादनयोरिकण् स्यात् । नागरिकः । बादरिकः ॥ ३० ॥

पक्षिमत्स्यमृगार्थाद् घ्नति । ६ । ४ । ३१ ।

पक्ष्याद्यर्थात् द्वितीयान्ताद् घ्नत्यर्थे इकण् स्यात् । पाक्षिकः । मात्स्यिकः । मार्गिकः ॥ ३१ ॥

परिपन्थात्तिष्ठति च । ६ । ४ । ३२ ।

अस्माद्द्वितीयान्तात्तिष्ठति प्रति चेकण् स्यात् । पारिपन्थिकश्चौरः॥

परिपथात् । ६ । ४ । ३३ ।

अस्माद्द्वितीयान्तात्तिष्ठत्यर्थे इकण् स्यात् । पारिपन्थिकः ॥३३ ॥

अवृद्धेर्गृह्णाति गर्ह्ये । ६ । ४ । ३४ ।

द्वितीयान्ताद्वृद्धिवर्जान्निन्द्ये गृह्णतीकण् स्यात् । द्वैगुणिकः ॥

कुसीदादिकट् । ६ । ४ । ३५ ।

अस्माद्द्वितीयान्तान्निन्द्ये गृह्णतीकट् स्यात् । कुसीदिकी ॥ ३५॥

दशैकादशादिकश्च । ६ । ४ । ३६ ।

अस्माद् द्वितीयान्तान्निन्द्ये गृह्णतीक इकट् च स्यात् । दशैकादशिका । दशैकादशिकी ॥ ३६ ॥

अर्थपदपदोत्तरललामप्रतिकण्ठात् ।६।४।३७।

अर्थात्पदात्पदशब्द उत्तरपदं यस्य तस्माल्ललामप्रतिकण्ठाभ्यां च द्वितीयान्ताभ्यां गृह्णतीकण् स्यात् । आर्थिकः । पादिकः। पौर्वपादिकः। लालामिकः । प्रातिकण्ठिकः ॥ ३७ ॥

परदारादिभ्यो गच्छति ।६।४।३८।

एभ्यो द्वितीयान्तेभ्यो गच्छत्यर्थे इकण् स्यात् । पारदारिकः । गौरुदारिकः ॥ ३८ ॥

प्रतिपथादिकश्च ।६।४।३९।

अस्माद्द्वितीयान्ताद्गच्छतीक इकण् च स्यात् । प्रतिपथिकः । प्रातिपथिकः ॥ ३९ ॥

माथोत्तरपदपदव्याक्रन्दाद्धावति।६।४।४०।

माथ उत्तरपदं यस्य तस्मात्पदव्याक्रन्दाभ्यां च द्वितीयान्ताभ्यां च धावत्यर्थे इकण् स्यात् । दाण्डमाथिकः । पादविकः । आक्रन्दिकः ॥

पश्चात्यनुपदात् । ६ । ४ । ४१ ।

पश्चादर्थादनुपदाद्द्वितीयान्तात् धावतीकण् स्यात् । आनुपदिकः ॥

सुस्नातादिभ्यः पृच्छति । ६ । ४ । ४२ ।

एभ्यो द्वितीयान्तेभ्यो पृच्छत्यर्थे इकण् स्यात् । सौस्नातिकः । सौखरात्रिकः ॥ ४२ ॥

प्रभूतादिभ्यो ब्रुवति । ६ । ४ । ४३ ।

एभ्यो द्वितीयान्तेभ्यो ब्रुवत्यर्थे इकण् स्यात् । प्राभूतिकः । पार्यासिकः ॥ ४३ ॥

माशब्दइत्यादिभ्यः । ६ । ४ । ४४ ।

एभ्यो ब्रुवतीकण् स्यात् । माशब्दिकः । कार्यशब्दिकः ॥ ४४ ॥

शाब्दिकदार्दरिकलालाटिककौक्कुटिकम् । ६ । ४ । ४५ ।

एते इकणन्ता निपात्यन्ते । शाब्दिको वैयाकरणः । दार्दरिको वादित्रकृत् । लालाटिकः प्रमत्तः सेवाकृत् । कौक्कुटिको भिक्षुः ॥ ४५ ॥

समूहार्थात्समवेते । ६ । ४ । ४६ ।

अस्माद्द्वितीयान्तात्समवेतेऽर्थे इकण् स्यात् । सामूहिकः । सामाजिकः ॥ ४६ ॥

पर्षदो ण्यः । ६ । ४ । ४७ ।

अस्माद्द्वितीयान्तात्समवेते ण्यः स्यात् । पार्षद्यः ॥ ४७ ॥

सेनाया वा । ६ । ४ । ४८ ।

अस्माद्द्वितीयान्तात्समवेते ण्यो वा स्यात् । सैन्यः । सैनिकः ॥४८॥

धर्माधर्माच्चरति । ६ । ४ । ४९ ।

आभ्यां द्वितीयान्ताभ्यां चरत्यर्थे इकण् स्यात् । धार्मिकः । आधर्मिकः ॥ ४९ ॥

षष्ठ्या धर्म्ये । ६ । ४ । ५० ।

षष्ठ्यन्ताद्धर्मादनपेते इकण् स्यात् । शौल्कशालिकम् ॥ ५० ॥

ऋन्नरादेरण् । ६ । ४ । ५१ ।

ऋदन्तान्नरादेश्च षष्ठ्यन्ताद्धर्म्येऽण् स्यात् । नारं नरस्य धर्म्यम् । नारं माहिषम ॥ ५१ ॥

विभाजयितृविशसितुर्णीड्लुक् च । ६ । ४ । ५२ ।

आभ्यां षष्ठ्यन्ताभ्यां धर्म्येऽण स्यात् । तद्योगे विभाजयितुर्णिलुक् विशशितुश्चेड् लुक् च । वैभाजित्रम् । वैशस्त्रम् ॥ ५२ ॥

अवक्रये । ६ । ४ । ५३ ।

षष्ठ्यन्तादवक्रये भाटकेऽर्थे इकण् स्यात् । आपणिकः ॥ ५३ ॥

तदस्य पण्यम् । ६ । ४ । ५४ ।

तदिति प्रथमान्ताद्विक्रेयार्थादस्येति षष्ठ्यर्थे इकण् स्यात् । तत्प्रथमान्तं पण्यं चेत् । आपूपिकः ॥ ५४ ॥

किशरादेरिकट् । ६ । ४ । ५५ ।

एभ्यस्तदस्य पण्यमिति विषये इकट् स्यात् । किशरिकी । तगरिकः ॥

शलालुनो वा । ६ । ४ । ५६ ।

अस्मात्तदस्य पण्यमिति विषये इकट् वा स्यात् । शलालुकी । शालालुकी ॥ ५६ ॥

शिल्पम् । ६ । ४ । ५७ ।

प्रथमान्तादस्येत्यर्थे इकण् स्यात् । तच्छिल्पं चेत् नार्त्तिकः ॥ ५७ ॥

मड्डुकझर्झराद्वाऽण् । ६ । ४ । ५८ ।

आभ्यां तदस्य शिल्पमिति विषये ऽण् वा स्यात् । माड्डुकः । माड्डुकिकः । झार्झरः । झार्झरिकः ॥ ५८ ॥

शीलम् । ६ । ४ । ५९ ।

प्रथमान्ताच्छीलार्थात् षष्ठ्यर्थे इकण् स्यात् । आपूपिकः ॥ ५९ ॥

अङ्स्थाच्छत्रादेरञ् । ६ । ४ । ६० ।

अङन्तात्स्थश्छत्रादेश्च तदस्य शीलमिति विषये ऽञ् स्यात् । आस्थः । छात्रः । तापसः ॥ ६० ॥

तूष्णीकः । ६ । ४ । ६१ ।

तूष्णीमस्तदस्य शीलमिति विषये कोम् लुक्च स्यात् । तूष्णीकः ॥ ६१ ॥

प्रहरणम् । ६ । ४ । ६२ ।

प्रथमन्तात् षष्ठ्यर्थे इकण् स्यात् । तत्प्रहरणं चेत् । आसिकः ॥

परश्वधाद्वाऽण् । ६ । ४ । ६३ ।

अस्मात्तदस्य प्रहरणमिति विषये ऽण् वा स्यात् । पारश्वधः । पारश्वधिकः ॥ ६३ ॥

शक्तियष्टेष्टीकण् । ६ । ४ । ६४ ।

आभ्यां तदस्य प्रहरणमिति विषये टीकण् स्यात् । शाक्तीकी । याष्टीकी ॥ ६४ ॥

वेष्ट्यादिभ्यः । ६ । ४ । ६५ ।

एभ्यस्तदस्य प्रहरणमित्यर्थे टीकण् वा स्यात् । ऐष्टीकी । ऐष्टिकी । ऐषीकः । ऐषिकः ॥ ६५ ॥

नास्तिकास्तिकदैष्टिकम् । ६ । ४ । ६६ ।

एते तदस्येत्यर्थे इकणन्ता निपात्यन्ते । नास्तिकः । आस्तिकः । दैष्टिकः ॥ ६६ ॥

वृत्तोऽपपाठोऽनुयोगे । ६ । ४ । ६७ ।

प्रथमान्तात्षष्ठ्यर्थे इकण् स्यात् । तच्चेदनुयोगविषये वृत्तोऽपपाठः । ऐकान्यिकः ॥ ६७ ॥

बहुस्वरपूर्वादिकः । ६ । ४ । ६८ ।

बहुस्वरं पूर्वपदं यस्य तस्मात्प्रथमान्तात् षष्ठ्यर्थे इकः स्यात् । तच्चे-त्परीक्षायां वृत्तोऽपपाठः । एकादशान्यिकः ॥ ६८ ॥

भक्ष्यं हितमस्मै । ६ । ४ । ६९ ।

प्रथमान्तादस्मै इति चतुर्थ्यर्थे इकण् स्यात् । तच्चेत् भक्ष्यं हितम् । आपूपिकः ॥ ६९ ॥

नियुक्तं दीयते । ६ । ४ । ७० ।

प्रथमान्ताच्चतुर्थ्यर्थे इकण् स्यात् । तच्चेन्नियुक्तमव्यभिचारेण नित्यं वा दीयते । आग्रभोजानिकः ॥ ७० ॥

श्राणामांसौदनादिको वा । ६ । ४ । ७१ ।

आभ्यां तदस्मै नियुक्तं दीयते इति विषये इकः प्रत्ययो वा स्यात् । श्राणिका । श्राणिकी । मांसौदनिका । मांसौदनिकी ॥७१॥

भक्तौदनाद्वा णिकट् । ६ । ४ । ७२ ।

आभ्यां यथासङ्ख्यमणिकटौ वा स्याताम् । तदस्मै नियुक्तं दीयते इति विषये । भाक्तः । औदनिकी । भाक्तिकः । औदनिकः ॥ ७२ ॥

नवयज्ञादयोऽस्मिन् वर्त्तन्ते । ६ । ४ । ७३ ।

एभ्यः प्रथमान्तेभ्यो वर्त्तन्ते इत्युपाधिभ्योऽस्मिन्निति सप्तम्यर्थे इकण् स्यात् । नावयज्ञिकः । पाकयज्ञिकः ॥ ७३ ॥

तत्र नियुक्ते । ६ । ४ । ७४ ।

तत्रेति सप्तम्यन्तान्नियुक्तेऽर्थे इकण् स्यात् । शौलकशालिकः ॥ ७४ ॥

अगारान्तादिकः । ६ । ४ । ७५ ।

अस्मात्तत्र नियुक्ते इकः स्यात् । देवागारिकः ॥ ७५ ॥

अदेशकालादध्यायिनि । ६ । ४ । ७६ ।

अध्ययनस्य यौ प्रतिषिद्धौ देशकालौ तदर्थात् सप्तम्यन्तादध्यायिन्यर्थे इकण् स्यात् । आशुचिकः । सान्ध्यिकः ॥ ७६ ॥

निकटादिषु वसति । ६ । ४ । ७७ ।

एभ्यः सप्तम्यन्तेभ्यो वसत्यर्थे इकण् स्यात् । नैकटिकः । आरण्यिको भिक्षुः । वार्क्षमूलिकः ॥ ७७ ॥

सतीर्थ्यः । ६ । ४ । ७८ ।

समानतीर्थात्तत्र वसत्यर्थे यो निपात्यते समानस्य च स भावः । सतीर्थ्यः ॥ ७८ ॥

प्रस्तारसंस्थानतदन्तकठिनान्तेभ्यो व्यवहरति । ६ । ४ । ७९ ।

प्रस्तारसंस्थानाभ्यां तदन्तेभ्यः कठिनान्ताच्च व्यवहरत्यर्थे इकण् स्यात् । प्रास्तारिकः । सांस्थानिकः । कांस्यप्रस्तारिकः । गौसंस्थानिकः । वांशकठिनिकः ॥ ७९ ॥

सङ्ख्यादेश्चार्हदलुचः । ६ । ४ । ८० ।

अर्हदर्थमभिव्याप्य या प्रकृतिवर्क्ष्यते तस्याः केवलायाः सङ्ख्यापूर्वायाश्च वक्ष्यमाणः प्रत्ययः स्यादिति ज्ञेयम् । नचेत्सा लुगन्ता । चान्द्रायणिकः । द्वैचन्द्रायणिकः । अलुचइति किम् । द्विसूर्पेण क्रीतेन क्रीतं द्विसौर्पिकम् ॥ ८० ॥

गोदानादीनां ब्रह्मचर्ये । ६ । ४ । ८१ ।

एभ्यः षष्ठयन्तेभ्यो ब्रह्मचर्येऽर्थे इकण् स्यात् । गौदानिकम् । आदित्यव्रातिकम् ॥ ८१ ॥

चद्रायणं च चरति । ६ । ४ । ८२ ।

अस्माद्द्वितीयान्ताद्गोदानादेश्च चरत्यर्थे इकण् स्यात् । चान्द्रायणिकः । गौदानिकः ॥ ८२ ॥

देवव्रतादीन् डिन् । ६ । ४ । ८३ ।

एभ्यो निर्देशादेव द्वितीयान्तेभ्यश्चरत्यर्थे डिन् स्यात् । देवव्रती । महाव्रती ॥ ८३ ॥

डकश्चाष्टाचत्वारिंशतं वर्षाणाम् । ६ । ४ । ८४ ।

वर्षाणामष्टाचत्वारिंशतो द्वितीयान्ताच्चरत्यर्थे डकोडिन् च स्यात् । अष्टाचत्वारिंशकः । अष्टाचत्वारिंशी ॥ ८४ ॥

चातुर्मास्यन्तौ यलुक् च। ६।४।८५।

अस्माद्द्वितीयान्ताच्चरत्यर्थे इकडिनौ स्याताम्। यलुक्च। चातुर्मासकः। चातुर्मासी॥ ८५॥

क्रोशयोजनपूर्वाच्छताद्योजनाच्चाऽभिगमार्हे। ६।४।८६।

क्रोशपूर्वाद्योजनपूर्वाच्च शताद्योजनाच्च पञ्चम्यन्तादभिगमार्हेऽर्थे इकण् स्यात्। क्रौशशतिको मुनिः। यौजनशतिकः। यौजनिकः॥८६॥

तद्यात्येभ्यः। ६।४।८७।

तदिति द्वितीयान्तेभ्य एभ्यः क्रोशशतयोजनशतयोजनेभ्यो याति गच्छत्यर्थे इकण् स्यात्। क्रौशशतिकः। यौजनशतिकः। यौजनिकः दूतः॥ ८७॥

पथ इकट्। ६।४।८८।

पथो द्वितीयान्ताद्यात्यर्थे इकट् स्यात्। पथिकी॥८८॥

नित्यं णः पन्थश्च। ६।४।८९।

पथो द्वितीयान्तान्नित्यं यात्यर्थे णः स्यात्। पन्थचास्य। पान्थः॥ ८९॥

शङ्कूत्तरकान्ताराजवारिस्थलजङ्गलादेस्तेनाहृते च। ६।४।९०।

शंकादिपुर्वपदात्पथिनन्तात्तेनेति तृतीयान्तादाहृते याति चार्थे इकण् स्यात्। शाङ्कुपथिकः। औत्तरपथिकः। कान्तारपथिकः। आजपथिकः। वारिपथिकः। स्थालपथिकः। जाङ्गलपथिकः॥ ९०॥

स्थलादेर्मधुकमरिचेऽण् । ६ । ४ । ९१ ।

स्थलपूर्वपदात्पथिनन्तादाहृते मधुके मरिचे चार्थेऽण् स्यात्। स्थालपथं मधुकम् मरिचं वा ॥ ९१ ॥

तुरायणपारायणं यजमानाऽधीयाने । ६ । ४ । ९२ ।

आभ्यां द्वितीयान्ताभ्यां यथासङ्ख्यं यजमानाधीयानयोरिकण् स्यात् । तौरायणिकः । पारायणिकः ॥ ९२ ॥

संशयं प्राप्ते ज्ञेये । ६ । ४ । ९३ ।

संशयमिति द्वितीयान्तात्प्राप्ते ज्ञेयेऽर्थे इकण् स्यात् । सांशयिको ऽर्थः ॥ ९३ ॥

तस्मै योगादेः शक्ते । ६ । ४ । ९४ ।

एभ्यस्तस्मैइति चतुर्थ्यन्तेभ्यः शक्तेऽर्थे इकण् स्यात् । यौगिकः । साम्तापिकः ॥ ९४ ॥

योगकर्मभ्या योकञौ । ६ । ४ । ९५ ।

आभ्यां चतुर्थ्यन्ताभ्यां शक्तेऽर्थे यथासङ्ख्यं योकञौ स्याताम् । योग्यः। कार्मुकम् ॥ ९५ ॥

यज्ञानां दक्षिणायाम् । ६ । ४ । ९६ ।

एभ्यः षष्ठ्यन्तेभ्यो दक्षिणायामर्थे इकण् स्यात् । आग्निष्टोमिकी ॥

तेषु देये । ६ । ४ । ९७ ।

यज्ञार्थेभ्यः सप्तम्यन्तेभ्यो देयेऽर्थे इकण् स्यात्। वाजपेयिकं भक्तम् ॥

काले कार्ये च भववत् । ६ । ४ । ९८ ।

कालार्थात्सप्तम्यन्ताद्देये कार्ये चार्थे भवे इव प्रत्ययाः स्युः । यथा वर्षासु भवं वार्षिकम् । तथा कार्यं देयं च ॥ ९८ ॥

व्युष्टादिष्वण् । ६ । ४ । ९९ ।

एभ्यः सप्तम्यन्तेभ्यो देये कार्ये चाण् स्यात् । वैयुष्टम् । नैत्यम् ॥

यथाकथाचाण्णः । ६ । ४ । १०० ।

अस्माद्देये कार्ये चार्थे णः स्यात् । याथाकथाचम् ॥ १०० ॥

तेन हस्ताद्यः । ६ । ४ । १०१ ।

तेनेति तृतीयान्ताद्धस्ताद्देये कार्ये च यः स्यात् । हस्त्यम् ॥ १०१ ॥

शोभमाने । ६ । ४ । १०२ ।

टान्तात् शोभमाने इकण् स्यात् । कार्णवेष्टकिकम् मुखम् ॥ १०२ ॥

कर्मवेषाद्यः । ६ । ४ । १०३ ।

आभ्यां टान्ताभ्यां शोभमाने ऽर्थे यः स्यात । कर्मण्यं शौर्यम् । वेष्यो नटः ॥ १०३ ॥

कालात्परिजय्यलभ्यकार्यसुकरे । ६ । ४ । १०४ ।

कालविशेषार्थाट्टान्तात्परिजय्यादावर्थे इकण् स्यात् । मासिको-व्याधिः पटः चान्द्रायणं प्रासादो वा ॥ १०४ ॥

निर्वृत्ते । ६ । ४ । १०५ ।

कालार्थाट्टान्तान्निर्वृत्तेऽर्थे इकण् स्यात् । आह्निकम् ॥ १०५ ॥

तं भाविभूते । ६ । ४ । १०६ ।

तमिति द्वितीयान्तात्कालार्थाद्भाविनि भूते चार्थे इकण् स्यात् । मासिकः उत्सवः ॥ १०६ ॥

तस्मै भृताऽधीष्टे च। ६ । ४ । १०७।

तस्मैइति चतुर्थ्यन्तात्कालार्थात् भृतेऽधीष्टे चार्थे इकण् स्यात् । मासिकः कर्मकरः उपाध्यायो वा ॥ १०७॥

षण्मासाद्वयसि ण्येकौ । ६ । ४ । १०८।

अस्मात्कालार्थात्तेन निर्वृत्ते तं भाविनि भूते तस्मै भृताऽधीष्टे चेति विषये ण्य इकश्च स्यात् अवयसि गम्यमाने । षाण्मास्यः । षण्मासिकः ॥ १०८ ॥

समाया ईनः । ६ । ४ । १०९ ।

अस्मात्तेन निर्वृत्ते इत्यादि पञ्चकविषये ईनः स्यात् । समीनः ॥

रात्र्यहःसंवत्सराच्च द्विगोर्वा ।६।४।११०।

रात्र्याद्यन्तात्समान्ताच्च द्विगोस्तेन निर्वृत्तइत्यादि पञ्चकविषये ईनो वा स्यात् । द्विरात्रीणः । द्वैरात्रिकः । द्व्यहीनः । द्वैयह्निकः । द्विसंवत्सरीणः । द्विसांवत्सरिकः । द्विसमीनः । द्वैसमिकः ॥ ११० ॥

वर्षादश्च वा । ६ । ४ । १११।

कालवाचिवर्षान्तात् द्विगोस्तेन निर्वृत्ते इत्यादि पञ्चकविषये ईनोऽश्च वा स्यात् । द्विवर्षः । द्विवर्षीणः । द्विवार्षिकः ॥ १११ ॥

प्राणिनि भूते । ६ । ४ । ११२ ।

कालार्थवर्षान्ताद्द्विगोर्भूते प्राणिन्यर्थे अः स्यात् । द्विवर्षो वत्सः प्राणिनीति किम् । द्विवर्षः । द्विवर्षीणः । द्विवार्षिकः सरकः ॥ ११२ ॥

मासाद्वयसि यः । ६ । ४ । ११३ ।

मासान्ताद्द्विगोर्भूतेऽर्थे यः स्यात् । वयसिगम्ये । द्विमास्यः शिशुः । वयसीति किम् । द्वैमासिको व्याधिः ॥ ११३ ॥

ईनञ्च । ६ । ४ । ११४ ।

मासाद्भूतेऽर्थे इनञ् यश्च स्यात् वयसिगम्ये । मासीनः । मास्यः । शिशुः ॥ ११४ ॥

षण्मासाद्ययणिकण् । ६ । ४ । ११५ ।

अस्मात्कालार्थाद्भूतेऽर्थे एते स्युः। वयसिगम्ये। षण्मास्यः। षाण्मास्यः। षाण्मासिकः शिशुः ॥ ११५ ॥

सोऽस्य ब्रह्मचर्यतद्वतोः । ६ । ४ । ११६ ।

स इति प्रथमान्तात्कालार्थादस्येति षष्ठ्यर्थे ब्रह्मचर्ये ब्रह्मचारिणि चेकण् स्यात् । मासिकं ब्रह्मचर्यम् । मासिकस्तद्वान् ॥ ११६ ॥

प्रयोजनम् । ६ । ४ । ११७ ।

प्रथमान्तात्षष्ठ्यर्थे इकण् स्यात् प्रथमान्तं चेत्प्रयोजनम् । जैनमहिकं देवागमनम् ॥ ११७ ॥

एकागाराच्चौरे । ६ । ४ । ११८ ।

अस्मात्तदस्य प्रयोजनमिति विषये चौरेऽर्थे इकण् स्यात् । ऐकागारिकः ॥ ११८ ॥

चूडादिभ्योऽण् । ६ । ४ । ११९ ।

एभ्यस्तदस्य प्रयोजनमिति विषये ऽण स्यात् । चौडं श्राद्धम् ॥

विशाखाषाढान्मन्थदण्डे । ६ । ४ । १२० ।

आभ्यां तदस्य प्रयोजनमिति विषये यथासङ्ख्यं मन्थे दण्डे चार्थेऽण् स्यात् । वैशाखो मन्थः । आषाढो दण्डः ॥ १२० ॥

उत्थापनादेरीयः । ६ । ४ । १२१ ।

एभ्यस्तदस्य प्रयोजनमिति विषये ईयः स्यात् । उत्थापनीयः । उपस्थापनीयः ॥ १२१ ॥

विशिरुहिपदिपूरिसमापरनात्सपूर्वपदात् । ६ । ४ । १२२ ।

एभ्यो ऽनान्तेभ्यः सपूर्वपदेभ्यस्तदस्य प्रयोजनमित्यर्थे ईयः स्यात् । गृहप्रवेशनीयम् । आरोहणीयम् । गोप्रपदनीयम् । प्रपापूरणीयम् । अङ्गसमापनीयम् ॥ १२२ ॥

स्वर्गस्वतिवाचनादिभ्यो यलुपौ ।६।४।१२३।

स्वर्गादेः स्वस्तिवाचनादेश्च तदस्य प्रयोजनमित्यर्थे यथासंख्यं यो लुप् च स्यात् । स्वर्ग्यम् । आयुष्यम् । स्वस्तिवाचनम् । शान्तिवाचनम् ॥ १२३ ॥

समयात्प्राप्तः । ६ । ४ । १२४ ।

समयात्प्रथमान्तात् षष्ठ्यर्थे इकण् स्यात् । चेत्समयः प्राप्तः । सामयिकं कार्यम् ॥ १२४ ॥

ऋत्वादिभ्योऽण् । ६ । ४ । १२५ ।

एभ्यः प्रथमान्तेभ्यः सोऽस्य प्राप्तइत्यर्थे ऽण स्यात् । आर्त्तवं फलम् । औपवस्त्रम् ॥ १२५ ॥

कालाद्यः ।६।४।१२६।

कालात्सोऽस्य प्राप्तइत्यर्थे यः स्यात् । काल्या मेघाः ॥१२६॥

दीर्घः । ६ । ४ । १२७ ।

कालात्प्रथमान्तादस्येत्यर्थे इकण् स्यात् । प्रथमान्तश्चेद्दीर्घः । कालिकमृणम् ॥ १२७ ॥

आकालिकमिकश्चाद्यन्ते।६।४।१२८।

आकालिकादिक इकण् च भवत्यर्थे स्यात् आदिरेव यद्यन्तः। आकालिकोऽनध्यायः पूर्वेद्युर्यस्मिन्काले प्रवृत्तो ऽपरेद्युरप्यातस्मात्कालाद्भवतीत्यर्थः। आकालिकी आकालिका वा विद्युत् आजन्मकालमेव स्याज्जन्मानन्तरनाशिनीत्यर्थः ॥ १२८ ॥

त्रिंशद्विंशतेर्डकोऽसंज्ञायामार्हदर्थे । ६ । ४ । १२९ ।

आभ्यामार्हदर्थाद्योर्थो वक्ष्यते तस्मिन् डकः स्यात् । असंज्ञाविषये । त्रिंशकम् । विंशकम् । त्रिंशकः । विंशकः । असंज्ञायामिति किम् । त्रिंशत्कम् । विंशतिकम् ॥ १२९ ॥

सङ्ख्याडतेश्चाऽशत्तिष्टेः कः।६।४।१३०।

शदन्तत्यन्तष्ट्यन्तवर्जसङ्ख्याया डत्यन्तात्रिंशद्विंशतिभ्यां चार्हदर्थे कः स्यात् । द्विकम् । कतिकम् । त्रिंशत्कम् । विंशतिकम् । अशत्तिष्टेरिति किम् । चात्वारिंशत्कम् । साप्ततिकम् । षाष्टिकम् ॥१३०॥

शतात्केवलादतस्मिन्येकौ ।६।४।१३१।

शतात्केवलादार्हदर्थे येकौ स्याताम् । सचेदर्थः प्रकृत्यर्थान्नाभिन्नः । शत्यम् । शतिकम् । केवलादिति किम् । द्विशतकम् । अतस्मिन्निति किम् । शतकं स्तोत्रम् ॥ १३१ ॥

वातोरिकः । ६ । ४ । १३२ ।

अत्वन्तसङ्ख्याया आर्हदर्थे इको वा स्यात् । यावतिकम् । यावत्कम् ॥ १३२ ॥

कार्षापणादिकट् प्रतिश्चास्य वा।६।४।१३३।

आस्मादार्हदर्थे इकट् स्यात् । अस्य च प्रतिर्वा । कार्षापणिकी । प्रतिकी ॥ १३३ ॥

अर्द्धात्पलकंसकर्षात् । ६ । ४ । १३४ ।

अर्द्धपूर्वात्पलाद्यन्तादार्हदर्थे इकट् स्यात् । अर्द्धपलिकम् । अर्द्धकंसिकम् । अर्द्धकर्षिकी ॥ १३४ ॥

कंसार्द्धात् । ६ । ४ । १३५ ।

आभ्यामार्हदर्थे इकट् स्यात् । कंसिकी । अर्द्धिकी ॥ १३५॥

सहस्रशतमानादण् । ६ । ४ । १३६ ।

आभ्यामार्हदर्थेऽण् स्यात् । साहस्रः । शातमानः ॥ १३६ ॥

सूर्प्पाद्वाऽञ् । ६ । ४ । १३७ ।

आर्हदर्थे वाऽञ् स्यात् । सौर्प्पम् । सौर्प्पिकम् ॥ १३७ ॥

वसनात् । ६ । ४ । १३८ ।

आर्हदर्थेऽञ् स्यात् । वासनम् ॥ १३८ ॥

विंशतिकात् । ६ । ४ । १३९ ।

आर्हदर्थे ऽञ् स्यात् । वैंशतिकम् ॥ १३९ ॥

द्विगोरीनः । ६ । ४ । १४० ।

विंशतिकान्ताद् द्विगोरार्हदर्थे ईनः स्यात् । द्विविंशतिकीनम् ॥

अनाम्न्यऽद्विः प्लुप् । ६ । ४ । १४१ ।

द्विगोरार्हदर्थे जातस्य प्रत्ययस्य पित् लुप् स्यात् । नतु द्विः अनाम्नि । द्विकंसम् । अनाम्नीति किम् । पाञ्चलोहितिकम् । अद्विरिति किम् । द्विसूर्प्पेण क्रीतं द्विसौर्प्पिकम् ॥ १४१ ॥

नवाणः । ६ । ४ । १४२ ।

द्विगोः परस्यार्हदर्थे ऽणः पित् लुब् वा स्यात् । नतुद्विः । द्विसहस्रम् । द्विसाहस्रम् ॥ १४२ ॥

सुवर्णकार्षापणात् । ६ । ४ । १४३ ।

एतदन्तात् द्विगोः परस्यार्हदर्थे प्रत्ययस्य लुब्वा स्यात् । नतुद्विः । द्विसुवर्णम् । द्विसौवर्णिकम् । द्विकार्षापणम् । द्विकार्षापणिकम् ॥१४३॥

द्वित्रिबहोर्निष्कविस्तात् । ६ । ४ । १४४ ।

एभ्यः परौ यौ निष्कविस्तौ तदन्ताद्विगोरार्हदर्थे प्रत्ययस्य लुब् वा स्यात् । अद्विः । द्विनिष्कम् । द्विनैष्किकम् । त्रिनिष्कम् । त्रिनैष्किकम् । बहुनिष्कम् । बहुनैष्किकम् । द्विविस्तम् । द्विवैस्तिकम् । त्रिविस्तम् । त्रिवैस्तिकम् । बहुविस्तम् । बहुवैस्तिकम् ॥ १४४ ॥

शताद्यः । ६ । ४ । १४५ ।

शतान्ताद्विगोरार्हदर्थे यो वा स्यात् । द्विशत्यम् । द्विशतिकम् ॥

शाणात् । ६ । ४ । १४६ ।

शाणान्ताद् द्विगोरार्हदर्थे यो वा स्यात् । पञ्चशाण्यम् । पञ्चशाणम् ॥ १४६ ॥

द्वित्र्यादेर्याऽण् वा । ६ । ४ । १४७ ।

द्वित्रिपूर्वो यः शाणस्तदन्ताद्विगोरार्हदर्थे या ऽणौ वा स्याताम् । द्विशाण्यम् । द्वैशाणम् । द्विशाणम् । त्रिशाण्यम् । त्रैशाणम् । त्रिशाणम् ॥ १४७ ॥

पणपादमाषाद्यः । ६ । ४ । १४८ ।

पणाद्यन्ताद् द्विगोरार्हदर्थे यः स्यात् । द्विपण्यम् । द्विपाद्यम् । अध्यर्द्धमाष्यम् ॥ १४८ ॥

खारीकाकणीभ्यः कच् । ६ । ४ । १४९ ।

एतदन्ताद्विगोराभ्यां चार्हदर्थे कच् स्यात् । द्विखारीकम् । द्विकाकणीकम् । खारीकम् । काकणीकम् ॥ १४९ ॥

मूल्यैः क्रीते । ६ । ४ । १५० ।

मूल्यार्थाट्टान्तात् क्रीतेऽर्थे यथोक्तं प्रत्ययाः स्युः । प्रास्थिकम् । त्रिंशकम् ॥ १५० ॥

तस्य वापे । ६ । ४ । १५१ ।

तस्येति षष्ठयन्ताद्वापेऽर्थे यथोक्तं प्रत्ययाः स्युः । प्रास्थिकम् । खारीकम् ॥ १५१ ॥

वातपित्तश्लेष्मसन्निपाताच्छमनकोपने । ६ । ४ । १५२ ।

एभ्यः षष्ठयन्तेभ्यः शमने कोपने चार्थे यथोक्तमिकण् स्यात् । वातिकम् । पैत्तिकम् । श्लैष्मिकम् । सान्निपातिकम् ॥ १५२ ॥

हेतौ संयोगोत्पाते । ६ । ४ । १५३ ।

षष्ठयन्ताद्धेतावर्थे यथोक्तं प्रत्ययः स्यात् । चेद्धेतुः संयोग उत्पातो वा । शत्यः । शतिकः दातृसंयोगः । सौमग्राहणिको भूमिकम्पः ॥१५३॥

पुत्राद्येयौ । ६ । ४ । १५४ ।

पुत्रात्षष्ठ्यन्ताद्धेतावर्थे येयौ स्याताम् । चेद्धेतुः संयोगोत्पातो वा । पुत्र्यः । पुत्रीयः ॥ १५४ ॥

द्विस्वरब्रह्मवर्चसाद्योऽसङ्ख्यापरिमाणाश्वादेः । ६ । ४ । १५५ ।

सङ्ख्यापरिमाणाऽश्वादिवर्जात् द्विस्वराद्ब्रह्मवर्चसाच्च षष्ठ्यन्ताद्धेतौ संयोगे उत्पाते वा यः स्यात् । धन्यः । ब्रह्मवर्चस्यः । सङ्ख्यादिवर्जनं किम् । पञ्चकः । प्रास्थिकः । आश्विकः ॥ १५५ ॥

पृथिवीसर्वभूमेरीशज्ञातयोश्चाञ् । ६ । ४ । १५६ ।

आभ्यां षष्ठ्यन्ताभ्यामीशज्ञातयोस्तस्य हेतुः संयोग उत्पात इति विषये चाऽञ् स्यात् । पार्थिवः । सार्वभौमः ईशो ज्ञातः संयोगोत्पातरूपो हेतुर्वा ॥ १५६ ॥

लोकसर्वलोकात् ज्ञाते । ६ । ४ । १५७ ।

आभ्यां षष्ठ्यन्ताभ्यां ज्ञाते ऽर्थे यथोक्तं प्रत्ययः स्यात् । लौकिकः । सार्वलौकिकः ॥ १५७ ॥

तदत्रास्मै वा वृद्ध्यायलाभोपदाशुल्कं देयम् । ६ । ४ । १५८ ।

तदिति प्रथमान्तादत्रेति सप्तम्यर्थेऽस्मै इति चतुर्थ्यर्थे वा यथोक्तं प्रत्ययः स्यात् । तच्चेत्प्रथमान्तं वृद्ध्यादिदेयं च स्यात् । वृद्धिः पञ्चकं शतम् । आयः पञ्चको ग्रामः । लाभः पञ्चकः पटः । उपदा लंचा । पञ्चको व्यवहारः । शुल्कं पञ्चकं शतम् । एवं शत्यं शतिकम् ॥ १५८ ॥

पूरणार्द्धादिकः । ६ । ४ । १५९ ।

पूरणप्रत्ययान्तादर्द्धाच्च प्रथमान्तादस्मिन्नस्मै वा दीयते इत्यर्थयोरिकः स्यात् । प्रथमान्तं चेद्वृद्ध्यादि । द्वितीयिकः । अर्द्धिकः ॥ १५९ ॥

भागाद्येकौ । ६ । ४ । १६० ।

भागात्तदस्मिन्नस्मै वा वृद्ध्याद्यन्यतमन्देयमिति विषये येकौ स्याताम् । भाग्यः । भागिकः ॥ १६० ॥

तं पचतिद्रोणाद्वाऽञ् । ६ । ४ । १६१ ।

तमिति द्वितीयान्ताद्द्रोणात्पचत्यर्थे वा ऽञ् स्यात् । द्रौणी । द्रौणिकी स्थाली ॥ १६१ ॥

सम्भवद्वहरतोश्च । ६ । ४ । १६२ ।

द्वितीयान्तात्पचत्सम्भवद्वहरत्सु यथोक्तं प्रत्ययः स्यात् । आधेयस्य प्रमाणानतिरेकेण धारणं सम्भवः । अतिरेकेणावहारः । प्रास्थिकी स्थाली ॥ १६२ ॥

पात्राचिताढकादीनो वा । ६ । ४ । १६३ ।

एभ्यो द्वितीयान्तेभ्यः पचदाद्यर्थे ईनो वा स्यात । पात्रीणा । पात्रिकी । आचितीना । आचितिकी । आढकीना । आढकिकी ॥

द्विगोरीनेकटौ वा । ६ । ४ । १६४ ।

पात्राचिताढकान्ताद्विगोर्द्वितीयान्तात्पचदाद्यर्थे ईनेकटौ वा स्याताम् । पक्ष इकण् । तस्य चानाम्नीत्यादिना लुप् । नानयोर्विधानबलात् । द्विपात्रीणा । द्विपात्रिकी । द्विपात्री । द्व्याचितीना । द्व्याचितिकी । द्व्याचिता । द्व्याढकीना । द्व्याढकिकी । द्व्याढकी ॥ १६४ ॥

कुलिजाद्वा लुप्च । ६ । ४ । १६५ ।

कुलिजान्ताद्विगोर्द्वितीयान्तात्पचदाद्यर्थे ईनेकटौ वा स्याताम् । पक्ष इकण् तस्य च वा लुप् । द्विकुलिजीना । द्विकुलिजिकी । द्विकुलिजी । द्वैकुलिजिकी ॥ १६५ ॥

वंशादेर्भाराद्धरद्वहदावहत्सु । ६ । ४ । १६६ ।

एभ्यः परो यो भारस्तदन्ताद्द्वितीयान्तात् एष्वर्थेषु यथोक्तं प्रत्ययः स्यात् । वांशभारिकः । कौटभारिकः ॥ १६६ ॥

द्रव्यवस्नात्केकम् । ६ । ४ । १६७ ।

आभ्यां द्वितीयान्ताभ्यां हरदाद्यर्थे यथासङ्ख्यं कइकश्च स्यात् । द्रव्यकः । वस्निकः ॥ १६७ ॥

सोऽस्य भृतिवस्नांशम् । ६ । ४ । १६८ ।

स इतिप्रथमान्ताद्भृत्याद्यर्थादस्येति षष्ठ्यर्थे यथोक्तं प्रत्ययः स्यात् । पञ्चकः कर्मकृत् पटो ग्रामो वा । साहस्रः ॥१६८ ॥

मानम् । ६ । ४ । १६९ ।

प्रथमान्तात्षष्ठ्यर्थे यथोक्तं प्रत्ययः स्यात् । स्यन्तं चेन्मानम् । द्रौणिकः । खारीको राशिः ॥१६९॥

जीवितस्य सन् । ६ । ४ । १७० ।

जीवितमानार्थात्स्यन्तात् षष्ठ्यर्थे यथोक्तं प्रत्ययः स्यात् । तस्य च न लुप् । द्विषाष्टिको ना ॥१७०॥

सङ्ख्यया: संघसूत्रपाठे । ६ । ४ । १७१ ।

अस्मात्स्यन्तादस्य मानमित्यर्थे यथोक्तं प्रत्ययः स्यात् । षष्ठ्यर्थश्चे-त्सङ्घः सूत्रं पाठो वा । पञ्चकः सङ्घः । अष्टकं पाणिनीयं सूत्रम् । अष्टकः पाठः ॥१७१॥

नाम्नि । ६ । ४ । १७२ ।

सङ्ख्यार्थात्तदस्य मानमित्यर्थे यथोक्तं प्रत्ययः स्यात् । नाम्नि । पञ्चकाः शकुनयः ॥१७२॥

विंशत्यादयः । ६ । ४ । १७३ ।

एते तदस्य मानमित्यर्थे साधवः स्युः नाम्नि । द्वौदशतौ मानमेषां विंशतिः । त्रिंशत् ॥ १७३ ॥

त्रैंशचात्वारिंशम् । ६ । ४ । १७४ ।

त्रिंशच्चात्वारिंशद्भ्यान्तदस्य मानमित्यर्थे डण् स्यात् । नाम्नि । त्रैंशानि। चात्वारिंशानि ब्राह्मणानि ॥ १७४ ॥

पञ्चदशद्वर्गेऽवा । ६ । ४ । १७५ ।

एतौ तदस्य मानमिति विषये वर्गेऽर्थेऽदन्तौ वा निपात्यौ । पञ्चत्। दशत् । पञ्चकः । दशकः वर्गः ॥ १७५ ॥

स्तोमे डट् । ६ । ४ । १७६ ।

सङ्ख्यार्थात्तदस्य मानमिति विषये स्तोमेऽर्थे डट् स्यात् । विंशः । स्तोमः ॥ १७६ ॥

तमर्हति । ६ । ४ । १७७ ।

तमिति द्वितीयान्तादर्हदर्थे यथोक्तं प्रत्ययः स्यात् । वैषिकः । साहस्रः ॥ १७७ ॥

दण्डादेर्यः । ६ । ४ । १७८ ।

एभ्यो द्वितीयान्तेभ्योऽर्हत्यर्थे यः स्यात् । दण्ड्यः । अर्घ्यः॥१७८॥

यज्ञादियः । ६ । ४ । १७९ ।

द्वितीयान्ताद्यज्ञादर्हतीयः स्यात् । यज्ञियो देशः ॥ १७९ ॥

पात्रात्तौ । ६ । ४ । १८० ।

द्वितीयान्तात् पात्रादर्हति ययौ स्याताम् । पात्र्यः । पात्रियः॥१८०॥

दक्षिणाकडङ्गरस्थालीबिलादीययौ । ६ । ४ । १८१ ।

एभ्यो द्वितीयान्तेभ्योऽर्हत्यर्थे ईययौ स्याताम् । दक्षिणीयो । दक्षिण्यो गुरुः । कडङ्गरीयः कडङ्गर्यो गौः । स्थालीबिलीयाः स्थालीबिल्यास्तण्डुलाः ॥ १८१ ॥

छेदादेर्नित्यम् । ६ । ४ । १८२ ।

अस्माद्द्वितीयान्तान्नित्यमर्हति यथोक्तं प्रत्ययः स्यात् । छैदिकः । भैदिकः ॥ १८२ ॥

विरागाद्विरङ्गश्च । ६ । ४ । १८३ ।

अस्माद्द्वितीयान्तान्नित्यमर्हति यथोक्तं प्रत्ययः स्यात् । तद्योगे चास्य विरङ्गः । वैरङ्गिकः ॥ १८३ ॥

शीर्षच्छेदाद्यो वा । ६ । ४ । १८४ ।

अस्माद्द्वितीयान्तान्नित्यमर्हति यो वा स्यात् । शीर्षच्छेद्यः । शीर्षच्छेदिकश्चौरः ॥ १८४ ॥

शालीनकौपीनार्त्विजीनम् ।६।४।१८५।

एते तमर्हतीत्यर्थे ईनञन्ता निपात्याः । शालीनोऽधृष्टः । कौपीनं पापकर्मादिः । आर्त्विजीनो यजमानः ऋत्विग्वा ॥ १८५ ॥

इत्याचार्यहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनलघुवृत्तौ षष्ठोऽध्यायः समाप्तः ॥

ॐ

अर्हम्

यः । ७ । १ । १ ।

यदित ऊर्ध्वमनुक्रमिष्यामस्तत्र ईयादर्वाग् य इत्यधिकृतं ज्ञेयम् ॥१॥

वहतिरथयुगप्रासङ्गात् । ७ । १ । २ ।

तमिति वर्त्तते । एभ्यो द्वितीयान्तेभ्यो वहत्यर्थे यः स्यात् । द्विरथ्यः। युग्यः। प्रासङ्गो वत्सदमनस्कन्धकाष्ठम् प्रासङ्ग्यः॥ २ ॥

धुरो यैयण् । ७ । १ । ३ ।

धुरोद्वितीयान्ताद्वहत्यर्थे एतौ स्याताम् । धुर्यः । धौरेयः ॥ ३ ॥

वामाद्यादेरीनः । ७ । १ । ४ ।

वामादिपूर्वाद्धुरन्तादमन्ताद्वहत्यर्थे ईनः स्यात् । वामधुरीणः । सर्व-धुरीणः ॥ ४ ॥

अश्चैकादेः । ७ । १ । ५ ।

एकपुर्वाद्धुरन्तादमन्ताद्वहत्यर्थे अईनश्च स्यात् । एकधुरः । एक-धुरीणः ॥ ५ ॥

हलसीरादिकण् । ७ । १ । ६ ।

आभ्यां तं वहत्यर्थे इकण् स्यात् । हालिकः । सैरिकः ॥ ६ ॥

शकटादण् । ७ । १ । ७ ।

अस्मात्तं वहत्यर्थेऽण् स्यात् । शाकटो गौः ॥ ७ ॥

विध्यत्यऽनन्येन । ७ । १ । ८ ।

द्वितीयान्ताद्विध्यत्यर्थे यः स्यात् । नचेदात्मनोऽन्येन करणेन विध्येत् । पद्याः । शर्कराः । अनन्येनेति किम् । चौरं विध्यति चैत्रः ॥ ८ ॥

धनगणाल्लब्धरि । ७ । १ । ९ ।

आभ्याममन्ताभ्यां लब्धर्यर्थे यः स्यात् । धन्यः । गण्यः ॥ ९ ॥

णोऽन्नात् । ७ । १ । १० ।

अन्नादमन्ताल्लब्धरि णः स्यात् । आन्नः ॥ १० ॥

हृद्यपद्यतुल्यमूल्यवश्यपथ्यवयस्यधेनुष्या-गार्हपत्यजन्यधर्म्यम् । ७ । १ । ११ ।

एते ऽर्थविशेषेषु यान्ता निपात्याः । हृद्यमौषधम् । पद्यं पंकः । तुल्यं भाण्डं सदृक्षम् । मूल्यं धान्यम् पटादिविक्रयाल्लभ्यश्च । वश्यो गौः । पथ्यमोदनादि । वयस्यः सखा । धेनुष्यापीतदुग्धा गौः । गार्हपत्यो नामाग्निः । जन्या वरवयस्याः । धर्म्यम् सुखम् ॥ ११ ॥

नौविषेण तार्यवध्ये । ७ । १ । १२ ।

आभ्यां निर्देशादेव तृतीयान्ताभ्यां यथासङ्ख्यं तार्ये वध्ये चार्थे यः स्यात् । नाव्या नदी । विष्यो गजः ॥ १२ ॥

न्यायार्थादनपेते । ७ । १ । १३ ।

आभ्यां पञ्चम्यन्ताभ्यामनपेतेऽर्थे यः स्यात् । न्याय्यम् । अर्थ्यम् ॥

मतमदस्य करणे । ७ । १ । १४ ।

आभ्यां षष्ठ्यन्ताभ्यां करणे यः स्यात् । मत्यम् । मद्यम् ॥ १४ ॥

तत्र साधौ । ७ । १ । १५ ।

तत्रेति सप्तम्यन्तात्साधवर्थे यः स्यात् । सभ्यः ॥ १५ ॥

पथ्यतिथिवसतिस्वपतेरेयण् । ७ । १ । १६ ।

एभ्यस्तत्र साधावेयण् स्यात् । पाथेयम् । आतिथेयम् । वासतेयम् । स्वापतेयम् ॥ १६ ॥

भक्ताण्णः । ७ । १ । १७ ।

भक्तात्तत्र साधौ णः स्यात् । भाक्तः शालिः ॥१७॥

पर्षदो ण्यणौ । ७ । १ । १८ ।

तत्र साधौ स्याताम् । पार्षद्यः । पार्षदः ॥ १८ ॥

सर्वजनाण्ण्येनञौ । ७ । १ । १९ ।

तत्र साधौ स्याताम् । सार्वजन्यः । सार्वजनीनः ॥ १९ ॥

प्रतिजनादेरीनञ् । ७ । १ । २० ।

तत्र साधौ स्यात् । प्रातिजनीनः । आनुजनीनः ॥ २० ॥

कथादेरिकण् । ७ । १ । २१ ।

तत्र साधौ स्यात् । काथिकः । वैकथिकः ॥ २१ ॥

देवतान्तात्तदर्थे । ७ । १ । २२ ।

देवतान्तात्तदर्थे यः स्यात् । अग्निदेवत्यं हविः ॥ २२ ॥

पाद्यार्घ्ये । ७ । १ । २३ ।

एतौ तदर्थे यान्तौ निपात्यौ । पाद्यं जलम् । अर्घ्यम् । रत्नम् ॥ २३ ॥

ण्योऽतिथेः । ७ । १ । २४ ।

तदर्थे ऽर्थे स्यात् । आतिथ्यम् ॥२४॥

सादेश्चातदः । ७ । १ । २५ ।

तदिति सूत्रं यावत् । केवलस्य सादेश्च वक्ष्यमाणो विधिर्ज्ञेयः॥२५॥

हलस्य कर्षे । ७ । १ । २६ ।

हलात्षष्ठ्यन्तात्कर्षेऽर्थे यः स्यात् । हल्या । द्विहल्या ॥ २६ ॥

सीतया संगते । ७ । १ । २७ ।

अस्माट्टान्तात्सङ्गतेऽर्थे यः स्यात् । सीत्यम् । त्रिसीत्यम् ॥ २७ ॥

ईयः । ७ । १ । २८ ।

आतदो वक्ष्यमाणार्थेषु ईयोऽधिकृतो ज्ञेयः॥ २८ ॥

हविरन्नभेदापूपादेर्यो वा । ७ । १ । २९ ।

हविर्भेदादन्नभेदादपूपादेश्चातदोऽर्थेषु वा योऽधिक्रियते । आमिक्ष्यम् । आमिक्षीयम् । ओदन्याः । ओदनीयास्तन्डुलाः । अपूप्यम् । अपूपीयम् । यवापूप्यम् । यवापूपीयम् ॥ २९ ॥

उवर्णयुगादेर्यः । ७ । १ । ३० ।

उवर्णान्ताद्युगादेश्चातदोऽर्थेषु यः स्यात् । शङ्कव्यम् दारु । युग्यं हविष्यम् ॥ ३० ॥

नाभेर्नभ्वाऽदेहांशात् । ७ । १ । ३१ ।

अदेहांशार्थान्नाभेरातदोऽर्थेषु यः स्यात् । नभ्चास्य । नभ्योऽक्षः। अदेहांशादिति किम् । नाभ्यं तैलम् ॥ ३१ ॥

न्चोधसः । ७ । १ । ३२ ।

आतदोऽर्थेषूधसो यः स्यात् । न्चान्तस्य । औधन्यम् ॥ ३२ ॥

शुनो वश्चोदूत् । ७ । १ । ३३ ।

आतदोऽर्थेषु शुनो यः स्यात्। वश्चोदूदूपः। शुन्यम्। शून्यम्॥

कम्बलान्नाम्नि। ७। १। ३४।

अस्मादातदोऽर्थेषु नाम्नि यः स्यात्। कम्बल्यम् ऊर्णापलशतम्। नाम्नीति किम्। कम्बलीयोर्णा॥ ३४॥

तस्मै हिते। ७। १। ३५।

तस्मैइति चतुर्थ्यन्ताद्धितेऽर्थे यथा ऽधिकृतं प्रत्ययः स्यात्। वत्सीयः। आमिक्ष्यः। आमिक्षीयः। शुग्यः॥ ३५॥

न राजाचार्यब्राह्मणवृष्णः। ७। १। ३६।

एभ्यश्चतुर्थ्यन्तेभ्यो हितेऽधिकृतः प्रत्ययो न स्यात्। राज्ञे आचार्याय ब्राह्मणाय वृष्णे वा हित इति वाक्यमेव॥ ३६॥

प्राण्यङ्गरथखलतिलयववृषब्रह्ममाषाद्यः। ७। १। ३७।

प्राण्यङ्गार्थेभ्यो रथादिभ्यश्चतुर्थ्यन्तेभ्यो हिते यः। स्यात्। दन्त्यम्। रथ्या भूमिः। खल्यम्। तिल्यम्। यव्यम्। वृष्यम्। क्षीरम्। ब्रह्मण्यो देशः। माष्यः। राजमाष्यः॥ ३७॥

अव्यजात्थ्यप्। ७। १। ३८।

आभ्यां तस्मै हिते थ्यप् स्यात्। अविथ्यम्। अजथ्या यूतिः॥ ३८॥

चरकमाणवादीनञ्। ७। १। ३९।

आभ्यां तस्मै हिते ईनञ् स्यात्। चारकीणः। माणवीनः॥ ३९॥

भोगोत्तरपदात्मभ्यामीनः। ७। १। ४०।

भोगउत्तरपदं यस्य तस्मादात्मनश्च तस्मै हिते ईनः स्यात्। मातृभोगीणः। आत्मनीनः॥ ४०॥

पञ्चसर्वविश्वाज्जनात्कर्मधारये।७।१।४१।

पञ्चादेः पराज्जनात्कर्मधारयवृत्ते तस्मै हिते ईनः स्यात्। पञ्चजनीनः। सर्वजनीनः। विश्वजनीनः। कर्मधारयइति किम्। पञ्चानाञ्जनाय हितः पञ्चजनीयः॥ ४१॥

महत्सर्वादिकण्।७।१।४२।

आभ्यां पराज्जनात्कर्मधारयवृत्तेस्तस्मै हिते इकण् स्यात्। माहाजनिकः। सार्वजनिकः॥ ४२॥

सर्वाण्णो वा।७।१।४३।

अस्मात्तस्मै हिते णो वा स्यात्। सार्वः। सर्वीयः॥ ४३॥

परिणामिनि तदर्थे।७।१।४४।

चतुर्थ्यन्ताच्चतुर्थ्यर्थे परिणामिनि हेतावर्थे यथा ऽधिकृतं प्रत्ययः स्यात्। आङ्गारीयाणि काष्ठानि। शङ्कव्यं दारु॥४४॥

चर्मण्यञ्।७।१।४५।

चतुर्थ्यन्तात्तदर्थे परिणामिनि चर्मण्यर्थेऽञ् स्यात्। वार्ध्रं चर्म॥

ऋषभोपानहाञ्ञ्यः।७।१।४६।

आभ्यां चतुर्थ्यन्ताभ्यां परिणामिनि तदर्थे ञ्यः स्यात्। आर्षभ्यो वत्सः। औपानह्यो मुञ्जः॥ ४६॥

छदिर्बलेरेयण्।७।१।४७।

आभ्यां चतुर्थ्यन्ताभ्यां परिणामिनि तदर्थे एयण् स्यात्। छादिषेयं तृणम्। बालेयास्तन्डुलाः॥ ४७॥

परिखाऽस्य स्यात् । ७ । १ । ४८ ।

अस्मात्स्यन्तादस्येति षष्ठ्यर्थे परिणामिन्येयण् स्यात् । साचेत्स्यादिति सम्भाव्या । पारिखेय्य इष्टकाः ॥ ४८ ॥

अत्र च । ७ । १ । ४९ ।

परिखायाः स्यादिति सम्भाव्यायाः स्यन्तायाः अत्रेति सप्तम्यर्थे एयण् स्यात् । पारिखेयी भूमीः ॥ ४९ ॥

तद् । ७ । १ । ५० ।

तदिति स्यन्तात्स्यादिति सम्भाव्यात्षष्ठ्यर्थे परिणामिनि सप्तम्यर्थे च यथाऽधिकृतं प्रत्ययः स्यात् । प्राकारीया इष्टकाः । परशव्यमयः । प्रासादीयो देशः ॥ ५० ॥

तस्यार्हे क्रियायां वत् । ७ । १ । ५१ ।

तस्येति षष्ठ्यन्तात्क्रियारूपे ऽर्हेऽर्थे वत् स्यात् । राजवद्वृत्तं राज्ञः । क्रियायामिति किम् । राज्ञोऽर्हो मणिः ॥ ५१ ॥

स्यादेरिवे । ७ । १ । ५२ ।

स्याद्यन्तादिवार्थे सादृश्ये क्रियार्थे वत् स्यात् । अश्ववद्याति चैत्रः । देववत्पश्यन्ति मुनिम् ॥ ५२ ॥

तत्र । ७ । १ । ५३ ।

तत्रेति सप्तम्यन्तादिवार्थे वत्स्यात् । स्रुघ्नवत् साकेते परिखा ॥

तस्य । ७ । १ । ५४ ।

तस्येति षष्ठ्यन्तादिवार्थे वत् स्यात् । चैत्रवन्मैत्रस्य भूः ॥ ५४ ॥

भावे त्वतल् । ७ । १ । ५५ ।

षष्ठ्यान्ताद्भावे एतौ स्याताम् । शब्दस्य प्रवृत्तिहेतुर्गुणो भावः । गोत्वम् । गोता । शुक्लत्वम् । शुक्लता ॥ ५५ ॥

प्राक्त्वादगडुलादेः । ७ । १ । ५६ ।

ब्रह्मणस्त्व इत्यतोऽर्वाक्त्वतलावधिकृतौ ज्ञेयौ नतु गडुलादेः । तत्रैवो- दाहरिष्यते । गडुलादिवर्जनं किम् । गाडुल्यम् । कामण्डलवम् ॥५६॥

नञ्तत्पुरुषादबुधादेः । ७ । १ । ५७ ।

प्राक्त्वान्नञ्पूर्वात्तत्पुरुषाद्बुधाद्यन्तवर्जात्त्वतलावेव स्याताम् । इत्य- धिकृतं ज्ञेयम् । अशुक्लत्वम् । अशुक्लता । अपतित्वम् । अपतिता । अबुधादेरिति किम् । आबुध्यम् । आचतुर्यम् ॥ ५७ ॥

पृथ्व्यादेरिमन्वा । ७ । १ । ५८ ।

एभ्यो भावेऽिमन् स्यात् । प्रथिमा । पृथुत्वम् । पृथुता । पार्थवम् । म्रदिमा । मृदुत्वम् । मृदुता । मार्दवम् ॥ ५८ ॥

वर्णदृढादिभ्यष्ट्यण् च वा । ७ । १ । ५९ ।

वर्णविशेषार्थेभ्यो दृढादेश्च तस्य भावे ट्यण् इमन्च स्याद्वा । शौक्ल्यम् । शुक्लिमा । शुक्लत्वम् । शुक्लता । शैत्यम् । शितिमा । शितित्वम् । शितिता । शैतम् । दार्ढ्यम् । द्रढिमा । दृढत्वम् । दृढता । वैमत्यम् । विमतिमा । विमतित्वम् । विमतिता । वैमतम् ॥ ५९ ॥

पतिराजान्तगुणाङ्गराजादिभ्यः कर्म्मणि च । ७ । १ । ६० ।

पत्यन्तराजान्तेभ्यो गुणोऽङ्गं प्रवृत्तौ हेतुर्येषान्तेभ्यो राजादेश्च तस्य भावे क्रियायां च ट्यण् स्यात् । आधिपत्यम् । अधिपतित्वम् । अधिपतिता ।

आधिराज्यम् । अधिराजत्वम् । अधिराजता । मौढ्यम् । मूढत्वम् । मूढता । राज्यम् । राजत्वम् । राजता । काव्यम् । कवित्वम् । कविता ॥

अर्हतस्तोन्त च । ७ । १ । ६१ ।

अस्मात्तस्य भावे कर्म्मणि च ट्यण् स्यात् । तद्योगे च तस्य न्तादेशः । आर्हन्त्यम् । अर्हत्त्वम् । अर्हत्ता ॥ ६१ ॥

सहायाद्वा । ७ । १ । ६२ ।

अस्मात्तस्य भावे कर्म्मणि च ट्यण् स्यात् वा । साहाय्यम् । साहायकम् । सहायत्वम् । सहायता ॥ ६२ ॥

सखिवणिग्दूताद्यः । ७ । १ । ६३ ।

एभ्यस्तस्य भावे कर्म्मणि च यः स्यात् । सख्यम् । सखित्वम् । सखिता । वणिज्या । वणिक्त्वम् । वणिक्ता । वाणिज्यम् । दूत्यम् । दूतत्वम् । दूतता । दौत्यम् ॥ ६३ ॥

स्तेनान्नलुक्च । ७ । १ । ६४ ।

स्तेनात्तस्य भावे कर्म्मणि च यः स्यात् । तद्योगे च नस्य लुक् । स्तेयम् । स्तेनत्वम् । स्तेनता । स्तैन्यम् ॥ ६४ ॥

कपिज्ञातेरेयण् । ७ । १ । ६५ ।

आभ्यां तस्य भावे कर्म्मणि चैयण् स्यात् । कापेयम् । कपित्वम् । कपिता । ज्ञातेयम् । ज्ञातित्वम् । ज्ञातिता ॥ ६५ ॥

प्राणिजातिवयोऽर्थादञ् । ७ । १ । ६६ ।

प्राणिजात्यर्थात् वयोऽर्थाच्च तस्य भावे कर्माणि चाञ् स्यात् । आश्वम् । अश्वत्वम् । अश्वता । कौमारम् । कुमारत्वम् । कुमारता ॥ ६६ ॥

युवादेरण् । ७ । १ । ६७ ।

एभ्यस्तस्य भावे कर्म्मणि चाण् स्यात्। यौवनम्। युवत्वम्। युवता। स्थाविरम्। स्थविरत्वम्। स्थविरता ॥ ६७ ॥

हायनान्तात्।७।१।६८।

अस्मात्तस्य भावे कर्म्मणि चाण् स्यात्। द्वैहायनम्। द्विहायनत्वम्। द्विहायनता ॥ ६८ ॥

य्वृवर्णाल्लघ्वादेः। ७। १। ६९।

लघुरादिः समीपो येषां इउऋवर्णानां तदन्तेभ्यस्तस्य भावे कर्म्मणि चाण् स्यात्। शौचम्। शुचित्वम्। शुचिता। एवं हारीतकम्। पाटवम्। बाधवम्। पैत्रम्। लघ्वादेरिति किम्। पाण्डुत्वम् ॥ ६९ ॥

पुरुषहृदयादसमासे। ७। १। ७०।

आभ्यामसमासविषयाभ्यां तस्य भावे कर्मणि चाण् स्यात्। पौरुषम्। पुरुषत्वम्। पुरुषता। एवं हार्दम्। असमासइति किम्। परमपुरुषत्वम्। परमपौरुषमिति माभूत् ॥ ७० ॥

श्रोत्रियाद्यलुक्च।७।१।७१।

अस्मात्तस्य भावे कर्म्मणि चाण् स्यात्। तद्योगे च यस्य लुक्च श्रौत्रम्। श्रोत्रियत्वम्। श्रोत्रियता। श्रौत्रियकम् ॥ ७१ ॥

योपान्त्याद्गुरूपोत्तमादसुप्रख्याद-कञ्। ७। १। ७२।

त्र्यादीनामन्त्यमुत्तमम्। तत्समीपमुपोत्तमम्। तद्गुरुर्यस्य तस्माद्युपान्त्यात्सुप्रख्यवर्जात्तस्य भावे कर्म्मणि चाऽकञ् स्यात्। रामणीयकम्। रमणीयत्वम्। रमणीयता। एवमाचार्यकम्। गुरूपोत्तमादिति किम्। क्षत्रियत्वम्। कायत्वम्। असुप्रख्यादिति किम्। सुप्रख्यत्वम्। सौप्रख्यम् ॥ ७२ ॥

चोरादेः । ७ । १ । ७३ ।

एभ्यस्तस्य भावे कर्मणि चाकञ् स्यात् । चौरिका । चोरत्वम् । चोरता । एवं धौर्त्तिका ॥ ७३ ॥

द्वन्द्वाल्लित् । ७ । १ । ७४ ।

द्वन्द्वात्तस्य भावे कर्मणि च लिदकञ् स्यात् । वैत्रिका । वित्नृत्वम् । वित्नृता ॥ ७४ ॥

गोत्रचरणात् श्लाघात्याकारप्राप्त्यवगमे । ७ । १ । ७५ ।

गोत्रार्थचरणार्थाभ्यां तस्य भावे कर्म्मणि च लिदकञ् स्यात् । श्लाघादिविषये । गार्गिकया श्लाघते अत्याकुरुते वा गार्गिकं प्राप्तोऽवगतो वा । एवं काठिकयेत्यादि । श्लाघादिष्विति किम् । गार्गम् । काठम् ॥ ७५ ॥

होत्राभ्य ईयः । ७ । १ । ७६ ।

होत्रा ऋत्विग्विशेषः । तदर्थात्तस्य भावे कर्म्मणि ईयः स्यात् । मैत्रावरुणीयम् । त्वतलावपि ॥ ७६ ॥

ब्रह्मणस्त्वः । ७ । १ । ७७ ।

अस्मादृत्विगर्थात्तस्य भावे कर्म्मणि त्वः स्यात् । ब्रह्मत्वम् ॥ ७७ ॥

शाकटशाकिनौ क्षेत्रे । ७ । १ । ७८ ।

षष्ठ्यन्तात्क्षेत्रेऽर्थे एतौ स्याताम् । इक्षुशाकटम् । शाकशाकिनम् ॥

धान्येभ्य ईनञ् । ७ । १ । ७९ ।

धान्यार्थेभ्यः षष्ठ्यन्तेभ्यः क्षेत्रेऽर्थे इनञ् स्यात् । मौद्गीनम् । कौद्रवीणम् ॥ ७९ ॥

व्रीहिशालेरेयण् । ७ । १ । ८० ।

आभ्यं तास्य क्षेत्रे एयण स्यात् । व्रैहेयम् । शालेयम् ॥ ८० ॥

यवयवकषष्टिकाद्यः ।७।१।८१।

एभ्यस्तस्य क्षेत्रं यः स्यात् । यव्यम् । यवक्यम् । षष्टिक्यम् ॥ ८१॥

वाणुमाषात् ।७।१।८२।

आभ्यां तस्य क्षेत्रे यो वा स्यात्। अणव्यम्। आणवीनम्। माष्यम्। माषीणम् ॥ ८२ ॥

वोमाभङ्गतिलात् । ७। १ । ८३ ।

एभ्यस्तस्य क्षेत्रेऽर्थे यो वा स्यात् । उम्यम । औमीनम् । भंग्यम् । भांगीनम् । तिल्यम् । तैलीनम् ॥ ८३ ॥

अलाब्वाश्च कटो रजसि । ७।१। ८४ ।

आस्मादुमादेश्च तस्य रजस्यर्थे कटः स्यात् । अलाबूकटम् । उमाकटम् । भङ्गाकटम् । तिलकटम् ॥ ८४ ॥

अह्नागम्येऽश्वादीनञ् ।७।१।८५।

षष्ठ्यन्तादश्वादेकेनाह्नागम्येऽर्थे ईनञ् स्यात्। आश्वीनोऽध्वा॥८५॥

कुलाज्जल्पे ।७।१।८६ ।

षष्ठ्यन्तात्कुलाज्जल्पेऽर्थे ईनञ् स्यात् । कौलीनः ॥ ८६॥

पील्वादेः कुणः पाके । ७ । १ । ८७।

एभ्यस्तस्य पाके कुणः स्यात् । पीलुकुणः । शमीकुणः ॥ ८७ ॥

कर्णादेर्मूले जाहः । ७ । १ । ८८ ।

एभ्यस्तस्य मूलेऽर्थे जाहः स्यात् । कर्णजाहम् । अक्षिजाहम् ॥८८॥

पक्षात्तिः । ७ । १ । ८९ ।

पक्षात्तस्य मूलेऽर्थे तिः स्यात । पक्षतिः ॥ ८९ ॥

हिमादेलुः सहे । ७ । १ । ९० ।

हिमात्तस्य सहमानेऽर्थे एलुः स्यात् । हिमेलुः ॥ ९० ॥

बलवातादूलः । ७ । १ । ९१ ।

आभ्यां तस्य सहेऽर्थे ऊलः स्यात् । बलूलः । वातूलः ॥ ९१ ॥

शीतोष्णतृपादालुरसहे । ७ । १ । ९२ ।

एभ्यस्तस्यासहेऽर्थे आलुः स्यात् । शीतालुः । उष्णालुः । तृपालुः ॥

यथामुखसंमुखादीनस्तद्दृश्यतेऽस्मिन् । ७ । १ । ९३ ।

आभ्यां तदिति स्यन्ताभ्यामस्मिन्निति ङ्यर्थे ईनः स्यात् । स्यन्तं चेद्दृश्यते । यथामुखं प्रतिबिम्बम् । यथामुखीनः आदर्शः । एवं संमुखीनः ॥ ९३ ॥

सर्वादेः पथ्यंगकर्मपत्रपात्रशरावं व्याप्नोति । ७ । १ । ९४ ।

सर्वशब्दपूर्वेभ्य एभ्यो द्वितीयान्तेभ्यो व्याप्नोतीत्यर्थे ईनः स्यात् । सर्वपथीनो रथः । सर्वाङ्गीणस्तापः । सर्वकर्म्मीणो ना । सर्वपत्रीणो यन्ता । सर्वपात्रीणं भक्तम् । सर्वशरावीणं ओदनम् ॥ ९४ ॥

आप्रपदम् । ७ । १ । ९५ ।

आपदाप्पादाप्रपदम् । अस्मादमन्ताद्व्याप्नोतीत्यर्थे ईनः स्यात् । आप्रपदीनः पटः ॥ ९५ ॥

अनुपदं बद्धा । ७ । १ । ९६ ।

अस्मादमन्ताद्बद्धेत्यर्थे ईनः स्यात् । अनुपदीनोपानत् ॥ ९६ ॥

अयानयं नेयः । ७ । १ । ९७ ।

अस्माद्द्वितीयान्तान्नेयेऽर्थे ईनः स्यात् । अयानयीनः शारः ॥९७॥

सर्वान्नमत्ति । ७ । १ । ९८ ।

अस्मादन्नन्तादत्त्यर्थे ईनः स्यात् । सर्वान्नीनो भिक्षुः ॥ ९८ ॥

परोवरीणपरंपरीणपुत्रपौत्रीणम् ।७।१।९९।

एतेऽनुभवत्यर्थे ईनान्ता निपात्याः । परोवरीणः । परंपरीणः । पुत्र-पौत्रीणः ॥ ९९ ॥

यथाकामानुकामात्यन्तंगामिनि।७।१।१००।

एभ्यो ऽमन्तेभ्यो गामिन्यर्थे ईनः । स्यात् । यथाकामीनः । अनु-कामीनः । अत्यन्तीनः ॥ १०० ॥

पारावारं व्यस्तव्यत्यस्तं च ।७।१।१०१।

अस्मात्समस्ताद्व्यस्ताद्व्यत्यस्ताच्चामन्ताद्गामिनीनः स्यात् । पारा-वारीणः । पारीणः । अवारीणः । अवारपारीणः ॥ १०१ ॥

अनुग्वलम् ।७। १ । १०२ ।

अस्मादमन्तादलंगामिनीनः स्यात् । अनुगवीनो गोपः ॥१०२॥

अध्वानं येनौ । ७ । १ । १०३ ।

अस्मादमन्तादलङ्गामिनि येनौ स्याताम् । अध्वन्यः । अध्वनीनः ॥

अभ्यमित्रमीयश्च । ७ । १ । १०४ ।

अस्मादमन्तादलं गामिनि ईयोयेनौ च स्याताम् । अभ्यमित्रीयः । अभ्यमित्र्यः । अभ्यमित्रीणः ॥ १०४ ॥

समांसमीनाद्यश्वीनाद्यप्रातीनाऽऽगवीनसाप्तपदीनम् । ७ । १ । १०५ ।

एते ईनान्ता निपात्याः । साप्तपदीनस्त्वीनजन्तः । समांसमीना गौः । अद्यश्वीना गौः । अद्यप्रातीना लाभः । आगवीनः कर्मकृत् । साप्तपदीनं सख्यम् ॥ १०५ ॥

अषडक्षाशितंग्वलङ्कर्मालंपुरुषादीनः । ७ । १ । १०६ ।

एभ्यः स्वार्थे ईनः स्यात् । अषडक्षीणो मन्त्रः । आशितंगवीनं अरण्यम् । अलङ्कर्मीणः । अलंपुरुषीणः ॥ १०६ ॥

अदिक्स्त्रियां वाञ्चः । ७ । १ । १०७ ।

अञ्चत्यन्तात्स्वार्थे ईनो वा स्यात् । नचेद् स दिशि स्त्रियाम् । प्राचीनम् । प्राक् । प्राचीना शाखा । प्राची । अदिक्स्त्रियामिति किम् । प्राची दिक् ॥ १०७ ॥

तस्य तुल्ये कः संज्ञाप्रतिकृत्योः । ७ । १ । १०८ ।

तस्येतिषष्ठ्यन्तात्तुल्येऽर्थे कः स्यात् संज्ञायां प्रतिकृतौ च विषये । अश्वकः । अश्वकं रूपम् ॥ १०९ ॥

न नृपूजार्थध्वजचित्रे । ७ । १ । १०९ ।

नरि पूजार्थे ध्वजे चित्रकर्मणि चार्थे को न स्यात् । चञ्चा ना । अर्हन् । ध्वजे सिंहः । चित्रे भीमः ॥ १०९ ॥

अपण्ये जीवने । ७ । १ । ११० ।

जीव्यते येन तस्मिन् पण्यवर्जे को न स्यात् । शिवः । अपण्यइति किम् । हस्तिकान् विक्रीणीते ॥ ११० ॥

देवपथादिभ्यः । ७ । १ । १११ ।

एभ्यस्तुल्ये संज्ञाप्रतिकृत्योः को न स्यात् । देवपथः । हंसपथः ॥१११॥

बस्तेरेयञ् । ७ । १ । ११२ ।

बस्तेस्तस्य तुल्येऽर्थे एयञ् स्यात् । बास्तेयी प्रणालिका ॥ ११२ ॥

शिलाया एयच्च । ७ । १ । ११३ ।

अस्मात्तस्य तुल्येऽर्थे एयच् एयञ् च स्यात् । शिलेयम् । शैलेयं दधि ॥ ११३ ॥

शाखादेर्यः । ७ । १ । ११४ ।

एभ्यस्तस्य तुल्ये यः स्यात् । शाख्यः । मुख्यः ॥ ११४ ॥

द्रोर्भव्ये । ७ । १ । ११५ ।

द्रोस्तस्य तुल्ये भव्येऽर्थे यः स्यात् । द्रव्यमयं ना स्वर्णादि च ॥

कुशाग्रादीयः । ७ । १ । ११६ ।

अस्मात्तस्य तुल्ये ईयः स्यात् । कुशाग्रीया बुद्धिः ॥ ११६ ॥

काकतालीयादयः । ७ । १ । ११७ ।

एते तस्य तुल्ये ईयान्ताः साधवः स्युः । काकतालीयम् । खलतिबिल्वीयम् ॥ ११७ ॥

शर्करादेरण् । ७ । १ । ११८ ।

एभ्यस्तस्य तुल्येऽण् स्यात् । शार्करं दधि । कापालिकम् ॥ ११८ ॥

अः सपत्न्याः । ७ । १ । ११९ ।

अस्मात्तस्य तुल्ये अः स्यात् । सपत्नः ॥ ११९ ॥

एकशालाया इकः । ७ । १ । १२० ।

अस्मात्तस्य तुल्ये इकः स्यात् । एकशालिकम् ॥ १२० ॥

गोण्यादेश्चेकण् । ७ । १ । १२१ ।

एभ्यः एकशालायाश्च तस्य तुल्ये इकण् स्यात् । गौणिकम् । आङ्गु-लिकम् । एकशालिकम् ॥ १२१ ॥

कर्कलोहितादीकण् च । ७ । १ । १२२ ।

आभ्यां तस्य तुल्ये टीकणिकण् च स्यात् । कार्कीकः । कार्किकः । लौहितीकः । लौहितिकः ॥ १२२ ॥

वेर्विस्तृते शालशङ्कटौ । ७ । १ । १२३ ।

वेर्विस्तृतेऽर्थे शालशङ्कटौ स्याताम् । विशालः । विशङ्कटः ॥ १२३ ॥

कटः । ७ । १ । १२४ ।

वेर्विस्तृतेऽर्थे कटः स्यात् । विकटः ॥ १२४ ॥

संप्रोन्नेः संकीर्णप्रकाशाधिकसमीपे । ७ । १ । १२५ ।

एभ्यो यथासङ्ख्यमेष्वर्थेषु कटः स्यात् । सङ्कटः । प्रकटः । उत्कटः । निकटः ॥ १२५ ॥

अवात्कुटारश्चावनते । ७ । १ । १२६ ।

अवादवनतेऽर्थे कुटारः कटश्च स्यात् । अवकुटारः । अवकटः ॥ १२६ ॥

नासानतितद्वतोष्टीटनाटभ्रटम् ।७।१।१२७।

अवान्नासानतौ तद्वति चार्थे एते स्युः । अवटीटम् । अवनाटम् । अवभ्रटं नासानमनम् । तद्वद्वा नासादि ॥ १२७ ॥

नेरिनापिटकाश्चिकुचिचिकश्चा-स्य । ७ । १ । १२८ ।

नेर्नासानतौ तद्वति चार्थे एते स्युः तद्योगे च नेर्यथासङ्ख्यं चिकचिचिकः । चिकिनम् । चिपिटम् । चिक्कं नासानमनं नासादि च॥१२८॥

विडविरीसौ नीरन्ध्रे च । ७ । १ । १२९ ।

नेर्नीरन्ध्रेऽर्थे नासानतितद्वतोश्च एतौ स्याताम् । निविडाः । निविरीसाः केशाः । निविडम् । निविरीसं नासानमनं नासादि च ॥ १२९ ॥

क्लिन्नाल्लश्चक्षुषि चिल्पिल्चुल् चास्य ।७।१।१३० ।

क्लिन्नाच्चक्षुष्यर्थे लः स्यात् । तद्योगे चास्य चिल्पिल्चुलः । चिल्लम् । पिल्लम् । चुल्लं चक्षुः ॥ १३० ॥

उपत्यकाधित्यके । ७ । १ । १३१ ।

एतौ निपात्येते । उपत्यका गिर्यासन्ना भूः । अधित्यका पर्वताधिरूढा भूः ॥ १३१ ॥

अवेस्संघातविस्तारे कटपटम् ।७।१।१३२।

अवेरर्थात्षष्ठ्यन्तात्संघाते विस्तारे चार्थे यथासङ्ख्यं कटपटौ स्याताम् । अविकटः संघातः । अविपटः विस्तारः ॥ १३२ ॥

पशुभ्यः स्थाने गोष्ठः । ७ । १ । १३३ ।

पश्वर्थेभ्यः षष्ठ्यन्तेभ्यः स्थानेऽर्थे गोष्ठः स्यात् । गोगोष्ठम् । अश्वगोष्ठम् ॥ १३३ ॥

द्वित्वे गोयुगः । ७ । १ । १३४ ।

पश्वर्थेभ्यस्तस्य द्वित्वेऽर्थे ऽयं स्यात् । गोगोयुगम् ॥ १३४ ॥

षट्त्वे षड्गवः । ७ । १ । १३५ ।

पश्वर्थेभ्यस्तस्य षट्त्वेऽयं स्यात् । हस्तिषड्गवम् ॥ १३५ ॥

तिलादिभ्यः स्नेहे तैलः । ७ । १ । १३६ ।

एभ्यस्तस्य स्नेहेऽर्थे तैलः स्यात् । तिलतैलम् । सर्षपतैलम् ॥१३६॥

तत्र घटते कर्म्मणष्ठः । ७ । १ । १३७ ।

तत्रेति ङ्यन्तात्कर्मशब्दाद्घटते इत्यर्थे ठः स्यात् । कर्म्मठः॥१३७॥

तदस्य सञ्जातं तारकादिभ्य इतः । ७ । १ । १३८ ।

तदिति स्यन्तेभ्य एभ्योऽस्येति षष्ठ्यर्थे इतः स्यात् । स्यन्तं सञ्जातं चेत् । तारकितं नभः। पुष्पितस्तरुः ॥ १३८ ॥

गर्भादप्राणिनि । ७ । १ । १३९ ।

गर्भात्तदस्य सञ्जातमित्यर्थे इतः स्यात । नतु प्राणिनि । गर्भितो व्रीहिः ॥ १३९ ॥

प्रमाणान्मात्रट् । ७ । १ । १४० ।

स्यन्तात्प्रमाणार्थात् षष्ठ्यर्थे मात्रट् स्यात् । आयामः प्रमाणम् । जानुमात्रं जलम् । तन्मात्री भूः ॥ १४० ॥

हस्तिपुरुषाद्वाण् । ७ । १ । १४१ ।

स्यन्ताभ्यां प्रमाणार्थाभ्यामाभ्यां षष्ठ्यर्थे ऽण् वा स्यात् । हास्तिनम् । हस्तिमात्रम् । हस्तिदघ्नम् । हस्तिद्वयसं जलम् । एवं पौरुषम् ॥ १४१ ॥

वोर्द्ध्वं दघ्नट्द्वयसट् । ७ । १ । १४२ ।

ऊर्द्ध्वम् यत्प्रमाणं तदर्थात्स्यन्तात् षष्ठ्यर्थे वैतौ स्याताम् । ऊरुदघ्नम् । ऊरुद्वयसम् । ऊरुमात्रं जलम् । ऊर्द्ध्वमिति किम् । रज्जुमात्री भूः ॥१४२॥

मानादसंशये लुप् । ७ । १ । १४३ ।

मानार्थ एव साक्षाद्यः प्रमाणशब्दो हस्तवितस्त्यादिर्नतु रज्ज्वादिः । तस्मात्प्रस्तुतस्य मात्रडादेरसंशये गम्ये लुप् स्यात् । हस्तः । वितस्तिः । मानादिति किम् । ऊरुमात्रं जलम् । असंशयइति किम् । शममात्रं स्यात् ॥ १४३ ॥

द्विगोः संशये च । ७ । १ । १४४ ।

मानान्ताद्विगोः संशयेऽसंशये च प्रस्तुतमात्रडादेर्लुप् स्यात् । द्विवितस्तिः । द्विप्रस्थः स्यात् ॥ १४४ ॥

मात्रट् । ७ । १ । १४५ ।

स्यन्तान्मानार्थात् षष्ठ्यर्थे मात्रट् स्यात् संशये । प्रस्थमात्रं स्यात ॥

शन्शद्विंशतेः । ७ । १ । १४६ ।

शन्नन्ताच्छदन्ताच्च सङ्ख्यार्थाद्विंशतेश्च मानवृत्तेः स्यन्तात् षष्ठ्यर्थे मात्रट् स्यात् संशये । दशमात्राः स्युः । एवं त्रिंशन्मात्राः । विंशतिमात्राः ॥ १४६ ॥

डिन् । ७ । १ । १४७ ।

शन्शद्विंशतिभ्यः स्यन्तेभ्यो मानार्थेभ्यः षष्ठ्यर्थे डिन् स्यात् । पञ्चदश्यर्द्धमासः । त्रिंशी मासः । विंशिनो भवनेन्द्राः ॥ १४७ ॥

इदं किमोऽतुरियकिय् चास्य ।७।१।१४८।

आभ्यां मानार्थाभ्यां षष्ठ्यर्थे मेयेऽतुः स्यात् । तद्योगे चानयोर्यथासङ्ख्यमियकियौ स्याताम् । इयान् । कियान् पटः ॥ १४८ ॥

यत्तदेतदोर्डावादिः । ७ । १ । १४९ ।

एभ्यः स्यन्तेभ्यो मानार्थेभ्यो षष्ठ्यर्थे मेयेऽतुर्डावादिः स्यात् । यावान् । तावान् । एतावान् धान्यराशिः ॥ १४९ ॥

यत्तत्किमः सङ्ख्याया डतिर्वा ।७।१।१५०।

सङ्ख्यारूपं यन्मानं तदर्थेभ्य एभ्यः स्यन्तेभ्यः षष्ठ्यर्थे सङ्ख्येये डतिर्वा स्यात् । यति यावन्तः । एवं तति तावन्तः । कति कियन्तः ॥ १५० ॥

अवयवात्तयट् । ७ । १ । १५१ ।

अवयववृत्तेः सङ्ख्यार्थात् स्यन्तात्षष्ठ्यर्थे ऽवयविनि तयट् स्यात् । पञ्चतयो यमः ॥ १५१ ॥

द्वित्रिभ्यामयट् वा । ७ । १ । १५२ ।

आभ्यामवयवार्थाभ्यां स्यन्ताभ्यां षष्ठ्यर्थेऽयट् वा स्यात् । द्वयम् । द्वितयम् । त्रयम् । त्रितयम् ॥ १५२ ॥

द्व्यादेर्गुणान्मूल्यक्रेये मयट् ।७।१।१५३।

द्व्यादेर्गुणवृत्तेः स्यन्तात् षष्ठ्यर्थे मयट् स्यात् । द्व्यादिश्चेन्मूल्यार्थः क्रयार्थो वा । द्विमयमुदश्विद्यवानाम् । एवं त्रिमयं द्विमया यवा उदश्वितः । एवं त्रिमयाः । गुणादिति किम् । द्वौ व्रीहियवौ मूल्यमस्य ॥ १५३ ॥

अधिकं तत्सङ्ख्यमस्मिन् शतसहस्रे शतिशद्दशान्ताया डः।७।१।१५४।

स्यन्ताच्छत्याद्यन्तात्सङ्ख्यार्थादस्मिन्निति ङ्यर्थे शतसहस्रे च डः स्यात्। स्यन्तं चेदधिकम् शतादिसङ्ख्यं च वस्तु स्यात्। विंशं योजनशतं योजनसहस्रं वा। एवं त्रिंशम्। एकादशम्। तत्संख्यमिति किम्। विंशतिर्दण्डा अधिका अस्मिन् योजनशते ॥१५४॥

सङ्ख्यापूरणे डट्। ७। १। १५५।

सङ्ख्यापूर्यते येन तत्रार्थे सङ्ख्याया डट् स्यात्। एकादशी। सङ्ख्येति किम्। एकादशानामुष्ट्रिकाणां पूरणो घटः॥ १५५॥

विंशत्यादेर्वा तमट्। ७। १। १५६।

अस्याः सङ्ख्यायाः सङ्ख्यापूरणे तमट् वा स्यात्। विंशतितमः। विंशः। त्रिंशत्तमः। त्रिंशः॥ १५६॥

शतादिमासार्द्धमाससंवत्सरात्।७।१।१५७।

शतादेः सङ्ख्याया मासादेश्च सङ्ख्यापूरणे तमट् स्यात्। शततमी। सहस्रतमी। मासतमः। अर्द्धमासतमः। संवत्सरतमः दिनः॥

षष्ट्यादेरसङ्ख्यादेः। ७। १।१५८।

सङ्ख्यादिरवयवो यस्य तद्वर्जात्षष्ट्यादेः सङ्ख्यापूरणे तमट् स्यात्। षष्टितमः। सप्ततितमः। असङ्ख्यादेरिति किम्। एकषष्टः॥ १५८॥

नो मट्। ७। १। १५९।

असङ्ख्यादेर्नान्तायाः सङ्ख्यायाः सङ्ख्यापूरणे मट् स्यात्। पञ्चमी। असङ्ख्यादेरित्येव। द्वादशः॥ १५९॥

पित्तिथट् बहुगणपूगसंघात्।७।१।१६०।

एभ्यः संख्यापूरणे तिथट् स्यात् । पित् । बहुतिथी । गणतिथः । पूगतिथः । सङ्घतिथः ॥ १६० ॥

अतोरिथट् । ७ । १ । १६१ ।

अत्वन्तात्संख्यापूरणे इथट् स्यात् । पित् । इयतिथः । तावतिथी ॥ १६१ ॥

षट्कतिकतिपयात् थट् । ७।१।१६२।

एभ्यः संख्यापूरणे थट् स्यात् । षष्ठी । कतिथः । कतिपयथी ॥

चतुरः । ७ । १ । १६३ ।

अस्मात्संख्यापूरणे थट् स्यात् । चतुर्थी ॥ १६३ ॥

येयौ च लुक् च । ७ । १ । १६४ ।

चतुरः संख्यापूरणे एतौ स्याताम् । चस्य लुक् च । तुर्यः । तुरीयः ॥

द्वेस्तीयः । ७ । १ । १६५ ।

द्वेः संख्यापूरणे तीयः स्यात् । द्वितीयः ॥ १६५ ॥

त्रेस्तृ च । ७ । १ । १६६ ।

त्रेः संख्यापूरणे तीयः स्यात् । तद्योगे च तृ । तृतीया ॥१६६॥

पूर्वमनेन सादेश्चेन् । ७ । १ । १६७ ।

पूर्वमित्यमन्तात्केवलात्सपूर्वाच्चाऽनेनेति टार्थे कर्त्तरीन् स्यात् । कृतपूर्वी कटम् । पीतपूर्वी पयः ॥ १६७ ॥

इष्टादेः । ७ । १ । १६८ ।

एभ्योऽर्थात्स्यन्तेभ्यष्टार्थे कर्त्तरीन् स्यात् । इष्टी यज्ञे । पूर्त्ती श्राद्धे ॥

श्राद्धमद्यभुक्तमिकेनौ । ७ । १ । १६९ ।

श्राद्धात्स्यन्तादद्यभुक्तार्थर्थे कर्त्तर्येतौ स्याताम् । श्राद्धिकः। श्राद्धी ॥

अनुपद्यन्वेष्टा । ७ । १ । १७० ।

एष इन्नन्तो निपात्यते । अन्वेष्टा चेत् । अनुपदी गवाम् ॥१७०॥

दाण्डाजिनिकायःशूलिकपार्श्वकम् । ७ । १ । १७१ ।

एते यथायोगमिकण् कान्ता निपात्याः । अन्वेष्टर्यर्थे । दाण्डाजिनिको दाम्भिकः । आयःशूलिकः तीक्ष्णोपायोऽर्थान्वेष्टा । पार्श्वको अनृजूपायः स एव ॥ १७१ ॥

क्षेत्रेऽन्यस्मिन्नाश्ये इयः ।७।१।१७२।

क्षेत्रान्निर्देशात् ङ्यन्तादन्योपाधिकान्नाश्येऽर्थे इयः स्यात् । क्षेत्रियो व्याधिः जारश्च ॥ १७२ ॥

छन्दोऽधीते श्रोत्रश्च वा । ७।१।१७३।

अस्मादमन्तादधीतेऽर्थे इयो वा स्यात् । तद्योगे चास्य श्रोत्रः । श्रोत्रियः । छान्दसः ॥ १७३ ॥

इन्द्रियम् । ७ । १ । १७४ ।

इन्द्रादियो निपात्यः । इन्द्रस्य लिङ्गमिन्द्रियम् ॥ १७४ ॥

तेन वित्ते चञ्चुचणौ । ७ । १ । १७५ ।

तेनेति टान्ताद्वित्तेऽर्थे एतौ स्याताम् । विद्याचञ्चुः । केशचणः ॥

पूरणाद्ग्रन्थस्य ग्राहके को लुक्चाऽस्य । ७ । १ । १७६ ।

पूरणप्रत्ययान्ताट्टान्ताद् ग्रन्थस्य ग्राहकेऽर्थे कः स्यात् । तद्योगे च पूरणार्थस्य लुक् । द्विकः शिष्यः ॥ १७६ ॥

ग्रहणाद्वा । ७ । १ । १७७ ।

गृह्यते ऽनेनेति ग्रहणम् । रूपादिग्रन्थस्य ग्रहणार्थात्पूरणप्रत्ययान्तात् कः स्वार्थे स्यात् । तद्योगे च पूरणार्थस्य लुग् वा । द्विकं द्वितीयकं वा ग्रन्थग्रहणम् ॥ १७७ ॥

सस्याद् गुणात्परिजाते ।७।१।१७८।

सस्याद्गुणार्थाट्टान्तात्परिजातेऽर्थे कः स्यात् । सस्यकः शालिः देशो वा । गुणादिति किम् । सस्येन परिजातं क्षेत्रम् ॥ १७८ ॥

धनहिरण्ये कामे । ७ । १ । १७९ ।

आभ्यां ङ्यन्ताभ्यां कामेऽर्थे कः स्यात् । धनकः । हिरण्यकः मैत्रस्य ॥

स्वाङ्गेषु सक्ते । ७ । १ । १८० ।

स्वाङ्गार्थेभ्यो ङ्यन्तेभ्यः सक्तेऽर्थे कः स्यात् । नखकः । केशनखकः । दन्तौष्ठकः ॥ १८० ॥

उदरेत्विकणाद्यूने । ७ । १ । १८१ ।

अस्माद् ङ्यन्तात्सक्ते आद्यूनेऽर्थे इकण् स्यात् । औदरिकः । उदरकोऽन्यः ॥ १८१ ॥

अंशं हारिणि । ७ । १ । १८२ ।

अंशादमन्ताद्धारिण्यर्थे कः स्यात् । अंशको दायादः ॥ १८२ ॥

तन्त्रादचिरोद्धृते । ७ । १ । १८३ ।

तन्त्रात्पञ्चम्यन्तादचिरोद्धृतेऽर्थे कः स्यात् । तन्त्रकः पटः ॥ १८३ ॥

ब्राह्मणान्नाम्नि । ७ । १ । १८४ ।

अस्माङ्‌ङ्‍स्यन्तादचिरोद्धृतेऽर्थे कः स्यात् नाम्नि । ब्राह्मणको नामदेशः ॥ १८४ ॥

उष्णात् । ७ । १ । १८५ ।

उष्णाङ्‌ङ्‍स्यन्तादचिरोद्धृतेऽर्थे कः स्यात् नाम्नि । उष्णिका यवागूः॥

शीताच्च कारिणि । ७ । १ ।१८६ ।

शीतोष्णाभ्यामर्थादमन्ताभ्यां कारिण्यर्थे कः स्यात् नाम्नि । शीतकोऽलसः । उष्णको दक्षः ॥ १८६ ॥

अधेरारूढे । ७ । १ । १८७ ।

अधेरारूढार्थात्स्वार्थे कः स्यात् । अधिको द्रोणः खार्याः । अधिका खारी द्रोणेन ॥ १८७ ॥

अनोः कमितरि । ७ । १ । १८८ ।

अनोः कः स्यात् । तदन्तश्चेत्कमितरि । अनुकः ॥ १८८ ॥

अभेरीश्च वा । ७ । १ । १८९ ।

अभेः कः स्यात् ईश्चाऽस्य वा । तदन्तश्चेत्कमितरि । अभिकः । अभीकः ॥ १८९ ॥

सोऽस्य मुख्यः । ७ । १ । १९० ।

स इति स्यन्तादस्येति षष्ठ्यर्थे कः स्यात् । स्यन्तं चेन्मुख्यार्थम् । देवदत्तकः सङ्घः ॥ १९० ॥

शृङ्खलकः करभे । ७ । १ । १९१ ।

कान्तो निपात्यः । शृङ्खलकः करभ उष्ट्रशिशुः ॥ १९१॥

उदुत्सोरुन्मनसि । ७ । १ । १९२ ।

आभ्यामस्येत्युन्मनस्यर्थे कः स्यात् । उत्कः । उत्सुकः ॥ १९२ ॥

कालहेतुफलाद्रोगे । ७ । १ । १९३ ।

कालविशेषार्थेभ्यो हेत्वर्थेभ्यः फलार्थेभ्यश्च स्यन्तेभ्योऽस्येति रोगेऽर्थे कः स्यात् । द्वितीयको ज्वरः । पर्वतको रोगः। शीतको ज्वरः॥१९३॥

प्रायोऽन्नमस्मिन्नाम्नि । ७ । १ । १९४ ।

स्यन्तादस्मिन्निति ङ्यर्थे संज्ञाविषये कः स्यात् । स्यन्तं चेदन्नं प्रायेण । गुडापूपिका पौर्णमासी ॥ १९४ ॥

कुल्माषादण् । ७ । १ । १९५ ।

अस्मात्स्यन्तात्प्रायोऽन्नमस्मिन्नित्यर्थेऽण् स्यात् नाम्नि । कौल्माषी पौर्णमासी ॥ १९५ ॥

वटकादिन् । ७ । १ । १९६ ।

अस्मात्स्यन्तात्प्रायोऽन्नमस्मिन्नित्यर्थे इन् स्यात् । वटकिनी पौर्णमासी ॥ १९६ ॥

साक्षाद् द्रष्टा । ७ । १ । १९७ ।

साक्षातो द्रष्टेत्यस्मिन्नर्थे इन् नाम्नि स्यात् । साक्षी ॥ १९७ ॥

इत्याचार्यहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनलघुवृत्तौ सप्तमस्याध्यायस्य प्रथमः पादः समाप्तः ॥

अर्हम्

तदस्याऽस्त्यस्मिन्निति मतुः । ७ । २ । १ ।

तदिति स्यन्तादस्येति षष्ठ्यर्थेऽस्मिन्निति ङ्यर्थे वा मतुः स्यात् । चेत् स्यन्तमस्तीति । गोमान् । वृक्षवान् गिरिः । अस्तीति किम् । गावोऽस्यासन् । इतः प्रायो भूमादौ मत्वादयः ॥ १ ॥

आयात् । ७ । २ । २ ।

रूपात् प्रशस्ताहतादित्यायविधेर्वक्ष्यमाणप्रकृतिभ्यो मतुः स्यात् । तदस्यास्ति । तदस्मिन्नस्तीति विषये । कुमारीमान् । व्रीहिमान् ॥ २ ॥

नावादेरिकः । ७ । २ । ३ ।

एभ्यो मत्वर्थे इकः स्यात् । नाविकः । नौमान् । एवं कुमारिकः । कुमारीमान् ॥ ३ ॥

शिखादिभ्य इन् । ७ । २ । ४ ।

एभ्यो मत्वर्थे इन् स्यात् । शिखी । शिखावान् । माली । मालावान् ॥ ४ ॥

व्रीह्यादिभ्यस्तौ । ७ । २ । ५ ।

एभ्यो मत्वर्थे इकेनौ स्याताम् । व्रीहिकः । व्रीही । व्रीहिमान् । मायिकः । मायी । मायावान् ॥ ५ ॥

अतोऽनेकस्वरात् । ७ । २ । ६ ।

अदन्तादनेकस्वरान्मत्वर्थे इकेनौ स्याताम् । दण्डिकः । दण्डी । दण्डवान् । छत्रिकः । छत्री । छत्रवान् । अनेकस्वरादिति किम् । खवान् ॥ ६ ॥

अशिरसोऽशीर्षश्च । ७ । २ । ७ ।

अस्मान्मत्वर्थे इकेनौ स्याताम् । मतुश्च । तद्योगे चास्याशीर्षः । अशीर्षिकः । अशीर्षी । अशीर्षवान् ॥ ७ ॥

अर्थार्थान्ताद्भावात् । ७ । २ । ८ ।

अर्थादर्थान्ताच्च भावार्थादेव मत्वर्थे इकेनावेव स्याताम् । अर्थिकः। अर्थी । प्रत्यर्थिकः । प्रत्यर्थी मतुर्न स्यात् । भावादिति किम् । धनार्थात् मतुरेव अर्थवान् ॥ ८ ॥

व्रीह्यर्थतुन्दादेरिलश्च । ७ । २ । ९ ।

आभ्या मत्वर्थे इल इकेनौ च स्युः । शालिलः । शालिकः । शाली । शालिमान् । तुन्दिलः । तुन्दिकः । तुन्दी । तुन्दिवान् । उदरिलः । उदरिकः । उदरी । उदरवान् ॥ ९ ॥

स्वाङ्गाद्विवृद्धात्ते । ७ । २ । १०

अस्मान्मत्वर्थे इलेकेनाः स्युः । कर्णिलः । कर्णिकः । कर्णी । कर्णवान्॥

वृन्दादारकः । ७ । २ । ११ ।

मत्वर्थे स्यात् । वृन्दारकः । वृन्दवान् ॥ ११ ॥

शृङ्गात् । ७ । २ । १२ ।

मत्वर्थे आरकः स्यात् । शृङ्गारकः । शृङ्गवान् ॥ १२ ॥

फलबर्हाच्चेनः । ७ । २ । १३ ।

आभ्या शृङ्गाच्च मत्वर्थे इनः स्यात् । फलिनः । फलवान् । बर्हिणः । शृङ्गिणः ॥ १३ ॥

मलादीमसश्च । ७ । २ । १४ ।

मलान्मत्वर्थे ईमसइनश्च स्यात् । मलीमसः । मलिनः । मलवान् ॥

मरुत्पर्वणस्तः । ७ । २ । १५ ।

आभ्यां मत्वर्थे तः स्यात् । मरुत्तः । मरुत्वान् । पर्वतः । पर्ववान् ॥ १५ ॥

वलिवटितुण्डेर्भः । ७ । २ । १६ ।

एभ्यो मत्वर्थे भः स्यात् । वलिभः । वटिभः । तुण्डिभः । वलिवान् ॥

ऊर्णाहंशुभमो युस् । ७ । २ । १७ ।

एभ्यो मत्वेऽर्थे युस्स्यात् । ऊर्णायुः । अहंयुः । शुभंयुः ॥ १७ ॥

कंशंभ्यां युस्तियस्तुतवभम् । ७ । २ । १८ ।

आभ्यां मत्वर्थे एते स्युः । कंयुः । शंयुः । कंतिः । शंतिः । कंयः । शंयः । कंतुः । शंतुः । कंतः । शंतः । कंवः । शंवः । कंभः । शंभः ॥ १८ ॥

बलवातदन्तललाटादूलः । ७ । २ । १९ ।

एभ्यो मत्वर्थे ऊलः स्यात् । बलूलः । वातूलः । दन्तूलः । ललाटूलः । बलवान् ॥ १९ ॥

प्राण्यङ्गादातोलः । ७ । २ । २० ।

प्राण्यङ्गार्थादादन्तान्मत्वर्थे लः स्यात् । चूडालः । चूडावान् । प्राण्यङ्गादिति किम् । जङ्घावान् प्रासादः ॥ २० ॥

सिध्मादिक्षुद्रजन्तुरुग्भ्यः । ७ । २ । २१ ।

सिध्मादेः क्षुद्रजन्त्वर्थाद्रुगर्थाच्च मत्वर्थे लः स्यात् । सिध्मलः । सिध्मवान् । वध्मलः । यूकालः । मूर्च्छालः ॥ २१ ॥

प्रज्ञापर्णोदकफेनाल्लेलौ । ७ । २ । २२ ।

एभ्यो मत्वर्थे लेलौ स्याताम् । प्रज्ञालः । प्रज्ञिलः । पर्णलः । पर्णिलः । उदकलः । उदकिलः । फेनलः । फेनिलः । फेनवान् ॥ २२ ॥

कालाजटाघाटात् क्षेपे । ७ । २ । २३ ।

एभ्यो मत्वर्थे लेलौ स्याताम् । क्षेपे गम्ये । कालालः । कालिलः । जटालः । जटिलः । घाटालः । घाटिलः । क्षेपइति किम् । कालावान् ॥ २३ ॥

वाच आलाटौ । ७ । २ । २४ ।

मत्वर्थे स्याताम् । क्षेपे गम्ये । वाचालः । वाचाटः ॥ २४ ॥

ग्मिन् । ७ । २ । २५ ।

वाचो मत्वर्थे ग्मिन् स्यात् । वाग्मी । वाग्वान् ॥ २५ ॥

मध्वादिभ्यो रः । ७ । २ । २६ ।

मत्वर्थे रः स्यात् । मधुरो रसः । खरो गदर्भः ॥ २६ ॥

कृष्यादिभ्यो बलच् । ७ । २ । २७ ।

मत्वर्थे स्यात् । कृषीबलः कुटुम्बी । आसुतीबलः कल्पपालः । आसुतिमान् ॥ २७ ॥

लोमपिच्छादेः शेलम् । ७ । २ । २८ ।

लोमादेः पिच्छादेश्च मत्वर्थे यथासङ्ख्यं शइलश्च स्यात् । लोमशः । लोमवान् । गिरिशः । पिच्छिलः । पिच्छवान । उरसिलः ॥ २८ ॥

नोऽङ्गादेः । ७ । २ । २९ ।

एभ्यो मत्वर्थे नः स्यात् । अङ्गना चार्वङ्गी स्त्री । पामनः । पामवान् ॥ २९ ॥

शाकीपलालीदद्र्वा ह्रस्वश्च । ७ । २ । ३० ।

एभ्यो मत्वर्थे नः स्यात् । तद्योगे चैषां ह्रस्वः महच्छाकं पलालं च । शाकी । पलाली । दद्रुर्व्याधिः । शाकिनः । शाकीमान् । पलालिनः । दद्रुणः ॥ ३० ॥

विष्वचो विषुश्च । ७ । २ । ३१ ।

अस्मान्मत्वर्थे नः स्यात् । विषुश्चास्य । विषुणः रविर्वायुर्वा । विष्वग्वान् ॥ ३१ ॥

लक्ष्म्या अनः । ७ । २ । ३२ ।

मत्वर्थे स्यात् । लक्ष्मणः । लक्ष्मीवान् ॥ ३२ ॥

प्रज्ञाश्रद्धार्चावृत्तेर्णः । ७ । २ । ३३ ।

एभ्यो मत्वर्थे णः स्यात् । प्राज्ञः । प्रज्ञावान् । श्राद्धः । श्रद्धावान् आर्चः । अर्चावान् । वार्त्तः । वृत्तिमान् ॥ ३३ ॥

ज्योत्स्नादिभ्योऽण् । ७ । २ । ३४ ।

मत्वर्थेऽण् स्यात् । ज्योत्स्नी रात्रिः । तामिस्री ॥ ३४ ॥

सिकताशर्करात । ७ । २ । ३५ ।

आभ्यां मत्वर्थेऽण् स्यात् । सैकतः । सिकतावान् । शार्करः ॥

इलश्च देशे । ७ । २ । ३६ ।

सिकताशर्कराभ्यां देशे मत्वर्थे इलाणौ स्याताम् । सिकतिलः । सैकतः । सिकतावान् । शर्करिलः । शार्करो देशः । शर्करावान् ॥३६॥

द्युद्रोर्मः । ७ । २ । ३७ ।

आभ्यां मत्वर्थे मः स्यात् । द्युमः । द्रुमः ॥ ३७ ॥

काण्डाण्डभाण्डादीरः । ७ । २ । ३८ ।

एभ्यो मत्वर्थे ईरः स्यात् । काण्डीरः । काण्डवान् । आण्डीरः। भाण्डीरः ॥ ३८ ॥

कच्छ्वा डुरः । ७ । २ । ३९ ।

मत्वर्थे स्यात् । कच्छुरः । कच्छूमान् ॥ ३९ ॥

दन्तादुन्नतात् । ७ । २ । ४० ।

उन्नत्युपाधेर्दन्तान्मत्वर्थे डुरः स्यात् । दन्तुरः । उन्नतादिति किम् । दन्तवान् ॥ ४० ॥

मेधारथान्नवेरः । ७ । २ । ४१ ।

आभ्यां मत्वर्थे इरो वा स्यात् । मेधिरः । मेधावान् । मेधावी । रथिरः । रथिकः । रथी ॥ ४१ ॥

कृपाहृदयादालुः । ७ । २ । ४२ ।

आभ्यां मत्वर्थे वाऽलुः स्यात् । कृपालुः । कृपावान् । हृदयालुः । हृदयी ॥ ४२ ॥

केशाद्वः । ७ । २ । ४३ ।

मत्वर्थे वो वा स्यात् । केशवः । केशवान् । केशी ॥ ४३ ॥

मण्यादिभ्यः । ७ । २ । ४४ ।

एभ्यो मत्वर्थे वः स्यात् । मणिवः । मणिमान् । हिरण्यवः । हिरण्यवान् ॥ ४४ ॥

हीनात्स्वाङ्गादः । ७ । २ । ४५ ।

हीनत्वोपाधेः स्वाङ्गार्थान्मत्वर्थे अः स्यात् । कर्णः । हीनादिति किम् । कर्णवान् ॥ ४५ ॥

अभ्रादिभ्यः । ७ । २ । ४६ ।

एभ्यो मत्वर्थे अः स्यात् । अभ्रं नभः । अर्शसो मैत्रः ॥ ४६ ॥

अस्तपो मायामेधास्रजो विन् । ७ । २ । ४७ ।

असन्तात्तपसादेश्च मत्वर्थे विन् स्यात्। यशस्वी । यशस्वान्। तपस्वी । मायावी । मायावान्। मेधावी । स्रग्वी ॥ ४७ ॥

आमयाद्दीर्घश्च । ७। २ । ४८ ।

अस्मान्मत्वर्थे विन् स्यात्। दीर्घश्चास्य । आमयावी । आमयवान् ॥ ४८ ॥

स्वान्मिन्नीशे । ७ । २ । ४९ ।

स्वान्मत्वर्थे ईशे मिन् स्यात्। दीर्घश्चास्य । स्वामी। स्ववानन्यः ॥

गोः । ७ । २ । ५० ।

गोर्मत्वर्थे मिन् स्यात्। गोमी । गोमान् ॥ ५० ॥

ऊर्जो विन्वलावस्चान्तः । ७। २ । ५१ ।

ऊर्जो मत्वर्थे विन्वलौ स्याताम्। तद्योगे वोर्जोऽसन्तः। ऊर्जस्वी । ऊर्जस्वलः । ऊर्ग्वान् ॥ ५१ ॥

तमिस्रार्णवज्योत्स्नाः । ७। २ । ५२ ।

एते मत्वर्थे निपात्याः । तमिस्रा रात्रिः । तमिस्राणि गुहामुखानि । तमस्वान् । अर्णवः समुद्रः । ज्योत्स्ना चन्द्रप्रभा ॥ ५२ ॥

गुणादिभ्यो यः । ७। २। ५३ ।

एभ्यो मत्वर्थे यः स्यात्। गुण्यो ना। हिम्यो गिरिः हिमवान्॥५३॥

रूपात्प्रशस्ताहतात् । ७ । २ । ५४ ।

प्रशस्तोपाधेराहतोपाधेश्च रूपान्मत्वर्थे यः स्यात्। रूप्यो गौः रूप्यं कार्षापणम्। रूपवानन्यः ॥ ५४ ॥

पूर्णमासोऽण् । ७ । २ । ५५ ।

मत्वर्थे स्यात् । पौर्णमासी ॥ ५५ ॥

गोपूर्वादत इकण् । ७ । २ । ५६ ।

गोपूर्वाददन्तान्मत्वर्थे इकण् स्यात् । गौशतिकः । अत इति किम् । गोविंशतिमान् ॥ ५६ ॥

निष्कादेः शतसहस्रात् । ७ । २ । ५७ ।

निष्काद्यवयवात्परं यच्छतं सहस्रं च तदन्तान्मत्वर्थे इकण् स्यात् । नैष्कशतिकः । नैष्कसहस्रिकः । आदेरिति किम् । स्वर्णनिष्कशतमस्यास्ति ॥ ५७ ॥

एकादेः कर्मधारयात् । ७ । २ । ५८ ।

अस्माददन्तान्मत्वर्थे इकण् स्यात् । ऐकगविकः ॥ ५८ ॥

सर्वादेरिन् । ७ । २ । ५९ ।

सर्वादेरदन्तात्कर्मधारयादिन् स्यात् । सर्वधनी ॥ ५९ ॥

प्राणिस्थादस्वाङ्गाद्द्वन्द्वरुग्निन्द्यात् । ७ । २ । ६० ।

प्राणिस्थोऽस्वाङ्गार्थो ऽदन्तो यो द्वन्द्वो यश्च रुग्वाची निन्द्यार्थश्च तस्मान्मत्वर्थे इन् स्यात् । कटकवलयिनी । कुष्ठी । ककुदावर्त्ती । प्राणिस्थादिति किम् । पुष्पफलवान् वृक्षः । अस्वाङ्गादिति किम् । स्तनकेशवती ॥ ६० ॥

वातातीसारपिशाचात्कश्चान्तः । ७ । २ । ६१ ।

एभ्यो मत्वर्थे इन् स्यात् । कश्चान्तः । वातकी । अतिसारकी । पिशाचकी ॥ ६१ ॥

पूरणाद्वयसि । ७ । २ । ६२ ।

पूरणप्रत्ययान्ताद्वयसि गम्ये मत्वर्थे इन्नेव स्यात् । पञ्चमीबालः ॥

सुखादेः । ७ । २ । ६३ ।

एभ्यो मत्वर्थे इन्नेव स्यात् । सुखी । दुःखी ॥ ६३ ॥

मालायाः क्षेपे । ७ । २ । ६४ ।

मत्वर्थे इन्नेव स्यात् । माली । क्षेप इति किम् । मालावान् ॥६४॥

धर्म्मशीलवर्णान्तात् । ७ । २ । ६५ ।

धर्माद्यन्तान्मत्वर्थे इन्नेव स्यात् । मुनिधर्मी । यतिशीली । ब्राह्मणवर्णी ॥ ६५ ॥

बाहूर्वादेर्बलात् । ७ । २ । ६६ ।

बाहूरुपुर्वाद्बलान्मत्वर्थे इन्नेव स्यात् । बाहुबली । ऊरुबली ॥६६॥

मन्माऽब्जादेर्नाम्नि । ७ । २ । ६७ ।

मन्नन्तान्मान्तेभ्योऽब्जादेश्च मत्वर्थे इन्नेव स्यात् । नाम्नि । दामिनी । सोमिनी । अब्जिनि । कमलिनी ॥ ६७ ॥

हस्तदन्तकराज्जातौ । ७ । २ । ६८ ।

एभ्यो मत्वर्थे इन्नेव स्यात् । एतदन्तस्य जातावर्थे । हस्ती । दन्ती । करी ॥ ६८ ॥

वर्णाद्ब्रह्मचारिणि । ७ । २ । ६९ ।

वर्णान्मत्वर्थे इन्नेव स्यात् । चेद्ब्रह्मचार्यर्थः । वर्णी ब्रह्मचारीत्यर्थः । वर्णवानन्यः ॥ ६९ ॥

पुष्करादेर्देशे । ७ । २ । ७० ।

एभ्यो मत्वर्थे इन्नेव स्यात् । देशेऽर्थे । पुष्करिणि । पद्मिनी । देश इति किम् । पुष्करवान् हस्ती ॥ ७० ॥

सूक्तसाम्नोरीयः । ७ । २ । ७१ ।

सूक्ते साम्नि चार्थे मत्वर्थे ईयः स्यात् । अच्छावाकीयं सूक्तम् । यज्ञायज्ञीयं साम ॥ ७१ ॥

लुब्वाऽध्यायानुवाके । ७ । २ । ७२ ।

अनयोर्मत्वर्थे ईयस्य लुब्वा स्यात् । लुब्विधेरेवेयः । गर्दभाण्डः । गर्दभाण्डीयोऽध्यायोऽनुवाको वा ॥ ७२ ॥

विमुक्तादेरण् । ७ । २ । ७३ ।

एभ्यो मत्वर्थेऽध्यायानुवाकयोरण् स्यात् । वैमुक्तः । दैवासुरः अध्यायोऽनुवाको वा ॥ ७३ ॥

घोषदादेरकः । ७ । २ । ७४ ।

एभ्यो मत्वर्थेऽध्यायानुवाकेऽकः स्यात् । घोषदकः । गोषदकः अध्यायादिः ॥ ७४ ॥

प्रकारे जातीयर् । ७ । २ । ७५ ।

स्यन्तात्षष्ठ्यर्थे ऽयं स्यात् । चेत्स्यन्तं प्रकारार्थम् । सामान्यस्य विशेषोऽविशेषान्तरानुयायी प्रकारः । पटुजातीयः ॥ ७५ ॥

कोऽण्वादेः । ७ । २ । ७६ ।

एभ्यस्तदस्य प्रकार इति विषये कः स्यात् । अणुकः । स्थूलकः पटः ॥ ७६ ॥

जीर्णगोमूत्रावदातसुरायवकृष्णाच्छाल्याच्छादनसुराहिव्रीहितिले । ७ । २ । ७७ ।

एभ्यो यथासङ्ख्यमेष्वर्थेषु तदस्य प्रकार इति विषये कः स्यात् ।

जीर्णकः शालिः। गोमूत्रकमाच्छादनम् । अवदातिका सुरा। सुरकोऽहिः। यवको व्रीहिः । कृष्णकास्तिलाः ॥ ७७ ॥

भूतपूर्वे प्चरट् ।७।२।७८।

भूतपूर्वार्थात्स्वार्थे प्चरट् स्यात् । आद्यचरी ॥ ७८॥

गोष्ठादीनञ् । ७ । २ । ७९ ।

भूतपूर्वे स्यात् । गोष्ठीनो देशः ॥ ७९ ॥

षष्ठ्या रूप्यप्चरट् । ७ । २ । ८० ।

भूतपूर्वेऽर्थे एतौ स्याताम् । मैत्ररूप्यो गौः। मैत्रचरः ॥ ८० ॥

व्याश्रये तसुः ।७।२।८१ ।

षष्ठ्यन्तान्नानापक्षाश्रये गम्ये तसुः स्यात् । देवा अर्जुनतो अभवन् । रविः कर्णतोऽभवत् ॥ ८१ ॥

रोगात्प्रतीकारे ।७।२।८२।

षष्ठ्यन्ताद्रोगार्थादपनयने तसुः स्यात् । प्रवाहिकातः कुरु: ॥८२॥

पर्यभेः सर्वोभये ।७।२।८३।

आभ्यां यथासङ्ख्यं सर्वोभयार्थाभ्यां तसुः स्यात्। परितः। अभितः। सर्वोभय इति किम् । वृक्षं परि अभि वा ॥ ८३ ॥

आद्यादिभ्यः ।७।२।८४ ।

एभ्यः सम्भवत्स्याद्यन्तेभ्यस्तसुः स्यात् । आदितः। मध्यतः ॥८४॥

क्षेपातिग्रहाव्यथेष्वकर्तुस्तृतीयायाः। ७।२।८५।

टान्तादकर्त्रर्थात् क्षेपादिविषये तसुः स्यात् । वृत्ततः क्षिप्तोऽतिग्राह्यो न व्यथते वा । अकर्तुरिति किम् । मैत्रेण क्षिप्तः ॥ ८५ ॥

पापहीयमानेन । ७ । २ । ८६ ।

आभ्यां योगे टान्तादकर्तुस्तसुः स्यात् । वृत्ततः पापो हीयते वा ॥

प्रतिना पञ्चम्याः । ७ । २ । ८७ ।

प्रतिना योगे जातपञ्चम्यन्तात्तसुर्वा स्यात् । अभिमन्युरर्जुनादर्जुनतो वा प्रति ॥ ८७ ॥

अहीयरुहोऽपादाने । ७ । २ । ८८ ।

अपादानपञ्चम्यन्तात्तसुर्वा स्यात् । नचेत्तद्धीयरुहोः । ग्रामाद् ग्रामतो वैति । अहीयरुहइति किम् । सार्थाद्धीनः गिरेरवरोहति ॥ ८८ ॥

किमद्व्यादिसर्वाद्यऽवैपुल्यबहोः पित् तस् । ७ । २ । ८९ ।

किमोऽद्व्यादिवर्जसर्वादिभ्योऽवैपुल्यार्थबहोश्च ङस्यन्तात्तस् पित् स्यात् । कुतः । सर्वतः । यतः । बहुतः । द्व्यादिवर्जनं किम् । द्वाभ्यां त्वत् । अवैपुल्येति किम् । बहोः सूपात् ॥ ८९ ॥

इतोऽतः कुतः । ७ । २ । ९० ।

एते तसन्ता निपात्याः ॥ ९० ॥

भवत्वायुष्मद्दीर्घायुर्देवानांप्रियैकार्थात् । ७ । २ । ९१ ।

भवत्वाद्यैस्तुल्याधिकरणात् किमद्व्यादिसर्वाद्यवैपुल्यबहोः सर्वस्याद्यन्तात् पित्तस्वा स्यात् । स भवान् । ततो भवान् । ते भवन्तः । ततो

भवन्तः । स आयुष्मान् । तत आयुष्मान् । स दीर्घायुः। ततो दीर्घायुः। तं देवानांप्रियम् । ततो देवानांप्रियम् ॥ ९१ ॥

त्रप् च । ७ । २ । ९२ ।

भवत्वाद्यैरेकार्थात्किमद्व्यादिसर्वाद्यवैपुल्यबहोः सर्वस्याद्यन्तात्त्रप् च वा स्यात् । स भवान् । तत्र भवान् । ततो भवान् । तस्मिन् भवति। तत्र भवति । ततो भवति । आयुष्मदादिनाप्येवम् ॥९२॥

क्कुत्रात्रेह । ७ । २ । ९३ ।

एते त्रबन्ता निपात्याः ॥९३॥

सप्तम्याः । ७ । २ । ९४ ।

सप्तम्यन्तात्किमद्व्यादिसर्वाद्यवैपुल्यबहोः त्रप् स्यात् । कुत्र । सर्वत्र । तत्र । बहुत्र ॥ ९४ ॥

किंयत्तत्सर्वैकान्यात्काले दा । ७।२।९५।

एभ्यो ङ्यन्तेभ्यः कालेऽर्थे दा स्यात्। कदा। यदा। तदा । सर्वदा । एकदा । अन्यदा ॥ ९५॥

सदाऽधुनेदानींतदानीमेतर्हि ।७।२।९६।

एते कालेऽर्थे निपात्याः ॥ ९६ ॥

सद्योऽद्यपरेद्यव्यह्नि । ७ । २ । ९७ ।

एतेऽह्नि काले निपात्याः ॥ ९७॥

पूर्वापराधरोत्तरान्यान्यतरेतरादेद्युस् ।७।२। ९८ ।

एभ्यो ङ्यन्तेभ्योऽह्नि कालेऽर्थे एद्युस् स्यात् । पूर्वेद्युः । अपरेद्युः । अधरेद्युः । उत्तरेद्युः । अन्येद्युः । अन्यतरेद्युः । इतरेद्युः ॥ ९८ ॥

उभयाद्द्युश्च । ७ । २ । ९९ ।

अतोऽह्न्यर्थे द्युसेद्युसौ स्याताम् । उभयद्युः । उभयेद्युः ॥ ९९ ॥

ऐषमःपरुत्परारि वर्षे । ७ । २ । १०० ।

एते वत्सरेऽर्थे निपात्याः । ऐषमः । परुत् । परारि ॥ १०० ॥

अनद्यतने र्हिः । ७ । २ । १०१ ।

ङ्यन्तादनद्यतनकालार्थाद्यथासम्भवं किमद्व्यादिसर्वाद्यवैपुल्यबह्वो र्हिः स्यात् । कर्हि । यर्हि । अमुर्हि । बहुर्हि ॥ १०१ ॥

प्रकारे था । ७ । २ । १०२ ।

प्रकारार्थात्सम्भवत्स्याद्यन्तात्किमद्व्यादिसर्वाद्यवैपुल्यबहोर्था स्यात् । सर्वथा । अन्यथा ॥ १०२ ॥

कथमित्थम् । ७ । २ । १०३ ।

एतौ प्रकारे निपात्यौ ॥ १०३ ॥

सङ्ख्याया धा । ७ । २ । १०४ ।

सङ्ख्यार्थात्प्रकारवृत्तेर्धा वा स्यात् । एकधा । कतिधा ॥ १०४ ॥

विचाले च । ७ । २ १०५ ।

एकस्याऽनेकीभावोऽनेकस्य चैकीभावो विचालः । तस्मिन्गम्ये सङ्ख्यार्थाद्धा वा स्यात् । एको राशिर्द्वौ द्विधा वा क्रियते । अनेकमेकमेकधा वा करोति ॥ १०५ ॥

वैकाद्ध्यमञ् । ७ । २ । १०६ ।

एकेति सङ्ख्यार्थात्प्रकारवृत्तेर्विचाले च गम्ये ध्यमञ् वा स्यात् । ऐकध्यम् । एकधा भुंक्ते । अनेकमेकं करोति ऐकध्यं एकधा वा करोति ॥ १०६ ॥

द्वित्रेर्द्धमञेधौ वा । ७ । २ । १०७ ।

आभ्यां प्रकारार्थाभ्यां विचाले च गम्ये एतौ वा स्याताम् । द्वैधम् । त्रैधम् । द्वेधा । त्रेधा । द्विधा । त्रिधा भुंक्ते । एकराशिं द्वौ करोति द्वैधम् । त्रैधम् । द्वेधा । त्रेधा । द्विधा । त्रिधा करोति ॥ १०७ ॥

तद्वति धण् । ७ । २ । १०८ ।

द्वित्रिभ्यां प्रकारवति विचालवति चार्थे धण् स्यात् । द्वैधानि । त्रैधानि ॥ १०८ ॥

वारे कृत्वस् । ७ । २ । १०९ ।

वारवृतेः सङ्ख्यार्थाद्वारवति धात्वर्थे कृत्वस् स्यात् । पञ्चकृत्वो भुंक्ते ॥ १०९ ॥

द्वित्रिचतुरः सुच् । ७ । २ । ११० ।

एभ्यो वारार्थेभ्यस्तद्वति सुच् स्यात् । द्विः । त्रिः । चतुः भुंक्ते ॥

एकात्सकृच्चास्य । ७ । २ । १११ ।

अस्माद्वारार्थात्तद्वति सुच् स्यात । सकृच्चाऽस्य । सकृद्भुंक्ते ॥१११॥

बहोर्धासन्ने । ७ । २ । ११२ ।

बहोः सङ्ख्यार्थाददूरवारार्थात्तद्वति धा स्यात् । बहुधा भुंक्ते॥११२॥

दिक्शब्दाद्दिग्देशकालेषु प्रथमापञ्चमी-सप्तम्याः । ७ । २ । ११३ ।

दिशि दृष्टाद्दिगाद्यर्थात्सिङसिङ्यन्तात् स्वार्थे धा स्यात् । प्राची दिग् रम्या प्राग्रम्यम् । प्राग् देशः कालो वा रम्यः प्राग्रम्यम् ।

प्राच्या दिशो देशकालाभ्यां वा आगतः प्रागागतः। प्राच्यां दिशि देश-कालयोर्वा वासः प्राग्वासः ॥ ११३ ॥

ऊर्ध्वाद्रिरिष्टातावुपश्चास्य । ७ । २ । ११४ ।

ऊर्ध्वाद्दिग्देशकालार्थात्सिङसिङ्यन्तादेतौ स्याताम्। उपश्चोर्ध्वस्य। उपरि । उपरिष्टाद्रम्यं आगतो वासो वा ॥ ११४ ॥

पूर्वावराधरेभ्योऽसऽस्तातौ पुरवध-श्चैषाम् । ७ । २ । ११५ ।

एभ्यो दिग्देशकालार्थेभ्यः सिङसिङ्यन्तेभ्योऽसऽस्ताच्च स्यात् । एषां च यथासङ्ख्यं पुर् अव् अध् च । पुरः । अवः । अधः । पुर-स्तात् । अवस्तात् । अधस्तात् रम्यमागतो वासो वा ॥ ११५ ॥

परावरात्स्तात् । ७ । २ । ११६ ।

आभ्यां दिगाद्यर्थाभ्यां प्रथमाद्यन्ताभ्यां स्वार्थे स्तात् स्यात् । पर-स्तात् । अवरस्तात् रम्यमागतो वासो वा ॥ ११६ ॥

दक्षिणोत्तराच्चातस् । ७ । २ । ११७ ।

आभ्यां परावराभ्यां च दिगाद्यर्थाभ्यां प्रथमाद्यन्ताभ्यां स्वार्थे ऽतस्स्यात् । दक्षिणतः । उत्तरतः । परतः । अवरतः रम्यमागतो वा-सो वा ॥ ११७ ॥

अधरापराच्चात् । ७ । २ । ११८ ।

आभ्यां दक्षिणोत्तराभ्यां च दिगाद्यर्थाभ्यां प्रथमाद्यन्ताभ्यामात् स्यात् । अधरात् । पश्चात् । दक्षिणात् । उत्तरात् रम्यमागतो वा-सो वा ॥ ११८ ॥

वा दक्षिणात् प्रथमासप्तम्या आः । ७ । २ । ११९ ।

अस्माद्दिग्देशार्थात्सिङ्यन्तादा वा स्यात् । दक्षिणा । दक्षिणतः । दक्षिणाद्रम्यं वासो वा ॥ ११९ ॥

आही दूरे । ७ । २ । १२० ।

दूरदिग्देशार्थात्सिङ्यन्ताद्दक्षिणादा आहिश्च स्यात् । ग्रामाद्दक्षिणा । दक्षिणाहि रम्यं वासो वा ॥ १२० ॥

वोत्तरात् । ७ । २ । १२१ ।

दिगाद्यर्थादस्मात्सिङ्यन्तादा आहिश्च वा स्यात् । उत्तरा । उत्तराहि । उत्तरतः । उत्तरात् रम्यं वासो वा ॥ १२१ ॥

अदूरे एनः । ७ । २ । १२२ ।

दिग्शब्दाददूरदिगाद्यर्थात्सिङ्यन्तादेनः स्यात् । पूर्वेणास्य रम्यं वसति वा ॥ १२२ ॥

लुबञ्चेः । ७ । २ । १२३ ।

अञ्चत्यन्ताद्दिक्शब्दाद्दिगादिवृत्तेः सिङसिङ्यन्ताद्विहितो यो धा ऐनो वा तस्य लुप् स्यात् । प्राग्रम्यमागतो वासो वा ॥ १२३ ॥

पश्चोऽपरस्य दिक्पूर्वस्य चाति । ७ । २ । १२४ ।

अपरस्य केवलस्य दिगर्थपूर्वपदस्य चाति परे पश्चः स्यात् । पश्चात् । दक्षिणपश्चात् रम्यमागतो वासो वा ॥ १२४ ॥

वोत्तरपदेऽर्द्धे । ७ । २ । १२५ ।

अपरस्य केवलस्य दिक्पूर्वस्य च अर्द्धे उत्तरपदे पश्चो वा स्यात् । पश्चार्द्धम् । अपरार्द्धम् । दक्षिणपश्चार्द्धः । दक्षिणापरार्द्धः ॥ १२५ ॥

कृभ्वस्तिभ्यां कर्मकर्तृभ्यां प्रागतत्त्वे च्विः । ७ । २ । १२६ ।

कर्मार्थात्कृगा योगे कर्त्रर्थाच्च भ्वस्तियोगे प्रागभूततद्भावे गम्ये च्विः स्यात् । शुक्लीकरोति पटं । शुक्लीभवति । शुक्लीस्यात् पटः । प्रागिति किम् । अशुक्लं शुक्लं करोत्येकदा ॥ १२६ ॥

अरुर्मनश्चक्षुश्चेतोरहोरजसां लुक् च्वौ । ७ । २ । १२७ ।

एषां च्वावन्तस्य लुक् स्यात् । अरूस्यात् । महारूस्यात् । उन्मनीस्यात् । चक्षूस्यात् । चेतीस्यात् । रहीस्यात् । रजीस्यात् ॥ १२७ ॥

इसुसोर्बहुलम् । ७ । २ । १२८ ।

इसुसन्तस्य च्वौ बहुलं लुक् स्यात् । सर्पीकरोति नवनीतम् । धनूस्याद्वंशः । न च भवति सर्पिर्भवति । धनुर्भवति ॥ १२८ ॥

व्यञ्जनस्यान्त ईः । ७ । २ । १२९ ।

व्यञ्जनान्तस्य च्वौ बहुलमीरन्तः स्यात् । दृषदीभवति शिला । नच भवति दृषद्भवति शिला ॥ १२९ ॥

व्याप्तौ स्सात् । ७ । २ । १३० ।

कृभ्वस्तिभ्यां कर्मकर्तृभ्यां प्रागतत्तत्त्वइति विषये सादिः सात्स्यात् व्याप्तौ प्रागतत्तत्त्वस्य सर्वात्मना द्रव्येण सम्बन्धे गम्ये । अग्निसात् काष्ठं करोति । अग्निसाद्भवति । अग्निसात् स्यात् ॥ १३० ॥

जातेः सम्पदा च । ७ । २ । १३१ ।

कृभ्वस्तिभिः सम्पदा च योगे कृग्कर्मणो भ्वस्तिसम्पत्कर्तुश्च प्रागतत्त्वेन सामान्यस्य व्याप्तौ स्सात् स्यात् । अस्यां सेनायां सर्वं शस्त्रमग्निसात्करोति दैवम् । एवमग्निसाद्भवति । अग्निसात् स्यात् । अग्निसात्सम्पद्यते ॥१३१॥

तत्राधीने । ७ । २ । १३२ ।

तत्रेति ङ्यन्तादायत्तेऽर्थे कृभ्वस्तिसम्पद्योगे सात्स्यात् । राजसात्करोति । राजसाद्भवति । राजसात्स्यात् । राजसात्सम्पद्यते ॥ १३२ ॥

देये त्रा च । ७ । २ । १३३ ।

ङ्यन्ताद्देयेआयत्तेऽर्थे कृभ्वस्तिसम्पद्योगे त्रा स्यात् । देवत्रा करोति द्रव्यम् । देवत्रा भवेत् स्यात् सम्पद्यते वा । देयइति किम् । राजसात्स्यात् राष्ट्रम् ॥ १३३ ॥

सप्तमीद्वितीयाद्देवादिभ्यः । ७ । २ । १३४ ।

एभ्यो ङ्यमन्तेभ्यः स्वार्थे त्रा स्यात् । देवत्रा वसेत् भवेत्स्यात् करोति वा । एवं मनुष्यत्रा ॥ १३४ ॥

तीयशम्बबीजात्कृगा कृषौ डाच् । ७ । २ । १३५ ।

तीयान्ताच्छम्बबीजाभ्यां च कृग्योगे कृषि विषये डाच् स्यात् । द्वितीया करोति । शम्बा करोति । बीजा करोति क्षेत्रम् । कृषाविति किम् । द्वितीयं पटं करोति ॥ १३५ ॥

सङ्ख्यादेर्गुणात् । ७ । २ । १३६ ।

सङ्ख्यायाः आद्यवयवात्परो यो गुणस्तदन्तात्कृग्योगे कृषि विषये डाच् स्यात् । द्विगुणा करोति क्षेत्रम् ॥ १३६ ॥

समयाद्यापनायाम् । ७ । २ । १३७ ।

अस्मात्कालक्षेपे गम्ये कृग्योगे डाच् स्यात् । समया करोति कालं क्षिपतीत्यर्थः ॥ १३७ ॥

सपत्रनिष्पत्रादतिव्यथने । ७ । २ । १३८ ।

आभ्यां कृग्योगेऽतिपीडने गम्ये डाच् स्यात् । सपत्रा करोति मृगम् ।

निष्पत्रा करोति। अतिव्यथनइति किम्। सपत्रं करोति तरुं सेकः॥

निष्कुलान्निष्कोषणे। ७। २। १३९।

अस्मात्कृग्योगे निष्कोषणेऽर्थे डाच् स्यात्। निष्कुला करोति दाडिमम्। निष्कोषणइति किम्। निष्कुलं करोति शत्रुम्॥ १३९॥

प्रियसुखादानुकूल्ये। ७। २। १४०।

आभ्यां कृग्योगे आनुकूल्ये गम्ये डाच् स्यात्। प्रिया करोति। सुखा करोति गुरुम्। आनुकूल्य इति किम्। प्रियं करोति साम। सुखं करोति पौषधव्रतम्॥१४०॥

दुःखात्प्रातिकूल्ये। ७। २। १४१।

दुःखात्प्रातिकूल्ये गम्ये कृग्योगे डाच् स्यात्। दुःखा करोति शत्रुम्। प्रातिकूल्यइति किम्। दुःखं करोति रोगः॥ १४१॥

शूलात्पाके। ७। २। १४२।

शूलात्पाके गम्ये कृग्योगे डाच् स्यात्। शूला करोति मांसम्॥१४२॥

सत्यादशपथे। ७। २। १४३।

अशपथार्थात्सत्यात्कृग्योगे डाच् स्यात्। सत्या करोति वणिग् भाण्डम्। अशपथइति किम्। सत्यं करोति शपथमित्यर्थः॥ १४३॥

मद्रभद्राद्वपने। ७। २। १४४।

आभ्यां मुण्डने गम्ये कृग्योगे डाच् स्यात्। मद्रा करोति। भद्रा करोति नापितः। वपनइति किम्। मद्रं करोति। भद्रं करोति साधुः॥

अव्यक्ताऽनुकरणादनेकस्वरात्कृभ्वस्तिना अनितौ द्विश्च। ७। २। १४५।

यस्मिन् ध्वनौ वर्णा विशेषरूपेण नाभिव्यज्यन्ते सोऽव्यक्तः। तदनुकरणार्थादनेकस्वरादनितिपरात्कृभ्वस्तियोगे डाज्वा स्यात् । द्विश्चास्य प्रकृतिः। पटपटा करोति भवेत् स्याद्वा। अनेकस्वरादिति किम्। खाट्करोति। अनिताविति किम् । पटिति करोति ॥ १४५ ॥

इतावतो लुक् । ७। २। १४६ ।

अव्यक्तानुकरणस्यानेकस्वरस्य योऽदिति तस्येति शब्दे लुक् स्यात् । पटिति ॥ १४६ ॥

न द्वित्वे । ७ । २ । १४७ ।

अव्यक्तानुकरणस्यानेकस्वरस्य द्वित्वे सति इतौ परेऽतो लुम् स्यात्। पटत्पटदिति ॥ १४७ ॥

तो वा । ७। २। १४८ ।

द्वित्वेऽव्यक्तानुकरणस्यानेकस्वरस्यातस्तो लुग्वा स्यात् । पटत्पटेति करोति । पटत्पटदिति वा ॥ १४८ ॥

डाच्यादौ । ७। २। १४९ ।

अव्यक्तानुकरणस्यानेकस्वरस्याच्छब्दान्तस्य द्वित्वे सत्याद्यतस्तो डाचि लुक् स्यात् । पटपटा करोति। आदाविति किम्। पतपता करोति ॥

बहल्पार्थात्कारकादिष्टानिष्टेप्शस्।७।२।१५०

बह्वल्पार्थाभ्यां कारकवाचिभ्यां यथासङ्ख्यमिष्टेऽनिष्टे च विषये शस् पिद्वा स्यात् । इष्टं प्राशित्रादि । अनिष्टं श्राद्धादि । ग्रामे बहवो बहुशो वा ददाति । एवं भूरिशः। अल्पमल्पशो वा धनं दत्ते श्राद्धे । एवं स्तोकशः। इष्टानिष्टइति किम् । बहु दत्ते श्राद्धे । अल्पं प्राशित्रे ॥

संख्यैकार्थाद्वीप्सायां शस् । ७। २।१५१ ।

सङ्ख्यैकार्थाभ्यां कारकार्थाभ्यां वीप्सायां द्योत्यमानायां शस्वा स्यात् । एकैकमेकशो वा दत्ते । माषंमाषं माषशो वा देहि । संख्यैकार्थादिति किम् । माषौ माषौ दत्ते । वीप्सायामिति किम् । द्वौ दत्ते ॥१५१॥

सङ्ख्यादेः पादादिभ्यो दानदण्डे चाकल्लुक् च । ७ । २ । १५२ ।

सङ्ख्यार्थादवयवात्परे ये पादादयस्तदन्ताद्दाने दण्डे वीप्सायां च विषये ऽकल् स्यात् । तद्योगे च प्रकृतेरन्तस्य लुक् । द्विपदिकां दत्ते दण्डितो भुंक्ते वा । एवं द्विशतिकाम् ॥ १५२ ॥

तीयाट्टीकण् न विद्या चेत् । ७ । २ । १५३ ।

तीयान्तादविद्यार्थात् स्वार्थे टीकण् वा स्यात् । द्वितीयम् । द्वैतीयीकम् । विद्या तु द्वितीया ॥ १५३ ॥

निष्फले तिलात्पिञ्जपेजौ । ७ । २ । १५४ ।

निष्फलार्थात्तिलादेतौ स्याताम् । तिलपिञ्जः । तिलपेजः ॥१५४॥

प्रायोऽतोर्द्वयसट्मात्रट् । ७ । २ । १५५ ।

अत्वन्तात्स्वार्थे एतौ स्याताम् । यथालक्ष्यम् । यावद्द्वयसम् । यावन्मात्रम् ॥ १५५ ॥

वर्णाऽव्ययात् स्वरूपे कारः । ७ । २ । १५६ ।

एभ्यः स्वरूपार्थेभ्यः कारो वा स्यात् । अकारः । ॐकारः । स्वरूप इति किम् । अः विष्णुः ॥ १५६ ॥

रादेफः । ७ । २ । १५७ ।

वा स्यात् । रेफः । प्रायोऽधिकाराद्रकारः ॥ १५७ ॥

नामरूपभागाद्धेयः । ७ । २ । १५८ ।

एभ्यः स्वार्थे धेयो वा स्यात् । नामधेयम् । रूपधेयम् । भागधेयम् ॥

मर्त्तादिभ्यो यः । ७ । २ । १५९ ।

एभ्यो यः स्यात् । मर्त्यः । सूर्यः ॥ १५९ ॥

नवादीनतनत्नं च नू चास्य । ७ । २ । १६० ।

नवात्स्वार्थे एते यश्च वा स्युः तद्योगे च नवस्य नूः । नवीनम् । नूतनम् । नूत्नम् । नव्यम् ॥ १६० ॥

प्रात्पुराणे नश्च । ७ । २ । १६१ ।

पुराणार्थात्प्रात् नईनतनत्नाश्च स्युः प्रणम् । प्रीणम् । प्रतनम् । प्रत्नं पुराणम् ॥ १६१ ॥

देवात्तल् । ७ । २ । १६२ ।

स्वार्थे वा स्यात् । देवता ॥ १६२ ॥

होत्राया ईयः । ७ । २ । १६३ ।

स्वार्थे वा स्यात् । होत्रीयम् ॥ १६३ ॥

भेषजादिभ्यष्ट्यण् । ७ । २ । १६४ ।

स्वार्थे वा स्यात् । भैषज्यम् । आनन्त्यम् ॥ १६४ ॥

प्रज्ञादिभ्योऽण् । ७ । २ । १६५ ।

स्वार्थेऽण् वा स्यात् । प्राज्ञः । वाणिजः ॥ १६५ ॥

श्रोत्रौषधिकृष्णाच्छरीरभेषजमृगे । ७ । २ । १६६ ।

एभ्यो यथासङ्ख्यं शरीराद्यर्थेभ्यः स्वार्थे ऽण् वा स्यात् । श्रौत्रं वपुः । औषधं भैषजम् । कार्ष्णो मृगः ॥ १६६ ॥

कर्म्मणः सन्दिष्टे । ७ । २ । १६७ ।

सन्दिष्टार्थात्कर्म्मणः स्वार्थेऽण् वा स्यात् । अन्येनान्योऽन्यस्मै यदाह त्वयेदं कार्यं इति । तत्सन्दिष्टं कार्मणम् ॥१६७ ॥

वाच इकण् । ७ । २ । १६८ ।

सन्दिष्टार्थात् स्यात् । वाचिकं वक्ति ॥१६८ ॥

विनयादिभ्यः । ७ । २ । १६९ ।

स्वार्थे इकण् वा स्यात् । वैनयिकम् । सामयिकम् ॥ १६९ ॥

उपायाद् ह्रस्वश्च । ७ । २ । १७० ।

स्वार्थे इकण् वा स्यात् । तद्योगे च ह्रस्वः। औपयिकम् ॥१७०॥

मृदस्तिकः । ७ । २ । १७१ ।

स्वार्थे वा स्यात् । मृत्तिका । मृत् ॥ १७१ ॥

सस्नौ प्रशस्ते । ७ । २ । १७२ ।

प्रशस्तार्थान्मृदः सस्नौ वा स्याताम् । मृत्सा । मृत्स्ना ॥ १७२ ॥

इत्याचार्यहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनलघुवृत्तौ सप्तमस्याध्यायस्य द्वितीयः पादः समाप्तः ॥

अर्हम्

प्रकृते मयट् । ७ । ३ । १ ।

प्राचुर्येण प्राधान्येन वा कृतं प्रकृतम् । तदर्थात्स्वार्थे मयट् स्यात् । अन्नमयम् । पूजामयम् ॥ १ ॥

अस्मिन् । ७ । ३ । २ ।

प्रकृतार्थादस्मिन्निति विषये मयट् स्यात् । अपूपमयं पर्व ॥ २ ॥

तयोः समूहवच्च बहुषु । ७ । ३ । ३ ।

प्रकृतेऽस्मिन्निति च विषययोर्बह्वर्थात्समूहइव प्रत्ययः स्यात् । मयट् च । आपूपिकम् । अपूपमयम् । अपूपास्तत्पर्व वा ॥ ३ ॥

निन्द्ये पाशप् । ७ । ३ । ४ ।

निन्द्यार्थात्स्वार्थे पाशप् स्यात् । छान्दसपाशः ॥ ४ ॥

प्रकृष्टे तमप् । ७ । ३ । ५ ।

प्रकृष्टार्थात्तमप् स्यात् । शुक्लतमः कारकतमः ॥ ५ ॥

द्वयोर्विभज्ये च तरप् । ७ । ३ । ६ ।

द्वयोर्मध्ये प्रकृष्टे विभज्ये च वर्त्तमानात्तरप् स्यात् । पटुतरा स्त्री । साङ्काश्यकेभ्यः पाटलिपुत्रका आढ्यतराः ॥ ६ ॥

क्वचित्स्वार्थे । ७ । ३ । ७ ।

यथालक्ष्यं स्वार्थे तरप् स्यात् । अभिन्नतरकम् । उच्चैस्तराम् ॥ ७ ॥

किन्त्याद्येऽव्ययादसत्वे तयोरन्तस्याम् । ७ । ३ । ८ ।

किमस्त्याद्यन्तादेकारान्तादव्ययाच्च परयोस्तमप्तरपोरन्तस्याम् स्यात् । नचेत्तौ सत्वे द्रव्ये वर्त्तेते । किन्तराम् । किन्तमाम् । पचतितराम् । पचतितमाम् । पूर्वाह्णेतराम् । पूर्वाह्णेतमां भुंक्ते । अतितराम् । अतितमाम् । असत्वइति किम् । किन्तरं दारु ॥ ८ ॥

गुणाङ्गाद्वेष्ठेयसू । ७ । ३ । ९ ।

गुणप्रवृत्तिहेतुकात्तमप्तरपोर्विषये यथासङ्ख्यमेतौ वा स्याताम् । पटिष्ठः । पटुतमः । गरीयान् । गुरुतरः ॥९॥

त्यादेश्च प्रशस्तेरूपप् । ७ । ३ । १० ।

त्याद्यन्तान्नाम्नश्च प्रशस्तार्थाद्रूपप् स्यात् । पचतिरूपम् । दस्युरूपम् ॥ १० ॥

अतमबादेरीषदसमाप्ते कल्पप्देश्यप्देशीयर् । ७ । ३ । ११ ।

किञ्चिदसमाप्तार्थात्त्याद्यन्तवर्जादेते स्युः । पचतिकल्पम् । पचतिदेश्यम् । पचतिदेशीयम् । पटुकल्पा । पटुदेश्या । पटुदेशीया ॥११॥

नाम्नः प्राग्बहुर्वा । ७ । ३ । १२ ।

ईषदपरिसमाप्तार्थान्नाम्नः प्राग्बहुर्वा स्यात् । बहुपटुः । पटुकल्पः॥

न तमबादिः कपोऽच्छिन्नादिभ्यः । ७ । ३ । १३ ।

छिन्नादिवर्जाद्यः कप्रदन्तात्तमबादिर्न स्यात् । अयमेषामनयोर्वा प्रकृष्टः पटुकः । अच्छिन्नादिभ्यइति किम् । छिन्नकतमः ॥ १३ ॥

अनत्यन्ते । ७ । ३ । १४ ।

अनत्यन्तार्थात्कबन्तात्तमबादिर्न स्यात् । इदमेषामनयोर्वा प्रकृष्टं छिन्नकम् । भिन्नकम् ॥ १४ ॥

यावादिभ्यः कः । ७ । ३ । १५ ।

स्वार्थे कः स्यात् । यावकः । मणिकः ॥ १५ ॥

कुमारीक्रीडने यसोः । ७ । ३ । १६ ।

कुमारीणां यत्क्रीडनं तदर्थादीयस्वन्ताच्च स्वार्थे कः स्यात् । कन्दुकः । श्रेयस्कः ॥ १६ ॥

लोहितान्मणौ । ७ । ३ । १७ ।

अस्मान्मण्यर्थात्स्वार्थे को वा स्यात् । लोहितको मणिः । लोहितो मणिः ॥ १७ ॥

रक्ताऽनित्यवर्णयोः । ७ । ३ । १८ ।

लाक्षादिरक्तार्थादनित्यवर्णार्थाच्च लोहितात्को वा स्यात् । लोहितकः पटः । लोहितकमक्षि कोपेन ॥ १८ ॥

कालात् । ७ । ३ । १९ ।

कज्जलादिरक्तेऽनित्यवर्णे च वर्त्तमानात्कालात्को वा स्यात् । काल- एव कालकः पटः । कालकं मुखं शोकेन ॥ १९ ॥

शीतोष्णादृतौ । ७ । ३ । २० ।

आभ्यामृत्वऽर्थाभ्यां को वा स्यात् । शीतकः । उष्णकः ऋतुः ॥

लूनवियातात्पशौ । ७ । ३ । २१ ।

आभ्यां पश्वर्थाभ्यां को वा स्यात् । लूनकः। वियातकः पशुः ॥२१॥

स्नाताद्वेदसमाप्तौ । ७ । ३ । २२ ।

अस्यां गम्यायां स्नातात्कः स्यात् । वेदं समाप्य स्नातः स्नातकः ॥ २२ ॥

तनुपुत्राणुबृहतीशून्यात्सूत्रकृत्रिमनिपुणा-च्छादनरिक्ते । ७ । ३ । २३ ।

तन्वादिभ्यो यथासंख्यं सूत्राद्यर्थेभ्यः कः स्यात् । तनुकं सूत्रम् । पुत्रकः कृत्रिमः । अणुको निपुणः । बृहतिका आच्छादनम् । शून्यको रिक्तः ॥ २३ ॥

भागेऽष्टमाञ्ञः । ७ । ३ । २४ ।

भागार्थादस्माञ्ञो वा स्यात् । आष्टमो भागः ॥२४॥

षष्ठात् । ७ । ३ । २५ ।

अस्माद्भागार्थाञ्ञो वा स्यात् । षाष्ठो भागः ॥ २५ ॥

मानेकश्च । ७ । ३ । २६ ।

मीयते येन तद्रूपभागार्थात् षष्ठात्को ञश्च वा स्यात् । षष्ठकः षाष्ठो-भागः मानं चेत् ॥ २६ ॥

एकादाकिन्चाऽसहाये । ७ । ३ । २७ ।

असहायार्थादेकादाकिन्कश्च स्यात् । एकाकी । एककः ॥२७॥

प्रागनित्यात्कप् । ७ । ३ । २८ ।

नित्यसङ्कीर्त्तनात्प्राग्येऽर्थास्तेषु द्योतेषु कबधिकृतो ज्ञेयः। कुत्सितो ऽल्पोऽज्ञातो वाऽश्वः अश्वकः ॥ २८ ॥

त्यादिसर्वादेः स्वरेष्वऽन्त्यात्पूर्वो-ऽक् । ७ । ३ । २९ ।

त्याद्यन्तस्य सर्वादेश्च स्वराणां मध्ये योऽन्त्यस्वरस्तस्मात्पूर्वोऽक् स्यात् । प्रागनित्यात् । कुत्सितमल्पमज्ञातं वा पचति पचतकि । सर्वके । विश्वके ॥ २९ ॥

युष्मदस्मदोऽसोभादिस्यादेः । ७ । ३ । ३० ।

अनयोः सउभादिवर्जस्याद्यन्तयोः स्वरेष्वन्त्यात्पूर्वोऽक् स्यात् । त्वयका । मयका । असोभादिस्यादेरिति किम् । युष्मकासु । युवकयोः । युवकाभ्याम् ॥ ३० ॥

अव्ययस्य को द् च । ७ । ३ । ३१ ।

प्रागनित्याद्येऽर्थास्तेषु द्योतेष्वव्ययस्य स्वरात्पूर्वोऽक् स्यात्। तद्योगे चाऽस्य को द् । कुत्सिताद्युच्चैः उच्चकैः । एवं धिक् । धकिद् ॥ ३१ ॥

तूष्णीकां । ७ । ३ । ३२ ।

तूष्णीमो मः प्राका इत्यन्तो निपात्यः प्राग्नित्यात्। कुत्सितादितूष्णीं तूष्णीकामास्ते ॥ ३२ ॥

कुत्सिताल्पाज्ञाते । ७ । ३ । ३३ ।

कुत्सिताद्युपाधिकार्थाद्यथायोगं कबादयः स्युः । अश्वकः । पचतकि । उच्चकैः ॥ ३३ ॥

अनुकम्पातद्युक्तनीत्योः । ७ । ३ । ३४ ।

अनुकम्पायां तद्युक्तायां च नीतौ गम्यायां यथायोगं कबादयः स्युः । पुत्रकः । स्वपिषकि । पुत्रकः । एहकि । उत्सङ्गके उपविश । कर्दमकेनाऽसिदिग्धकः ॥ ३४ ॥

अजातेर्नृनाम्नो बहुस्वरादियेकेलं वा । ७ । ३ । ३५ ।

मनुष्यनाम्नो बहुस्वरादनुकम्पायां गम्यायां एते वा स्युः नचेन्नृनामजात्यर्थम् । देवियः । देविकः । देविलः । देवदत्तकः । अजातेरिति किम् । महिषकः ॥ ३५ ॥

वोपादेरडाकौ च । ७ । ३ । ३६ ।

उपपूर्वादजात्यर्थाद्बहुस्वरान्नृनाम्नोऽनुकम्पायामडाकावियेकेलाश्च वा स्युः । उपडः । उपकः । उपियः । उपिकः । उपिलः । उपेन्द्रदत्तकः ॥

ऋवर्णोवर्णात्स्वरादेरादेर्लुक् प्रकृत्या च । ७ । ३ । ३७ ।

ऋवर्णान्तोवर्णान्ताभ्यां परस्यानुकम्पोत्पन्नस्य स्वरादेः प्रत्ययस्यादेर्लुक् स्यात् । लुकि तु सति प्रकृतेः प्रकृतिः । मातृयः । मातृकः । मातृलः । वायुयः । वायुकः । वायुलः । स्वरादेरिति किम् । भद्रबाहुकः॥

लुक्युत्तरपदस्य कप् । ७ । ३ । ३८ ।

नृनाम्नो यदुत्तरपदं तस्य ते लुग्वेति लुकि सति ततः कप् स्यात् । अनुकम्पायां गम्यायां । देवदत्ता । लुकि देवी । अनुकम्पिताऽसौ देवका । उत्तरपदस्येति किम् । दत्तिका ॥ ३८ ॥

लुक्चाऽजिनान्तात् । ७ । ३ । ३९ ।

अजिनान्तान्नृनाम्नोऽनुकम्पायां कप् स्यात् । तद्योगे च लुगुत्तरपदस्य । व्याघ्रकः ॥ ३९ ॥

षड्वर्जैकस्वरपूर्वपदस्य स्वरे । ७ । ३ । ४० ।

षड्वर्जमेकस्वरं पूर्वपदं यस्य तस्योत्तरपदस्यानुकम्पार्थे स्वरादौ प्रत्यये लुक् स्यात् । अनुकम्पितो वागाशीः । वाचियः । षड्वर्जेत्यादिति किम् । उपेन्द्रेण दत्तः उपेन्द्रदत्तः। सोऽनुकम्पित उपडः । षडङ्गुलिः षडियः । स्वरइति किम् । वागाशीर्दत्तकः ॥ ४० ॥

द्वितीयात्स्वरादूर्ध्वम् । ७ । ३ । ४१ ।

अनुकम्पार्थे स्वरादौ प्रत्यये प्रकृतेर्द्वितीयात् स्वरादूर्द्ध्वं लुक् स्यात् । देवियः ॥ ४१ ॥

सन्ध्यक्षरात्तेन । ७ । ३ । ४२ ।

अनुकम्पार्थे स्वरादौ प्रत्यये प्रकृतेर्द्वितीयात्सन्ध्यक्षरस्वरादूर्द्ध्वं तेन सन्ध्यक्षरेण सहलुक् स्यात् । कुवियः । कुहिकः ॥ ४२ ॥

शेवलाद्यादेस्तृतीयात् । ७ । ३ । ४३ ।

शेवलादिपूर्वपदस्य नृनाम्नोऽनुकम्पार्थे स्वरादौ प्रत्यये तृतीयात् स्वरादूर्द्ध्वं लुक् स्यात् । शेवलियः । सुपरियः ॥ ४३ ॥

क्वचित्तुर्यात् । ७ । ३ । ४४ ।

अनुकम्पोत्पन्ने स्वरादौ प्रत्यये यथालक्ष्यं चतुर्थात्स्वरादूर्द्ध्वं लुक् स्यात् । बृहस्पतियः । क्वचिदिति किम् । उपडः ॥ ४४ ॥

पूर्वपदस्य वा । ७ । ३ । ४५ ।

अनुकम्पार्थे स्वारादौ प्रत्यये पूर्वपदस्य लुग्वा स्यात् । दत्तियः । देवियः ॥ ४५ ॥

ह्रस्वे । ७ । ३ । ४६ ।

ह्रस्वार्थाद्यथायोगं कबादिः स्यात् । पटकः । पचतकि ॥ ४६ ॥

कुटीशुण्डाद्रः । ७ । ३ । ४७ ।

आभ्यां ह्रस्वार्थाभ्यां रः स्यात् । कुटीरः । शुण्डारः ॥ ४७ ॥

शम्या रुरौ । ७ । ३ । ४८ ।

अस्मात् ह्रस्वार्थादेतौ स्याताम् । शमीरुः । शमीरः ॥ ४८ ॥

कुत्वा डुपः । ७ । ३ । ४९ ।

अस्मात् ह्रस्वार्थात् डुपः स्यात् । कुतुपः ॥ ४९ ॥

कासूगोणीभ्यां तरट् । ७ । ३ । ५० ।

आभ्यां ह्रस्वार्थाभ्यां तरट् स्यात् । कासूतरी । गोणीतरी ॥ ५० ॥

वत्सोक्षाश्वर्षभाद् ह्रासे पित् ।७।३।५१।

एभ्यः स्वप्रवृत्तिहेतोर्ह्रासे गम्ये तरट् पित् स्यात् । वत्सतरः । उक्षतरः । अश्वतरः । ऋषभतरः ॥ ५१ ॥

वैकाद्द्वयोर्निर्द्धार्ये डतरः ।७। ३।५२।

एकाद्द्वयोरेकस्मिन् निर्द्धार्येऽर्थे डतरो वा स्यात् । एकतरः एकको वा भवतोः कठः पटुर्गन्ता चैत्रो दण्डी वा ॥ ५२ ॥

यत्तत्किमन्यात् । ७ । ३ ।५३ ।

एभ्यो द्वयोरेकस्मिन्निर्द्धार्येऽर्थे वर्त्तमानेभ्यो डतरः स्यात् । यतरो भवतोः कठादिस्ततर आगच्छेत् । एवं कतरः। अन्यतरः ॥५३ ॥

बहूनां प्रश्ने डतमश्च वा ।७। ३ । ५४।

यदादिभ्यो बहुनां मध्ये निर्द्धार्यार्थेभ्यः प्रश्ने डतमोडतरश्च वा स्यात् । यतमो यतरो वा भवतां कठस्ततरस्ततमो वा यातु । एवं कतमः। कतरः। अन्यतमः । अन्यतरः पक्षे यको यो वा । सकः स वा भवतां कठइत्यादि ॥ ५४ ॥

वैकात् । ७। ३ । ५५ ।

एकाद्बहुनां मध्ये निर्द्धायार्थात् डतमो वा स्यात् । एकतमः । एककः। एको वा भवतां कठः ॥ ५५ ॥

क्तात्तमबादेश्चानत्यन्ते । ७। ३ । ५६ ।

क्तान्तात्केवलात्तमबाद्यन्ताच्चानत्यन्तार्थात्कप् स्यात् । अनत्यन्तं भिन्नं भिन्नकम् । भिन्नतमकम् । भिन्नतरकम् ॥ ५६ ॥

न सामिवचने । ७ । ३ । ५७ ।

अर्द्धवचने उपपदे अनत्यन्तार्थात् क्तान्तात्केवलात्तमबाद्यन्ताच्च कप् न स्यात्। सामिअनत्यन्तं भिन्नम्। अर्द्धमनत्यन्तं भिन्नम् ॥५७॥

नित्यं ञजिनोऽण्। ७। ३। ५८।

ञजिनन्तात्स्वार्थे नित्यमण् स्यात्। व्यावक्रोशी। साङ्कोटिनम् ॥ ५८ ॥

विसारिणो मत्स्ये। ७। ३। ५९।

अस्मान्मत्स्यार्थात् स्वार्थेऽण् स्यात्। वैसारिणो मत्स्यः ॥ ५९॥

पूगादमुख्यकाञ्ञ्यो द्रिः। ७। ३। ६०।

नानाजातीया अनियतवृत्तयोऽर्थकामप्रधानाः सङ्घाः पूगास्तदर्थात्स्वार्थे ञ्यो द्रिः स्यात्। नचेत्पूगार्थं मुख्यार्थकान्तम्। लौहध्वज्यः। लोहध्वजाः। अमुख्यकादिति किम्। देवदत्तकः पूगः॥ ६० ॥

व्रातादस्त्रियाम्। ७। ३। ६१।

नानाजातीया अनियत्तवृत्तयः शरीरायासजीविनः सङ्घा व्राताः। तदर्थादस्त्रियां स्वार्थे ञ्यो द्रिः स्यात्। कापोतपाक्यः। स्त्रीतु कपोतपाका॥ ६१ ॥

शस्त्रजीविसंघाञ्ञ्यड् वा। ७। ३। ६२।

एतदर्थात्स्वार्थे द्रिर्ञ्यड्वा स्यात्। शाबर्यः। शबराः। पुलिन्दाः। पक्षे शबरः। संघादिति किम्। वागुरः ॥ ६२ ॥

वाहीकेष्वब्राह्मणराजन्येभ्यः। ७। ३। ६३।

एषु यः शस्त्रजीविसङ्घो ब्राह्मणराजन्यवर्जस्तदर्थात्स्वार्थे द्रिर्ञ्यट् स्यात्। कौण्डीविश्याः। कुण्डीविशाः। अब्राह्मणेत्यादीति किम्। गौपालिः राजन्यः ॥ ६३ ॥

वृकाट्टेण्यण् । ७ । ३ । ६४ ।

वृकादशस्त्रजीविसंघार्थात् स्वार्थे टेण्यण् द्विः स्यात् । वार्केण्यः ॥ ६४ ॥

यौधेयादेरञ् । ७ । ३ । ६५ ।

एभ्यः शस्त्रजीविसंघार्थेभ्याऽञ् द्विः स्यात् । यौधेयः । धार्तेयः ॥ ६५ ॥

पर्श्वादेरण् । ७ । ३ । ६६ ।

एभ्यः शास्त्रजीविसंघार्थेभ्यो स्वार्थेऽण् द्विः स्यात् । पार्शवः । राक्षसः ॥ ६६ ॥

दामन्यादेरीयः । ७ । ३ । ६७ ।

एभ्यः शस्त्रजीविसंघार्थेभ्यः स्वार्थे ईयो द्विः स्यात् । दामनीयः । औलपीयः ॥ ६७ ॥

श्रुमच्छमीवच्छिखावच्छालावदूर्णावद्विद्-भृदभिजितो गोत्रेऽणो यञ् । ७ । ३ । ६८ ।

एभ्यो गोत्राऽणन्तेभ्यः स्वार्थे यञ् द्विः स्यात् । श्रौमत्यः । शामीवत्यः । शैखावत्यः । शालावत्यः । और्णावत्यः । वैदभृत्यः । आभिजित्यः ॥ ६८ ॥

समासान्तः । ७ । ३ । ६९ ।

अतः परं विधास्यमानं समासस्यावयवः स्यात् । ततस्तस्य तत्तत् समाससंज्ञा । सुजम्भे सुजम्भानौ स्त्रियौ । उपधुरम् । द्विधुरी । स्वक्चिनी ॥ ६९ ॥

न किमः क्षेपे । ७ । ३ । ७० ।

निन्दार्थात्किमः परं यदृगादितदन्तात्समासात् समासान्तो न स्यात् । किंधूः । किंसखा । क्षेपइति किम् । केषां राजा किंराजः ॥

नञ्तत्पुरुषात् । ७ । ३ । ७१ ।

अस्मात्समासान्तो न स्यात् । अनृक् । अराजा । तत्पुरुषादिति किम् । न विद्यते धूरस्याधुरं शकटम् ॥ ७१ ॥

पूजास्वतेः प्राक्टात् । ७ । ३ । ७२ ।

पूजार्थस्वतिभ्यां परं यदृगादितदन्तात्टात्प्राग् यः समासान्तः स न स्यात् । सुधूः । अतिधूरियम् । पूजेति किम् । अतिराजोऽरिः । प्राग्टादिति किम् । स्वङ्गुलं काष्ठम् ॥ ७२ ॥

बहोर्डे । ७ । ३ । ७३ ।

डस्य प्राप्तिर्यतस्ततः समासान्तो डः कच्च न स्यात् । उपबहवो घटाः । डइति किम् । प्रियबहुकः ॥ ७३ ॥

इच् युद्धे । ७ । ३ । ७४ ।

युद्धे यः समास उक्तस्तस्मादिच् समासान्तः स्यात् । केशाकेशि ॥

द्विदण्ड्यादिः । ७ । ३ । ७५ ।

एते इजन्ताः साधवः स्यु । द्विदण्डि हन्ति । उभादन्ति ॥ ७५ ॥

ऋक्पूःपथ्यपोऽत् । ७ । ३ । ७६ ।

ऋगाद्यन्तात्समासादत् समासान्तः स्यात् । अर्द्धर्चः । त्रिपुरम् । जलपथः । द्वीपम् ॥ ७६ ॥

धुरोऽनक्षस्य । ७ । ३ । ७७ ।

धुरन्तात्समासादत् समासान्तः स्यात् । चेद्धूर्नाक्षस्य । राजधुरा । अनक्षस्येति किम् । अक्षधूः ॥ ७७ ॥

सङ्ख्यापाण्डूदक्कृष्णाद्भूमेः ।७।३।७८।

सङ्ख्यार्थात्पाण्ड्वादेश्च परो यो भूमिस्तदन्तादत्समासान्तः स्यात् । द्विभूमम् । पाण्डुभूमम् । उदग्भूमम् । कृष्णभूमम् ॥ ७८ ॥

उपसर्गादध्वनः । ७ । ३ । ७९ ।

उपसर्गाद्धातुयोग्यात्प्रादेः परादध्वनो अः समासान्तः स्यात् । प्राध्वो रथः ॥ ७९ ॥

समवान्धात्तमसः । ७ । ३ । ८० ।

एभ्यः परोयस्तमस्तदन्तादत्समासान्तः स्यात् । सन्तमसम् । अव तमसं । अन्धतमसम् ॥ ८० ॥

तप्तान्ववाद्रहसः । ७ । ३ । ८१ ।

तप्तादिपूर्वोयो रहस्तदन्तादः समासान्तः स्यात् । तप्तरहसम् । अनुरहसम् । अवरहसम् ॥ ८१ ॥

प्रत्यन्ववात्सामलोम्नः ।७ । ३ ।८२।

एभ्यः परौ यौ सामलोमानौ तदन्तादः समासान्तः स्यात् । प्रतिसामम् । अनुसामम् । अवसामम् । प्रतिलोमः। अनुलोमः। अवलोमः॥

ब्रह्महस्तिराजपल्याद्वर्चसः ।७।३।८३।

ब्रह्मादिपूर्वाद्वर्चसन्तादत्समासान्तः स्यात् । ब्रह्मवर्चसम् । हस्तिवर्चसम् । राजवर्चसम् । पल्यवर्चसम् ॥ ८३ ॥

प्रतेरुरसः सप्तम्याः । ७ । ३ । ८४ ।

प्रतिपूर्वात्सप्तम्यन्तोरसन्तादद‍न्तः स्यात् । प्रत्युरसम् । सप्तम्याइति किम् । प्रत्युरः ॥ ८४ ॥

अक्ष्णोऽप्राण्यङ्गे । ७ । ३ । ८५ ।

अप्राण्यङ्गार्थादक्ष्यन्ताददन्तः स्यात् । लवणाक्षम् । अप्राण्यङ्गइति किम् । अजाक्षि ॥ ८५ ॥

सङ्कटाभ्याम् । ७ । ३ । ८६ ।

आभ्यां परादक्ष्यन्ताददन्तः स्यात् । समक्षम् । कटाक्षः ॥ ८६ ॥

प्रतिपरोनोरव्ययीभावात् । ७ । ३ । ८७ ।

प्रत्यादिपूर्वादक्ष्यन्तादव्ययीभावादतस्यात् । प्रत्यक्षम् । परोक्षम् । अन्वक्षम् ॥ ८७ ॥

अनः । ७ । ३ । ८८ ।

अन्नन्तादव्ययीभावादः स्यात् । उपतक्षम् ॥ ८८ ॥

नपुंसकाद्वा । ७ । ३ । ८९ ।

अन्नन्तं यत्क्लीबं तदन्तादव्ययीभावादद्वा स्यात् । उपचर्म्मम् । उपचर्म्म ॥ ८९ ॥

गिरिनदीपौर्णमास्याग्रहायण्यपञ्चमवर्ग्याद्वा । ७ । ३ । ९० ।

एतदन्तात्पञ्चमवर्गवर्जवर्गान्ताच्चाव्ययीभावादद्वा स्यात् । अन्तगिरम् । अन्तर्गिरि । उपनदम् । उपनदि । उपपौर्णमासम् । उपपौर्णमासि । उपाग्रहायणम् । उपाग्रहायणि । उपस्रुचम् । उपस्रुक् ॥ ९० ॥

संख्याया नदीगोदावरीभ्याम् । ७ । ३ । ९१ ।

सङ्ख्यार्थात्परौ यावेतौ तदन्तादव्ययीभावादः स्यात् । पञ्चनदम् । द्विगोदावरम् ॥ ९१ ॥

शरदादेः । ७ । ३ । ९२ ।

शरदाद्यन्तादव्ययीभावादत् स्यात् । उपशरदम् । प्रतित्यदम् ॥

जराया जरस् च । ७ । ३ । ९३ ।

जरान्तादव्ययीभावादत् स्यात् । तद्योगे च जराया जरस् । उप-जरसम् ॥ ९३ ॥

सरजसोपशुनानुगवम् । ७ । ३ । ९४ ।

एतेऽव्ययीभावा अदन्ता निपात्याः । सरजसं भुङ्क्ते । उपशुन-मास्ते । अनुगवमनः ॥ ९४ ॥

जातमहद्वृद्धादुक्ष्णः कर्मधारयात् ।७।३।९५।

एभ्यः परो य उक्षा तदन्तात्कर्मधारयादत् स्यात् । जातोक्षः। महोक्षः। वृद्धोक्षः । कर्मधारयादिति किम् । जातस्योक्षा जातोक्षा ॥ ९५ ॥

स्त्रियाः पुंसो द्वन्द्वाच्च । ७ । ३ । ९६ ।

स्त्रियाः परो यः पुंमांस्तदन्तात् द्वन्द्वात्कर्मधारयाच्चात् स्यात् । स्त्रीपुंसौ । स्त्रीपुंसः शिखण्डी ॥ ९६ ॥

ऋक्सामर्ग्यजुषधेन्वनडुहवाङ्मनसा-ऽहोरात्ररात्रिंदिवनक्तंदिवाऽहर्दि-वोर्वष्ठीवपदष्ठीवाक्षिभ्रुवदारग-वम् । ७ । ३ । ९७ ।

एते द्वन्द्वा अदन्ता निपात्याः । ऋक्सामे । ऋग्यजुषम् । धेन्वनडुहौ । वाङ्मनसे । अहोरात्रः । रात्रिंदिवम् । नक्तंदिवम् । अहर्दिवम् । ऊर्व-ष्ठीवम् । पदष्ठीवम् । अक्षिभ्रुवम् । दारगवम् ॥ ९७ ॥

चवर्गदषहः समाहारे । ७ । ३ । ९८ ।

एतदन्ताद्द्वन्द्वात्समाहारार्थादत् स्यात् । वाक्त्वचम् । संपद्विपदम् । वाक्त्विषम् । छत्रोपानहम् । समाहारइति । किम् प्रावृट्शरद्भ्याम् ॥

द्विगोरन्नह्नोऽट् । ७ । ३ । ९९ ।

अन्नन्तादहन्नन्ताच्च समाहारार्थाद्द्विगोरट् स्यात् । पञ्चतक्षी । पञ्चतक्षम् । द्व्यहः । द्विगोरिति किम् । समह्नः ॥ ९९ ॥

द्वित्रेरायुषः । ७ । ३ । १०० ।

आभ्यां परो य आयुस्तदन्तात्समाहारार्थाद्द्विगोरट् स्यात् । द्व्यायुषम् । त्र्यायुषम् ॥१०० ॥

वाञ्जलेरलुकः । ७ । ३ । १०१ ।

द्वित्रिभ्यां परो योऽञ्जलिस्तदन्ताद्द्विगोरट् वा स्यात् । नचेद्द्विगुस्तद्धितलुगन्तः । द्व्यञ्जलम् । द्व्यञ्जलि । त्र्यञ्जलमयम् । त्र्यञ्जलिमयम् । अलुक इति किम् । द्व्यञ्जलिर्घटः ॥ १०१ ॥

खार्या वा । ७ । ३ । १०२ ।

खार्यन्ताद्द्विगोरलुकोऽड् वा स्यात । द्विखारम् । द्विखारि । पञ्चखारधनः । पञ्चखारीधनः ॥ १०२ ॥

वार्द्धाच्च । ७ । ३ । १०३ ।

अर्द्धात् परा या खारी तदन्तात्समासादलुकोऽड्वा स्यात् । अर्द्धखारम् । अर्द्धखारी ॥ १०३ ॥

नावः । ७ । ३ । १०४ ।

अर्द्धात्परो यो नौस्तदन्तात्समासाद्द्विगोश्चाऽलुकोऽद् स्यात् । अर्द्धनावम् । अर्द्धनावी । पञ्चनावम् । अलुक इत्येव द्विनौः ॥ १०४ ॥

गोस्तत्पुरुषात । ७ । ३ । १०५ ।

गवन्तात्तत्पुरुषादलुकोऽट् स्यात् । राजगवी । तत्पुरुषादिति किम् । चित्रगुः । अलुक इत्येव । पञ्चगुः पटः ॥ १०५ ॥

राजन्सखेः । ७ । ३ । १०६ ।

एतदन्तात्तत्पुरुषादट् स्यात् । पञ्चराजी । राजसखः ॥ १०६ ॥

राष्ट्राख्याद्ब्रह्मणः । ७ । ३ । १०७ ।

राष्ट्रार्थात्परो यो ब्रह्मा तदन्तात्तत्पुरुषादट् स्यात् । सुराष्ट्रब्रह्मः । राष्ट्राख्यादिति किम् । देवब्रह्मा नारदः ॥ १०७ ॥

कुमहद्भ्यां वा । ७ । ३ । १०८ ।

आभ्यां परो यो ब्रह्मा तदन्तात्तत्पुरुषादट् वा स्यात् । कुब्रह्मः । कुब्रह्मा । महाब्रह्मः । महाब्रह्मा ॥ १०८ ॥

ग्रामकौटात्तक्ष्णः । ७ । ३ । १०९ ।

आभ्यां परो यस्तक्षा तदन्तात्तत्पुरुषादट् स्यात् । ग्रामतक्षः । कौटतक्षः ॥ १०९ ॥

गोष्ठातेः शुनः । ७ । ३ । ११० ।

आभ्यां परो यः श्वा तदन्तात्तत्पुरुषादट् स्यात् । गोष्ठश्वः । अतिश्वो वराहः ॥ ११० ॥

प्राणिन उपमानात् । ७ । ३ । १११ ।

प्राण्यर्थादुपमानात्परो यः श्वा तदन्तात्तत्पुरुषादट् स्यात् । व्याघ्रश्वः । प्राणिनइति किम् । फलकश्वा ॥ १११ ॥

अप्राणिनि । ७ । ३ । ११२ ।

अप्राण्यर्थ उपमानवाची यः श्वा तदन्तात्तत्पुरुषादट् स्यात्। आकर्षश्वः। अप्राणिनीति किम् । वानरश्वा ॥ ११२ ॥

पूर्वोत्तरमृगाच्च सक्थ्नः । ७ । ३ । ११३ ।

एभ्य उपमानार्थाच्च परो यः सक्थिस्तदन्तात्तत्पुरुषादट् स्यात् । पूर्वसक्थम् । उत्तरसक्थम् । मृगसक्थम् । फलकसक्थम् ॥ ११३ ॥

उरसोऽग्रे । ७ । ३ । ११४ ।

अग्रं मुखं प्रधानं वा तदर्थो य उरस्तदन्तात्तत्पुरुषादट् स्यात् । अश्वोरसं सेनायाः । अश्वोरसं कविकम् ॥ ११४ ॥

सरोऽनोऽश्माऽयसो जातिनाम्नोः । ७ । ३ । ११५ ।

एतदन्तात्तत्पुरुषादट् स्यात् । यथासम्भवं जातावर्थे संज्ञाविषये च । जालसरसम् । उपानसम् । स्थूलाश्मः। कालायसम् । जातिनाम्नोरिति किम् । परमसरः ॥ ११५ ॥

अह्नः । ७ । ३ । ११६ ।

अहन्नन्तात्तत्पुरुषादट् स्यात् । परमाहः ॥ ११६ ॥

सङ्ख्यातादह्नश्च वा । ७ । ३ । ११७ ।

सङ्ख्यातात्परो योऽहा तदन्तात्तत्पुरुषादट् स्यात् । अह्नश्च वाऽह्नः । सङ्ख्याताह्नः । सङ्ख्याताहः ॥ ११७ ॥

सर्वांशसङ्ख्याऽव्ययात् । ७ । ३ । ११८ ।

सर्वादंशार्थात्संख्यार्थादव्ययाच्च परो योऽहा तदन्तात्तत्पुरुषादट् स्यात्। अह्नश्चाह्नः । सर्वाह्नः । पूर्वाह्नः । द्व्यह्नः पटः । अत्यह्नी कथा ॥ ११८ ॥

सङ्ख्यातैकपुण्यवर्षादीर्घाच्च रात्रेरत् । ७ । ३ । ११९ ।

एभ्यः सर्वांशादेश्च परो यो रात्रिस्तदन्तात्तत्पुरुषादत् स्यात्। सङ्ख्यातरात्रः। एकरात्रः। पुण्यरात्रः। वर्षारात्रः। दीर्घरात्रः। सर्वरात्रः। पूर्वरात्रः। द्विरात्रः। त्रिरात्रः। अतिरात्रः॥ ११९॥

पुरुषायुषद्विस्तावत्रिस्तावम्।७।३।१२०।

एते तत्पुरुषा अदन्ता निपात्याः। पुरुषायुषम्। द्विस्तावा। त्रिस्तावा वेदिः॥ १२०॥

श्वसो वसीयसः। ७। ३। १२१।

श्वसः परो यो वसीयांस्तदन्तात्तत्पुरुषादत् स्यात्। श्वोवसीयसम्॥ १२१॥

निसश्च श्रेयसः। ७। ३। १२२।

निसः श्वसश्च परो यः श्रेयांस्तदन्तात्तत्पुरुषादत् स्यात्। निःश्रेयसम्। श्वःश्रेयसम्॥ १२२॥

नञऽव्ययात्सङ्ख्याया डः।७।३।१२३।

आभ्यां परो यः सङ्ख्यार्थस्तदन्तात्तत्पुरुषाड्डः स्यात्। अदशाः। निस्त्रिंशः खड्गः॥ १२३॥

सङ्ख्याऽव्ययादंगुलेः।७।३।१२४।

आभ्यां परो योऽङ्गुलिस्तदन्तात्तत्पुरुषाड्डः स्यात्। द्व्यङ्गुलम्। निरङ्गुलम्॥ १२४॥

बहुव्रीहेः काष्ठे टः। ७। ३। १२५।

काष्ठार्थादङ्गुल्यन्ताद्बहुव्रीहेष्टः स्यात्। द्व्यङ्गुलं काष्ठम्। काष्ठइति किम्। पञ्चाङ्गुलिर्हस्तः॥ १२५॥

सक्थ्यऽक्ष्णः स्वाङ्गे।७।३।१२६।

स्वाङ्गार्थौ यौ सक्थ्यक्षी तदन्ताद्बहुव्रीहेष्टः स्यात् । दीर्घसक्थी । स्वक्षी । स्वाङ्गइति किम् । दीर्घसक्थ्यनः ॥ १२६ ॥

द्वित्रेर्मूर्ध्नो वा । ७ । ३ । १२७ ।

आभ्यां परो यो मूर्द्धा तदन्ताद्बहुव्रीहेष्टो वा स्यात् । द्विमूर्द्धः । द्विमूर्द्धा । त्रिमूर्द्धः । त्रिमूर्द्धा ॥ १२७ ॥

प्रमाणीसङ्ख्याड्डः । ७ । ३ । १२८ ।

प्रमाण्यन्तात्सङ्ख्यार्थाच्च बहुव्रीहेर्डः स्यात् । स्त्रीप्रमाणाः कुटुम्बिनः । द्वित्राः ॥ १२८ ॥

सुप्रातसुश्वसुदिवशारिकुक्षचतुरस्रैणीपदाऽजपदप्रोष्ठपदभद्रपदम् । ७ । ३ । १२९ ।

एते बहुव्रीहयो डान्ता निपात्याः । सुप्रातो ना । सुश्वः । सुदिवः । शारिकुक्षः । चतुरस्रः । एणीपदः । अजपदः । प्रोष्ठपदः । भद्रपदः ॥

पूरणीभ्यस्तत्प्राधान्येऽप् । ७ । ३ । १३० ।

पूरणप्रत्ययान्ता या स्त्री तदन्ताद्बहुव्रीहेरप् स्यात् । पूरण्याः प्राधान्ये समासार्थत्वे सति कल्याणीपञ्चमा रात्रयः । तत्प्राधान्यइति किम् । कल्याणपञ्चमीकः पक्षः ॥ १३० ॥

नञ्सुव्युपत्रेश्चतुरः । ७ । ३ । १३१ ।

एभ्यो यश्चत्वारस्तदन्ताद्बहुव्रीहेरप् स्यात् । अचतुरः । सुचतुरः । विचतुरः । उपचतुराः त्रिचतुराः ॥ १३१ ॥

अन्तर्बहिर्भ्यां लोम्नः । ७ । ३ । १३२ ।

आभ्यां परो यो लोमा तदन्ताद्बहुव्रीहेरप् स्यात् । अन्तर्लोमः । बहिर्लोमः प्रावारः ॥ १३२ ॥

भान्नेतुः । ७ । ३ । १३३ ।

नक्षत्रार्थात्परो यो नेता तदन्ताद्बहुव्रीहेरप् स्यात् । मृगनेत्रा निशा॥

नाभेर्नाम्नि । ७ । ३ । १३४ ।

नाभ्यन्ताद्बहुव्रीहेर्नाम्न्यप् स्यात् । पद्मनाभः। नाम्नीति किम् । विकसितवारिजनाभिः ॥ १३४ ॥

नञ्बहोर्ऋचो माणवचरणे ।७।३।१३५।

आभ्यां परो य ऋक् तदन्ताद्बहुव्रीहेरप् स्यात् । यथासङ्ख्यं माणवे चरणे चार्थे । अनृचो माणवः। बह्वृचश्चरणः । माणवचरणइति किम् । अनृकं साम । बह्वृकं सूक्तम् ॥ १३५ ॥

नञ्सुदुर्भ्यः सक्तिसक्थिहलेर्वा।७।३।१३६।

नञादेः परो यः सक्थ्यादिस्तदन्ताद्बहुव्रीहेरप् स्यात् । असक्तः। असक्तिः । सुसक्तः । सुसक्तिः । दुःसक्तः । दुःसक्तिः । एवमऽसक्थः । असक्थिः । अहलः । अहलिः ॥ १३६ ॥

प्रजाया अस् । ७ । ३ । १३७।

नञादिपूर्वपदात्प्रजान्ताद्बहुव्रीहेरस् स्यात् । अप्रजाः । सुप्रजाः। दुःप्रजाः ॥ १३७॥

मन्दाल्पाच्च मेधायाः । ७ । ३ ।१३८।

आभ्यां नञादिभ्यश्च परो यो मेधाशब्दस्तदन्तात् बहुव्रीहेरस्स्यात्। मन्दमेधाः । अल्पमेधाः । अमेधाः । सुमेधाः । दुर्मेधा ना ॥१३८ ॥

जातेरीयः सामान्यवति ।७।३।१३९।

जात्यन्ताद्बहुव्रीहेरीयः स्यात् । सामान्याश्रयेऽन्यपदार्थे। ब्राह्मणजातीयः। सामान्यवतीति किम् । बहुजातिर्ग्रामः ॥ १३९ ॥

भृतिप्रत्ययान्मासादिकः । ७ । ३ । १४० ।

भृत्यर्थाद्यः प्रत्ययस्तदन्तात्परो यो मासस्तदन्ताद्बहुव्रीहेरिकः स्यात्। पञ्चको मासोऽस्य पञ्चकमासिकः । मासादिति किम् । पञ्चकदिवसकः ॥

द्विपदाद्धर्मादन् । ७ । ३ । १४१ ।

धर्मान्ताद्द्विपदाद्बहुव्रीहेरन् स्यात्। साधुधर्मा। द्विपदादिति किम् । परमस्वधर्मः ॥ १४१ ॥

सुहरिततृणसोमाज्जम्भात् । ७ । ३ । १४२ ।

एभ्यः परो यो जम्भस्तदन्ताद्बहुव्रीहेरन् स्यात्। सुजम्भा । हरितजम्भा । तृणजम्भा । सोमजम्भा ना ॥ १४२ ॥

दक्षिणेर्मा व्याधयोगे । ७ । ३ । १४३ ।

अयं बहुव्रीहिरन्नन्तो निपात्यः । व्याधेन योगे सति । ईर्मं बहुव्रणं वा । दक्षिणेर्मा मृगः । व्याधयोगइति किम् । दाक्षिणेर्मः पशुः ॥ १४३ ॥

सुपूत्युत्सुरभेर्गन्धादिद्गुणे । ७ । ३ । १४४ ।

एभ्यः परो गुणार्थो यो गन्धस्तदन्ताद्बहुव्रीहेरित् स्यात् । सुगन्धि । पूतिगन्धि । उद्गन्धि । सुरभिगन्धि द्रव्यम् । गुणइति किम् । द्रव्ये सुगन्ध आपणिकः ॥ १४४ ॥

वागन्तौ । ७ । ३ । १४५ ।

स्वादिभ्यः पर आहार्यगुणार्थो यो गन्धस्तदन्ताद्बहुव्रीहेरिद्वा स्यात् । सुगन्धिः सुगन्धो वा कायः । एवं पूतिगन्धिः । पूतिगन्धः । उद्गन्धिः । उद्गन्धः । सुरभिगन्धिः । सुरभिगन्धः ॥ १४५ ॥

वाल्पे । ७ । ३ । १४६ ।

अल्पार्थो यो गन्धस्तदन्ताद्बहुव्रीहेरिद् वा स्यात्। सूपगन्धि। सूपगन्धं भोजनम् ॥ १४६ ॥

वोपमानात्। ७। ३। १४७।

उपमानात्परो यो गन्धस्तदन्ताद्बहुव्रीहेरिद् वा स्यात्। उत्पलगन्धि। उत्पलगन्धं मुखम् ॥ १४७॥

पात्पादस्याऽहस्त्यादेः।७। ३। १४८।

हस्त्यादिवर्जादुपमानात्परस्य बहुव्रीहौ पादस्य पाद् स्यात्। व्याघ्रपात्। अहस्त्यादेरिति किम्। हस्तिपादः। अश्वपादः ॥ १४८ ॥

कुम्भपद्यादिः। ७। ३। १४९।

एते कृतपदन्ता ङ्यन्ता एव बहुव्रीहयो निपात्याः। कुम्भपदी। जालपदी ॥ १४९ ॥

सुसङ्ख्यात्। ७। ३। १५०।

सोः संख्यायाश्च परस्य पादस्य बहुव्रीहौ पाद् स्यात्। सुपाद्। द्विपात् ॥ १५० ॥

वयसि दन्तस्य दतृः। ७। ३। १५१।

सुपूर्वस्य सङ्ख्यापूर्वस्य च दन्तस्य बहुव्रीहौ वयसि गम्ये दतृः स्यात्। सुदन् कुमारः। द्विदन् बालः। वयसीति किम्। सुदन्तः ॥ १५१ ॥

स्त्रियां नाम्नि। ७। ३। १५२।

बहुव्रीहौ स्त्रियां नाम्नि दन्तस्य दतृः स्यात्। अयोदती। स्त्रियामिति किम्। वज्रदन्तः ॥ १५२ ॥

श्यावाऽरोकाद्वा। ७। ३। १५३।

आभ्यां परस्य दन्तस्य बहुव्रीहौ दतृर्वा स्यात्। नाम्नि। श्यावदन्। श्यावदन्तः। अरोकदन्। अरोकदन्तः॥ १५३॥

वाग्रान्तशुद्धशुभ्रवृषवराहाहिमूषिकशिखरात्। ७। ३। १५४।

अग्रान्तात् शुद्धादिभ्यश्च परस्य दन्तस्य बहुव्रीहौ दतृर्वा स्यात्। कुड्मलाग्रदन्। कुड्मलाग्रदन्तः। शुद्धदन्। शुद्धदन्तः। शुभ्रदन्। शुभ्रदन्तः। वृषदन्। वृषदन्तः। वराहदन्। वराहदन्तः। अहिदन्। अहिदन्तः। मूषिकदन्। मूषिकदन्तः। शिखरदन्। सिखरदन्तः॥ १५४॥

संप्राज्जानोर्ज्ञुज्ञौ। ७। ३। १५५।

आभ्यां परस्य जानोर्बहुव्रीहौ ज्ञुज्ञौ स्याताम्। संज्ञुः। संज्ञः। प्रज्ञुः। प्रज्ञः॥ १५५॥

वोर्ध्वात्। ७। ३। १५६।

ऊर्ध्वात्परस्य जानोर्बहुव्रीहौ ज्ञुज्ञौ वा स्याताम्। ऊर्ध्वज्ञुः। ऊर्ध्वज्ञः। ऊर्ध्वजानुः॥ १५६॥

सुहृद्दुर्हृद् मित्रामित्रे। ७। ३। १५७।

सुदुर्भ्यां परस्य हृदयस्य बहुव्रीहौ यथासंख्यं मित्रेऽमित्रे चार्थे हृन्निपात्यः। सुहृन्मित्रम्। दुर्हृदमित्रः। मित्रामित्रइति किम्। सुहृदयो मुनिः। दुर्हृदयो व्याधः॥ १५७॥

धनुषो धन्वन्। ७। ३। १५८।

बहुव्रीहौ स्यात्। शार्ङ्गधन्वा॥ १५८॥

वा नाम्नि। ७। ३। १५९।

धनुषो बहुव्रीहौ धन्वन् वा स्यात्। नाम्नि। पुष्पधन्वा। पुष्पधनुः॥

खरखुरान्नासिकाया नस् । ७ । ३ । १६० ।

आभ्यां परस्या नासिकाया बहुव्रीहौ नरस्यात् । नाम्नि । खरणाः । खुरणाः ॥ १६० ॥

अस्थूलाच्च नसः । ७ । ३ । १६१ ।

स्थूलवर्जात्खरखुराभ्यां च परस्या नासिकाया बहुव्रीहौ नसः स्यात् । नाम्नि । द्रुणसः । खरणसः । खुरणसः । अस्थूलादिति किं स्थूलनासिकः ॥

उपसर्गात् । ७ । ३ । १६२ ।

अस्मात् परस्या नासिकाया बहुव्रीहौ नसः स्यात् । प्रणसं मुखम् ॥

वेः खुखूग्रम् । ७ । ३ । १६३ ।

वेरुपसर्गात्परस्या नासिकाया बहुव्रीहावेते स्युः । विखुः । विखूः । विग्रः ॥ १६३ ॥

जायाया जानिः । ७ । ३ । १६४ ।

जायाशब्दस्य जानिर्बहुव्रीहौ स्यात् । युवजानिः ॥ १६४ ॥

व्युदः काकुदस्य लुक् । ७ । ३ । १६५ ।

आभ्यां परस्यास्य बहुव्रीहौ लुक् स्यात् । विकाकुत् । उत्काकुत् ॥

पूर्णाद्वा । ७ । ३ । १६६ ।

पूर्णात्परस्य काकुदस्य बहुव्रीहौ लुग् वा स्यात् । पूर्णकाकुत् । पूर्णकाकुदः ॥ १६६ ॥

ककुदस्यावस्थायाम् । ७ । ३ । १६७ ।

अस्य बहुव्रीहौ वयसि गम्ये लुक् स्यात् । पूर्णककुद्वत्सा अककुद्वत्सालः ॥ १६७ ॥

त्रिककुद् गिरौ । ७ । ३ । १६८ ।

गिरावर्थे त्रेः परस्य ककुदस्य बहुव्रीहौ ककुन्निपात्यः । त्रिककुद्गिरिः ॥ १६८ ॥

स्त्रियामूधसो न् । ७।३ । १६९ ।

स्त्र्यर्थस्योधसो बहुव्रीहौ न् स्यात् । कुण्डोध्नी गौः ॥ १६९ ॥

इनः कच् । ७ । ३ । १७० ।

इन्नन्ताद्बहुव्रीहेः स्त्र्यऽर्थात्कच् स्यात् । बहुदण्डिका सेना ॥१७०॥

ऋन्नित्यदितः । ७ । ३ । १७१ ।

ऋदन्तान्नित्यंदिदादेशो यस्मात्तदन्ताच्च बहुव्रीहेः कच् स्यात् । बहुकर्तृकः । बहुनदीको देशः । नित्येति किम् । पृथुश्रीः ॥ १७१ ॥

दध्यूरःसर्पिर्मधूपानच्छालेः । ७।३।१७२ ।

एतदन्ताद्बहुव्रीहेः कच् स्यात् । प्रियदधिकः । प्रियोरस्कः । बहुसर्पिष्कः । अमधुकः । बहूपानत्कः । अशालिकः ॥१७२॥

पुमनडुन्नौपयोलक्ष्म्या एकत्वे ।७।३।१७३ ।

एकार्था येऽमी तदन्ताद्बहुव्रीहेः कच् स्यात् । अपुंस्कः । प्रियानडुत्कः । अनौकः । अपयस्कः । सुलक्ष्मीकः । एकत्वइति किम् । द्विपुमान् ॥

नञोऽर्थात् । ७ । ३ । १७४ ।

नञः परो योऽर्थस्तदन्ताद्बहुव्रीहेः कच् स्यात् । अनर्थकं वचः॥१७४॥

शेषाद्वा । ७ । ३ । १७५ ।

उपयुक्तातिरिक्ताद्बहुव्रीहेः कच्वा स्यात् । बहुखट्वकः । बहुखट्वः । शेषादिति किम् । प्रियपथः ॥ १७५ ॥

न नाम्नि । ७ । ३ । १७६ ।

नाम्नि विषये कच् न स्यात् । बहुदेवदत्तो नाम ग्रामः ॥१७६॥

ईयसोः । ७ । ३ । १७७ ।

ईयस्वन्तात्समासात्कच् न स्यात् । बहुश्रेयसी सेना ॥१७७॥

सहात्तुल्ययोगे । ७ । ३ । १७८ ।

तुल्ययोगार्थात्सहाद्बहुव्रीहेः कच् न स्यात् । सपुत्रो याति । तुल्ययोगइति किम् । सकर्मकः ॥ १७८ ॥

भ्रातुः स्तुतौ । ७ । ३ । १७९ ।

भ्रात्रन्तात्समासात् कच् न स्यात् । स्तुतौ गम्यायाम् । सुभ्राता ॥

नाडीतन्त्रीभ्यां स्वाङ्गे । ७ । ३ । १८० ।

स्वाङ्गार्थान्नाडीतन्त्र्यन्तात्समासात्कच् न स्यात् । बहुनाडिः कायः । बहुतन्त्री ग्रीवा । स्वाङ्गइति किम् । बहुनाडीकः स्तम्बः ॥ १८० ॥

निष्प्रवाणिः । ७ । ३ । १८१ ।

अस्मिन्कजभावो निपात्यः । निष्प्रवाणिः पटः ॥१८१॥

सुभ्र्वादिभ्यः । ७ । ३ । १८२ ।

एभ्यः कच् न स्यात् । सुभ्रूः । वरोरूः ॥ १८२ ॥

इत्याचार्यहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनलघुवृत्तौ सप्तमस्याध्यायस्य तृतीयः पादः समाप्तः ॥

अर्हम्

वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते ।७।४।१।

ञिति णिति च तद्धिते परे प्रकृतेः स्वराणां मध्ये आद्यस्वरस्य वृद्धिः स्यात् । दाक्षिः । भार्गवः । तद्धितइति किम् । चिकीर्षकः ॥ १ ॥

केकयमित्रयुप्रलयस्य यादेरिय् च।७।४।२।

एषां ञ्णिति तद्धिते स्वरेष्वादेः स्वरस्य वृद्धिर्यादेश्चांशस्येय् स्यात् । कैकेयः । मैत्रेयिकया श्लाघते । प्रालेयं हिमम् ॥ २॥

देविकाशिंशपादीर्घसत्रश्रेयसस्तत्-प्राप्तावाः । ७ । ४ । ३ ।

एषां स्वरेष्वादेः स्वरस्य ञ्णिति तद्धिते वृद्धिप्राप्तावाः स्यात् । दाविकं जलम् । शांशपः स्तम्भः । दार्घसत्रम् । श्रायसं द्वादशाङ्गम् । तत्प्राप्ताविति किम् । सौदेविकः ॥ ३ ॥

वहीनरस्यैत् । ७ । ४ । ४ ।

अस्य ञ्णिति तद्धिते स्वरेष्वादेः स्वरस्यैः स्यात् । वैहीनरिः ॥४ ॥

य्वः पदान्तात्प्रागैदौत् । ७ । ४ । ५ ।

ञ्णिति तद्धिते इवर्णो वर्णयोर्वृद्धिप्राप्तौ तयोरेव स्थाने यौ य्वौ पदान्तौ ताभ्यां प्राक् यथासङ्ख्यमैदौतौ स्याताम् । नैयायिकः । सौवश्वः । पदान्तादिति किम् । यत इमे याताः ॥ ५॥

द्वारादेः । ७ । ४ । ६ ।

एषां यौ य्वौ तयोः समीपस्य स्वरेष्वादेः स्वरस्य वृद्धिप्राप्तौ ताभ्यामेव प्रागैदौतौ स्यातां ञ्णिति तद्धिते । दौवारिकः । सौवरो ग्रन्थः॥६॥

न्यग्रोधस्य केवलस्य ।७।४।७।

अस्य केवलस्य यो यस्तत्सम्बन्धिनः स्वरेष्वादेः स्वरस्य वृद्धिप्राप्तौ तस्मादेव यः प्रागैत् स्यात्। ञ्णिति तद्धिते। नैयग्रोधो दण्डः। केवलस्येति किम्। न्याग्रोधमूलाः शालयः ॥ ७ ॥

न्यङ्कोर्वा । ७ । ४ । ८ ।

न्यङ्कोस्तद्धिते ञ्णिति यः प्रागैद्वा स्यात्। नैयङ्कवम्। न्याङ्कवम् ॥

नञस्वाङ्गादेः । ७ । ४ । ९ ।

ञान्तस्य स्वाङ्गादेश्च ञ्णिति तद्धिते य्वः प्रागैदौतौ न स्याताम्। व्यावक्रोशी। स्वाङ्गिः। व्याङ्गिः ॥ ९ ॥

श्वादेरिति । ७ । ४ । १० ।

श्वादिरवयवो यस्य तस्येदादौ ञ्णिति तद्धिते वः प्रागौर्न स्यात्। श्वाभस्त्रिः। इतीति किम्। शौवहानम् ॥ १० ॥

इञः । ७ । ४ । ११ ।

इञन्तस्य श्वादेर्ञ्णिति तद्धिते वः प्रागौर्न स्यात्। श्वाभस्त्रम् ॥ ११ ॥

पदस्यानिति वा । ७ । ४ । १२ ।

पदशब्दान्तस्य श्वादेरिदादिवर्जे ञ्णिति तद्धिते वः प्रागौद्वा स्यात्। श्वापदम्। शौवापदम्। अनितीति किम्। श्वापदिकः ॥ १२ ॥

प्रोष्ठभद्राज्जाते । ७ । ४ । १३ ।

आभ्यां परस्य पदस्योत्तरपदस्य स्वरेष्वादेः स्वरस्य जातेऽर्थे ञ्णिति तद्धिते वृद्धिः स्यात्। प्रोष्ठपदः। भद्रपादो बटुः ॥ १३ ॥

अंशादृतोः । ७ । ४ । १४ ।

अंशार्थात्परस्य ऋत्वर्थस्योत्तरपदस्य स्वरेष्वादेः स्वरस्य ञ्णिति तद्धिते वृद्धिः स्यात्। पूर्ववार्षिकः। अंशादिति किम्। सौवर्षिकः ॥

सुसर्वार्द्धाद्राष्ट्रस्य । ७ । ४ । १५ ।

एभ्यः परस्य राष्ट्रार्थोत्तरपदस्य ञ्णिति तद्धिते स्वरेष्वादेः स्वरस्य वृद्धिः स्यात् । सुपाञ्चालकः । सर्वपाञ्चालकः । अर्द्धपाञ्चालकः ॥ १५ ॥

अमद्रस्य दिशः । ७ । ४ । १६ ।

दिगर्थात्परस्य मद्रवर्जराष्ट्रार्थस्य ञ्णिति तद्धिते स्वरेष्वादेः स्वरस्य वृद्धिः स्यात् । पूर्वपाञ्चालिकः । अमद्रस्येति किम् । पौर्वमद्रः ॥ १६ ॥

प्राग्ग्रामाणाम् । ७ । ४ । १७ ।

प्राग्देशे ग्रामार्थानां योऽंशो दिगर्थस्ततः परस्यांशस्य दिशः परेषां च प्राग्ग्रामार्थानां ञ्णिति तद्धिते स्वरेष्वादेः स्वरस्य वृद्धिः स्यात् । पूर्वकार्ष्णमृतकः । पूर्वकान्यकुब्जः ॥ १७ ॥

सङ्ख्याधिकाभ्यां वर्षस्याऽभाविनि । ७ । ४ । १८ ।

सङ्ख्यार्थादधिकाच्च परस्य वर्षस्य ञ्णिति तद्धिते स्वरेष्वादेः स्वरस्य वृद्धिः स्यात् । न चेत्तद्धितो भाविन्यर्थे । द्विवार्षिकः । अधिकवार्षिकः । अभाविनीति किम् । द्वैवर्षिकं धान्यम् ॥ १८ ॥

मानसंवत्सरस्याशाणकुलिजस्याऽनाम्नि । ७ । ४ । १९ ।

सङ्ख्यार्थाधिकाभ्यां परस्य शाणकुलिजवर्जस्य मानार्थस्य संवत्सरस्य च ञ्णिति तद्धिते स्वरेष्वादेः स्वरस्य वृद्धिः स्यादनाम्नि । द्विकौडविकः । अधिककौडविकः । द्विसांवत्सरिकः । अशाणकुलिजस्येति किम् । द्वैशाणम् । द्वैकुलिजिकः । अनाम्नीति किम् । पाञ्चलोहितिकम् ॥ १९ ॥

अर्द्धात्परिमाणस्याऽनतो वात्वादेः।७।४।२०।

अर्द्धात्परस्य परिमाणार्थस्य स्वरेष्वादेरद्धर्जस्वरस्य ञ्णिति तद्धिते वृद्धिः स्यात्। वात्वर्द्धस्य। अर्द्धकौडविकम्। आर्द्धकौडविकम्। अनत इति किम्। अर्द्धप्रास्थिकम्। आर्द्धप्रास्थिकम्॥ २०॥

प्राद्वाहणस्यैये।७।४।२१।

प्रात्परस्य वाहणस्य एये ञ्णिति तद्धिते स्वरेष्वादेर्वृद्धिः स्यात्। प्रस्य तु वा। प्रवाहणेयः। प्रावाहणेयः॥ २१॥

एयस्य।७।४।२२।

एयान्तांशात्प्रात्परस्य वाहणस्य ञ्णिति तद्धिते स्वरेष्वादेर्वृद्धिः स्यात्। प्रस्य तु वा। प्रवाहणेयिः। प्रावाहणेयिः॥ २२॥

नञः क्षेत्रज्ञेश्वरकुशलचपलनिपुणशुचेः।७।४।२३।

नञः परेषां एषां ञ्णिति तद्धिते स्वरेष्वादेर्वृद्धिः स्यात्। नञस्तु वा। अक्षैत्रज्ञम्। आक्षैत्रज्ञम्। अनैश्वरम्। आनैश्वरम्। अकौशलम्। आकौशलम्। अचापलम्। आचापलम्। अनैपुणम्। आनैपुणम्। अशौचम्। आशौचम्॥ २३॥

जङ्गलधेनुवलजस्योत्तरपदस्य तु वा।७।४।२४।

एतदुत्तरपदानामादेः पूर्वपदस्य स्वरेष्वादेर्नित्यं वृद्धिः स्यात्। वातूत्तरपदस्य ञ्णिति तद्धिते। कौरुजङ्गलः। कौरुजाङ्गलः। वैश्वधेनवः वैश्वधैनवः। सौवर्णवलजः। सौवर्णवालजः॥ २४॥

हृद्भगसिन्धोः।७।४।२५।

हृदाद्यन्तानां पूर्वपदस्योत्तरपदस्य च स्वरेष्वादेर्वृद्धिः स्यात् । ञ्णिति तद्धिते । सौहार्दम् । सौभाग्यम् । साक्तुसैन्धवः ॥ २५ ॥

प्राचां नगरस्य । ७ । ४ । २६ ।

प्राग्देशार्थस्य नगरान्तस्य ञ्णिति तद्धिते पूर्वोत्तरपदयोः स्वरेष्वादेर्वृद्धिः स्यात् । सौह्मनागरः । प्राचामिति किम् । माडनगरः ॥ २६ ॥

अनुशतिकादीनाम् । ७ । ४ । २७ ।

एषां ञ्णिति तद्धिते पूर्वोत्तरपदयोः स्वरेष्वादेर्वृद्धिः स्यात् । आनुशातिकम् । आनुहौडिकम् ॥ २७ ॥

देवतानामात्वादौ । ७ । ४ । २८ ।

आत्वविषये देवतार्थानां पूर्वोत्तरपदयोः स्वरेष्वादेर्वृद्धिः स्यात् । ञ्णिति तद्धिते । आग्नावैष्णवं सूक्तम् । आत्वादाविति किम् । ब्राह्मप्रजापत्यम् ॥ २८ ॥

आतो नेन्द्रवरुणस्य । ७ । ४ । २९ ।

आदन्तात्पूर्वपदात्परस्येन्द्रस्य वरुणस्य चोत्तरपदस्य स्वरेष्वादेर्वृद्धिर्न स्यात् । आग्नेन्द्रं सूक्तम् । ऐन्द्रावरुणम् । आतइति किम् । आग्निवारुणम् ॥ २९ ॥

सारवैक्ष्वाकमैत्रेयभ्रौणहत्यधैवत्यहिरण्मयम् । ७ । ४ । ३० ।

एतेऽणाद्यन्ता अय् लोपादौ निपात्याः । सारवं जलम् । ऐक्ष्वाकः । मैत्रेयः । भ्रौणहत्यम् । धैवत्यम् । हिरण्मयम् ॥ ३० ॥

वान्तमान्तितमान्तितोऽन्तियान्तिषत् । ७ । ४ । ३१ ।

एते तमबाद्यन्ताः कृतातिकादिलुको वा निपात्याः। अन्तमः। अन्तिकतमः। अन्तितमः। अन्तिकतमः। अन्तितः। अन्तिकतः। अन्तियः। अन्तिकयः। अन्तिषद्। अन्तिकसद् ॥ ३१ ॥

विन्मतोर्णीष्ठेयसौलुप्। ७। ४। ३२।

विन्मत्वोरेषु लुप् स्यात्। स्रजयति। स्रजिष्ठः। स्रजीयान्। त्वचयति। त्वचिष्ठः। त्वचीयान् ॥ ३२ ॥

अल्पयूनोः कन्वा। ७। ४। ३३।

अनयोर्णीष्ठेयसुषु कन्वा स्यात्। कनयति। कनिष्ठः। कनीयान्। अल्पयति। अल्पिष्ठः। अल्पीयान्। यवयति। यविष्ठः। यवीयान् ॥३३॥

प्रशस्यस्य श्रः। ७। ४। ३४।

अस्य ण्यादौ श्रः स्यात्। श्रयति। श्रेष्ठः। श्रेयान् ॥ ३४ ॥

वृद्धस्य च ज्यः। ७। ४। ३५।

अस्य प्रशस्यस्य च ण्यादौ ज्यः स्यात्। ज्ययति। ज्येष्ठः ॥३५॥

ज्यायान्। ७। ४। ३६।

ज्यादेशात्परस्येयसोरीत आ निपात्यः। ज्यायान् ॥ ३६ ॥

बाढान्तिकयोः साधनेदौ। ७। ४। ३७।

अनयोर्ण्यादौ यथासङ्ख्यमेतौ स्याताम्। साधयति। साधिष्ठः। साधीयान्। नेदयति। नेदिष्ठः। नेदीयान् ॥ ३७ ॥

प्रियस्थिरस्फिरोरुगुरुबहुलतृप्रदीर्घवृद्धवृन्दारकस्येमनि च प्रास्थास्फावरगरवंहत्रपद्राघवर्षवृन्दम्। ७। ४। ३८।

प्रियादीनां यथासंभवमिमानि ण्यादौ च यथासङ्ख्यमेते स्युः। प्रेमा। प्रापयति । प्रेष्ठः। प्रेयान् । स्थेमा । स्थापयति । स्थेष्ठः। स्थेयान् । स्फापयति । वरिमा । गरिमा । वंहिमा । त्रपिमा । द्राघिमा । वर्षिमा । वृन्दिमा ॥ ३८ ॥

पृथुमृदुभृशकृशदृढपरिवृढस्य ऋतो रः । ७ । ४ । ३९ ।

एषामृतइम्नि ण्यादौ च रः स्यात् । प्रथिमा । प्रथयति । प्रथिष्ठः । प्रथीयान् । एवं म्रदिमा । भ्रशिमा । क्रशिमा । द्रढिमा । परिव्रढिमा॥

बहोर्णीष्ठे भूय् । ७ । ४ । ४० ।

भूययति । भूयिष्ठः ॥ ४० ॥

भूर्लुक्चेवर्णस्य । ७ । ४ । ४१ ।

बहोरीयसाविम्नि च भूः स्यात्। लुक् चाऽनयोरिवर्णस्य। भूयान्। भूमा ॥ ४१ ॥

स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्रस्यान्तस्थादेर्गुणश्च नामिनः । ७ । ४ । ४२ ।

एषामिम्नि ण्यादौ चान्तस्थादेरंशस्य लुक् स्यात् । नामिनश्च गुणः। स्थवयति । स्थविष्ठः। स्थवीयान्। एवं दवयति। यवयति। यविष्ठः। ह्रसिमा । क्षेपिमा । क्षोदिमा ॥ ४२ ॥

त्र्यन्तस्वरादेः । ७ । ४ । ४३ ।

तुरन्त्यस्वरादेश्चांशस्येम्नि ण्यादौ च लुक् स्यात् । करयति । करिष्ठः। करीयान् । पटिमा । पटयति । पटिष्ठः। पटीयान् ॥ ४३ ॥

नैकस्वरस्य । ७ । ४ । ४४ ।

एकस्वरस्य योन्त्यस्वरादिरंशस्तस्येम्नि ण्यादौ च लुक् न स्यात्। स्रजयति। स्रजिष्ठः। स्रजीयान् ॥ ४४ ॥

दण्डिहस्तिनोरायने।७।४।४५।

अनयोरायनप्रत्ययेऽन्त्यस्वरादेर्लुग् न स्यात्। दाण्डिनायनः। हास्तिनायनः ॥ ४५ ॥

वाशिन आयनौ।७।४।४६।

अन्त्यस्वरादेर्लुग्न स्यात्। वाशिनायनिः ॥ ४६ ॥

एये जिह्माशिनः।७।४।४७।

अन्त्यस्वरादेर्लुग्न स्यात्। जैह्माशिनेयः ॥ ४७ ॥

ईनेऽध्वात्मनोः।७।४।४८।

अन्त्यस्वरादेर्लुग्न स्यात्। अध्वनीनः। आत्मनीनः ॥ ४८ ॥

इकण्यथर्वणः।७।४।४९।

अन्त्यस्वरादेर्लुग्न स्यात्। आथर्वणिकः ॥ ४९ ॥

यूनोऽके।७।४।५०।

अन्त्यस्वरादेर्लुग्न स्यात्। यौवनिका ॥ ५० ॥

अनोऽट्ये ये।७।४।५१।

अन्नन्तस्य टयवर्जे यादावन्त्यस्वरादेर्लुग्न स्यात्। सामन्यः। वैमन्यः। मूर्द्धन्यः अट्य इति किम्। राज्यम् ॥ ५१ ॥

अणि।७।४।५२।

अन्नन्तस्याऽण्यन्त्यस्वरादेर्लुग् न स्यात्। सौत्वनः ॥ ५२ ॥

संयोगादिनः।७।४।५३।

संयोगात्परो य इन् तदन्तस्याऽण्यन्त्यस्वरादेर्लुग् न स्यात्। शांखिनः॥

गाथिविदथिकेशिपणिगणिनः । ७।४।५४।

एषामण्यन्त्यस्वरादेर्लुग्न स्यात्। गाथिनः । वैदथिनः । कैशिनः । पाणिनः । गाणिनः पुत्रः ॥ ५४ ॥

अनपत्ये । ७।४।५५।

इन्नन्तस्याऽनपत्यार्थे ऽण्यन्त्यस्वरादेर्लुग् न स्यात् । सांराविणम् ॥

उक्ष्णोर्लुक् । ७ । ४ । ५६ ।

उक्ष्णोऽनपत्येऽण्यन्त्यस्वरादेर्लुक् स्यात् । औक्षं पदम् । अनपत्य-इत्येव । औक्ष्णः ॥ ५६ ॥

ब्रह्मणः । ७ । ४ । ५७ ।

अस्याऽनपत्येऽण्यन्त्यस्वरादेर्लुक् स्यात् । ब्राह्ममस्त्रम् ॥ ५७ ॥

जातौ । ७ । ४ । ५८ ।

ब्रह्मणो जातावर्थेऽनपत्ये ऽण्यन्त्यस्वरादेर्लुक् स्यात् । ब्राह्मी औषधिः । अपत्येतु ब्राह्मणः। जाताविति किम् । ब्राह्मो नारदः ॥ ५८ ॥

अचर्मणो मनोऽपत्ये । ७।४।५९।

चर्मन्वर्जमन्नन्तस्याऽपत्यार्थे ऽण्यन्त्यस्वरादेर्लुक् स्यात् । सौषामः । अचर्मण इति किम् । चाक्रवर्मणः ॥ ५९ ॥

हितनाम्नो वा ।७।४।६०।

अस्याऽपत्यार्थे ऽण्यन्त्यस्वरादेर्लुग्वा स्यात् ।हैतनामः । हैतनामनः॥

नोऽपदस्य तद्धिते । ७ । ४ । ६१ ।

नन्तस्याऽपदस्य तद्धिते परेऽन्त्यस्वरादेर्लुक् स्यात् । मैधावः । अपदस्येति किम् । मेधा विरूप्यम् ॥ ६१ ॥

कलापिकुथुमितैतलिजाजलिलाङ्गलिशिखण्डिशिलालिसब्रह्मचारिपीठसर्पिसूकरसद्मसुपर्वणः ।७।४।६२।

एषामपदानां तद्धिते ऽन्त्यस्वरादेर्लुक् स्यात् । कालापाः । कौथुमाः । तैतलाः । जाजलाः । लाङ्गलाः । शैखण्डाः । शैलालाः । साब्रह्मचाराः। पैठसर्पाः । सौकरसद्माः। सौपर्वाः ॥ ६२ ॥

वाश्मनो विकारे ।७।४।६३।

अस्यापदस्य विकारार्थे तद्धिते ऽन्त्यस्वरादेर्लुक् स्यात् वा । आश्मः। आश्मनः ॥ ६३ ॥

चर्मशुनः कोशसङ्कोचे ।७।४।६४।

अनयोरपदयोर्यथासङ्ख्यं कोशे सङ्कोचे चार्थे तद्धितेऽन्त्यस्वरादेर्लुक् स्यात् । चार्म्मः कोशः । शौवः सङ्कोचः ॥ ६४ ॥

प्रायोऽव्ययस्य ।७।४।६५।

अपदस्यास्य तद्धिते ऽन्त्यस्वरादेः प्रायोलुक् स्यात् । सौवः । प्राय: किम् । आरातीयः ॥ ६५ ॥

अनीनादट्यह्नोऽतः ।७।४।६६।

इनादट्वर्जे तद्धितेऽपदस्याऽह्नोऽतो लुक् स्यात् । आह्नम् । अनीनादटीति किम् । द्व्यहीनः । प्रत्यहम्। द्व्यहः ॥ ६६ ॥

विंशतेस्तेर्डिति ।७।४।६७।

अस्यापदस्य तेर्डिति तद्धिते लुक् स्यात् । विंशकः पटः॥६७॥

अवर्णेवर्णस्य ।७।४।६८।

एतदन्तस्यापदस्य तद्धिते लुक् स्यात् । दाक्षिः । चौडिः । नाभेयः। दौलेयः। अपदस्येति किम् । ऊर्णायुः ॥ ६८॥

अकद्रूपाण्ड्वोरुवर्णस्यैये । ७।४।६९।

एतद्वर्जोवर्णान्तस्य एये तद्धिते लुक् स्यात्। जाम्बेयः। कद्वादिवर्जनं किम्। काद्रवेयः। पाण्डवेयः ॥ ६९ ॥

अस्वयम्भुवोऽव् । ७ । ४ । ७० ।

स्वयंभूवर्जोवर्णान्तस्यापदस्य तद्धितेऽव् स्यात् । औपगवः । अस्वयम्भुव इति किम् । स्वायम्भुवः ॥ ७० ॥

ऋवर्णोवर्णदोसिसुसशश्वदकस्मात्त इकस्येतो लुक् ।७।४।७१ ।

ऋवर्णोवर्णान्ताभ्यां दोस इसुसन्ताभ्यां शश्वदकस्माद्वर्जतान्ताच्च परस्येकस्थस्येतो लुक् स्यात् । मातृकम् । नैषादकर्षुकः । दौष्कः । सार्पिष्कः । धानुष्कः । औदश्वित्कः । शश्वदकस्माद्वर्जनं किम्। शाश्वतिकम् । आकस्मिकम् ॥ ७१ ॥

असकृत्संभ्रमे । ७। ४। ७२।

भयादिभिः प्रयोक्तुस्त्वरणे द्योत्ये पदं वाक्यं वाऽसकृत्प्रयोज्यम् । अहिरहिरहिः। हस्त्यागच्छति हस्त्यागच्छति। लघुपलायध्वं लघुपलायध्वम्॥

भृशाभीक्ष्ण्याऽविच्छेदे द्विः प्राक्तमबादेः । ७ । ४ । ७३ ।

क्रियाया अवयवक्रियाणां कात्स्र्न्यं भृशार्थः, पौनःपुन्यमाभीक्ष्ण्यम्, क्रियान्तराव्यवधानमविच्छेदः, एषु द्योतेषु पदं वाक्यं वा तमबादेः

प्राग् द्विः स्यात् । लुनीहि लुनीहीत्येवाऽयं लुनाति । भोजं २ याति । प्रपचति प्रपचति ॥ ७३ ॥

नानावधारणे । ७ । ४ । ७४ ।

नानाभूतानामियत्तापरिच्छेदे गम्ये शब्दो द्विः स्यात् । अस्मात्कार्षापणादिह भवद्भ्यां माषं २ देहि ॥ ७४ ॥

आधिक्यानुपूर्व्ये । ७ । ४ । ७५ ।

एतद्वृत्ति द्विः स्यात् । नमोनमः । मूले २ स्थूलाः ॥ ७५ ॥

डतरडतमौ समानां स्त्रीभावप्रश्ने । ७ । ४ । ७६ ।

केनचिद् गुणेन तुल्यानां स्त्रीलिङ्गभावस्य प्रश्ने वर्त्तमानो डतरडतमान्तो द्विः स्यात् । उभाविमावाढ्यौ । कतराकतरा अनयोराढ्यता । कतमाकतमा एषामाढ्यता । भावेति किम् । उभाविमौ लक्ष्मीवन्तौ । कतरानयोर्लक्ष्मीः ॥ ७६ ॥

पूर्वप्रथमावन्यतोऽतिशये । ७ । ४ । ७७ ।

एतौ स्वार्थस्यान्यतः प्रकर्षे द्योत्ये द्विः स्याताम् । पूर्वंपूर्वं पुष्पन्ति । प्रथमंप्रथमं पच्यन्ते ॥ ७७ ॥

प्रोपोत्सम्पादपूरणे । ७ । ४ । ७८ ।

एते द्विः स्युश्चेत्पादः पूर्यः । प्रप्रशान्तकषायाग्नि, रुपोपप्लववर्जितम् । उदुज्ज्वलं तपो यस्य, संसंश्रयत तं जिनम् ॥ ७८ ॥

सामीप्येऽधोऽध्युपरि । ७ । ४ । ७९ ।

एते सामीप्येऽर्थे द्विः स्यात् । अधोऽधः, अध्यधि, उपर्युपरि ग्रामम् ॥

वीप्सायाम् । ७ । ४ । ८० ।

अस्यां वर्त्तमानं द्विः स्यात् । वृक्षं २ सिञ्चति । ग्रामो २ रम्यः ॥

प्लुप्चादावेकस्य स्यादेः । ७ । ४ । ८१ ।

एकस्य वीप्सायां द्व्युक्तस्याद्यस्य स्यादेः पिल्लुप् स्यात् । एकैकस्याः ॥ ८१ ॥

द्वन्द्वं वा । ७ । ४ । ८२ ।

वीप्सायां द्व्युक्तस्य द्वेरादेः स्यादेः पिल्लुप् स्यात्, एश्चाम् । उत्तरत्रेतोऽत्वं स्यादेश्चाऽम्वा निपात्यः । द्वन्द्वं द्वौद्वौ वा तिष्ठतः ॥ ८२ ॥

रहस्यमर्यादोक्तिव्युत्क्रान्तियज्ञपात्र-प्रयोगे । ७ । ४ । ८३ ।

एषे गम्येषु द्वेर्द्विर्वचनं शेषं च पूर्ववन्निपात्यम् । द्वन्द्वं मन्त्रयन्ते । पशवोद्वन्द्वं मिथुनायन्ते । द्वन्द्वं व्युत्क्रान्ताः । द्वन्द्वं यज्ञपात्राणि प्रयुनक्ति ॥ ८३ ॥

लोकज्ञातेऽत्यन्तसाहचर्ये । ७ । ४ । ८४ ।

अत्र द्योत्ये द्वेः पूर्ववत् द्वन्द्वमिति निपात्यम् । द्वन्द्वं रामलक्ष्मणौ ॥

आबाधे । ७ । ४ । ८५ ।

मनःपीडाविषये शब्दो द्विः स्यात, आदौ स्यादेश्च पिल् लुप् । रुक् रुक् ॥ ८५ ॥

नवा गुणः सदृशे रित् । ७ । ४ । ८६ ।

गुणशब्दोमुख्यसदृशे गुणे गुणिनि वा वर्त्तमानोद्विर्वा स्यात्, आदौ स्यादेः पिल्लुप् च । सा च रित् । शुक्लशुक्लं रूपम् । कालककालिका । पक्षे शुक्लजातीयः ॥ ८६ ॥

प्रियसुखं चाकृच्छ्रे । ७ । ४ । ८७ ।

एतावक्लेशार्थौ वा द्विः स्याताम्, आदौ स्यादेः पिल्लुप्च। प्रियप्रियेण प्रियेण वा दत्ते। सुखसुखेन सुखेन वा ऽधीते ॥ ८७ ॥

वाक्यस्य परिवर्जने । ७ । ४ । ८८ ।

वर्जनार्थो वाक्यांशः परिर्वा द्विः स्यात्। परिपरि परि वा त्रिगर्त्तेभ्यो वृष्टो मेघः। वाक्यस्येति किम्। परित्रिगर्त्तं वृष्टो मेघः ॥८८॥

सम्मत्यसूयाकोपकुत्सनेष्वाद्यामन्त्र्यमादौ स्वरेष्वन्त्यश्च प्लुतः । ७ । ४ । ८९ ।

एतद्वृत्तेर्वाक्यस्यादिभूतमामन्त्र्यार्थं पदं द्विः स्यात् द्वित्वे चादौ स्वराणां मध्येऽन्त्यस्वरः प्लुतो वा स्यात्। माणवक ३ माणवक, माणवक माणवक आर्यः खल्वसि, रिक्तं ते आभिरूप्यम्, इदानीं ज्ञास्यसि जाल्म, रिक्ता ते शक्तिरिति वा। आदीति किम्। भव्यः खल्वसि माणवक ॥ ८९ ॥

भर्त्सने पर्यायेण । ७ । ४ । ९० ।

कोपेन दण्डाविष्क्रिया भर्त्सनम्, तद्वृत्तेर्वाक्यस्य यदामन्त्र्यं पदं तद्द्विः स्यात्, द्वित्वे च क्रमेण पूर्वोत्तरपदयोः स्वरेष्वन्त्यः प्लुतो वा स्यात। चौर ३ चौर चौर चौर ३ चौर चौर, घातयिष्यामि त्वाम् ॥

त्यादेः साकाङ्क्षस्याङ्गेन । ७ । ४ । ९१ ।

भर्त्सनार्थस्य वाक्यस्य स्वरेष्वन्त्यः स्वरस्त्याद्यन्तस्य पदस्य वाक्यान्तराकाङ्क्षस्य अङ्गेन युक्तस्यांशः प्लुतो वा स्यात्। अङ्गकूज ३ अङ्ग कूज, इदानीं ज्ञास्यसि जाल्म। साकाङ्क्षस्येति किम्। अङ्ग पच ॥ ९१ ॥

क्षियाशीः प्रैषे । ७ । ४ । ९२ ।

क्षिया आचारद्भ्रेष, एतद्वृत्तेर्वाक्यस्य स्वरेष्वन्त्यः स्वरस्त्याद्यन्तस्य वाक्यान्तराकाङ्क्षस्यांशः प्लुतो वा स्यात्। स्वयं हि रथेन याति ३

याति वा, उपाध्यायं पदातिं गमयति । सिद्धान्तमध्येषीष्ठाः ३ अध्येषीष्ठा वा, तर्कं च तात। कटं च कुरु ३ कुरु वा, ग्रामं च गच्छ ॥

चितीवार्थे । ७ । ४ । ९३ ।

सादृश्यार्थे चिति प्रयुक्ते वाक्यस्य स्वरेष्व ऽन्त्यः स्वरः प्लुतो वा स्यात् । अग्निश्चिद्भायाा३त्, भायाद्वा । इवार्थे इति किम् । कर्णवेष्टकांश्चित्कारय ॥ ९३ ॥

प्रतिश्रवणनिगृह्यानुयोगे । ७ । ४ । ९४।

एतद्वृत्तेर्वाक्यस्य स्वरेष्वन्त्यः स्वरः प्लुतो वा स्यात् । गां मे देहि भोः हन्त ते ददामि ३ ददामि वा । अद्य श्राद्धमित्यात्थ ६ आत्थ वा ॥

विचारे पूर्वस्य ।७।४।९५।

विचारः संशयः तद्विषये संशय्यमानस्य यत्पूर्वं तस्य स्वरेष्वन्त्यः स्वरः प्लुतो वा स्यात् । अहिर्नु ३ अहिर्नु वा रज्जुर्नु ॥ ९५ ॥

ओमः प्रारम्भे । ७ । ४ । ९६ ।

ओमः प्रणामाद्यभ्यदानार्थस्य स्वरेष्वन्त्यः स्वरः प्लुतो वा स्यात् । ओ३म् ओम्वा, ऋषभमृषभगामिनं प्रणमत ॥ ९६ ॥

हेः प्रश्नाख्याने ।७।४।९७।

पृष्टप्रतिवचनार्थं वाक्यस्य हेः स्वरेष्वन्त्यः स्वरः प्लुतो वा स्यात् । अकार्षीः कटं मैत्र । अकार्षं हि ३ हि वा ॥ ९७ ॥

प्रश्ने च प्रतिपदम् ।७।४।९८।

प्रश्नार्थस्य प्रश्नाख्यानार्थस्य च वाक्यस्य यत्पदं तस्य स्वरेष्वन्त्यः स्वरः प्लुतो वा स्यात् । अगम३ः पूर्वा३न् ग्रामा३न् मैत्र३ । अगमः पूर्वान् ग्रामान्मैत्र । अगमं३ पूर्वा३न् ग्रामा३न् मैत्र ३ । अगमं पूर्वान् ग्रामान् मैत्र५॥ ९८ ॥

दूरादामन्त्र्यस्य गुरुर्वैकोऽनन्त्योऽपि-लनृत् । ७ । ४ । ९९ ।

वाक्यस्य यः स्वरेष्वन्त्यस्वरो दूरादामन्त्र्यार्थपदस्थो गुरुर्वाऽनन्त्यो-ऽपि ऋद्वर्जस्वरलृकारश्चैकोऽसौ प्लुतो वा स्यात् । आगच्छ भो देवदत्त३ देवदत्त वा । सक्तून् पिब दे३वदत्त देवद३त्त देवदत्त वा । आगच्छभो क्लृ३प्तशिख क्लृप्तशिख वा । अनृदिति किम् । कृष्णमि३त्र कृष्ण-मित्र ॥ ९९ ॥

हेहैष्वेषामेव । ७ । ४ । १०० ।

दूरादामन्त्र्यस्य यौ हेहैशब्दौ तयोः प्रयुक्तयोरेव वाक्ये यत्र तत्र-स्थयोरन्त्यस्वरः प्लुतो वा स्यात् । हे३मैत्र आगच्छ । आगच्छ हे३मैत्र । आगच्छ मैत्र हे ३ । है३मैत्रागच्छ । आगच्छहै३मैत्र । आगच्छ मैत्र है ३ ॥

अस्त्रीशूद्रे प्रत्यभिवादे भोगोत्रनाम्नो वा । ७ । ४ । १०१ ।

यदभिवादितो गुरुः कुशलानुयोगादिमद्वाक्यं प्रयुङ्क्ते तत्राऽस्त्री-शूद्रविषये वर्त्तमानस्य वाक्यस्य स्वरेष्वन्त्यस्वरो भोसो गोत्रस्य नाम्नो वाऽऽमन्त्र्यस्यांशः प्लुतो वा स्यात् । अभिवादये मैत्रोऽहं भोः आयुष्माने-धि भोः ३ भो वा । अभिवादये गार्ग्योऽहं भोः कुशल्यसि गार्ग्य ३ गार्ग्य वा । अभिवादये मैत्रो ऽहं भोः आयुष्मन्नेधि मैत्र ३ मैत्र वा । स्त्रीशूद्र-वर्जनं किम् । अभिवादये गार्ग्यऽहं भोः आयुष्मती त्वं भव गार्गि । अभिवादये तुषजकोऽहं भोः कुशल्यऽसि तुषजक ॥ १०१ ॥

प्रश्नार्चाविचारे च सन्धेयसन्ध्यक्षरस्यादिदुत्परः । ७ । ४ । १०२ ।

एषु प्रत्यभिवादे च वर्त्तमानस्य वाक्यस्य स्वरेष्वन्त्यः स्वरः सन्धियोग्यसन्ध्यक्षरान्तस्य प्लुतो भवन् इदुत्पर आत्स्यात्। अगमः ३ पूर्वा३न् ग्रामा३न् अग्निभूता३इ। पटा३उ। अर्चा, शोभनः खल्व३सि अग्निभूता३इ। पटा३उ। विचारे, वस्तव्यं किं निर्ग्रन्थस्य सागारिका३इ। उतानागारिके। प्रत्यभिवादे, आयुष्मानेधि अग्निभूता ३ इ। सन्धेयेति किम्। कच्चि३त् कुशल३म् भवत्योः ३ कन्ये३॥ १०२॥

तयोर्य्वौ स्वरे संहितायाम्। ७। ४। १०३।

तयोः प्लुताकारात्परयोरिदुतोः स्वरे परे संहिताविषये यथासङ्ख्यं य्वौ स्याताम्। अगमः ३ अग्निभूता ३ यत्रागच्छ। अगमः ३ पटा ३ वत्रागच्छ। संहितायामिति किम्। अग्ना ३ इ इन्द्रम्। पटा ३ उ उदकम्॥ १०३॥

पञ्चम्या निर्दिष्टे परस्य। ७। ४। १०४।

पञ्चम्या निर्दिष्टे यत्कार्यमुक्तं तत्परस्याऽव्यवधेः स्यात्। अतोभिस् ऐस्। वृक्षैः। इह माभूत्. मालाभिरत्र दृषद्भिः॥१०४॥

सप्तम्या पूर्वस्य। ७। ४। १०५।

सप्तम्या निर्दिष्टं यत्कार्यमुक्तं तत्पूर्वस्या ऽव्यवधेः स्यात्। दध्यत्र। इह माभूत्। समिदत्र॥१०५॥

षष्ठ्याऽन्त्यस्य। ७। ४। १०६।

षष्ठ्या निर्दिष्टं यदुक्तं तत्षष्ठ्युक्तस्य योऽन्त्यस्तस्य स्यात। अष्टाभिः॥

अनेकवर्णः सर्वस्य। ७। ४। १०७।

अयं विधिः षष्ठ्योक्तस्य सर्वस्यैव स्यात्। तिसृभिः॥ १०७॥

प्रत्ययस्य। ७। ४। १०८।

प्रत्ययस्थानिनो विधिः सर्वस्य स्यात। सर्वे॥ १०८॥

स्थानीवावर्णविधौ । ७ । ४ । १०९ ।

आदेशः आदेशीव स्यात् न चेत्स्थानिवर्णाश्रयं कार्यम् । भव्यम् । कस्मै । राजा । प्रकृत्य । प्रस्तुत्य । धर्मो वो रक्षतु । अवर्णविधाविति किम् । द्यौः । कइष्टः । प्रदीव्य ॥ १०९ ॥

स्वरस्य परे प्राग्विधौ । ७ । ४ । ११० ।

स्वरस्यादेशः परनिमित्तकः पूर्वविधौ विधेये स्थानीव स्यात । कथयति । पादिकः । संस्यते । पर इति किम् । द्विपदिकां दत्ते । प्राग्विधाविति किम् । नैधेयः ॥ ११० ॥

न सन्धिङीयक्विद्विदीर्घासद्विधावस्क्लुकि । ७ । ४ । १११ ।

सन्धिविधौ ङीविधौ यविधौ क्विविधौ द्वित्वविधौ दीर्घविधौ संयोगस्यादौ स्कोर्लुगिति स्कलुग्वर्जे चाऽसद्विधौ स्वरस्यादेशः स्थानीव न स्यात् सन्धिः । वियन्ति । ङी, बिम्बम् । यः, कण्डूतिः । क्विः, दयूः । द्विः, दध्यत्र । दीर्घः, शामंशामम् । असद्विधिः, यायष्टिः । अस्क्लुकीति किम् । सूक्तः । काष्ठतक् ॥ १११ ॥

लुप्यय्वृल्लेनत् । ७ । ४ । ११२ ।

प्रत्ययस्य लुपि सत्यां लुब् भूतपरनिमित्तकं पूर्वं कार्यं न स्यात् य्वृत् लं एनच्च मुक्त्वा । तद् गर्गाः । लुगीत्युक्ते लुकि स्यादेव । गोमान् । अय्वृल्लेनदिति किम् । जरीगृहीति । निजागलीति । एनत्पश्य ॥ ११२ ॥

विशेषणमन्तः । ७ । ४ । ११३ ।

अभेदेनोक्तोऽवयवोविशेषणं विशेषस्य समुदायस्यान्तः स्यात् । अतः स्यमोऽम् । कुण्डम् । इह न स्यात् तद् ॥ ११३ ॥

सप्तम्या आदिः । ७ । ४ । ११४ ।

सप्तम्यन्तस्य विशेष्यस्य यद्विशेषणं तत्तस्यादिः स्यात् । इन्ङीस्वरे लुक् । पथः । इह माभूत् पथिषु ॥ ११४ ॥

प्रत्ययः प्रकृत्यादेः । ७ । ४ । ११५ ।

यस्माद्यः प्रत्ययो विधीयते सा तस्य प्रकृतिः प्रत्ययः प्रकृत्यादेः समुदायस्य विशेषणं स्यात् नोनाधिकस्य । मातृभोगीणः ॥ ११५ ॥

गौणोङ्यादिः । ७ । ४ । ११६ ।

ङीमारभ्य ष्यं यावत् ङ्यादिः प्रत्ययः स गौणः सन्प्रकृत्यादेः समुदायस्य विशेषणं स्यात् । अतिकारीषगन्ध्याबन्धुः । गौण इति किम् । मुख्योऽधिकस्यापि विशेषणं स्यात् । परमकारीषगन्धी बन्धुः ॥ ११६ ॥

कृत्सगतिकारकस्यापि । ७ । ४ । ११७ ।

कृत्प्रत्ययः प्रकृत्यादेः समुदायस्य गतिकारकपूर्वस्य केवलस्य च विशेषणं स्यात् । यथेह समासो भस्मनिहुतं तथा उदके विशीर्णम् । अवतप्ते नकुलस्थितम् ॥ ११७ ॥

परः । ७ । ४ । ११८ ।

प्रत्ययः प्रकृतेः पर एव स्यात् । अजा । वृक्षः । जुगुप्सते ॥ ११८ ॥

स्पर्द्धे । ७ । ४ । ११९ ।

द्वयोर्विध्योरन्यत्र सावकाशयोस्तुल्यबलयोरेकत्राऽनेकत्र चोपनिपातः स्पर्द्धः, तत्र यः सूत्रपाठे परः सविधिः स्यात् । वनानि । अत्रशसाऽता सश्च नः पुंसीत्यतो नपुंसकस्य शिरित्येव स्यात् ॥ ११९ ॥

आसन्नः । ७ । ४ । १२० ।

यथास्वस्थानार्थं प्रमाणादिभिरासन्न एव विधिः स्यात्। दण्डाग्रम्। अत्र कण्ठ्ययोरतोः कण्ठ्य एव आ दीर्घः। वातण्ड्ययुवतिः। वतण्ड्याः, पुंवद्भावार्थतः आसन्नो वातण्ड्यः। अमुष्मै। मादुवर्णोऽन्विति मात्रिकस्य मात्रिकः॥ १२०॥

सम्बन्धिनां सम्बन्धे। ७। ४। १२१।

सम्बन्धिशब्दानां यत्कार्यमुक्तं तत्सम्बन्ध एव सति स्यात्। श्वसुर्यः। संज्ञायास्त्वत्रैव। श्वासुरिः॥ १२१

समर्थः पदविधिः। ७। ४। १२२।

समर्थपदाश्रयत्वात्समर्थः पदसम्बन्धीविधिः पदविधिः सर्वपदविधिः समर्थोज्ञेयः, सामर्थ्यं च व्यपेक्षा एकार्थीभावश्च। पदविधिस्तु समासनामधातुकृत्तद्धितोपपदविभक्तियुष्मदस्मदादेशः प्लुतरूपः। धर्मश्रितः। पुत्रीयति। कुम्भकारः। औपगवः। नमोदेवेभ्यः। धर्मस्ते स्वम्। धर्मो मे स्वम्। अङ्गकूज ३ इदानीं ज्ञास्यसि जाल्म। समर्थ इति किम्। पश्य धर्मं श्रितो मैत्रो गुरुकुलम्। पश्यति पुत्रमिच्छति सुखम्। पश्य कुम्भं करोति कटम्। गृहमुपगोरपत्यं तव। इदं नमो देवाः शृणुत। ओदनं पचतव मम वा भविष्यति। अङ्गकूजत्ययमिदानीं ज्ञास्यति जाल्मः। पदोक्तवर्णविधिरसामर्थ्येऽपि स्यात्। तिष्ठतु दध्यशान त्वं शाकेन। एवं समासनामधातुकृतद्धितेषु वाक्ये व्यपेक्षावृत्तावेकार्थीभावः। शेषेषु पुनर्व्यपेक्षैव सामर्थ्यम्॥ १२२॥

इत्याचार्यहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञ-
शब्दानुशासनलघुवृत्तौ सप्तमस्याध्यायस्य
चतुर्थः पादः समाप्तः॥

॥ सम्पूर्णा चासौ लघुवृत्तिः॥

श्रीहेमचन्द्राचार्यविरचित–हैमधातुपाठः ।

१	भू	सत्तायाम्
२	पां	पाने
३	घ्रां	गन्धोपादाने
४	ध्मां	शब्दाग्निसंयोगयोः
५	ष्ठां	गतिनिवृत्तौ
६	म्नां	अभ्यासे
७	दाम्	दाने
८	जिं ज्रिं	अभिभवे
९	क्षिं	क्षये
१०	इं दुं द्रुं शुं स्रुं	गतौ
११	ध्रुं	स्थैर्ये च
१२	सुं	प्रसवैश्वर्ययोः
१३	स्मृं	चिन्तायाम्
१४	गृं घृं	सेचने
१५	औस्वृं	शब्दोपतापयोः
१६	ह्वृं	वरणे
१७	ध्वृं ह्वृं	कौटिल्ये
१८	सृं	गतौ
१९	ऋं	प्रापणे च
२०	तॄं	प्लवनतरणयोः
२१	ट्धें	पाने
२२	दैव्	शोधने
२३	ध्यैं	चिन्तायाम्
२४	ग्लैं	हर्षक्षये
२५	म्लैं	गात्रविनामे
२६	द्यैं	न्यङ्करणे
२७	द्रैं	स्वप्ने
२८	ध्रैं	तृप्तौ
२९	कैं गैं रैं	शब्दे
३०	ष्ट्यैं स्त्यैं	सङ्घाते च
३१	ख्यैं	खदने
३२	क्षैं जैं सैं	क्षये
३३	स्रैं श्रैं	पाके
३४	पैं ओवैं	शोषणे
३५	ष्णैं	वेष्टने
३६	फक्क	नीचैर्गतौ
३७	तक	हसने
३८	तकु	कृच्छ्रजीवने
३९	शुक	गतौ
४०	बुक्क	भाषणे
४१	उखृ राखृ लाखृ द्राखृ ध्राखृ	शोषणालमर्थयोः

४२ शाखृ श्लाखृ व्याप्तौ
४३ कक्ख हसने
४४ उख नख णख वख मख रख
लख मखु रखु लखु रिखु इख
इखु ईखु वल्ग रगु लगु तगु
श्रगु श्लगु अगु वगु मगु स्वगु
इगु उगु रिगु लिगु गतौ
४५ त्वगु कम्पने च
४६ युगु जुगु बुगु वर्जने
४७ गग्घ हसने
४८ दघु पालने
४९ शिघु आघ्राणे
५० मघु मण्डने
५१ लघु शोषणे
५२ शुच शोके
५३ कुच शब्दे तारे
५४ क्रुञ्च गतौ
५५ कुञ्च च कौटिल्याल्पीभावयोः
५६ लुञ्च अपनयने
५७ अर्च्च पुजायाम्
५८ अञ्चू गतौ च
५९ वञ्चू चञ्चू तञ्चू त्वञ्चू मञ्चू
मुञ्चू म्रुंचू म्रुचू म्लुचू ग्लुचू
ग्लुंचू षश्च गतौ
६० ग्रुचू ग्लुचू स्तेये
६१ म्लेच्छ अव्यक्तायामवाचि
६२ लछ लाछु लक्षणे
६३ वाछु इच्छायाम्
६४ आछु आयामे
६५ ह्रीछ लज्जायाम्
६६ हूर्छा कौटिल्ये
६७ मूर्छा मोहसमुच्छ्राययोः
६८ स्फूर्छा स्मूर्छा विस्मृतौ
६९ युछ प्रमादे
७० धृज धृजु ध्वज ध्वजु ध्रज
ध्रजु वज व्रज षस्ज गतौ
७१ अज क्षेपणे च
७२ कुजू खुजू स्तेये
७३ अर्ज सर्ज अर्जने
७४ कर्ज व्यथने
७५ खर्ज मार्जने च
७६ खज मन्थे
७७ खजू गतिवैकल्ये
७८ एजृ कम्पने
७९ ट्वोस्फूर्जा वज्रनिर्घोषे
८० क्षीज कूज गुज गुजु अव्यक्ते
शब्दे
८१ लज लजु तर्ज भर्त्सने
८२ लाज लाजु भर्जने च
८३ जज जजु युद्धे
८४ तुज हिंसायाम्
८५ तुजु बलने च

८६ गर्ज गजु गृज गृजु मुज मुजु मृज मृजु मज शब्दे
८७ गज मदने च
८८ त्यजं हानौ
८९ षंजं सङ्गे
९० कटे वर्षावर्णयोः
९१ शट रुजाविशरणगत्यवसादनेषु
९२ वट वेष्टने
९३ किट खिट उत्त्रासे
९४ शिट षिट अनादरे
९५ जट झट सङ्घाते
९६ पिट शब्दे च
९७ भट भृतौ
९८ तट उच्छ्राये
९९ खट कांक्षे
१०० णट नृत्तौ
१०१ हट दीप्तौ
१०२ षट अवयवे
१०३ लुट विलोटने
१०४ चिट प्रैष्ये
१०५ विट शब्दे
१०६ हेट विबाधायाम्
१०७ अट पट इट किट कट कटु कटै गतौ
१०८ कुट्ट वैकल्ये
१०९ मुट प्रमर्दने
११० चुट चुट्ट अल्पीभावे
१११ वट्ट विभाजने
११२ रुट्ट लुट्ट स्तेये
११३ स्फुट स्फुट्ट विशरणे
११४ लट बाल्ये
११५ रट रठ च परिभाषणे
११६ पठ व्यक्तायाम् वाचि
११७ वठ स्थौल्ये
११८ मठ मदनिवासयोश्च
११९ कठ कृच्छ्रजीवने
१२० हठ बलात्कारे
१२१ उठ रुठ लुठ उपघाते
१२२ पिठ हिंसासंक्लेशयोः
१२३ शठ कैतवे च
१२४ शुठ गतिप्रतिघाते
१२५ कुठु लुठु आलस्ये च
१२६ शुठु शोषणे
१२७ अठ रुठु गतौ
१२८ पुड्ड प्रमर्दने
१२९ मुड्ड खण्डने च
१३० मड्ड भूषायाम्
१३१ गड्ड वदनैकदेशे
१३२ शौडृ गर्वे
१३३ यौडृ सम्बन्धे
१३४ मेडृ म्रेडृ म्लेडृ लोडृ लौडृ

उन्मादे

१३५ रोडृ रौडृ तौडृ अनादरे

१३६ क्रीडृ विहारे

१३७ तुडृ तूडृ जौडृ तोडने

१३८ हुडृ हूडृ हूडृ हौडृ गतौ

१३९ खोडृ प्रतिघाते

१४० विड आक्रोशे

१४१ अड उद्यमे

१४२ लड विलासे

१४३ कड्ड मदे

१४४ कड्ड कार्कश्ये

१४५ अड्ड अभियोगे

१४६ चुड्ड हावकरणे

१४७ अण रण वण व्रण बण भण भ्रण मण घण ध्वण भ्रण कण क्वण चण शब्दे

१४८ ओणृ अपनयने

१४९ शोणृ वर्णगत्योः

१५० श्रोणृ श्लोणृ संघाते

१५१ पैणृ गतिप्रेरणश्लेषणेषु

१५२ चितै संज्ञाने

१५३ अत सातत्यगमने

१५४ च्युतृ आसेचने

१५५ चुतृ श्चुतृ श्च्युतृ क्षरणे

१५६ जुतृ भासने

१५७ अतु बन्धने

१५८ कित निवासे

१५९ ऋत घृणागतिस्पर्द्धेषु

१६० कुथु पुथु लुथु मथु मन्थ मान्थ हिंसासंक्लेशयोः

१६१ खाद्द भक्षणे

१६२ बद स्थैर्ये

१६३ खद हिंसायाम् च

१६४ गद व्यक्तायाम् वाचि

१६५ रद विलेखने

१६६ णद ञिक्ष्विदा अव्यक्ते शब्दे

१६७ अर्द गतियाचनयोः

१६८ नर्द णर्द गर्द शब्दे

१६९ तर्द हिंसायाम्

१७० कर्द कुत्सिते शब्दे

१७१ खर्द दशने

१७२ अदु बन्धने

१७३ इदु परमैश्वर्ये

१७४ बिदु अवयवे

१७५ णिद्रु कुत्सायाम्

१७६ टुनदु समृद्धौ

१७७ चदु दीप्त्याल्हादनयोः

१७८ त्रदु चेष्टायाम्

१७९ कदु क्रदु क्लदु रोदनाह्वानयोः

१८० क्लिदु परिदेवने

१८१ स्कंदृं गतिशोषणयोः

१८२ षिधु गत्याम्

१८३ षिधौ शास्त्रमाङ्गल्ययोः
१८४ शुन्ध शुद्धौ
१८५ स्तन धन ध्वन चन स्वन वन शब्दे
१८६ वन षन संभक्तौ
१८७ कनै दीप्तिकान्तिगतिषु
१८८ गुपौ रक्षणे
१८९ तपं,—धुप, सन्तापे
१९० रप लप जल्प व्यक्ते वचने
१९१ जप मानसे च
१९२ चप सान्त्वने
१९३ षप समवाये
१९४ सृप्लृं गतौ
१९५ चुप मन्दायाम्
१९६ तुप तुम्प त्रुप त्रुम्प तुफ तुम्फ त्रुफ त्रुम्फ हिंसायाम्
१९७ वर्फ रफ रफु अर्ब कर्ब खर्ब गर्ब चर्ब तर्ब नर्ब पर्ब बर्ब शर्ब षर्ब सर्ब रिबु रबु गतौ
१९८ कुबु आच्छादने
१९९ लुबु तुबु अर्दने
२०० चुबु वक्त्रसंयोगे
२०१ सृभू सृम्भू स्रिभू षिभू भर्भ हिंसायाम्
२०२ शुम्भ भाषणे च
२०३ यभं जभ मैथुने
२०४ चमू छमू जमू झमू जिमू अदने
२०५ क्रमू पादविक्षेपे
२०६ यमूं उपरमे
२०७ स्यमू शब्दे
२०८ णमं प्रह्वत्वे
२०९ षम ष्टम वैक्लव्ये
२१० अम शब्दभक्त्योः
२११ अम द्रम हम्म मिमृ गम्लृं गतौ
२१२ हय हर्य क्लान्तौ च
२१३ मव्य बन्धने
२१४ सूर्क्ष्य ईर्क्ष्य ईर्ष्य ईर्ष्यार्थाः
२१५ शुच्यै चुच्यै अभिषवे
२१६ त्सर छद्मगतौ
२१७ क्मर हूर्छने
२१८ अभ्र वभ्र मभ्र गतौ
२१९ चर भक्षणे च
२२० धोर्ऋ गतिचातुर्ये
२२१ खोर्ऋ प्रतिघाते
२२२ दल त्रिफला विशरणे
२२३ मील श्मील स्मील क्ष्मील निमेषणे
२२४ पील प्रतिष्टम्भे
२२५ णील वरणे
२२६ शील समाधौ
२२७ कील बन्धे

२२८ कूल आवरणे
२२९ शूल रुजायाम्
२३० तूल निष्कर्षे
२३१ पूल संघाते
२३२ मूल प्रतिष्ठायाम्
२३३ फल निष्पत्तौ
२३४ फुल्ल विकसने
२३५ चुल्ल हावकरणे
२३६ चिल्ल शैथिल्ये च
२३७ पेल फेल शेल षेल सेल वेल्ल सल तिल तिल्ल पल्ल वेल्ल गतौ
२३८ वेल चेल केल क्वेल खेल स्खल चलने
२३९ खल सञ्चये च
२४० श्वल श्वल्ल आशुगतौ
२४१ गल चर्व अदने
२४२ पूर्व्व पर्व्व मर्व्व पूरणे
२४३ गर्व धिवु शव गतौ
२४४ कर्व्व खर्व्व गर्व्व दर्पे
२४५ ष्ठिवू क्षिवू निरसने
२४६ जीव प्राणधारणे
२४७ पीव मीव तीव नीव स्थौल्ये
२४८ उर्व्वैं तुर्व्वैं थुर्व्वैं दुर्व्वैं धुर्व्वैं जुर्व्वैं अर्व भर्व शर्व हिंसायाम्
२४९ मुर्व्वैं मव बन्धने
२५० गुर्व्वैं उद्यमे
२५१ पिवु मिवु निवु सेचने
२५२ हिवु दिवु जिवु प्रीणने
२५३ इवु व्याप्तौ च
२५४ अव रक्षणगतिकान्तिप्रीतितृप्त्यवगमनप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसादहनभाववृद्धिषु
२५५ कश शब्दे
२५६ मिश मश रोषे च
२५७ शश प्लुतिगतौ
२५८ णिश समाधौ
२५९ दृशृं प्रेक्षणे
२६० दंशं दशने
२६१ घुषृ शब्दे
२६२ चूष पाने
२६३ तूष तुष्टौ
२६४ पूष वृद्धौ
२६५ लूष मूष स्तेये
२६६ षूष प्रसवे
२६७ ऊष रुजायाम्
२६८ ईष उंछे
२६९ कृषं विलेखने
२७० कष शिष जष झष वष मष मुष रुष रिष यूष जूष शष चष हिंसायाम्
२७१ वृष संघाते च

२७२ भष भर्त्सने
२७३ जिषू विषू मिषू निषू पृषू वृषू सेचने
२७४ मृषू सहने च
२७५ उषू श्रिषू श्लिषू प्रुषू प्लुषू दाहे
२७६ घृषू सङ्घर्षे
२७७ हृषू अलीके
२७८ पुष पुष्टौ
२७९ भूष तसु अलङ्कारे
२८० तुस ह्रस ह्लस रस शब्दे
२८१ लस श्लेषणक्रीडनयोः
२८२ घस्लृं अदने
२८३ हसे हसने
२८४ पिसृ पेसृ वेसृ गतौ
२८५ शसू हिंसायाम्
२८६ शंसू स्तुतौ च
२८७ मिहं सेचने
२८८ दहं भस्मीकरणे
२८९ चह कल्कने
२९० रह त्यागे
२९१ रहु गतौ
२९२ दृह दृहु बृह वृद्धौ
२९३ बृहू बृहु शब्दे च
२९४ उहृ तुहृ दुहृ अर्दने
२९५ अर्ह मह पूजायाम्
२९६ उक्ष सेचने
२९७ रक्ष पालने
२९८ मक्ष मुक्ष सङ्घाते
२९९ अक्षौ व्याप्तौ च
३०० तक्षौ त्वक्षौ तनूकरणे
३०१ णिक्ष चुम्बने
३०२ तृक्ष स्तृक्ष णक्ष गतौ
३०३ वक्ष रोषे
३०४ त्वक्ष त्वचने
३०५ सूर्क्ष्य अनादरे
३०६ काक्षु वाक्षु माक्षु कांक्षायाम्
३०७ द्राक्षु ध्राक्षु ध्वाक्षु घोरवासिते च

इति परस्मैभाषाः ।

१ गाङ् गतौ
२ ष्मिङ् ईषद्धसने
३ डीङ् विहायसां गतौ
४ उंङ् कुंङ् गुंङ् घुंङ् ङुंङ् शब्दे
५ च्युंङ् ज्युंङ् जुंङ् प्रुंङ् प्लुङ् गतौ
६ रुंङ् रेषणे च
७ पूङ् पवने
८ मूङ् बन्धने
९ धृंङ् अवध्वंसने
१० मेंङ् प्रतिदाने
११ देंङ् त्रैङ् पालने
१२ श्यैङ् गतौ
१३ प्यैङ् वृद्धौ

१४ वकुङ् कौटिल्ये
१५ मकुङ् मण्डने
१६ अकुङ् लक्षणे
१७ शीकृङ् सेचने
१८ लोकृङ् दर्शने
१९ श्लोकृङ् सङ्घाते
२० द्रेकृङ् ध्रेकृङ् शब्दोत्साहे
२१ रेकृङ् शकुङ् शङ्कायाम्
२२ ककि लौल्ये
२३ कुकि वृकि आदाने
२४ चकि तृप्तिप्रतीघातयोः
२५ ककुङ् श्वकुङ् त्रकुङ् श्रकुङ् श्लकुङ् ढौकृङ् त्रौकृङ् ष्वष्कि वस्कि मस्कि तिकि टिकि टीकृङ् सेकृङ् स्रेकृङ् रघुङ् लघुङ् गतौ
२६ अघुङ् वघुङ् गत्याक्षेपे
२७ मघुङ् कैतवे च
२८ राघृङ् लाघृङ् सामर्थ्ये
२९ द्राघृङ् आयासे च
३० श्लाघृङ् कत्थने
३१ लोचृङ् दर्शने
३२ षचि सेचने
३३ शचि व्यक्तायाम् वाचि
३४ काचि बन्धने
३५ कचुङ् दीप्तौ च
३६ श्वचि श्वचुङ् गतौ
३७ वर्चि दीप्तौ
३८ मचि मुचुङ् कल्कने
३९ मचुङ् धारणोच्छ्रायपूजनेषु च
४० पचुङ् व्यक्तीकरणे
४१ ष्टुचि प्रसादे
४२ एजृङ् भ्रेजृङ् भ्राजि दीप्तौ
४३ इजुङ् गतौ
४४ ईजि कुत्सने च
४५ ऋजि गतिस्थानार्जनोपार्जनेषु
४६ ऋजुङ् भृजैङ् भर्जने
४७ तिजि क्षमानिशानयोः
४८ घट्टि चलने
४९ स्फुटि विकसने
५० चेष्टि चेष्टायाम्
५१ गोष्टि लोष्टि सङ्घाते
५२ वेष्टि वेष्टने
५३ अट्टि हिंसातिक्रमयोः
५४ एठि हेठि विबाधायाम्
५५ मठुङ् कठुङ् शोके
५६ मुठुङ् पलायने
५७ वठुङ् एकचर्यायाम्
५८ अठुङ् पठुङ् गतौ
५९ हुडुङ् पिडुङ् सङ्घाते
६० शडुङ् रुजायाम् च

६१ तडुङ् ताडने
६२ कडुङ् मदे
६३ खडुङ् मन्थे
६४ खुडुङ् गतिवैकल्ये
६५ कुडुङ् दाहे
६६ वडुङ् मडुङ् वेष्टने
६७ भडुङ् परिभाषणे
६८ मुडुङ् मार्जने
६९ तुडुङ् तोडने
७० भुडुङ् वरणे
७१ चडुङ् कोपे
७२ द्राडृङ् ध्राडृङ् विशरणे
७३ शाडृङ् श्लाघायाम्
७४ वाडृङ् आप्लाव्ये
७५ हेडृङ् होडृङ् अनादरे
७६ हिडुङ् गतौ च
७७ घिणुङ् घुणुङ् घृणुङ् ग्रहणे
७८ घुणि घूर्णि भ्रमणे
७९ पणि व्यवहारस्तुत्योः
८० यतैङ् प्रयत्ने
८१ युतृङ् जुतृङ् भासने
८२ विथृङ् वेथृङ् याचने
८३ नाथृङ् उपतापैश्वर्याशीःषु च
८४ श्रथुङ् शैथिल्ये
८५ ग्रथुङ् कौटिल्ये
८६ कत्थि श्लाघायाम्
८७ श्विदुङ् श्वैत्ये
८८ वदुङ् स्तुत्यभिवादनयोः
८९ भदुङ् सुखकल्याणयोः
९० मदुङ् स्तुतिमोदमदस्वप्नगतिषु
९१ स्पदुङ् किञ्चिच्चलने
९२ क्लिदुङ् परिदेवने
९३ मुदि हर्षे
९४ ददि दाने
९५ हृदि पुरीषोत्सर्गे
९६ ष्वदि स्वदि स्वादि आस्वादने
९७ उर्दि मानक्रीडयोश्च
९८ कुर्दि गुर्दि गुदि क्रीडायाम्
९९ षूदि क्षरणे
१०० ह्रादि शब्दे
१०१ ह्लादैङ् सुखे च
१०२ पर्दि कुत्सिते शब्दे
१०३ स्कुदुङ् आप्रवणे
१०४ एधि वृद्धौ
१०५ स्पर्द्धि सङ्घर्षे
१०६ गाधृङ् प्रतिष्ठालिप्साग्रन्थेषु
१०७ बाधृङ् रोटने
१०८ दधि धारणे
१०९ बधि बन्धने
११० नाधृङ् नाथृङ्वत्
१११ पनि स्तुतौ

११२ मानि पूजायाम्
११३ तिपृङ् ष्टिपृङ् ष्टेपृङ् क्षरणे
११४ तेपृङ् कम्पने च
११५ टुवेपृङ् केपृङ् गेपृङ् कपुङ् चलने
११६ ग्लेपृङ् दैन्ये च
११७ मेपृङ् रेपृङ् लेपृङ् गतौ
११८ त्रपौषि लज्जायाम्
११९ गुपि गोपनकुत्सनयोः
१२० अबुङ् रबुङ् शब्दे
१२१ लबुङ् अवस्रंसने च
१२२ कबृङ् वर्णे
१२३ क्लीबृङ् अधार्ष्ट्ये
१२४ क्षीबृङ् मदे
१२५ शीभृङ् चीभृङ् शल्भि कत्थने
१२६ वल्भि भोजने
१२७ गल्भि धार्ष्ट्ये
१२८ रेभृङ् अभुङ् रभुङ् लभुङ् शब्दे
१२९ ष्टभुङ् स्कभुङ् ष्टुभुङ् स्तम्भे
१३० जभुङ् जभैङ् जृभुङ् गात्रविनामे
१३१ रभिं राभस्ये
१३२ डुलभिंष् प्राप्तौ
१३३ भामि क्रोधे
१३४ क्षमौषि सहने
१३५ कमूङ् कान्तौ
१३६ अयि वयि पयि मयि नयि चयि रयि गतौ
१३७ तयि णयि रक्षणे च
१३८ दयि दानगतिहिंसादहनेषु च
१३९ ऊयैङ् तन्तुसन्ताने
१४० पूयैङ् दुर्गन्धविशरणयोः
१४१ क्नूयैङ् शब्दोन्दनयोः
१४२ क्ष्मायैङ् विधूनने
१४३ स्फायैङ् ओप्यायैङ् वृद्धौ
१४४ तायृङ् सन्तानपालनयोः
१४५ वलि वल्लि संवरणे
१४६ शलि चलने च
१४७ मलि मल्लि धारणे
१४८ भलि भल्लि परिभाषणहिंसादानेषु
१४९ कलि शब्दसंख्यानयोः
१५० कल्लि अशब्दे
१५१ तेवृङ् देवृङ् देवने
१५२ षेवृङ् सेवृङ् केवृङ् खेवृङ् गेवृङ् ग्लेवृङ् पेवृङ् प्लेवृङ् मेवृङ् म्लेवृङ् सेवने
१५३ रेवृङ् पवि गतौ
१५४ काशृङ् दीप्तौ
१५५ क्लेशि विबाधने
१५६ भाषि च व्यक्तायामवाचि

१५७ ईषि गतिहिंसादर्शनेषु
१५८ गेषृङ् अन्विच्छायाम्
१५९ येषृङ् प्रयत्ने
१६० जेषृङ् णेषृङ् एषृङ् हेषृङ् गतौ
१६१ रेषृङ् हेषृङ् अव्यक्तेशब्दे
१६२ पर्षि स्नेहने
१६३ घुषुङ् कान्तीकरणे
१६४ स्रंसूङ् प्रमादे
१६५ कासृङ् शब्दकुत्सायाम्
१६६ भासि टुभ्रासि टुभ्लासृङ् दीप्तौ
१६७ रासृङ् णासृङ् शब्दे
१६८ णसि कौटिल्ये
१६९ भ्यसि भये
१७० आङ् शसुङ् इच्छायाम्
१७१ ग्रसूङ् ग्लसूङ् अदने
१७२ घसुङ् करणे
१७३ ईहि चेष्टायाम्
१७४ अहुङ् लिहि, गतौ
१७५ गर्हि गल्हि कुत्सने
१७६ वर्हि वल्हि प्राधान्ये
१७७ बर्हि बल्हि परिभाषणहिंसा-
छादनेषु
१७८ वेहृङ् जेहृङ् वाहृङ् प्रयत्ने
१७९ द्राहृङ् निक्षेपे
१८० ऊहि तर्के
१८१ गाहौङ् विलोडने
१८२ ग्लाहौङ् ग्रहणे
१८३ बहुङ् महुङ् वृद्धौ
१८४ दक्षि शैघ्र्ये च
१८५ धुक्षि धिक्षि सन्दीपनक्लेशन-
जीवनेषु
१८६ वृक्षि वरणे
१८७ शिक्षि विद्योपादाने
१८८ भिक्षि याच्ञायाम्
१८९ दीक्षि मौण्ड्येज्योपनयन-
नियमव्रतादेशेषु
१९० ईक्षि दर्शने

इति आत्मनेभाषाः ।

१ श्रिग् सेवायाम्
२ णींग् प्रापणे
३ हृंग् हरणे
४ भृंग् भरणे
५ धृंग् धारणे
६ डुकृंग् करणे
७ हिक्की अव्यक्ते शब्दे
८ अञ्चूग् गतौ च
९ डुयाचृंग् याच्ञायाम्
१० डुपचींष पाके
११ राजृंग् टुभ्राजी दीप्तौ
१२ भजीं सेवायाम्
१३ रञ्जीं रागे
१४ रेटृग् परिभाषणयाचनयोः

१५ वेणृग् गतिज्ञानचिन्ता-निशामनवादित्र-ग्रहणेषु
१६ चतेग् याचने
१७ प्रोथृग् पर्याप्तौ
१८ मिथृग् मेधाहिंसयोः
१९ मेथृग् सङ्गमे च
२० चदेग् याचने
२१ ओबुन्दृग् निशामने
२२ णिदृग् णेदृग् कुत्सासन्निकर्षयोः
२३ मिदृग् मेदृग् मेधाहिंसयोः
२४ मेधृग् सङ्गमे च
२५ शृधूग् मृधूग् उन्दे
२६ बुधूग् बोधने
२७ खनूग् अवदारणे
२८ दानी अवखण्डने
२९ शानी तेजने
३० शपीं आक्रोशे
३१ चायृग् पूजानिशामनयोः
३२ व्ययी गतौ
३३ अली भूषणपर्याप्तिवारणेषु
३४ धावूग् गतिशुद्ध्योः
३५ चीवृग् ऋषीवत्
३६ दाशृग् दाने
३७ ऋषी आदानसंवरणयोः
३८ भेषृग् भये
३९ भ्रेषृग् चलने च
४० पषी बाधनस्पर्शनयोः
४१ लषी कान्तौ
४२ चषी भक्षणे
४३ छषी हिंसायाम्
४४ त्विषीं दीप्तौ
४५ अषी असी गत्यादानयोश्च
४६ दासृग् दाने
४७ माहृग् माने
४८ गुहौग् संवरणे
४९ भ्लक्षी भक्षणे

इति उभयतोभाषाः ।

---

१ द्युति दीप्तौ
२ रुचि अभिप्रीत्यां च
३ घुटि परिवर्तने
४ रुटि लुटि लुठि प्रतीघाते
५ श्विताङ् वर्णे
६ ञिमिदाङ् स्नेहने
७ ञिक्ष्विदाङ् ञिष्विदाङ् मोचने च
८ शुभि दीप्तौ
९ क्षुभि सञ्चलने
१० णभि तुभि हिंसायाम्
११ स्रंभूङ् विश्वासे
१२ भ्रंशूङ् स्रंसूङ् अवस्रंसने
१३ ध्वंसूङ् गतौ च

द्युतादिः {
१४ वृतूङ् वर्तने
१५ स्यंदौङ् श्रवणे
१६ वृधूङ् वृद्धौ
१७ शृधूङ् शब्दकुत्सायाम्
१८ कृपौङ् सामर्थ्ये
}

वृत् द्युतादयः ।

---

१ ज्वल दीप्तौ
२ कुच सम्पर्चनकौटिल्यप्रतिष्टंभविलेखनेषु
३ पत्लृ पथिगतौ
४ क्वथे निष्पाके
५ मथे विलोडने
६ षद्लृं विशरणगत्यवसादनेषु
७ शद्लृं शातने
८ बुध अवगमने
९ टुवमू उद्गिरणे
१० भ्रमू चलने
११ क्षर सञ्चलने
१२ चल कम्पने
१३ जल घात्ये
१४ टल ट्वल वैक्लव्ये
१५ ष्ठल स्थाने
१६ हल विलेखने
१७ णल गन्धे
१८ बल प्राणनधान्यावरोधयोः
१९ पुल महत्वे
२० कुल बन्धुसंस्त्यानयोः
२१ पल फल शल गतौ
२२ हुल हिंसासंवरणयोश्च
२३ क्रुशं आह्वानरोदनयोः
२४ कस गतौ
२५ रुहं जन्मनि
२६ रमिं क्रीडायाम्
२७ षहिं मर्षणे

वृत् ज्वलादिः ।

---

१ यजीं देवपूजासङ्गतिकरणदानेषु
२ व्येंग् तन्तुसन्ताने
३ वेंग् संवरणे
४ ह्वेंग् स्पर्धाशब्दयोः
५ टुवपीं बीजसन्ताने
६ वहीं प्रापणे
७ टोश्वि गतिवृद्ध्योः
८ वद व्यक्तायाम् वाचि
९ वसं निवासे

वृत् यजादिः ।

---

१ घटिष् चेष्टायाम्
२ क्षजुङ् गतिदानयोः
३ व्यथिष् भयचलनयोः
४ प्रथिष् प्रख्याने

५ म्रदिष् मर्दने
६ स्खदिष् खदने
७ कदुङ् क्रदुङ् क्लदुङ् वैक्लव्ये
८ क्रपि कृपायाम्
९ ञित्वरिष् सम्भ्रमे
१० प्रसिष् विस्तारे
११ दक्षि हिंसागत्योः
१२ श्रां पाके
१३ स्मृं आध्याने
१४ दॄ भये
१५ नॄ नये
१६ ष्टक स्तक प्रतीघाते
१७ चक तृप्तौ च
१८ अक कुटिलायां गतौ
१९ कखे हसने
२० अग अकवत्
२१ रगे शङ्कायाम्
२२ लगे सङ्गे
२३ ह्रगे ह्लगे षगे सगे ष्टगे स्थगे संवरणे
२४ वट भट परिभाषणे
२५ णट नृत्तौ
२६ गड सेचने
२७ हेड वेष्टने
२८ लड जिह्वोन्मथने
२९ फण कण रण गतौ
३० चण हिंसादानयोश्च
३१ शण श्रण दाने
३२ स्नथ क्नथ क्रथ क्लथ हिंसार्थाः
३३ छद उर्जने
३४ मदै हर्षग्लपनयोः
३५ ष्टन स्तन ध्वन शब्दे
३६ स्वन अवतंसने
३७ चन हिंसायाम्
३८ ज्वर रोगे
३९ चल कम्पने
४० ह्वल ह्मल चलने
४१ ज्वल दीप्तौ च

वृत् घटादिः ।

इति भ्वादयो निरनुबन्धा धातवः समाप्ताः॥

१ अदं प्सांक् भक्षणे
२ भांक् दीप्तौ
३ यांक् प्रापणे
४ वांक् गतिगन्धनयोः
५ ष्णांक् शौचे
६ श्रांक् पाके
७ द्रांक् कुत्सित् गतौ
८ पांक् रक्षणे
९ लांक् आदाने
१० रांक् दाने
११ दांवक् लवने
१२ ख्यांक् प्रकथने

१३　प्रांक्　पूरणे
१४　मांक्　माने
१५　इंक्　स्मरणे
१६　इंण्क्　गतौ
१७　वींक् प्रजनकान्त्यसनखादने च
१८　धुंक्　अभिगमे
१९　षुंक्　प्रसवैश्वर्ययोः
२०　तुंक्　वृत्तिहिंसापूरणेषु
२१　युंक्　मिश्रणे
२२　णुक्　स्तुतौ
२३　क्ष्णुक्　तेजने
२४　स्नुक्　प्रस्रवने
२५　टुक्षु रु कुंक्　शब्दे
२६　रुदृक्　अश्रुविमोचने
२७　ञिष्वपंक्　शये
२८　अन श्वसक् प्राणने
२९　जक्षक्　भक्षहसनयोः
३०　दरिद्राक्　दुर्गतौ
३१　जागृक्　निद्राक्षये
३२　चकासृक्　दीप्तौ
३३　शासूक्　अनुशिष्टौ
३४　वचंक्　भाषणे
३५　मृजौक्　शुद्धौ
३६　सस्तुक्　स्वप्ने
३७　विदक्　ज्ञाने
३८　हनंक्　हिंसागत्योः
३९　वशक्　कान्तौ
४०　असूक्　भुवि
४१　षसक्　स्वप्ने
४२　यङ्लुप्　च

इति परस्मैभाषाः ।

१　इंङ्क्　अध्ययने
२　शीङ्क्　स्वप्ने
३　ह्नुंङ्क्　अपनयने
४　षूङौक्　प्राणिगर्भविमोचने
५　पृचैङ् पृजुङ् पिजुकि संपर्चने
६　वृजैकिं　वर्जने
७　णिजुकिं　विशुद्धौ
८　शिजुकि　अव्यक्ते शब्दे
९　इडिक्　स्तुतौ
१०　ईरिक्　गतिकंपनयोः
११　ईशिंक्　ऐश्वर्ये
१२　वसिक्　आच्छादने
१३　आङ्शासूकि इच्छायाम्
१४　आसिक्　उपवेशने
१५　कसुकि　गतिसातनयोः
१६　णिसुकि　चुंबने
१७　चक्षिक्　व्यक्तायाम् वाचि

इति आत्मनेभाषाः ।

१ ऊर्णुगक् आच्छादने
२ ष्टुंगक् स्तुतौ
३ ब्रूंगक् व्यक्तायाम् वाचि
४ द्विषींक् अप्रीतौ
५ दुहींक् क्षरणे
६ दिहींक् लेपे
७ लिहींक् आस्वादने

इति उभयतोभाषाः ।

---

१ हुंक् दानादनयोः
२ ओहांक् त्यागे
३ ञिभीक् भये
४ ह्रींक् लज्जायाम्
५ पॄंक् पालनपूरणयोः
६ ऋंक् गतौ

इति परस्मैभाषाः ।

---

१ ओहांङ्क् गतौ
२ मांङ्क् मानशब्दयोः

इति आत्मनेभाषाः ।

---

१ डुदांग्क् दाने
२ डुधांग्क् धारणे च
३ टुडुभृंग्क् पोषणे च
४ णिजृंकी शौचे च
५ विजृंकी पृथग्भावे
६ विष्लृंकी व्याप्तौ

इति उभयतोभाषाः ।

हृत्वादयः

इति अदादयः कितो धातवः ।

---

१ दिवूच् क्रीडाजयेच्छापणि-द्युतिस्तुतिगतिषु
२ जॄष् झॄष्च् जरसि
३ शोंच् तक्षणे
४ दों छोंच् छेदने
५ षोंच् अन्तकर्मणि
६ व्रीडच् लज्जायाम्
७ नृतैच् नर्तने
८ कुथच् पूतिभावे
९ पुथच् हिंसायाम्
१० गुधच् परिवेष्टने
११ राधंच् वृद्धौ
१२ व्यधंच् ताडने
१३ क्षिपंच् प्रेरणे
१४ पुष्पच् विकसने
१५ तिम तीम ष्टिम ष्टीमच् आर्द्रभावे
१६ षिवूच् उतौ
१७ श्रिवूच् गतिशोषणयोः
१८ ष्ठिवू क्षिवूच् निरसने
१९ इषच् गतौ
२० ष्णसूच् निरसने

२१ क्नसूच् ह्वृतिदीप्त्योः
२२ त्रसैच् भये
२३ प्युसच् दाहे
२४ षह षुहच् शक्तौ

२५ पुषंच् पुष्टौ
२६ उचच् समवाये
२७ लुटच् विलोटने
२८ ष्विदांच् गात्रप्रक्षरणे
२९ क्लिदौच् आर्द्रभावे
३० ञिमिदाच् स्नेहने
३१ ञिक्ष्विदाच् मोचने च
३२ क्षुधंच् बुभुक्षायाम्
३३ शुधंच् शौचे
३४ क्रुधंच् कोपे
३५ षिधूंच् संराद्धौ
३६ ऋधूच् वृद्धौ
३७ गृधूच् अभिकांक्षायाम्
३८ रधौच् हिंसासंराद्ध्योः
३९ तृपौच् प्रीतौ
४० दृपौच् हर्षमोहनयोः
४१ कुपच् क्रोधे
४२ गुपच् व्याकुलत्वे
४३ युप रुप लुपच् विमोहने
४४ डिपच् क्षेपे
४५ ष्टूपच् समुच्छ्राये
४६ लुभच् गार्ध्ये
४७ क्षुभच् सञ्चलने
४८ णभ तुभच् हिंसायाम्
४९ नशौच् अदर्शने
५० कुशच् श्लेषणे
५१ भृशू भ्रंशूच् अधःपतने
५२ वृशच् वरणे
५३ कृशच् तनुत्वे
५४ शुषंच् शोषणे
५५ दुषंच् वैकृत्ये
५६ श्लिषंच् आलिङ्गने
५७ प्लुषूच् दाहे
५८ ञितृषच् पिपासायाम्
५९ तुषं हृषच् तुष्टौ
६० रुषंच् रोषे
६१ प्युष प्युस पुसच् विभागे
६२ विसच् प्रेरणे
६३ कुसच् श्लेषे
६४ असूच् क्षेपणे
६५ यसूच् प्रयत्ने
६६ जसूच् मोक्षणे
६७ तसू दसूच् उपक्षये
६८ बसूच् स्तम्भे
६९ वुसच् उत्सर्गे
७० मुसच् खण्डने
७१ मसैच् परिणामे
७२ शमू दमूच् उपशमे

७३ तमूच् कांक्षायाम्
७४ श्रमूच् खेदतपसोः
७५ भ्रमूच् अनवस्थाने
७६ क्षमूच् सहने
७७ मदैच् हर्षे
७८ क्लमूच् ग्लानौ
७९ मुहौच् वैचित्ये
८० द्रुहौच् जिघांसायाम्
८१ ष्णुहौच् उद्गिरणे
८२ ष्णिहौच् प्रीतौ

इत् पुषादिः ।
इति परस्मैभाषाः ।

———:०:———

१ षूङौच् प्राणिप्रसवे
२ दूङ्च् परितापे
३ दीङ्च् क्षये
४ धीङ्च् अनादरे
५ मीङ्च् हिंसायाम्
६ रीङ्च् श्रवणे
७ लीङ्च् श्लेषणे
८ डीङ्च् गतौ
९ व्रीङ्च् वरणे

इत् स्वादिः ।

———

१० पीङ्च् पाने
११ ईङ्च् गतौ
१२ प्रीङ्च् प्रीतौ
१३ युजिच् समाधौ
१४ सृजिच् विसर्गे
१५ वृतूचि वरणे
१६ पदिंच् गतौ
१७ विदिंच् सत्तायाम्
१८ खिदिंच् दैन्ये
१९ युधिंच् सम्प्रहारे
२० अनोरुधिंच् कामे
२१ बुधिं मनिंच् ज्ञाने
२२ अनिच् प्राणने
२३ जनैचि प्रादुर्भावे
२४ दीपैचि दीप्तौ
२५ तपिंच् ऐश्वर्ये वा
२६ पूरैचि आप्यायने
२७ धूरैङ् ज्वरैचि जरायाम्
२८ घूरैङ् गूरैचि गतौ
२९ शूरैचि स्तम्भे
३० तूरैचि त्वरायाम्
३१ घूरादयो हिंसायाम् च
३२ चूरैचि दाहे
३३ क्लिशिंच् उपतापे
३४ लिशिंच् अल्पत्वे
३५ काशिच् दीप्तौ
३६ वाशिच् शब्दे

इति आत्मनेभाषाः ।

१ शकींच् मर्षणे
२ शुचृंगैच् पूतिभावे
३ रञ्जींच् रागे
४ शपींच् आक्रोशे
५ मृषींच् तितिक्षायाम्
६ णहींच् बन्धने

उभयतोभाषाः ।

इति दिवादयश्चितो धातवः ।

---

१ षुंगट् अभिषवे
२ षिंगट् बन्धने
३ शिंगट् निशातने
४ डुमिंगट् प्रक्षेपणे
५ चिंगट् चयने
६ धूगट् कम्पने
७ स्तृंगट् आच्छादने
८ कृंगट् हिंसायाम्
९ वृगट् वरणे

इति उभतोभाषाः ।

---

१ हिंट् गतिवृद्ध्योः
२ श्रुंट् श्रवणे
३ टुदुंट् उपतापे
४ पृंट् प्रीतौ
५ स्मृंट् पालने च
६ शक्लृंट् शक्तौ
७ तिक तिग षघट् हिंसायाम्
८ राधं साधंट् संसिद्धौ
९ ऋधूट् वृद्धौ
१० आप्लृंट् व्याप्तौ
११ तृपट् प्रीणने
१२ दम्भूट् दम्भे
१३ कृवुट् हिंसाकरणयोः
१४ धिवुट् गतौ
१५ ञिधृषाट् प्रागल्भ्ये

इति परस्मैभाषाः ।

---

१ ष्टिघिट् आस्कन्दने
२ अशौटि व्याप्तौ

इति आत्मनेभाषाः ।

इति स्वादयष्टितोधातवः ।

---

१ तुदींत् व्यथने
२ भ्रस्जींत् पाके
३ क्षिपींत् प्रेरणे
४ दिशींत् अतिसर्जने
५ कृषींत् विलेखने

---

६ मुच्लृंती मोक्षणे
७ षिचींत् क्षरणे
८ विदॢंती लाभे
९ लुप्लृंती छेदने
१० लिपींत् उपदेहे

इति उभयतोभाषाः

---

११ कृतैत् छेदने
१२ खिदंत् परिघाते
१३ पिशत् अवयवे

इतमुचादिः ।

---

१४ रिपींत् गतौ
१५ धित् धारणे
१६ क्षित् निवासगत्योः
१७ षूत् प्रेरणे
१८ मृंत् प्राणत्यागे
१९ कृत् विक्षेपे
२० गृत् निगरणे
२१ लिखत् अक्षरविन्यासे
२२ जर्व झर्वत् परिभाषणे
२३ त्वचत् संवरणे
२४ रुचत् स्तुतौ
२५ ओव्रश्चौत् छेदने
२६ ऋछत् इन्द्रियप्रलयमूर्त्तिभावयोः
२७ विछत् गतौ
२८ उछैत् विवासे
२९ मिछत् उत्क्लेशे
३० उछुत् उञ्छे
३१ प्रछंत् ज्ञीप्सायाम्
३२ उब्जत् आर्जवे
३३ सृजंत् विसर्गे
३४ रुजोंत् भङ्गे
३५ भुजोंत् कौटिल्ये
३६ टुमस्जोंत् शुद्धौ
३७ जर्ज झर्झत् परिभाषणे
३८ उज्झत् उत्सर्गे
३९ जुडत् गतौ
४० पृड मृडत् सुखने
४१ कडत् मदे
४२ पृणत् प्रीणने
४३ तुणत् कौटिल्ये
४४ मृणत् हिंसायाम्
४५ द्रुणत् गतिकौटिल्ययोश्च
४६ पुणत् शुभे
४७ मुणत् प्रतिज्ञाने
४८ कुणत् शब्दोपकरणयोः
४९ घुण घूर्णत् भ्रमणे
५० चृतैत् हिंसाग्रन्थयोः
५१ णुदंत् प्रेरणे
५२ षद्लृंत् अवसादने
५३ विधत् विधाने
५४ जुन शुनत् गतौ
५५ छुपत् स्पर्शे
५६ रिफत् कथनयुद्धहिंसादानेषु
५७ तृफ तृंफत् तृप्तौ
५८ ऋफ रिंफत् हिंसायाम्
५९ दृफ दृंफत् उत्क्लेशे
६० गुफ गुंफत् ग्रंथने

६१ उभ उंभत् पूरणे
६२ शुभ शुंभत् शोभार्थे
६३ दृभैत् ग्रंथे
६४ लुभत् विमोहने
६५ कुरत् शब्दे
६६ क्षुरत् विलेखने
६७ खुरत् छेदने च
६८ घुरत् भीमार्थशब्दयोः
६९ पुरत् अग्रगमने
७० मुरत् संवेष्टने
७१ सुरत् ऐश्वर्यदीप्त्योः
७२ स्फर स्फलत् स्फुरणे
७३ किलत् श्वैत्यक्रीडनयोः
७४ इलत् गतिस्वप्नक्षेपणेषु
७५ हिलत् हावकरणे
७६ शिल सिलत् उञ्छे
७७ तिलत् स्नेहने
७८ चलत् विलसने
७९ चिलत् वसने
८० विलत् वरणे
८१ बिलत् भेदने
८२ णिलत् गहने
८३ मिलत् श्लेषणे
८४ स्पृशंत् संस्पर्शे
८५ रुशं रिशंत् हिंसायाम्
८६ विशंत् प्रवेशने
८७ मृशंत् आमर्शने
८८ लिशं रुषैत् गतौ
८९ इषत् इच्छायाम्
९० मिषत् स्पर्द्धायाम्
९१ वृहौत् उद्यमे
९२ तृहौ तृंहौ स्तृहौ स्तृंहौत् हिंसायाम्

---

९३ कुटत् कौटिल्ये
९४ गुंत् पुरीषोत्सर्गे
९५ ध्रुंत् गतिस्थैर्ययोः
९६ णूत् स्तवने
९७ धूत् विधूनने
९८ कुचत् संकोचने
९९ व्यचत् व्याजीकरणे
१०० गुजत् शब्दे
१०१ घुटत् प्रतीघाते
१०२ चुट छुट त्रुटत् छेदने
१०३ तुटत् कलहकर्मणि
१०४ मुटत् आक्षेपप्रमर्दनयोः
१०५ स्फुटत् बिकसने
१०६ पुट लुठत् संश्लेषणे
१०७ कुडत् घसने
१०८ कुडत् बाल्ये च
१०९ गुडत् रक्षायाम्
११० जुडत् बंधने
१११ तुडत् तोडने
११२ लुड घुड स्थुडत् संवरणे

११३ बुडत् उत्सर्गे च
११४ ब्रुड भ्रुडत् संघाते
११५ ट्रुड हुड त्रुडत् निमज्जने
११६ चुणत् छेदने
११७ डिपत् क्षेपे
११८ छुरत् छेदने
११९ स्फुरत् स्फुरणे
१२० स्फुलत् संचये च

इति परस्मैभाषाः।

---

१२१ कुंङ् कुङ्त् शब्दे
१२२ गुरैति उद्यमे

वृत्कुटादिः।

---

१२३ पृंङ्त् व्यायामे
१२४ दृङ्त् आदरे
१२५ धृंङ्त् स्थाने
१२६ ओविजैति भयचलनयोः
१२७ ओलजैङ् ओलस्जैति व्रीडे
१२८ ष्वंजित् सङ्गे
१२९ जुषैति प्रीतिसेवनयोः

इति आत्मनेभाषाः।

इति तुदादयस्तितो धातवः।

---

१ रुधूंपी आवरणे
२ रिचूंपी विरेचने
३ विचूंपी पृथग्भावे
४ युजूंपी योगे
५ क्षुदूंपी संपेषे
६ भिदूंपी विदारणे
७ छिदूंपी द्वैधीकरणे
८ ऊछृदूंपी दीप्तिदेवनयोः
९ ऊतृदूंपी हिंसानादरयोः

इति उभयतोभाषाः।

---

१० पृचैप् संपर्के
११ वृचैप् वरणे
१२ तंचूं तंजौप् संकोचने
१३ भंजौंप् आमर्दने
१४ भुजंप् पालनाभ्यवहारयोः
१५ अंजौप् व्यक्तिम्रक्षणकान्तिगतिषु
१६ ओविजैप् भयचलनयोः
१७ कृतैप् संवेष्टने
१८ उंदैप् क्लेदने
१९ शिष्लृंप् विशेषणे
२० पिष्लृंप् संचूर्णने
२१ हिंसु तृहप् हिंसायाम्

इति परस्मैभाषाः।

---

२२ खिदिंप् दैन्ये
२३ विदिंप् विचारणे
२४ ञिइंधैपि दीप्तौ

इति आत्मनेभाषाः।
इति रुधादयः पितोधातवः

१ तनूयी विस्तारे
२ षणूयी दाने
३ क्षणू क्षिणूयी हिंसायाम्
४ ऋणूयी गतौ
५ तृणूयी अदने
६ घृणूयी दीप्तौ
इति उभयतोभाषाः।

१ वनूयि याचने
२ मनूयि बोधने
इति आत्मनेभाषाः।
इति तनादयो यितोधातवः

१ डुक्रींगृश् द्रव्यविनिमये
२ षिंगृश् बन्धने
३ प्रींगृश् तृप्तिकान्त्योः
४ श्रींगृश् पाके
५ मींगृश् हिंसायाम्
६ युंगृश् बन्धने
७ स्कुंगृश् आप्रवणे
८ क्नूगृश् शब्दे
९ द्रूगृश् हिंसायाम्
१० ग्रहींश् उपादाने

११ पूगृश् पवने
१२ लूगृश् छेदने
१३ धूगृश् कम्पने
१४ स्तॄगृश् आच्छादने
१५ कॄगृश् हिंसायाम्
१६ वॄगृश् वरणे
इति उभतोभाषाः।

१ ज्यांश् हानौ
२ रींश् गतिरेषणयोः
३ लींश् श्लेषणे
४ ब्लींश् वरणे
५ प्लींश् गतौ
६ कॄ मॄ शॄश् हिंसायाम्
७ पॄश् पालनपूरणयोः
८ वॄश् भरणे
९ भॄश् भर्जने च
१० दॄश् विदारणे
११ जॄश् वयोहानौ
१२ नॄश् नये
१३ गॄश् शब्दे
१४ ऋश् गतौ
ह्रस्वादिः।
ह्रल्वादिः।

१५ ज्ञांश् अवबोधने
१६ क्षिषश् हिंसायाम्
१७ व्रीश् वरणे

१८ भ्रीश् भरणे
१९ हेठश् भूतप्रादुर्भावे
२० मृडश् सुखने
२१ श्रन्थश् विमोचनप्रतिहर्षणयोः
२२ मन्थश् विलोडने
२३ ग्रन्थश् संदर्भे
२४ कुन्थश् संक्लेशे
२५ मृदश् क्षोदे
२६ गुधश् रोषे
२७ बन्धश् बन्धने
२८ क्षुभश् संचलने
२९ णभ तुभश् हिंसायाम्
३० खवश् हेठश् वत्
३१ क्लिशौश् विबाधने
३२ अशश् भोजने
३३ इषश् आभीक्ष्ण्ये
३४ विषश् विप्रयोगे
३५ प्रुष प्लुषश् स्नेहसेचनपूरणेषु
३६ मुषश् स्तेये
३७ पुषश् पुष्टौ
३८ कुषश् निष्कर्षे
३९ भ्रसुश् उञ्छे

इति परस्मैभाषाः।

---

१ वृङ्श् सम्भक्तौ

इति आत्मनेभाषाः।

इति क्र्यादयः शितोधातवः

---

१ चुरण् स्तेये
२ पृण् पूरणे
३ घृण् स्रवणे
४ शुल्क वल्कण् भाषणे
५ नक्क धक्कण् नाशने
६ चक्क चुक्कण् व्यथने
७ टकुण् बन्धने
८ अर्कण् स्तवने
९ पिच्चण् कुट्टने
१० पचुण् विस्तारे
११ म्लेछण् म्लेछने
१२ ऊर्जण् बलप्राणनयोः
१३ युज पिजुण् हिंसाबलदाननिकेतनेषु
१४ क्षुजुण् कृच्छ्रजीवने
१५ पूजण् पूजायाम्
१६ गज मार्जण् शब्दे
१७ तिजण् निशाने
१८ वज व्रजण् मार्गणसंस्कारगत्योः
१९ रुजण् हिंसायाम्
२० नटण् अवस्यन्दने
२१ तुट चुट चुटु छुटुण् छेदने
२२ कुट्टण् कुत्सने च
२३ पुट्ट चुट्ट षुट्टण् अल्पीभावे
२४ पुट मुटण् संचूर्णने
२५ अट्ट स्मिटण् अनादरे

२६ लुण्टण् स्तेये च
२७ स्निटण् स्नेहने
२८ घट्टण् चलने
२९ खट्टण् संवरणे
३० षट्ट स्फिट्टण् हिंसायाम्
३१ स्फुटण् परिहासे
३२ कीटण् वर्णने
३३ वटुण् विभाजने
३४ रुटण् रोषे
३५ शठ श्वठुण् संस्कारगत्योः
३६ शुठण् आलस्ये
३७ शुठुण् शोषणे
३८ गुठुण् वेष्टने
३९ लडण् उपसेवायाम्
४० स्फुडुण् परिहासे
४१ ओलडुण् उत्क्षेपे
४२ पीडण् गहने
४३ तडण् आघाते
४४ खड खडुण् भेदे
४५ कडुण् खण्डने च
४६ कुडुण् रक्षणे
४७ गुडुण् वेष्टने च
४८ चुडुण् छेदने
४९ मडुण् भूषायाम्
५० भडुण् कल्याणे
५१ पिडुण् सङ्घाते
५२ ईडण् स्तुतौ
५३ चडुण् कोपे
५४ जुड चूर्ण वर्णण् प्रेरणे
५५ चूण तूणण् संकोचने
५६ श्रणण् दाने
५७ पूणण् संघाते
५८ चितुण् स्मृत्याम्
५९ पुस्त बुस्तण् आदरानादरयोः
६० मुस्तण् संघाते
६१ कूतण् संशब्दने
६२ स्वर्त पथुण् गतौ
६३ श्रथण् प्रतिहर्षे
६४ पृथुण् प्रक्षेपणे
६५ प्रथण् प्रख्याने
६६ छदण् संवरणे
६७ चुदण् संचोदने
६८ मिदुण् स्नेहने
६९ गुर्दण् निकेतने
७० छर्दण् वमने
७१ बुधण् हिंसायाम्
७२ वर्धण् छेदनपूरणयोः
७३ गर्धण् अभिकांक्षायाम्
७४ बन्ध बधण् संयमने
७५ छपुण् गतौ
७६ क्षपुण् क्षान्तौ
७७ छूपण् समुच्छ्राये

७८ डिपण् क्षेपे
७९ ष्टुपण् व्यक्तायांवाचि
८० डपु डिपुण् संघाते
८१ शूर्पण् माने
८२ शुल्बण् सर्जने च
८३ डबु डिबुण् क्षेपे
८४ सम्बण् सम्बन्धे
८५ कुबुण् आच्छादने
८६ लुबु तुबुण् अर्दने
८७ पुर्बण् निकेतने
८८ यमण् परिवेषणे
८९ व्ययण् क्षये
९० यत्रुण् संकोचने
९१ कुद्रुण् अनृतभाषणे
९२ श्वभ्रण् गतौ
९३ तिलण् स्नेहने
९४ जलण् अपवारणे
९५ क्षलण् शौचे
९६ पुलण् समुच्छ्राये
९७ बिलण् भेदे
९८ तलण् प्रतिष्ठायाम्
९९ तुलण् उन्माने
१०० दुलण् उत्क्षेपे
१०१ बुलण् निमज्जने
१०२ मुलण् रोहणे
१०३ कल किल पिलण् क्षेपे
१०४ पलण् रक्षणे
१०५ इलण् प्रेरणे
१०६ चलण् भृतौ
१०७ सांत्वण् सामप्रयोगे
१०८ धूशण् कान्तीकरणे
१०९ श्लिषण् श्लेषणे
११० लुषण् हिंसायाम्
१११ रुषण् रोषे
११२ प्युषण् उत्सर्गे
११३ पसुण् नाशने
११४ जसुण् रक्षणे
११५ पुंसुण् अभिमर्दने
११६ ब्रुस पिस जस बर्हण् हिंसायाम्
११७ ष्णिहण् स्नेहने
११८ म्रक्षण् म्लेछने
११९ भक्षण् अदने
१२० पक्षिण् परिग्रहे
१२१ लक्षीण् दर्शनांकनयोः

इतो अर्थविशेषे आलक्षिणः ।

१२२ ज्ञाण् मारणादिनियोजनेषु
१२३ च्युण् सहने
१२४ भूण् अवकल्कने
१२५ बुक्कण् भषणे
१२६ रक लक रग लगण् आस्वादने
१२७ लिगुण् चित्रीकरणे
१२८ चर्चण् अध्ययने

१२९ अंचण् विशेषणे
१३० मुचण् प्रमोचने
१३१ अर्जण् प्रतियत्ने
१३२ भजण् विश्रानणे
१३३ चट स्फुटण् भेदे
१३४ घटण् संघाते हन्त्यर्थाश्च
१३५ कणण् निमीलने
१३६ यतण् निकारोपस्कारयोः
१३७ निरश्च प्रतिदाने
१३८ शब्दण् उत्सर्गात् भाषाविष्कारयोः
१३९ षूदण् आश्रवणे
१४० आङः क्रंदण् सातत्ये
१४१ ष्वदण् आस्वादने
१४२ मुदण् संसर्गे
१४३ श्रृधण् प्रसहने
१४४ कृपण् अवकल्कने
१४५ जभुण् नाशने
१४६ अमण् रोगे
१४७ चरण् असंशये
१४८ पूरण् आप्यायने
१४९ दलण् विदारणे
१५० दिवण् अर्दने
१५१ पश पषण् बन्धने
१५२ पुषण् धारणे
१५३ घुषृण् विशब्दने
१५४ आङः क्रन्दे
१५५ भूष तसुण् अलंकारे
१५६ जसण् ताडने
१५७ त्रसण् वारणे
१५८ वसण् स्नेहछेदावहरणेषु
१५९ ध्रसण् उत्क्षेपे
१६० ग्रसण् ग्रहणे
१६१ लसण् शिल्पयोगे
१६२ अर्हण् पूजायाम्
१६३ मोक्षण् असने
१६४ लोकृ, तर्क, रघु, लघु, लोचृ, विच्छ, अजु, तुजु, पिजु, लजु, लुजु, भजु, पट, पुट, लुट, घट, घट्ट, वृत, पुथ, नद, वृध, गुप, धूप, कुप, चिव, दशु, कुशु, त्रसु, पिसु, कुसु, दसु, बर्ह, बृहु, वल्ह, अहु, वहु महुण्, भाषार्थाः

इति परस्मैभाषाः ।

---

१ युणि जुगुप्सायाम्
२ गृणि विज्ञाने
३ वंचिण् प्रलम्भने
४ कुटिण् प्रतापने
५ मदिण् तृप्तियोगे
६ विदिण् चेतनाख्याननिवासेषु
७ मानिण् स्तंभे
८ बलि भालिण् आभण्डने

९ दिविण् परिकूजने
१० वृषिण् शक्तिबन्धे
११ कुत्सिण् अवक्षेपे
१२ लक्षिण् आलोचने
१३ हिष्कि किष्किण् हिंसायाम्
१४ निष्किण् परिमाणे
१५ तर्जिण् संतर्जने
१६ कूटिण् अप्रमादे
१७ त्रुटिण् छेदने
१८ शठिण् श्लाघायाम्
१९ कूणिण् संकोचने
२० तूणिण् पूरणे
२१ भ्रूणिण् आशंसायाम्
२२ चितिण् संवेदने
२३ वस्ति गंधिण् अर्दने
२४ डपि डिपि डंपि डिंपि डंभि डिंभिण् संघाते
२५ स्यमिण् वितर्के
२६ शमिण् आलोचने
२७ कुस्मिण् कुस्मयने
२८ गुरिण् उद्यमे
२९ तंत्रिण् कुटुंबधारणे
३० मंत्रिण् गुप्तभाषणे
३१ ललिण् ईप्सायाम्
३२ स्पशिण् ग्रहणश्लेषणयोः
३३ दंशिण् दंशने
३४ दंसिण् दर्शने च
३५ भर्त्सिण् संतर्जने
३६ यक्षिण् पूजायाम्

इति आत्मनेभाषाः

इतो अदन्ताः ।

१ अङ्कण् लक्षणे
२ श्लेष्कण् दर्शने
३ सुख दुःखण् तत्क्रियायाम्
४ अङ्गण् पदलक्षणयोः
५ अघण् पापकरणे
६ रचण् प्रतियत्ने
७ सूचण् पैशून्ये
८ भाजण् पृथक्कर्माणि
९ सभाजण् प्रीतिसेवनयोः
१० लज लजुण् प्रकाशने
११ कूटण् दाहे
१२ पट वटुण् ग्रन्थे
१३ खेटण् भक्षणे
१४ खोटण् क्षेपे
१५ पुटण् संसर्गे
१६ वटुण् विभाजने
१७ शठ श्वठण् सम्यग्भाषणे
१८ दण्डण् दण्डनिपातने
१९ व्रणण् गात्रविचूर्णने
२० वर्णण् वर्णक्रियाविस्तार-गुणवचनेषु
२१ पर्णण् हरितभावे

२२ कर्णण् भेदे
२३ तूणण् संकोचने
२४ गणण् सङ्ख्याने
२५ कुण गुण केतण् आमन्त्रणे
२६ पतण् गतौ वा
२७ वातण् गतिसुखसेवनयोः
२८ कथण् वाक्यप्रबन्धे
२९ श्रथण् दौर्बल्ये
३० छेदण् द्वैधीकरणे
३१ गदण् गर्जे
३२ अन्धण् दृष्ट्युपसंहारे
३३ स्तनण् गर्जे
३४ ध्वनण् शब्दे
३५ स्तेनण् चौर्ये
३६ उनण् परिहाणे
३७ कृपण् दौर्बल्ये
३८ रूपण् रूपक्रियायाम्
३९ क्षप लाभण् प्रेरणे
४० भामण् क्रोधे
४१ गोमण् उपलेपने
४२ सामण् सान्त्वने
४३ श्रामण् आमन्त्रणे
४४ स्तोमण् श्लाघायाम्
४५ व्ययण् वित्तसमुत्सर्गे
४६ सूत्रण् विमोचने
४७ मूत्रण् प्रस्रवणे
४८ पार तीरण् कर्मसमाप्तौ
४९ कत्र गात्रण् शैथिल्ये
५० चित्रण् चित्रक्रियाकदाचिद्दृष्ट्योः
५१ छिद्रण् भेदे
५२ मिश्रण् संपर्चने
५३ वरण् ईप्सायाम्
५४ स्वरण् आक्षेपे
५५ शारण् दौर्बल्ये
५६ कुमारण् क्रीडायाम्
५७ कलण् संख्यानगत्योः
५८ शीलण् उपधारणे
५९ वेल कालण् उपदेशे
६० पल पूलण् लवनपवनयोः
६१ अंशण् समाघाते
६२ पषण् अनुपसर्गः
६३ गवेषण् मार्गणे
६४ मृषण् क्षान्तौ
६५ रसण् आस्वादनस्नेहनयोः
६६ वासण् उपसेवायाम्
६७ निवासण् आच्छादने
६८ चहण् कल्कने
६९ महण् पूजायाम्
७० रहण् त्यागे
७१ रहुण् गतौ
७२ स्पृहण् ईप्सायाम्
७३ रूक्षण् पारुष्ये

इति परस्मैभाषाः।

१ मृगाणि अन्वेषणे
२ अर्थाणि उपयाचने
३ पदाणि गतौ
४ संग्रामणि युद्धे
५ शूर वीरणि विक्रान्तौ
६ सत्राणि सन्दानक्रियायाम्
७ स्थूलणि परिबृंहणे
८ गर्वाणि माने
९ गृहाणि गृहणे
१० कुहाणि विस्मापने

इति आत्मनेभाषाः।

१ युजण् संपर्चने
२ लीण् द्रवीकरणे
३ मीण् मतौ
४ प्रीगण् तर्पणे
५ धूगण् कम्पने
६ वृगण् आवरणे
७ जॄण् वयोहानौ
८ चीक शीकण् आमर्षणे
९ मार्गण् अन्वेषणे
१० पृचण् संपर्चने
११ रिचण् वियोजने
१२ वचण् भाषणे
१३ अर्चिण् पूजायाम्
१४ वृजैण् वर्जने
१५ मृजौण् शौचालङ्कारयोः
१६ कठुण् शोके
१७ श्रन्थ ग्रन्थण् सदर्भे
१८ क्रथ अर्दिण् हिंसायाम्
१९ श्रथण् बन्धने च
२० विदण् भाषणे
२१ छदण् अपवारणे
२२ आङः सदण् गतौ
२३ वृदण् संदीपने
२४ शुंधिण् शुद्धौ
२५ तनूण् श्रद्धाघाते
२६ उपसर्गात् दैर्घ्ये
२७ मानण् पूजायाम्
२८ तपिण् दाहे
२९ तृपण् पूणने
३० आप्लृण् लम्भने
३१ दभैण् भये
३२ ईरण् क्षेपे
३३ मृषिण् तितिक्षायाम्
३४ शिषण् असर्वोपयोगे
३५ विपूर्वो अतिशये
३६ जुषण् परितर्कणे
३७ धृषण् प्रसहने
३८ हिंसुण् हिंसायाम्
३९ गर्हण् विनिन्दने
४० षहण् मर्षणे

बहुलमेतन्निदर्शनम्। वृत्युजादिःपरस्मैभाषाः इत्याचार्यहेमचन्द्रानुस्मृता चुरादयो-णितो धातवः।

उच्चारणेऽस्त्यवर्णाच्च आस्क्तयोरिण्निषेधने ।
इकारादात्मनेपदमीकाराच्चोभयं भवेत् ॥ १ ॥
उदितः स्वराज्ञोन्तश्चोस्क्तादाविटो विकल्पनं ।
रुपान्त्ये ङे परे ह्रस्व ऋकारादङ्विकल्पकः ॥ २ ॥
ऌकारादङ्समायात्येः सिचि वृद्धिनिषेधकः ।
एस्क्तयोरिण्निषेधः स्यादोस्क्तयोस्तस्य नो भवेत् ॥ ३ ॥
औकार इड्विकल्पार्थेऽनुस्वारोऽनिड्विशेषणे ।
ॡकारश्च विसर्गश्चानुबन्धे भवतो नहि ॥ ४ ॥
कोदादिर्न गुणी प्रोक्तः खे पूर्वस्य मुमागमः ।
गेनोभयपदी प्रोक्तो घश्च चजोः कगौ कृतौ ॥ ५ ॥
आत्मने गुणारोधे ङश्चो दिवादिगणो भवेत् ।
ञौ वृद्धौ वर्त्तमाने क्तः टः स्वादिष्ठ्युकारकः ॥ ६ ॥
त्रिमगर्थी डकारः स्याण् णचुरादिश्च वृद्धिकृत् ।
तस्तुदादौ नकारश्चेच्चापुंसीति विशेषणे ॥ ७ ॥
रुधादौ नागमे पो हि मो दामः संप्रदानके ।
यस्तनादेरकारः स्यात् पुंवज्ञावार्थसूचकः ॥ ८ ॥
स्त्रीलिंगार्थे लकारो हि उत और्वेति वो भवेत् ।
शः क्र्यादिः क्यः शिति प्रोक्तः षःषितोऽङविशेषणे ॥ ९ ॥
पदत्वार्थे सकारो हि नोक्ता अत्र न सन्ति च ।
धातुनां प्रत्ययानां चानुबन्धः कथितो मया ॥ १० ॥

इत्यनुबन्धफलम् ।

धुतादेरद्यतन्यां चाङात्मनेपदमिष्यते ।
वृदादिपञ्चकेऽन्यो वा स्यसनोरात्मनेपदम् ॥ १ ॥
ज्वलादिर्णौ भवेद्वृद्धिर्यजादेः संप्रसारणं ।
घटादिनां भवेद्ह्रस्वो णौ परेऽजीघटत् सदा ॥ २ ॥
अद्यतन्यां पुषादित्वादङ्परस्मैपदे भवेत् ।
स्वादित्वाच्च क्तयोस्तस्य नकारः प्रकटो भवेत् ॥ ३ ॥

प्वादिनां गदितो ह्रस्वो ल्वादेस्क्तक्तयोश्च नो भवेत् ।
युजादयो विकल्पेन ज्ञेयाश्चुरादिके गणे ॥ ४ ॥
मुचादेर्नागमोरो च कुटादित्वात् सिचि परे ।
गुणवृद्धेरभावश्च कथितो हेमसूरिणा ॥ ५ ॥
अदन्तानां गुणो वृद्धिर्यङ्चुरादिश्च नो भवेत् ॥
संक्षेपेण फलं चैतदीषितं वानरेण हि ॥ ६ ॥

इति वृत्तगणफलम् ।

श्विश्रिडीशीयुरुक्षुक्ष्णुणुस्नुभ्यश्च वृगो वृङः ।
ऊदृदन्तयुजादिभ्यः स्वरान्ता धातवोऽपरे ॥ १ ॥
पाठ एकस्वराः स्यु,र्येऽनुस्वारेत इमे स्मृताः ।
द्विविधोऽपि शकिश्चैवं, वचिर्विचिरिची पचिः ॥ २ ॥
सिञ्चतिर्मुचिरतोऽपि पृच्छति भ्रस्जिमास्जिभुजयोर्युजिर्यजिः ।
ष्वञ्जिरञ्जिरुजयोर्निजिर्विजुः षञ्जिभञ्जिभजयः सृजित्यजी ॥ ३ ॥
स्कन्दिविद्यविद्लृविन्तयोर्नुदिः स्विद्यतिः शदिसदी भिदिच्छिदी ।
तुदपदी पदिहदी खिदिक्षुदी । राधिसाधिसुधयो युधिव्यधी ॥ ४ ॥
बन्धिबुध्यरुधयः क्रुधिक्षुधी । सिध्यतिस्तदनु हन्तिमन्यती ।
आपिना तपिशपिक्षिपिच्छुपो । लुम्पतिः सृपिलिपी वपिस्वपी ॥ ५ ॥
यभिरभिलभियमिरमिनमिगमयः क्रुशिलिशिरुशिरिशिदिशतिदशयः ।
स्पृशिमृशतिविशतिदृशिशिष्लशुषयस्त्विषिपिषिविष्लकृषितुषिदुषिपुषयः ॥ ६ ॥
श्लिष्यतिर्द्विषिरतोघसिवसती रोहतिर्लुहिरिही अनिड्गादितौ ।
देग्धिदोग्धिलिह्योर्मिहिवहती नह्यतिर्दहिरिति स्फुटमनिटः ॥ ७ ॥

इति अनिट्कारिकाः ।

अथ संग्रहश्लोकाः ।

संहितैकपदे नित्या नित्या धातूपसर्गयोः ।
नित्या समासे वाक्ये तु सा विवक्षामपेक्षते ॥ १ ॥
निमित्तमेकमित्यत्र विभक्त्या नाभिधीयते ।
तद्वदस्तु यदेकत्वम् विभक्तिस्तत्र वर्तते ॥ २ ॥
ऊर्ध्वं मानं किलोन्मानं परिमाणं तु सर्वतः ।
आयामस्तु प्रमाणं स्यात् सङ्ख्याबाह्या तु सर्वतः ॥ ३ ॥
अविकारो द्रवं मूर्तं प्राणिस्थं स्वांगमुच्यते ।
च्युतं च प्राणिनस्तत्तन्निभं च प्रतिमादिषु ॥ ४ ॥
आकृतिग्रहणाज्जातिर्लिंगानां न च सर्वभाक् ।
सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह ॥ ५ ॥
सत्वे निविशतेऽपैति पृथग्जातिषु दृश्यते ।
आधेयश्चाक्रियाजश्च सोऽसत्वप्रकृतिर्गुणः ॥ ६ ॥
इदमस्तु सन्निकृष्टं समीपतरवर्ति चैतदो रूपं ।
अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात् ॥ ७ ॥
नकारजावनुस्वारपञ्चमौ धुटि धातुषु ।
सकारजः शकारश्चे षाट्टवर्गस्तवर्गजः ॥ ८ ॥
उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।
विहाराहारसंहारप्रहारप्रतिहारवत् ॥ ९ ॥
धात्वर्थो बाधते कश्चित् कश्चित्तमनुवर्तते ।
तमेव विशिनष्ट्यन्योऽनर्थकोऽन्यः प्रयुज्यते ॥ १० ॥
फलव्यापारयोरेकनिष्ठतायामकर्मकः ।
धातुस्तयोर्धर्मिभेदे सकर्मकमुदाहृतः ॥ ११ ॥
धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात् ।
प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया ॥ १२ ॥

नीहृवहिकृषोण्यन्तादुहिब्रूपृच्छिभिक्षिचिरुधिशास्वर्थाः ।
पचियाचिदण्डिकृग्रहमाथिजिप्रमुखा द्विकर्माणः ॥ १३ ॥
न्यादीनां कर्मणो मुख्यं प्रत्ययो वक्ति कर्मजः ।
नयते गौर्द्विजैर्ग्रामं भारो ग्राममथोह्यते ॥ १४ ॥
गौणं कर्मदुहादीनां प्रत्ययो वक्ति कर्मजः ।
गौः पयो दुह्यतेऽनेन शिष्योऽर्थं गुरुणोच्यते ॥ १५ ॥
बीजकालेषु सम्बद्धा यथा लाक्षारसादयः ।
वर्णादिपरिणामेन फलानामुपकुर्वते ॥ १६ ॥
बुद्धिस्थादपि सम्बद्धात्तथा धातूपसर्गयोः ।
अभ्यन्तरि कृतोभेदः पदकाले प्रकाश्यते ॥ १७ ॥
निपाताश्चोपसर्गाश्च धातवश्चेत्यमी त्रयः ।
अनेकार्थाः स्मृताः सर्वे पाठस्तेषां निदर्शनम् ॥ १८ ॥
प्रपरापसमन्ववनिर्दुर्भि, व्यधिसूदतिनिप्रातिपर्यपयः ।
उपआङिति विंशतिरेषसखे, उपसर्गगणः कथितः कविभिः ॥ १९ ॥

इति संग्रहश्लोकाः ॥

इदं
काश्यां चन्द्रप्रभायन्त्रालये मुद्रितम् ।

शुद्धिपत्रम् ।

पृष्ठः	पंक्तिः	अशुद्धम्	शुद्धम्
५	५	वहुदण्डिनौ	बहुदाण्डिनौ
१४	१२	७८पौः	७८पौ
१६	२	सुमोर्	सुमो
१९	१९	पुत्रपुत्त्रादि	पुत्त्रपुत्त्रादि
२०	११	माढि	माढिः
२१	९	व्यञ्जनान्तात्	व्यञ्जनात्
,,	,,	पञ्चमान्तस्था	पञ्चमस्यान्तस्था
२८	१२	३९	२९
३०	२०		हे श्रीः
५२	८	पराक्षा	परोक्षा
५३	११	तीर्थमृद्	तीर्थसृद्
५५	११	निशा	निशाः
,,	१८	उदना	उद्ना
५६	१३	विदुषः	विदुष्यः
६०	९	णिकर्त्ता	णिकर्त्ता
६०	१७	सर्पिषो	सर्पिषः
६४	१६	कुरुन्	कुरून्
६५	२	नाम्ना	नाम्नो
,,	१०	स्वीकाया	स्वीकार्यो
६९	८	उपत्	उत्
७३	१८	कृदतन्स्य	कृदन्तस्य
७४	१९	सा	स्वा
७८	८	शब्दद्गाम्य	शब्दाद्गम्य
,,	१०	कुरुणाम्	कुरूणाम्
७९	१४	स्यः	स्युः
८५	२०	अष्पठः	अपष्ठः

पृष्ठः	पंक्तिः	अशुद्धम्	शुद्धम्
८७	९	दुष्ट	दुःष्ट
८९	७	विषया	विषयौ
८९	२०	ष्यदन्ते	ष्यन्दते
९०	२०	निदुः	निर्दुः
९४	२	ह्णि	णह्रि
,,	१०	नेङ्र्मो	नेङ्र्मो
९५	२३	कृतस्य	कृतथस्य
९६	६	अलच	लच
,,	२०	प्रभायना	प्रभापना
९७	७	ङतद्धिते	ङ्यतद्धिते
९८	१७	ऋलौ	ऌलौ
९९	३	वर्जाङ्गीः	वर्जानङ्गीः
१००	१९	बहुराज्ञीः	बहुराज्ञी
१०१	१२	मुख्याङ्गीः	मुख्यानङ्गीः
१०२	४	चित्	चित
,,	२२	रवतो	रेवता
१०३	१४	मात्र	मामत्र
१०५	२	वेति	चेति
१०६	१४	अभ्रविलप्ती	अभ्राविलिप्ती
१०७	२	मासजाता	मासयाता
,,	६	त्यवे	त्येव
१०८	४	यान्तादि	यान्त
१०९	९	स्त्रीर्वृत्ते	स्त्रीहृत्ते
,,	२१	सूर्याणि	सूर्याणी
११०	१४	ङीः स्यात्	ङीर्वा स्यात
,,	१६	सुरैः	सुरेः

पृष्ठः	पंक्तिः	अशुद्धम्	शुद्धम्
१११	६	नश्च	नः
,,	६	नृजात्य	नृजातेर
,,	१५	करभोरुः	करभोरूः
११४	९	गार्गीयते	गार्गायते
११६	१६	न्ताञ्च	न्तानां च
११७	१४	द्वे	द्व्ये
,,	१९	नार्थे	नावर्थे
११८	४	दैव	देव
,,	७	दैव	देव
११९	८	ऽलं	ऽलसंदसत्
१२०	६	स्पु	स्यु
,,	८	कृग	कृग्
,,	१६	कृग	कृग्
,,	२०	पेते	एते
,,	२०	कृग	कृग्
१२१	१९	र्थे	र्थ्ये
१२२	७	या	याय
,,	१३	ओ	उ
,,	१४	ओ	उ
,,	१४	ओ	उ
१२४	२	गिरिम्	गिरि
,,	२	ऽव्य	अव्य
१२५	७	सं	स
,,	११	सं	स
१२६	१४	षः	षकः
१३०	११	मात्रः	मात्राः
१३१	८	आतुरार्थाय	आतुरार्था
,,	१०	रेकार्थ्ये	रैकार्थ्ये
१३४	७	रात्रर	राज्य
१३५	८	दाक्षण	दक्षिण
१३६	१२	घ	घे
१३८	९	लनैः	लिनैः
,,	८	युवजरत्	युवजरन्
१४०	२	श्वश्रु	श्वश्रू
,,	२३	ओ	उ
,,	,,	ओ	उ
,,	,,	ओ	उ
१४१	१४	द्वन्द्वौवै	द्वन्द्वोवै
,,	२४	पक्षिणा	पक्षिणां
१४२	१४	प्राणा	प्राण्या
१४६	६	चैत्रौ	चैत्रै
१४७	७	ने	न्ये
१४८	५	अव्य	अव्यय
,,	,,	सादे	स्यादे
,,	२२	लुब्	लुब
१४९	१२	मनश्चा	मनसश्चा
१५०	४	मान	माना
,,	८	कृतिः	कृति
१५१	३	घु	घो
,,	३	ह्ने	ह्ने
,,	३	ह्न	ह्न
,,	३	ह्न	ह्न
,,	४	ह्न	ह्न
,,	४	ह्ने	ह्ने
,,	४	ह्न	ह्न
,,	४	ह्ने	ह्ने
,,	४	ह्न	ह्न
,,	१०	ह्न	ह्न
१५२	१५	ह्नु	ह्न्
,,	१७	ह्नु	ह्न
१५४	१९	ध्यें	थें
१५५	११	घ	व

पृष्ठः	पंक्तिः	अशुद्धम्	शुद्धम्
१६९	७	अनड	अनड्
,,	८	अनङ	अनड्ड
१७३	१७	देङ्	देङ्
१७४	१२	ईमानि	इमानि
१७७	८	चात्मनेप	चात्मने
१७९	४	बहु विज	बहुवि ज
१७९	१६	तृतीयेति	तृतीययेति
१८६	१७	उसान्तव	उपसान्तव
१८७	२	बिरुदा	विरुद्धा
,,	३	पदंस्यात्	पदं वा स्यात्
१८८	९	काणि	काण्णि
,,	११	तस्माद्	तस्माद
,,	१२	गितीति	गिति
,,	१६	ताना	तानेनमा
,,	१७	तानेनमा	ताना
,,	२१	गद्धयते	गर्द्धयते
१८९	१८	द्धे	दृधे
१९२	२	श्रु	स्तु
,,	७	श्रा	स्ना
१९३	२१	व्येधा	व्यव
१९५	२	पदयाति	पदयते
,,	१८	चिकीर्ष	चिकीर्षि
१९६	८	डि	ङि
,,	९	किब्	क्विब्
१९९	१४	दन्तरं	दनन्तरं
२००	९	के	कार
२०१	५	त्रा	ता
२०३	३	अग्लुञ्चत्	अग्लुचत्
,,	९	वु	बु
,,	१४	स्व	श्व
,,	१६	स्व	श्व

पृष्ठः	पंक्तिः	अशुद्धम्	शुद्धम्
२०५	१६	सः	शः
,,	,,	चुदाति	तुदते
२०६	१६	श्र	स्र
,,	१७	श्र	स्र
,,	२०	सकर्मक	सकर्मिक
,,	२२	दुह्यते	दुग्धे
२०८	१०	च्छि	श्छि
,,	१९	त्यादिर्द्वि	त्याद्वि
,,	,,	नाधि	नमाधि
,,	२२	चीकाणत्	चीकणत्
२०९	१५	य्ये	य्यै
२१२	८	तृ	तॄ
,,	११	जृ	जॄ
२१३	१४	पिवः	पिबः
,,	१६	पिवते	पिबते
२१४	१९	छि	ष्ठि
,,	२०	छि	ष्ठि
,,	२०	छे	ष्ठे
,,	२०	छे	ष्ठे
२१६	१४	फम्फा	पम्फा
,,	,,	चूर्तिः	चूर्ति
,,	,,	पंम्फुल्लिः	पम्फुल्तिः
२१८	२३	आत्थ	आञ्छ
२२२	२०	क्तयोः	क्तयो
,,	२३	क्तयोः	क्तयो
,,	२४	श्यावान्	श्यानवान्
,,	३	न्धू	न्धावू
,,	१२	मात	मास
२२३	२	म्।अ	म्।अवशीनवान्
,,	१९	जिगांसते	संजिगांसते
[२२४]	८	केचल्ल	केचच्ल्ल
,,	९	तोः छू	तांश्च्छ्र

पृष्ठः	पंक्तिः	अशुद्धम्	शुद्धम्
,,	१३	उमा	ओमा
,,	,,	ओं	ओम्
२२७	९	यमः	मयः
२३२	१०	अशिश्वा	अशश्वा
,,	२१	ङ्परेणौ	णौ
२३३	२०	नो	नः
२३४	२१	धौ	धो
२३५	५	कृतः	क्षतः
२३६	१४	धावा	ध्वावा
२३७	१२	आतः।परस्य	आतः परस्य
२४०	२१	ऽनः	नः
२४१	५	श्राश्रातः	श्नश्रातः
२४२	५	मःश्छ	मश्छः
२४४	८	तू	तु
,,	१९	सप्तम्याया	सप्तम्या या
,,	१७	मु, इ	मि
२४५	९	पर्य	र्पय
,,	१८	वणान्ता	वर्णान्ता
२४६	२२	तिशि	तिचशि
२४७	३	दावि	दाववि
,,	८	ङ्कि	ह्वि
२४८	२	तृ	सृ
,,	८	घः	य्वः
,,	१०	घन्ता	य्वन्ता
,,	१२	घ	य्व
,,	१८	श्रि	श्वि
,,	२३	चितः	वितः
,,	,,	चित	वित
२४९	५	कत्वा	क्त्वा
,,	६	क्त्वा	क्त्वा
२५०	१७	गेच	गे
,,	१७	स्था	स्थो
,,	१७	तद्योगे च	तद्योगे

पृष्ठः	पंक्तिः	अशुद्धम्	शुद्धम्
२५४	१३	व	ब
,,	२१	दीयते	दीयाते
,,	,,	स्त	स्ते
,,	१७	मद्दे	माद्दे
,,	१४	विद्	विडद्
२५६	१२	वि	बि
२५८	१२	दीयते	दीयाते
२५९	१४	श्रा	श्वा
,,	२१	शी	शि
२६०	११	यक्ये	यक्क्ये
,,	१६	न्त्र	न्त्रू
२६३	६	स्त्रा	त्वा
,,	११	शित	शितं
,,	२१	सः।	सः।मातीति मघसः
२६५	१२	ह्	ट्
२६६	१६	ड्	ट्
२६८	१४	ण्णु	र्ण्णु
२७०	१७	ध्यः	ध्य
२७६	३	दि	दिः
,,	७	त	तेः
२७९	८	सीनः	आसीनः
,,	१६	स्तेःशस्या	स्तेरा
३०४	२१	अम्यां	आभ्यां
३०७	४	या। ना	याना
३०८	१०	ऽस्य	स्य
३१०	१२	धे	ट्धे
३१७	२	दिस्तद	दिसद
३३१	१९	इन्या	इन्वा
,,	२२	णा मु	णामु
३३३	१२	सि प्र	सिप्र
,,	२०	पचा।	पचा। जरा
३३४	१९	व्य	व
३४२	७	नोव	नोसंव

✣ NOTICE ✣

PRAMÁṆANAYA-TATWÁLOKÁLANKÁRA.

The author of this book is Vádi Devasùri. It contains clear exposition of many subjects of Jain faith with reference to the philosophy of causation. There are eight chapters in this book treating of the various forms of causation. It has been printed on thick glazed art paper. Price 8 as. per copy excluding postage.

SIDHAHEM-ŚABDÁNUŚÁSANA

With a short commentary by the author and

DHÁTUPÁTHA &c.

The author of this book is the same person whose works are èagerly looked for, by many learned men with anxiousness of the bird chàtak. It is superior to the eight well-known Grammars and is the work of Śri Kalikál-Sarvajṇa Hemchandrácharyavarya who is also the author of Mahárnavanyása-brihadvritti and Dhátuparayanaprabhriti-Sapadlakshaparimita-panchangi Vyákarana. The book has been printed in large Bombay types in the well known Chandraprabhâ Press. Such persons as are distressed by the trouble caused by not understanding Grammar will be fully satisfied by studying this book; there is no doubt that the method employed by the author is very simple. It is useless to say more on the subject; those who wlli see the book will know all about it. The purchasers of a copy of this work will get a copy of Lingànuśàsana gratis. Price per copy Rs. 2 as. 8 excluding postage.

HAIM LINGÁNUSÁSANA

WITH NOTES.

There are many persons in this world who are besmeared with the mire of disgrace by ignorance of genders of words and they cannot reply to an adversary and cannot do anything. If they were to study Lingànuśàsan by Hemchandràchárya, in verse, they will be safe from such disgrace. Price per copy 5 As. only, excluding postage.

These books can be obtained from

THE MANAGER ŚRÍ YAŚOVIJAYA
JAIN PATHSHALA
ANGREZI KOTHI-*Benares City.*